I. Jayanta-Vijaya

II. Gangavatāvarana

III. Dharmā Kathasara

IV. Śringara Sarvasva
bhana

891.21
Abh/Jay
57650

00057650



Digitized with financial assistance from
Mr. S.G. Kale in memory of his Father Mr. G.V. Kale
on 10 July, 2018

Books in this volume

I Jayanta - vijaya 891.21

II Gangavatarana 891.21

III Delarama Kuttha Sara 891.21

IV Sringara : Sarvasvabhana 891.21



Px. L. 90

3164.
1941

KÂVYAMÂLÂ. 75.

THE JAYANTAVIJAYA.

OF

ABHAYADEVA.



EDITED BY

PANDIT BHAVADATTA S'ASTRÎ,

2nd Pandit, Government College, Ajmere,

Son of

MAHÂMAHOPÂDYÂYA PAṆDIT S'IVADATTA

Head Pandit and Superintendent, Sanskrit Department,

Oriental College, Lahore,

AND

KÂS'ÎNÂTH PÂṆDURANG PARAB.

57650

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ

PROPRIETOR OF JAVAJI DADAJI'S 'NIRNAYA-SAGARA' PRESS.

BOMBAY.

1902.

Price 1 *Rupee.*

ERI 891-21
Abh/Jay
57650

(Registered according to Act XXV of 1867.)

[All rights reserved by the publisher.]

काव्यमाला. ७९.

श्रीमदभयदेवविरचितं

जयन्तविजयम् ।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारककेदारनाथ-
कृपाङ्कीकृतशोधनकर्मणा
महामहोपाध्यायपण्डितशिवदत्तशर्मतनूजपण्डितभवदत्तशास्त्रिणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथशर्मणा च
संशोधितम् ।

57650
ac.

तच्च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१९०२

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपतेरेवाधिकारः ।)

मूल्यमेको रूप्यकः ।

P x. ℓ 90

576b6

अभयदेवः ।

अयं **श्वेताम्बर**जैनाचार्यः श्रीमा**नभयदेवः** कदा कतममिलामण्डलं मण्डयामासेति जिज्ञासायामनेकग्रन्थपर्यालोचने प्रवृत्ते—

'आसी**च्चन्द्र**कुलाम्बराम्बरमणिः श्री**वर्धमान**प्रभोः
पादाम्भोरुहचञ्चरीकचरितश्चारित्रिणामग्रणीः ।
सः श्रीसूरि**जिनेश्वर**स्त्रिपथगापाथःप्रवाहैरिव
स्वैरं यस्य यशोभरैस्त्रिजगतः पावित्र्यमासूत्रितम् ॥ १ ॥
अभवद्**अभयदेवः** सूरिरस्मात्स यस्य
प्रभुरभजत तोषं **स्तम्भने** पार्श्वनाथः ।

---

१. अनेनैव **समवायाङ्ग**टीका प्रण्यनायि । यथा—

'निःसंबन्धविहारिहारिचरिताञ्श्री**वर्धमाना**भिधा-
न्सूरीन्ध्यातवतोऽतितीव्रतपसो ग्रन्थप्रणीतिप्रभोः ।
श्रीमत्सूरि**जिनेश्वर**स्य जयिनो दर्पीयसां वाग्मिनां
तद्बन्धोरपि **बुद्धिसागर** इति ख्यातस्य सूरेर्भुवि ॥
शिष्येणा**भयदेवा**ख्यसूरिणा विवृतिः कृता ।
श्रीमतः **समवाया**ख्यतुर्याङ्गस्य समासतः ॥
एकादशसु शतेष्वथ विंशत्यधिकेषु (११२०=A. D. 1164) विक्रमसमानाम् ।
अणहिल्लपाटनगरे रचिता **समवाय**टीकेयम् ॥' इति ।

२. अयं हि सूरिस्त्रिंशत्तमवृत्तेन **स्तम्भनक**पार्श्वनाथं संतुतोष—

'जय तिहुअणवरकप्परुक्ख जय जिण धण्णंतरि
जय तिहुअणकल्लाणकोस दुरिअक्करिकेसरि ।
तिहुअणजण अविलङ्घियाण भुवणत्तयसामिअ
कुणसु सुहाइं जिणेसपास **थंभणयपुर**ट्ठिअ ॥ १ ॥
तइं समरन्त लहंति झत्तिवर पुत्तकलत्तहिं
धण्ण सुवण्ण हिरण्ण पुण्ण जण भुंजहि रज्जहि ।
पिक्खहि मुक्ख असंखसुक्ख तुह पासपसाइण
इय तिहुअणवरकप्परुक्ख सुक्खहि कुण महिजिण ॥ २ ॥
जरजज्जर परिजुण्ण कण्णुट्ठुट्ठ सुकुट्ठिण
चक्खुक्खीणखएण खुज्जुनिरसल्लिअ सूलिण ।

तुह जिण सरणरसायणेण लहु हुंति पुणण्णव
जय धण्णंतरिपास महवि तुहु रोगहरो भव ॥ ३ ॥
विज्जा जोइसमंततंतसिद्धिउ अपयत्तिण
भुवणब्भुअ अट्ठविह सिद्धि सिज्जइ तुह नामिण ।
तुह नामिण अपवित्तओ वि जण होइ पवित्तउ
तं तिहुअणकल्लाणकोस तुह पास निरुत्तउ ॥ ४ ॥
खुद्द पवित्तइ मंततंतजंताइं विमुत्तइ
चरथिरगरलगहुग्गखग्गरिउवग्गविगंजइ ।
दुत्थिअसत्थ अणत्थ घत्थ नित्थारइ दयकरि
दुरिअइं हरउ सुपासदेव दुरिअक्करिकेसरि ॥ ५ ॥
तुह आणाथंभेइ भीमदप्पुद्धर सुरवर
रक्खस जक्ख फणिंद विंद चोरानलजलहर ।
जलथलचारिरउद्दखुद्द पसुजोइणि जोइअ
इअ तिहुअण अविलङ्घिआण जय पास सुसामिअ ॥ ६ ॥
पत्थिअ अत्थ अणत्थहित्थभत्तिब्भरनिब्भर
रोमंचं चिअ चारुकाय किण्णरनरसुरवर ।
जसु सेवहिं कमकमलजुअल पक्खालिअकलिमलु
सो भुवणत्तयसामिपास महमद्दउ रिउबलु ॥ ७ ॥
जय जोइअमणकमलभसलभय पंजरकुंजर
तिहुअणजण आणंदचंद भुवणत्तयदिणयर ।
जय मइमेइणि वारिवाह जय जंतु पिआमह
थंभणयट्ठिअ पासनाह नाहत्तणकुणमह ॥ ८ ॥
बहु विहवण्णु अवण्णु सुण्णु वण्णिउ छप्पण्णहि
मुक्खधम्मु कामत्थकाम नर नियनियसत्थहि ।
जं जायइ बहु दरिसणत्थ बहु नाम पसिद्धउ
सो जोइ अमण कमलभसलसुह पास पवद्धउ ॥ ९ ॥
भयबिब्भल रणझणिरदसण थरहरिअ सरीरय
तरलिअ नयणविसण्णुसुण्णुगग्गिरगिरकरुणय ।
तइं सहसत्ति सरंति हुंति नरनासिअ गुरुदर
महविज्जविसज्जसइ पास भय पंजरकुंजर ॥ १० ॥
पइं पासविविअसंतनित्तपत्तंतपवित्तिय
वाहपवाहपवूढरूढ दुहदाहसुपुलइय ।

मण्णहिं मण्णुसउण्णपुण्णअप्पाणं सुरनर
इअ तिहुअण आणंदचंद जय पास जिणेसर ॥ ११ ॥

तुह कल्लाणमहेसुघंटटंकारवपिल्लिअ
वल्लरमल्लमहल्लभत्तिसुरवरगंजुल्लिअ ।
हल्लुप्फलिअ पवत्तयंति भवणेहिं महूसव
इअ तिहुअण आणंदचंद जय पास सुहुब्भव ॥ १२ ॥

निम्मल केवल किरणनियरविहुरिअ तमपहयर
दंसिअ सयलपयत्थसत्थवित्थरिअ पहाभर ।
कलिकलुसिअ जण घूअलोयलोयणह अगोयर
तिमिरइं निरुहर पासनाह भुवणत्तयदिणयर ॥ १३ ॥

तुह समरणजलवरिससित्त माणव मइ मेइणि
अवरावरसुहुमत्थबोह कंदलदल रेइणि ।
जायइ फलभरभरिय हरिय दुहदाह अणोवम
इय मइ मेइणि वारिवाह दिसिपास मइं मम ॥ १४ ॥

कय अविकल कल्लाणवल्लिउल्लूरियदुहवणुं
दाविअ सग्गपवग्गमग्ग दुग्गइगम वारणुं ।
जय जंतुहजणएणतुल्लजंजणि यहियावहु
रम्म धम्म सो जयउ पास जय जंतुपिआमहु ॥ १५ ॥

भुवणारण्णनिवासदरिअपरदरिसणदेवय
जोइणिपूअणखित्तवाल खुद्दासुर पसुवय ।
तुह उत्तट्ठ सुनट्ठ सुट्ठ अविसंठुल चिट्ठहिं
इय तिहुअणवणसिंह पास पावाइ पणासहिं ॥ १६ ॥

फणिफणफारफुरंतरयण कररंजिअनहयल
फलिणी कंदलदलतमाल निल्लुप्पलसामल ।
कमठासुर उवसग्गवग्ग संसग्ग अंगजिअ
जय पञ्चक्खजिणेस पासथंभणयपुरट्ठिअ ॥ १७ ॥

महमणतरलपमाणनेय वायाविविसंठुल
नियतणुरवि अविणयसहाव आलसविहिलंघलु ।
तुह माहप्पपमाणदेव कारुण्णपवत्तउ
इयम इमाअवहीरपासपालहिविलवंतनु ॥ १८ ॥

किंकिंकप्पिउणेयकलुणुकिंकिंवनजं पिउ
किं वनचिट्ठिउकिट्ठदेवदीणयम विलंबिउ ।

कासुनकियनिप्पल्लल्लुअल्होहिं दुहत्तइं
तह विनपत्तउताण किंपि पइं पहु परिचत्तइं ॥ १९ ॥
तुहुं सामिह तुहुं माय बप्प तुहुं मित्तपियं कुरु
तुहुं गइ तुहुं मइ तुंहिज ताण तुहुं गुरु खेमं कुरु ।
हउं दुहमरभारिअबराउ रानुलनिब्भग्गनु
लीणउ तुह कमकमल सरणजिणपालहि चंगउ ॥ २० ॥
पइं किवि कयनीरोयलोय किवि पावियसुहसय
किवि मइं मंतमहंत केवि किवि साहियसिवपय ।
किवि गंजिअरिउवग्ग केवि जसधवलिअ भूअल
मइं अवहीरहि केणपाससरणागयवच्छल ॥ २१ ॥
पञ्चुवयारनिरीहनाहनिप्पण्ण पयोअण
तुहुं जिण पासपरोवयार करुणिक्कपरायण ।
सत्तुमित्तसमचित्त वित्तिनयनिन्दअसममण
मा अवहीरिअ जुग्गओ वि मइं पास निरंजण ॥ २२ ॥
हउं बहुविहदुहतत्तगत्त तहुं दुहनासणपरु
हउं सुयणहकरुणिक्कठाण तुहुं निरुकरुणा कुरु ।
अहुं जिणपासअसामिसालु तुहुं तिहुअणसामिअ
जं अवहीरहि मइं झखंतइय पासनसोहिअ ॥ २३ ॥
जुग्गाजुग्गविभागनाहनहुजोअणतुहसम
भवणुवयारसुहावभाव करुणारससत्तम ।
समविसमह किं घणनएइ भुवि दाहुसमंतउ
इय दुहबंधवपासनाह मइं पालथुणं तउ ॥ २४ ॥
नयदीणहदीणयमुएवि अण्णवि किवि जुग्गय
जं जोइय उवयारु करइ उवयारसमुज्जय ।
दीणहदीणनिहीणजेणतुहनाहिणचत्तउ
तो जुग्गउ अहमेव पास पालहि मइं चंगउ ॥ २५ ॥
अह अण्णवि जुग्गयविसेस किवि मण्णहि दीणह
जं पासवि उवया रुकरइ तुह नाह समग्गह ।
.....
किं अण्णंण तं चेव देव मामइं अवहीरह ॥ २६ ॥
तुह पत्थण नहु होइ विहल जिणजाणउ किं पुण
हउ दुक्खिउ निरुसत्तचत्तदुक्कदु उस्सुयमण ।
तं मण्णउ निमिसेण एण एउ विज्जइ लब्भइ
सच्चं जं भुक्खियवसेण किं उंवरु पच्चइ ॥ २७ ॥

प्रकटितविकटार्थां सङ्घसाम्राज्यवृद्ध्यै
व्यधित निधिसमानां यश्च वृत्तिं **नवाङ्गया**ः ॥ २ ॥

तिहुअणसामिह पासनाह मइं अप्पपयासिउ
किज्जउ जं नियरूवसरिसुनमुणुंवहुं जं पिउ ।
अण्णु ण जिणजगतुहसमोविदक्खिण्णदयासउ
जइ अवगण्णसि तुं हिज अहह किं होइ सह यासनु ॥ २८ ॥
जइ तुह रूविण किणविपेअ पाइणवेलंविउ
तनु जाणुं जिण पास तुम्ह होउं अंगिकरिउ ।
इअमह इच्छिअ जं न होइ सातुहओहावण
रक्खंतह नियकित्तिणेय जुज्जइ अवहीरण ॥ २९ ॥
एवमहारिहजत्तदेव इयन्हवणमहूसउ
जं अणलिय गुणगहण तुम्ह मुणिजणअणिसिद्धिउ ।
इय मइं पसिय सुपासनाह **थंभणपुर**संट्ठिअ
इय मुणिवर सिरि**अभयदेव** विण्णवइ अणिंदिअ ॥ ३० ॥' इति ।

१. '**चान्द्रे** कुले सद्वनकक्षकल्पे महाद्रुमो धर्मफलप्रदानात् ।
छायान्वितः शस्तविशालशाखः श्री**वर्धमानो** मुनिनायकोऽभूत् ॥
तत्पुष्पकल्पौ विलसद्विहारसद्गन्धसंपूर्णदिशौ समन्तात् ।
बभूवतुः शिष्यवरावनी च वृत्ती श्रुतज्ञानपरागवन्तौ ॥
एकस्तयोः सूरिवरो **जिनेश्वर**ः ख्यातस्तथान्यो भुवि **बुद्धिसागर**ः ।
तयोर्विनेयेन विबुद्धिनाप्यलं वृत्तिः कृतै**षाभयदेव**सूरिणा ॥
तयोरेव विनेयानां तत्पदं चानुकुर्वताम् ।
श्रीमतां **जिनचन्द्रा**ख्यसत्प्रभूणां नियोगतः ॥
श्रीम**ज्जिनेश्वरा**चार्यशिष्याणां गुणशालिनाम् ।
जिनभद्रमुनीन्द्राणामस्माकं चाङ्घ्रिसेविनः ॥
यशश्चन्द्रगणेर्गाढसाहाय्यात्सिद्धिमागता ।
परित्यक्तान्यकृत्यस्य युक्तायुक्तविवेकिनः ॥
शास्त्रार्थनिर्णयसुसौरभलम्पटस्य विद्वन्मधुव्रतगणस्य सदैव सेव्यः ।
श्री**निर्वृता**ख्यकुलसन्नदपद्मकल्पः श्री**द्रोणसूरि**रनवद्ययशःपरागः ॥
शोधितवान्वृत्तिमिमां युक्तो विदुषां समूहेन ।
शास्त्रार्थनिष्कनिकषणकषपट्टककल्पबुद्धीनाम् ॥
विशोधिता तावदियं सुधीभिस्तथापि दोषाः किल संभवन्ति ।
मन्मोहतस्तांश्च विहाय सद्भिस्तद्ग्राह्यमाप्ताभिमतं यदस्याम् ॥

तच्छिष्यो **जिनवल्लभः** प्रभुरभूद्विश्वंभराभामिनी-
भास्वद्भाललसामकोमलयशःस्तोमः शमारामभूः ।
यस्य श्री**नरवर्म**भूपतिशिरःकोटीररत्नाङ्कुर-
ज्योतिर्जालजलैरपुष्यत सदा पादारविन्दद्वयी ॥ ३ ॥

काश्मीरानपहाय संततहिमव्यासङ्गवैराग्यतः
प्रोन्मीलद्गुणसंपदा परिचिते यस्यास्यपङ्केरुहे ।
सान्द्रामोदतरङ्गिता भगवती वाग्देवता तस्थुषी
धारालामलभव्यकाव्यरचनाव्याजादनृत्यच्चिरम् ॥ ४ ॥

भृङ्गस्तदङ्घ्रिकमले **जिनशेखराह्वः** सूरिस्ततः प्रशमवर्मितकाययष्टिः ।
जिग्ये जगत्त्रयजयप्रयतोऽपि येन वीरव्रतं कलयता रतिजीवितेशः ॥ ५ ॥

वैराग्यं याति रागे भजति विधुरतां क्रोधयोधे विमाने
माने नष्टाभिमाने कपटपटुभटे क्षोभमाप्ते च लोभे ।
पञ्चेषौ कुञ्चितेषौ समिति निजमिति प्रेक्ष्य सैन्यं सदीन्यं
मुक्त्वा येषां जयाशां निभृतमपसृतं मोहराजेन दूरम् ॥ ६ ॥

प्रगुणितकरुणः क्षमया विराजितश्चारुविग्रहस्तदनु ।
अजनि वशीकृतविषयग्रामः **पद्मेन्दुमुनिराजः** ॥ ७ ॥

उत्फुल्लमल्लीप्रतिमल्लकान्तिः कीर्तिर्भ्रमन्ती भुवनेषु यस्य ।
श्रिया समं सौहृदकाङ्क्षयैव मुष्णाति विष्णोरपि कृष्णभावम् ॥ ८ ॥

विश्वत्रयप्रथितकीर्तिलतस्य तस्य शिष्यः प्रशस्यमहि**माभयदेव**सूरिः ।
काव्यं **जयन्तविजयं** रचयांचकार सारस्वतप्रसृमरप्रतिभाविलासः ॥ ९ ॥

यदवाप्तं मया पुण्यं वृत्ताविह शुभाशयात् ।
मोहाद्वृत्तिजमन्यच्च तेनागो मे विशुद्ध्यताम् ॥
प्रथमादर्शे लिखिता **विमलगणि**प्रभृतिभिर्निजविनेयैः ।
कुर्वद्भिः श्रुतभक्तिं दक्षैरधिकैर्विनीतैश्च ॥
अस्याः कारणव्याख्या श्रुतिलेखनपूजनादिषु यथार्हम् ।
दायिकसुत**माणिक्यः** प्रेरितवानस्मदादिजनान् ॥
अष्टाविंशतियुक्ते वर्षसहस्रे शतेन चाभ्यधिके (११२८=A. D. 1072) ।
अणहिलपाटनगरे कृतेयमच्छुप्तधनिवसतौ ॥' इति ।

अयं **नवाङ्ग**वृत्तिकृद**भयदेवसूरि**र्वैक्रमे ११३५ (A. D. 1079) वत्सरे कीर्तिशेषतां गत इति **प्रबन्धचिन्तामणि**प्रस्तावनैकादशपृष्ठे **दीनानाथात्मज**रामचन्द्रशास्त्री ।

दिक्करिकुलगिरिदिनकर(१२७८)परिमितविक्रमनरेश्वरसमायाम् ।
द्वाविंशतिशतमानं शास्त्रमिदं निर्मितं जयतु ॥ १० ॥'

इत्यभयदेवाचार्यप्रणीतजयन्तविजयीयकविप्रशस्तिपद्यदर्शनतो **नवाङ्गवृत्तिकृ-भयदेवा**चार्यसूरिशिष्यसंताने चतुर्थपट्टधारी श्रीमान**भयदेव**सूरिर्वैक्रमे १२७८ (A. D. 1221) शरदि एनं ग्रन्थं प्रकटयन् कृतममिलामण्डलं मण्डयामासेति न निश्चीयते। एतेनास्य कविवरस्य स्त्रिस्तत्रयोदशशतिकापूर्वार्धे सत्तासमय इति बाढमवगन्तव्यम् ।

अस्य हि ग्रन्थस्यैकमेव पुस्तकं श्रीयुत-**श्रावक-हीरालाल-हंसराज**-प्रबन्ध-द्वारोपलब्धम्, तस्यैकस्याधारेण शोधितमुद्रितेऽप्यस्मिन्ग्रन्थे यत्र कुहचनाशुद्धिः स्थिता जाता वा भवेत्तत्र सुहृदयहृदयाः संशोधयन्तु । यतः—

गच्छतः स्खलनं वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

इति प्रार्थयतः—

पण्डित-शिवदत्त-काशीनाथौ ।

काव्यमाला।

श्रीमदभयदेवविरचितं

जयन्तविजयम्।

प्रथमः सर्गः।

श्रेयांसि विश्राणयतादजस्रं नाभेयदेवस्य पदाम्बुजं वः।
समस्तसंपन्मधुबद्धरागा यत्र त्रिलोकी भ्रमरीव भाति ॥ १ ॥
शश्वच्चतुर्वर्गफलैः फलन्ती कल्पद्रुमस्यापि यदङ्घ्रिभक्तिः।
सौभाग्यभङ्गीमधरीकरोति शान्तिं स वः शान्तजिनस्तनोतु ॥ २ ॥
स्वच्छायया छन्नजगत्त्रयायाः कीर्तेर्लताया इव भाति कन्दः।
यस्याङ्कशङ्खः स विशेषतोषतोषाय भूयाद्यदुपुंगवो वः ॥ ३ ॥
आशासहस्रं परिपूरयन्त्या मूर्त्या पराभूततरेव कीर्तिः।
यस्य प्रभोर्दूरतरं जगाम क्षेमाय वामेयजिनः स वोऽस्तु ॥ ४ ॥
नखावली यस्य पदोर्विनम्रस्वस्त्रैणनेत्रप्रतिबिम्बभङ्ग्या।
पूजां व्यनक्तीव सरोजपत्रैः स त्रैशलेयस्त्रिजगत्पुनातु ॥ ५ ॥
यस्याङ्घ्रिसेवारसपारवश्यं कुलं विभूतेर्भुवनाद्भुतायाः।
क्षीरार्णवस्येव पयः सुधायाः पुनातु सोऽन्योऽपि जिनेशवर्यः ॥ ६ ॥
निर्नि(र्णि)क्तमुक्तामणिमञ्जुकर्णताटङ्कयुग्मं विरराज यस्याः।
आस्यश्रियं लुभ्यदिवोडुचारुचन्द्रद्वयं पातु सरस्वती सा ॥ ७ ॥
प्रसृत्वरामोदगुणप्रबोधं दिशन्ति शिष्यप्रकराम्बुजानाम्।
ये स्पर्धयेवाम्बुजिनीप्रियस्य जयन्तु ते मे गुरवो मुनीन्द्राः ॥ ८ ॥
महाकवीनामपि नव्यकाव्ये दोषः कदाचित्किल संभविष्णुः।
प्रमादनिद्रोदयमुद्रया हि क्रोडीक्रियन्ते सुधियां धियोऽपि ॥ ९ ॥

तद्दोषशङ्कापगमाय काव्ये निजे कृतीशः सुजनो नियोज्य ।
तदीयसंवादवशंवदं हि स्वकाव्यसौन्दर्यविशेषधैर्यम् ॥ १० ॥
आमोदितं यस्य जगद्वरेण्यसौजन्यपुष्पामितसौरभेण ।
स्वस्त्यस्तु तस्मै सुजनाय जाग्रत्सर्वान्यदोषाग्रहणाग्रहाय ॥ ११ ॥
अभ्यर्थितः सोऽपि यशोविलासलास्याय काव्यस्य धुनोति दोषम् ।
समुद्धरत्येव हि वैद्यराजः शल्यं तनोः सौख्यकृते कृतार्थः ॥ १२ ॥
उद्भासयत्यात्मविरूपशब्दैर्यो दुर्जनः काव्यगृहं निविश्य ।
उलूकपक्षीव स दूर एव दोषैकदृष्टिर्विबुधैर्विधेयः ॥ १३ ॥
न दुर्जनस्यानुनयो गुणाय स्वभावदौर्जन्यमलीमसस्य ।
सुगन्धिलक्षैरपि किं सुगन्धीकर्तुं हि शक्यं लशुनं कदापि ॥ १४ ॥
भवेयमस्यापि कृताञ्जलिर्वा यत्काव्यदोषग्रहणोग्रशङ्का ।
सा कापि यस्यास्त्वरितप्रयत्नो यशस्विकाव्याय कवेर्भविष्णुः ॥ १५ ॥
देव्या गिरां लास्यकलाविलासे रसानुगाः कान्तपदप्रबन्धाः ।
भवन्ति चक्रेषु महाकवीनां चित्रं तु सर्वत्र कृतप्रचाराः ॥ १६ ॥
जयन्ति ते सत्कवयो यदुक्त्या बाला अपि स्युः कविताप्रवीणाः ।
श्रीखण्डवासेन कृताधिवासाः श्रीखण्डतां यान्त्यपरेऽपि वृक्षाः ॥ १७ ॥
जयन्तु सर्वेऽपि कवीश्वरास्ते यदीयसत्काव्यसुधाप्रवाहः ।
विकूणिताक्षेण सुहृज्जनेन निपीयमानोऽप्यतिपुष्यतीव ॥ १८ ॥
धर्मार्थकामाः प्रथिताः समोक्षाश्चत्वार एते खलु पूरुषार्थाः ।
चतुर्भुजस्येव भुजा न कस्य विशेषभद्रप्रसरत्प्रमोदाः ॥ १९ ॥
तत्रार्थकामद्वयमैहिकार्थं भवोद्भवत्वेन सतां मतं न ।
जैनस्तु धर्मो हृदि जागरूकः स्यादैहिकामुष्मिकसौख्यहेतुः ॥ २० ॥
कल्पद्रुमाणामिव नन्दनोर्वी वनस्पतीनामिव वारि दाम्भः ।
महाविभूतेरिव कामधेनुर्लावण्यनद्या इव यौवनाद्रिः ॥ २१ ॥
भवोचितानामिव कर्मणां श्रीः कुन्दाभकीर्तेरिव भूरि दानम् ।
संतोषलीलेव मनःसुखानां सुधारसानामिव दुग्धसिन्धुः ॥ २२ ॥

अनन्यसाधारणराज्यमुख्यख्यातश्रियां पूर्णमनोरथानाम् ।
सिद्धाङ्गनासंगमशर्मणां च निबन्धनं श्रीजिनधर्मकर्म ॥ २३ ॥
(त्रिभिर्विशेषकम्)
एतत्प्रभावप्रथितं त्रिलोकीहृद्यत्रिवर्गानुपमप्रकर्षम् ।
वीरव्रतालंकरणं चरित्रं श्रीमज्जयन्तस्य नृपस्य वक्ष्ये ॥ २४ ॥
मध्येऽखिलद्वीपसमुद्रसौधं चञ्चत्सुवर्णाद्रिशिखावतंसः ।
दीपप्रदीपप्रतिमोऽस्ति जम्बूद्वीपः सदालोकविलासलक्ष्मीः ॥ २५ ॥
तस्यावतंसे भरताभिधाने क्षेत्रेऽस्ति देशो मगधाभिधानः ।
कल्याणवृन्दै रुचिराङ्गहारैरिवानिश नृत्यति यत्र लक्ष्मीः ॥ २६ ॥
यत्रत्यकान्तानयनोत्पलश्रीनिरस्तशोभान्यसितोत्पलानि ।
इतीव तापात्सरसां जलेषु लुलन्ति मन्दानिलशीतलेषु ॥ २७ ॥
यत्राद्भुतैर्नूतनधान्यकूटैः परःसहस्रैर्नगराणि भान्ति ।
सुभिक्षराजस्य सदैव काले शैलैरिवोत्तुङ्गतयाभिरामैः ॥ २८ ॥
सर्वत्र सौराज्यबलेन यत्र प्राज्याः प्रजाध्वस्तसमस्तशङ्काः ।
शृङ्गारयन्त्युत्तमदानभोगैः स्वसंपदः पुण्ययशोनिनादैः ॥ २९ ॥
सरोवरैर्यत्र भुवो विभान्ति सरोवराणि स्मितपद्मखण्डैः ।
तैः पद्मखण्डानि च राजहंसैः स्वै राजहंसाः सुगतिप्रचारैः ॥ ३० ॥
हस्तैरिवोच्चैस्तरवः पलाशैश्छायां दधानाः फलसंपदा च ।
पथ्यङ्गिनां पथ्यदनाय यत्र स्वबन्धुबुद्ध्येव भवन्ति भूयः ॥ ३१ ॥
निजैर्गुणैः स्मारितकामधेनुव्रजा व्रजा यत्र गवां विभान्ति ।
स्वादिष्टदुग्धेन मुधा सुधापि यासां महिष्यश्च मनोहरास्ताः ॥ ३२ ॥
संसारचक्रस्य चकास्ति सारः पद्माकरः शर्मसरोरुहस्य ।
विश्रामभूमी रमणीयताया यः संपदामास्पदमद्भुतानाम् ॥ ३३ ॥
अनीतिशालीन्यपि संश्रयन्ते सस्यानि शश्वत्परमां समृद्धिम् ।
जडाधिवासान्यपि यत्र चित्रं पद्मानि मित्राभिमुखीभवन्ति ॥ ३४ ॥
यस्मिन्ननुग्रामपुरं वधूनां विशुद्धशीलाभरणाग्रिमाणाम् ।
सर्वाङ्गलावण्यमलंकरोति सुवर्णरत्नोत्तमभूषणानि ॥ ३५ ॥

पदे पदे यत्र विचित्रवाप्यः प्रसन्नरूपाश्च विभान्ति कूपाः ।
ज्योत्स्नासपत्नेन जलेन पूर्णा माधुर्यदीक्षागुरुणा सुधायाः ॥ ३६ ॥
प्रीतिं परां यत्र नयन्ति लोकं सरांसि चेतांसि च सज्जनानाम् ।
अदृष्टपर्यन्ततया श्रितानि गम्भीरतान्यकृतवारिधीनि ॥ ३७ ॥
यत्राभिरामाणि विशालशालिक्षेत्राणि संरक्षितुमीयुषीणाम् ।
गोपाङ्गनानां मधुरोपगीतैः कृच्छ्राद्युवानः पथि यान्ति पान्थाः ॥ ३८ ॥
विजिष्णुभिर्विष्णुपदीं नदीभिर्वनैः श्रिया हेपितनन्दनैश्च ।
शैलैः सुवर्णाचलदत्तहीलैर्यः स्वर्गभाजामपि सेवनीयः ॥ ३९ ॥
श्रियामनन्यत्र निवासिनीनामन्योन्यमत्यन्तदिदृक्षयेव ।
यः संगतैर्भाति पुरैः समन्तादाश्चर्यचर्यानिलयैः परीतः ॥ ४० ॥
भोगावतीं भोगिपतिः सुरेन्द्रोऽमरावतीं प्रत्यधिकानुरागम् ।
मुमोच चारुत्वमवेक्ष्य यस्याः सा तत्र नाम्नास्ति पुरी जयन्ती ॥ ४१ ॥
रम्याणि हर्म्याणि सुवर्णरत्नमयानि यस्यां बहुभूमिभाञ्जि ।
येषां पुरःस्वर्गविमानलक्ष्मीः सूर्यप्रभाचुम्बितचन्द्रिकेव ॥ ४२ ॥
पौरा महेशाः प्रचुराः कुमारा गौर्यः स्त्रियोऽप्यत्र विनायकाश्च ।
इतीव कैलाशनगोऽनुरागादावृत्य यां शालमिषेण तस्थौ ॥ ४३ ॥
अर्कांशुसंपर्कविनिर्यदग्निज्वालारुणःस्फाटिकरत्नसालः ।
स्वराजराजत्प्रबलानुरागैरालिङ्गितात्मेव विभाति यत्र ॥ ४४ ॥
रम्यावधित्वेन यदीयसालविद्याधरीषु स्थितिमीयुषीभिः ।
विद्याधरीभिर्निशि धर्तुमीहांचक्रे करे कन्दुकलीलयेन्दुः ॥ ४५ ॥
समुन्नतं कान्तमिवाम्बुजाक्षीप्राकारमुच्चैः सरसीकरोति ।
विराजिलीलालहरीकटाक्षैर्मुक्तावलक्षैः परिखा यदीया ॥ ४६ ॥
लक्ष्म्याः स्वपुत्र्याः सततं वसन्त्याः क्षीरार्णवो यत्र दिदृक्षयेव ।
स्नेहातिरेकात्समुपेत्य तस्थौ सुधानिभाम्भःपरिखामिषेण ॥ ४७ ॥
रम्भेव कृष्णामितकान्तमूर्तिः पणाङ्गनाली सविलासलास्या ।
विभाति यस्यां सुरमन्दिरेषु विस्मारितस्वःपुरकौतुकेषु ॥ ४८ ॥

नेत्रैः सरोजैरिव राजमाना लावण्यपूरैरमृतैरिवोच्चैः ।
कुचैश्च चक्रैरिव सद्विलासैर्यत्रत्यरामाः स्मरकेलिवाप्यः ॥ ४९ ॥
उद्यानवापीषु जलाशयत्वं द्विजाश्रयेषु प्रियविप्रयोगः ।
विलोक्यते राजकरोपमर्दः पद्माकरेष्वेव न यत्र लोके ॥ ५० ॥
जिनेन्द्रहर्म्योपरि शातकुम्भकुम्भावलीषु प्रतिबिम्बितात्मा ।
अनेकमूर्तिः प्रतिभाति भानुर्यस्याः श्रियं द्रष्टुमिवावतीर्णः ॥ ५१ ॥
कस्तूरिकास्थासकवर्णभाजां व्याजेन जैनेन्द्रगृहध्वजानाम् ।
या दत्तपत्रेव समस्त·····श्रियं पुरीणामुपरि स्वऋद्ध्या ॥ ५२ ॥
भूयिष्ठमुक्तामणिहेमतारैः कर्पूरपूरैर्मृगनाभिपुञ्जैः ।
दिव्यांशुकाद्यैः कलिता पणाली तदाकराकारधरेव यत्र ॥ ५३ ॥
सुरेशवेषाभरणाङ्गरागवरेण लावण्यतरङ्गिताङ्गः ।
निमेषमात्रेण परं सुरेभ्यो विभिद्यते यत्र जनः समस्तः ॥ ५४ ॥
सचेतनाचेतनचारुभावैरेषैव रेषां(खां) लभते पुरीषु ।
इति स्म वृद्धा बहुदेशभाजो वदन्ति यस्यामसमाद्भुतायाम् ॥ ५५ ॥
कोटिध्वजाग्रैः प्रतिबिम्बितैश्च हर्म्यावलीनां मणिकुट्टिमानि ।
कृतास्पदानीव विभान्ति यस्यां निधानरक्षाभुजगैः स्फुरद्भिः ॥ ५६ ॥
उद्यानलक्ष्मीमधिकप्रकर्षामसंख्यभेदैः सुमनोद्रुमाणाम् ।
विलोक्य यत्र द्युपतिर्बभूव मन्दादरः श्रीमति नन्दनेऽपि ॥ ५७ ॥
तस्यां बभूवाद्भुतविक्रमश्रीः क्षोणीपतिर्विक्रमसिंहसंज्ञः ।
विश्वंभराभारभरं बभार यो विश्रुताशेषगुणोऽपि चित्रम् ॥ ५८ ॥
राजन्वती येन जगत्यजस्रं निजाः प्रजाः पालयता नयेन ।
स्वर्भूरिवेन्द्रेण गुरुप्रशस्यमन्त्रीशमन्त्रेण सुरोचितेन ॥ ५९ ॥
यः कामिनीनां प्रतिभाति कामः पितेव च प्रीतिपदं प्रजानाम् ।
कालः करालो रिपुभूपतीनां कल्पद्रुमश्च प्रणयिव्रजानाम् ॥ ६० ॥
यस्याहवे वैरिकरीन्द्रकुम्भस्थलीगलत्तारकरम्बिताङ्गः ।
रेजे कृपाणोऽरिकुलं जिगीषोर्यमस्य जिह्वेव सदन्तपङ्क्तिः ॥ ६१ ॥

यस्यासिलूना चिरराजजन्यक्षेत्रेषु वैरिद्विपदन्तपङ्क्तिः ।
कीलालसिक्तेषु यशस्तरूणामुद्गच्छतामङ्कुरमालिकेव ॥ ६२ ॥
स्वैराज्यसर्वस्वसुवर्णरत्नहस्त्यश्वदण्डै रिपुमण्डलीभिः ।
मूर्त्तैः प्रतापैरिव ढौक्यमानैर्यः स्वैरविस्तारिगुरुप्रभावः ॥ ६३ ॥
न मार्गणाः केचिदलब्धलक्ष्यां रणेषु दानेषु च यस्य जग्मुः ।
अपूरिताशा न यशोविलासा वरेण्यपुण्योदयकेलयश्च ॥ ६४ ॥
जितेन्द्रियस्योन्नतयौवनेऽपि स्थैर्येण धैर्येण कृतास्पदस्य ।
भूवल्लरीदास्यमतिप्रशस्यं यस्य श्रियः शिश्रियुरश्रमेण ॥ ६५ ॥
शचीव शक्रस्य महेश्वरस्य गौरीव लक्ष्मीरिव माधवस्य ।
श्रीनन्दनस्येव रतिश्च रत्यै तस्य प्रिया प्रीतिमती बभूव ॥ ६६ ॥
पीयूषभानोर्दलसंचयेन चेङ्गं[1] यदीयाङ्गमसार्जि धात्रा ।
आनन्दकं लोचनकैरवाणां प्रकामसंतापहरं च येन ॥ ६७ ॥
उल्लासिलावण्यसुधातरङ्गैरङ्गैरनङ्गः सरसैर्यदीयैः ।
चित्रीयते स्त्रैणगुणैस्त्रिलोकीलोकश्च लोकोत्तरकीर्तिकारैः ॥ ६८ ॥
संजीविनी चौषधिरङ्गजस्य विश्रामधामेव हृदः स्वभर्तुः ।
या राज्यऋद्धेरधिदेवतेव लावण्यवल्लेर्नवकन्दलीव ॥ ६९ ॥
रूपेण शीलेन धिया ह्रिया च दाक्ष्येण दाक्षिण्यगुणेन नीत्या ।
प्रीत्या गिरा कोमलया यया च ज्योत्स्नायितं पत्यनुरागसिन्धौ ॥७०॥
मन्त्री हरेर्जीव इवास्य जज्ञे सौधर्मसाम्राज्यमलंकरिष्णुः ।
सुबुद्धिनामा विबुधप्रमोदक्षीरार्णवार्णः क्षणदाभुजङ्गः ॥ ७१ ॥
यस्य क्षोणिपतेः प्रतापदहनज्वालावलीकेलिभिः
सप्ताप्यम्बुधयोऽम्बुबिन्दव इवाशोष्यन्त तेऽपि द्रुतम् ।
पूर्यन्ते स्म हतारिराजकवधूनेत्राम्बुपूरैः पुनः
स श्रीप्रीतिमतीं प्रियामिव मि(म)हाभोगामभुङ्क्त क्षमाम् ॥ ७२ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये शब्दाङ्के प्रस्तावनादिनिरूपणो नाम प्रथमः सर्गः ।

---

१. शोभनमित्यर्थः.

द्वितीयः सर्गः ।

अथ स्वसौधोपरि सा नृपप्रिया ददर्श हर्म्यान्तररत्नकुट्टिमे ।
हृदीभ्यकान्तां दधतीं निजाङ्गजं सुधामिव स्पर्शमिषेण वर्षुकम् ॥ १ ॥
नभस्थलीव द्युतिमद्विना कृता निशेव शीतद्युतिमण्डलोज्झिता ।
महौषधीवोन्मदवीर्यवर्जिता न सूनुहीना वनिता प्रशास्यते ॥ २ ॥
परप्रकर्षाञ्चितहर्षवर्षिणे सुताय वध्वः सकलाः समुत्सुकाः ।
यदस्य जन्मोत्सवऋद्धिदर्शनैर्भवन्ति सद्यः सुखनिर्मिता इव ॥ ३ ॥
परां जनन्या जनयत्यनारतं महाकुलीनस्तनयो नयाञ्चितः ।
महर्धतामेधयते गुणश्रियो न किं यशोराशिरदम्भसौरभः ॥ ४ ॥
सुनिश्चितं भूमिपतेरपि प्रिया यदा भवेदङ्कनिवेशिनन्दना ।
तटी सुमेरोरिव सर्वदा तदा भजेदहो सर्वसुपर्वसंगमम् ॥ ५ ॥
दुरन्तवन्ध्यात्वनिवृत्तिचिन्तया क्व सौख्यगन्धोऽपि धरेन्द्रसुभ्रुवाम् ।
कुमुद्वतीनां विभया विभा विभोर्विकाससौख्यं हि न जातु वल्गति ॥ ६ ॥
किमन्यदाप्नोत्यतिगौरवं वि(व)धूः प्रियस्य पुत्रैः खलु वृत्तशालिभिः ।
महार्घ्यतां रत्नखनी न किं भजेन्मणिप्रकाण्डैरिति सा व्यचिन्तयत् ॥ ७ ॥
समुत्सुका नन्दनजन्मने जगज्जनप्रमोदाङ्कुरनव्यवृष्टये ।
तदर्थवाञ्छाज्वरवेगदुर्बला बि(व्य)लोक्यथ क्षोणिभृता भृतार्तिना ॥ ८ ॥

(पञ्चभिः कुलकम्)

स भूभुजङ्गः समपृच्छतादृतः कृशोदरीयं कृशता कुतस्तव ।
विशेषशोका(षा) सरसीव मीनकं करोति या मां खलु खेदभाजनम् ॥ ९ ॥
पयोदवाताहतदर्पणस्य किं दधाति सादृश्यमिदं मुखाम्बुजम् ।
किमिन्दुबिम्बद्युति गोचरीभवत्सहस्रपत्राकृतिनी तवेक्षणे ॥ १० ॥
अमत्सरे मत्स्यवधूर्महातपस्थलस्थितेवासि किमाकुला प्रिये ।
कथं कुतोऽप्याहितदुःखशून्यता प्रयातविद्येव च खेचरप्रिया ॥ ११ ॥
अनेकधा व्याधिविबाधितेव किमाधिसंबन्धविधूतधीरसि ।
न पूर्यते कोऽपि मनोरथस्ते मयि स्थिते सुभ्रु निदेशवर्तिनि ॥ १२ ॥

मयाप्यखण्ड्यं तव देवि खण्डितं वचः किमाहूत(?) यमेन केनचित् ।
दुनोति किं स्वमकृतोऽपि मानसं प्रिये सपत्नीजनितः पराभवः ॥ १३ ॥
अकोपने किं मयि कोप एष ते तनोति यः प्राणितसंशयं मम ।
असौमनस्ये किमपीह कारणं द्रुतं प्रिये ब्रूहि यदाकुलोऽस्म्यहम् ॥ १४ ॥
दिवापि सा शारदचन्द्रचन्द्रिका भ्रमं दधाना दशनांशुभिस्ततः ।
इति स्वदुःखं नृपतेर्व्यजिज्ञपद्विषग्वरस्येव रुजं रुजातुरः ॥ १५ ॥
न देवपूर्वोदितदुःखदुर्दशालवोऽपि लब्धावसरस्तनौ मम ।
तव प्रसादेन दिनेश्वरोदये नभस्तले वा क्व तमिस्रसंभवः ॥ १६ ॥
सुखैरशेषैः सुखिनीषु मुख्यता ममेश शच्या अपि चित्तहारिणी ।
प्रसादतस्ते किमपूर्णमस्ति मे सुतं विना त्वेतदरुंतुदं हृदः ॥ १७ ॥
कृती निराकर्तुमिदं तु लाञ्छनं त्वमेव मे दुःसहसाहसप्रिय ।
निमेषमुक्तां कुरुते हि पद्मिनीं न पद्मबन्धोरपरः कदाचन ॥ १८ ॥
वसुंधरोद्धारधुरंधरेण मां विधेह्युपायेन सुतेन भूषिताम् ।
स्वदोहदेनेव लतां फलाञ्चितामिदं हि सारं किल सर्वसंपदाम् ॥ १९ ॥
इति प्रियाया वचनेन भूपतेर्मनोन्तरे दाव इवानिलाद्वने ।
अपुत्रता दुःखमवर्धताधिकं चकार चिन्तां स ततस्तदिच्छया ॥ २० ॥
विना विनीतेन सुतेन गेहिनां कुलं गृहं शून्यमनूनदुःखदम् ।
क्रमेण नश्यन्ति च सर्वसंपदः स्थिरं निरालम्बमहो न किंचन ॥ २१ ॥
अनन्यसाधारणवैभवोद्भवैः सुखैः सदा दुर्ललितोऽपि मानवः ।
अपुत्रजन्मप्रभवाभिबाधितो न कोटराग्निर्विटपीव नन्दति ॥ २२ ॥
वरं दरिद्रोऽपि सनन्दनो जनस्तदीक्षणानन्दतरङ्गिलोचनः ।
न शक्तुतुल्योऽपि समृद्धिभिः परः पराङ्मुखत्वेन विधेरनात्मजः ॥ २३ ॥
जनेऽप्यपुत्रस्य गतिर्न विद्यते क्षयं प्रयाति क्रमशश्च कीर्तनम् ।
इति प्रवादः खलु दुःसहः सतामपुत्रिणां भूप विलोप्य संपदाम् ॥ २४ ॥
इतोऽतिदुःखात्प्रगुणं भवान्तरस्थितौ प्रियायाः खलु भावि जीवितम् ।
ममासुभिः सार्धमतः सुतेच्छया कमप्यवन्ध्यं विदधेऽद्य साहसम् ॥ २५ ॥

समुद्रपर्यन्तमहीमहीपतिः कृतावहित्थक्षणमुल्बणोद्यमः(?) ।
गिरा समाश्वासयदात्मवल्लभां कुमुद्वतीं चन्द्रिकयेव चन्द्रमाः ॥ २६ ॥
भवन्ति पुण्योदयतः कदाचन स्ववाञ्छितानि द्रुतमेव देहिनः ।
उपायतो वा स्वकुलाधिदेवतामतः समाराधय भूरिभक्तिभिः ॥ २७ ॥
अनेकशोऽभीष्टफलप्रदायिनी विलोकिता निर्मलभक्तितस्तथा ।
कुलस्य नः कल्पलतेयमर्चिता मनोरथं ते सफलं करिष्यति ॥ २८ ॥
प्रियप्रियालापसुधारसोर्मिभिर्निरस्तसंतापभरा बभूव सा ।
तथैव सर्वं विदधे प्रियं वचः प्रियोपदिष्टं तनुते हि नात्र कः ॥ २९ ॥
दिवेन्दुबिम्बद्युति गण्डमण्डलं स्ववामहस्त(स्ते) दधती परे दिने ।
नृपेण पृष्टाकथयत्तदर्चनां सुधास्य विद्यामिव बीजवर्जिताम् ॥ ३० ॥
निवेश्य संदेहपदेऽपि जीवितं प्रिये प्रियं ते त्वरितं करोत्यदः ।
न चेज्जनोऽयं ज्वलने प्रवेशतः पतङ्गतां याति तदा विनिश्चितम् ॥३१॥
इति प्रतिज्ञावचनादमुष्य सा मुमूर्छ वज्राभिहतेव तत्क्षणम् ।
पपात च च्छिन्नलतेव भूतले किमद्भुतं प्रेमवतामिदं हि वा ॥ ३२ ॥
अथेतिकर्तव्यतयाकुलात्मना निजप्रियेणाङ्गगताभ्यषेचि सा ।
समूर्तिभिः प्रेमरसैरिवाश्रुभिस्ततः परं चन्दनशीतवारिभिः ॥ ३३ ॥
मुहुः प्रियायाः क्षितिपाञ्चलानिलैर्जगाम मूर्छा नृपतेः सहार्तिभिः ।
सचेतना जातवती सती ततो जगाद साश्रुर्निजजीवितेश्वरम् ॥ ३४ ॥
नरेन्द्र जीयाः कुलशैलजित्वरो निजायुषा नन्द सुरेश्वरश्रिया ।
अमङ्गलं तेऽपहरन्तु देवतास्तमांसि लोकस्य रवेरिव प्रभाः ॥ ३५ ॥
विभो भवज्जीवितशंसयार्जितं सुतस्य जन्मापि न मेऽवभासते ।
भवेच्छिदा येन सकर्णकर्णयोर्न तेन हेम्नापि खलु प्रयोजनम् ॥ ३६ ॥
उरस्थले स्थास्यति भर्तुराभवं(?) स्फुरत्प्रभाहारलतेव हारिणी ।
न्यवेवि(?)देहोद्भवलक्षणैरिदं समस्तसारङ्गदृशां विलक्षणैः ॥ ३७ ॥
भविष्यतीयं क्रमशः सुतान्विता तातेन साम्राज्यवता त्वदङ्गजा ।
अभून्निमित्तज्ञवचः पुरः पितुस्तवेति धांड्या जगदे नृपप्रिया ॥ ३८ ॥
(युग्मम्)

स्वभर्तुरिष्टा सुचिरं चिरायुषो भविष्यतीयं नृपनाथ नन्दना ।
सखी प्रियास्या जिनराजभाषिता पुरः सखेदस्य च भूभृतोऽवदत् ॥ ३९ ॥
नृपोऽप्यवादीत्त्यज दुःस्थतां प्रिये मनोरथं पूर्णमिमं विभावय ।
अथैष केनाप्युदितं मुदो भरादुपाश्रृणोत्सिद्धमिदं न संशयः ॥ ४० ॥
वराश्वहेषां गजराजगर्जितं सतूर्यनादं शुभशङ्खनिस्वनम् ।
अदक्षिणाक्षिस्फुरणं प्रियोदितं तदाश्रृणोच्छाकुनिकाग्रणीरसौ ॥ ४१ ॥
ममेष्टसिद्ध्यै शकुनावलिः शुभा दिवेव विद्युज्जलदस्य वृष्टये ।
निवेदवे(य)द्या इति हर्षनिर्भरं यशोनिधिः प्राप सभां स भासुराम् ॥४२॥
महार्द्धिकैरिन्द्र इवेन्द्रसंनिभैः स सेवितः संसदि मण्डलेश्वरैः ।
ननन्द कुर्वन्ति न कं प्रसूत्वराः सविस्मयस्मेरमुखाम्बुजं श्रियः ॥ ४३ ॥
अथ स्वभर्तुर्द्युमणेः समागमेऽरुणाङ्गशोभां दिगवाप वारुणी ।
समेत्य सख्येव च संध्ययाद्भुतं कृताङ्गरागेव नवीनकुङ्कुमैः ॥ ४४ ॥
दिनावसाने दिनरत्नमण्डलं निपातमाप द्रुतमस्तभूभृतः ।
दुरत्ययं कालविपाकमीयुषः स्थितिः स्थिरा नोच्चपदश्रियोऽपि हि ॥ ४५ ॥
अथाम्बुधेरम्भसि भानुमण्डले निलीयमानेऽरुणपङ्कजत्विषि ।
दिशां मुखेभ्यस्तदनु प्रधाविता मधुव्रतव्रातनिभा तमस्ततिः ॥ ४६ ॥
निजासु(जांशु)नाशेऽपि नितान्तनिर्मलः कृतज्ञतां मुञ्चति नैव कश्चन ।
समुन्नतिं भानुमताधिरोपितः सहैव तेनास्तमियाय वासरः ॥ ४७ ॥
खरांशुतीव्रातपपाततापतः सुरस्रवन्त्यां जलकेलिकारिभिः ।
धुतस्य दिग्दन्तिभिरम्भसो भृशं कणा इव व्योमनि भान्ति तारकाः॥४८॥
अवाप तारानिकरं परां श्रियं नभस्तलेऽवाप्य तमांजि(मोऽञ्ज)नप्रभम् ।
किमङ्ग लाटीकचसंचयेऽञ्चितं न जातिमाल्यं भजतेऽद्भुतां लिपिम् ॥४९॥

रम्भाविभ्रमपुण्यपण्यवनितारब्धैः स तूर्यत्रिकै-
र्मङ्गल्यैः कृतकौतुकाद्भुतरसैः श्रोत्रामृतस्यन्दिनी ।
रम्या नम्रनरेश्वरोदितजयारावेण सायंतनी
संध्या तस्य नरेश्वरस्य शुशुभे प्रोल्लासितारात्रिका ॥ ५० ॥

अथ पृथुयशाः सर्वं लोकं विसृज्य स सत्वरं
नरपतिमहासिद्धेः सिद्धाववन्ध्यधियां निधिम् ।
स्वहितविदुरः स्वं मन्त्रीशं सुबुद्धिमपूपुज-
द्गुरुरिव यतः पूज्यो मन्त्री नृपस्य विवेकवान् ॥ ९१ ॥
सिद्धिः साहसकर्मकर्मठधियामेवेप्सितानामिति
क्ष्मापस्तत्र समुत्सहिष्णुहृदयस्तस्याग्रतः श्रीमतः ।
मन्त्रीशस्य जगाद गौरवपरस्तां स प्रतिज्ञां यतः
क्षोणीन्द्रस्य सदैव मन्त्रणविधौ धौरेयता भन्त्रिणाम् ॥ ९२ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के पुत्रचिन्तादिनिरूपणो नाम द्वितीयः सर्गः ।

तृतीयः सर्गः ।

ततः स राजशार्दूलं मूलमन्त्री व्यजिज्ञपत् ।
त्वत्प्रतिज्ञाम्बुधिर्देव दुस्तरेभ्योऽपि दुस्तरः ॥ १ ॥
नमस्कारः परं तत्र श्रीपञ्चपरमेष्ठिनाम् ।
प्रयात्यनन्यसामान्ययानपात्रसगोत्रताम् ॥ २ ॥
किं चायं विधिवद्ध्यातः सर्वकर्मसु कर्मठः ।
कल्याणकदलीकन्दस्यन्दमानः सुधारसः ॥ ३ ॥
पूरयत्याशु दुष्पूरमपि देव मनोरथम् ।
स्वदोहदः करोत्येव द्रुममाढ्यं फलश्रिया ॥ ४ ॥
तदस्य शृणु माहात्म्यं गृहाण विधिना च तम् ।
धनावह इव श्रेष्ठी येनासोष्ट फलोदयम् ॥ ५ ॥
कौतुकेनासृजद्वेधा भुवि स्वर्गमिवापरम् ।
यत्सर्वाद्भुतमादाय श्रीमत्पृथ्वीवरं पुरम् ॥ ६ ॥
शक्रेणापि कृताशङ्कबाहुदण्डबलो बलः ।
तत्र राजा प्रिया तस्य पद्मा पद्मेव देवता ॥ ७ ॥
तत्रैवासीद्धनश्रेष्ठी श्रीदश्रीपरमार्हतः ।
श्रीमती श्रीमती कान्ता सुतस्तस्य धनावहः ॥ ८ ॥

महासार्थेन सोऽन्येद्युः प्राचलत्कुण्डिनं पुरम् ।
मासेन प्राप कारायाः(?) प्रदोषमिव चन्द्रमाः ॥ ९ ॥
पुष्पोद्गम इवाद्यायमत्र पुण्यतरोर्मम ।
सुवर्णकोटयो लाभः पण्यस्यातिजहर्ष सः ॥ १० ॥
पृथ्वीं प्रीणयितुं पीतवारिर्वारिनिधेरिव ।
आत्तपण्योऽथ स श्रेष्ठी ततोऽम्भोद इवाचलत् ॥ ११ ॥
शाखान्तरेषु वृक्षाणां बिभ्रते पुष्पविभ्रमम् ।
संचरन्त्यश्चिरं यत्र तारास्तारोज्ज्वलप्रभाः ॥ १२ ॥
शङ्के संतापकत्वेन दिवाकरकरोत्करः ।
प्रवेशं यत्र नाप्नोति निश्छिद्रद्रुमपल्लवैः ॥ १३ ॥
यस्मिन्कटाक्षयन्तीव सरांसि क्षीरसागरम् ।
नीलोत्पलदलैर्लोलरोलम्बपरिचुम्बितैः ॥ १४ ॥
धर्मध्यानसुधापानकायोत्सर्गविधायिनाम् ।
महातपस्विनां यत्र पावित्र्यं पादरेणुभिः ॥ १५ ॥
समस्तवनराजीनां साम्राज्यमिव वल्गति ।
यस्मिन्यमोपमैर्भिल्लैर्भयानां च महावने ॥ १६ ॥
तत्प्रत्यासन्नवर्तिन्यां वर्तमाने प्रयाणके ।
धनप्राणहराः पेतुः सायं सार्थेऽथ तस्कराः ॥ १७ ॥
(षड्भिः कुलकम्)
उपस्थिते धनप्राणसंशये कार्यवेदिनः ।
रक्षन्ति जीवितं जीवन्नरो भद्राणि पश्यति ॥ १८ ॥
इत्यदृश्यपटेनेव नैशेन तमसावृतः ।
श्रेष्ठी सार्थजने नष्टे नंष्ट्वा तत्राविशद्वने ॥ १९ ॥
कामं कामेन कामी च दिग्मोहेन कृतान्धधीः ।
स बभ्राम चिरं तत्र दरिद्रस्येव मानसम् ॥ २० ॥
स्वधर्मारामसेकुं संवेगामृतकूपतः ।
अरघट्टघटीमाला यस्याभाज्जपमालिका ॥ २१ ॥

तं सिद्धिप्रेयसीलाभचिन्तयेव कृशं भृशम् ।
तपसा स मुनिं तत्र मूर्तं पुण्यमिवैक्षत ॥ २२ ॥ (युग्मम्)
नमस्कृत्य मुनिस्तेन पपृच्छे किं तव प्रभो ।
ध्यानाधीनधियो ध्येयं ततः स प्रत्यपीपदत् ॥ २३ ॥
परमेष्ठिनमस्कारः शिवाय ध्यायते मया ।
मन्त्रोऽयं विधिना ध्यातः सर्वदा सर्वकामदः ॥ २४ ॥
नरासुरसुरेन्द्राणामपि साम्राज्यसंपदः ।
नमस्कारमहामन्त्रद्रुमस्य कुसुमोद्गमः ॥ २५ ॥
काञ्चनाचलचूलेव स्थिरा यस्य नमस्कृतिः ।
रतिस्तस्य तु सान्निध्ये देवानामपि जायते ॥ २६ ॥
नमस्कारप्रभावेण प्रभवन्ति न जन्तुषु ।
क्रूरा गजेन्द्रसिंहादिरक्षोदावानलादयः ॥ २७ ॥
श्रुत्वेति तत्र वर्द्धिष्णुश्रद्धासंबन्धबन्धुरः ।
तृषार्त इव पीयूषं विधिना स तमाददे ॥ २८ ॥
प्रणम्य पादयुगलं गुरोराशीर्वचस्ततः ।
धर्मलाभं स लब्धाग्रे चचाल शकुनेरितः ॥ २९ ॥
ऐरावतं करोत्क्षेपैर्गजं तर्जयतीव यः ।
धावते दिक्षु साक्षेपं जिघांसुरिव दिग्गजान् ॥ ३० ॥
भियेव यस्य नायाति भूतलेऽभ्रमुवल्लभः ।
कदापि कौतुकेनापि क्रीडितुं मानसाद्रिषु ॥ ३१ ॥
मदाहूतालितुमुलैः प्रध्वनज्जयदुन्दुभिः ।
साश्चर्यशौर्यसाम्राज्यं राजेवोच्चैर्बिभर्ति यः ॥ ३२ ॥
घनाघनो जलेनेव मदौघेनाथ वर्षकः ।
क्रुद्धः कुतोऽपि तं हन्तुं व्यालः काल इवाययौ ॥ ३३ ॥
(चतुर्भिः कलापकम्)
परमेष्ठिनमस्कारमन्त्रस्मृत्या यथाविधि ।
तेनास्तम्भि स दुःस्तम्भिस्तम्भयुक्तेव पारदः ॥ ३४ ॥

ययाऽवसरः किंचिच्च्यञ्चितान्यसरसंयम्(?) ।
तमेव मत्तमातङ्गमारुह्यासह्यविक्रमम् ॥ ३५ ॥
पायं पायं पयस्तस्य स्नायं स्नायं च तत्तटे ।
अमृतच्छायवृक्षाढ्ये स विशश्राम सश्रमः ॥ ३६ ॥
कुर्वन्निव जगत्कम्पं क्ष्वेडया क्षिप्रमेव हि ।
गाढपुच्छच्छटाछोटैर्भूपीठं पाटयन्निव ॥ ३७ ॥
नारङ्गकदलीमुख्यफलैरतिसुधारसैः ।
तं कृताहारमाहन्तुं तत्र सिंहः समाययौ ॥ ३८ ॥ (युग्मम्)
स नमस्कारमाहात्म्यात्ततो दूरे पलायत ।
प्रज्वलज्ज्वलनज्वालाजालेनैव करालितः ॥ ३९ ॥
वर्द्धयन्निव फूत्कारैर्विषज्वालां मुखेऽद्य ताम् ।
कालः क्रौर्येण कान्त्या च दुष्टं दुष्टोऽहिराययौ ॥ ४० ॥
सर्पोच्चाटनमन्त्रेण निर्जितोर्जिततेजसा ।
परमेष्ठिनमस्कारेणैष तं दूरमक्षिपत् ॥ ४१ ॥
जज्वालाग्रेऽस्य दावाग्निः क्षयकालानलोद्धुरः ।
तत्र पञ्चनमस्कारस्मृत्या घनघटायितम् ॥ ४२ ॥
तदग्रे राक्षसस्तस्य भक्षणाय समुद्यतः ।
सोऽपि मन्त्रादितोऽनश्यद्यदयं सर्वभीहरः ॥ ४३ ॥
परमेष्ठिनमस्कारभक्तिर्वल्लीव मानसे ।
उल्लसन्ती फलं दत्ते जन्तोश्चित्तं जगत्स्वपि ॥ ४४ ॥
श्रीनमस्कारमन्त्रोऽयं कण्ठे श्वास इवानिशम् ।
यस्यासीद्विवधूकण्ठे स कण्ठाभरणायते ॥ ४५ ॥
परमेष्ठिनमस्कारमन्त्रमाहात्म्यमूर्जितम् ।
कः संख्यातुमलंभूष्णुरिति चित्ते व्यचिन्तयत् ॥ ४६ ॥
जङ्घालः प्रचचालाथ स श्वशुरकुलं प्रति ।
प्रथमे यामिनीयामे ययौ मेरुनिभं नगम् ॥ ४७ ॥ (युग्मम्)

कौतुकेनारुरोहैनं शुश्राव च वचः पुरः ।
कस्यापीति स्मरस्मेरविकारविधुरं मुहुः ॥ ४८ ॥
मदङ्गीकारतो विद्धि विधेयं मां मृगेक्षणे ।
त्रातारं वा स्मराभीष्टं न यावन्मार्यसे मया ॥ ४९ ॥
तदीयोग्रगिरा भीरुः कम्पमानवपुर्लता ।
श्रीजिनेन्द्रः परं त्राणं जगादेति ममात्र सा ॥ ५० ॥
स स्त्रीं शस्त्रीप्रहारेण प्रहर्तुं तां समुद्यतः ।
कामान्धास्त्यक्तमर्यादाः किं किं पापं न कुर्वते ॥ ५१ ॥
तेन बद्धः स्वमन्त्रेण स्वबन्धैर्मृत्युबन्धुभिः ।
सतामार्तपरित्राणप्रगुणाश्चित्तवृत्तयः ॥ ५२ ॥
तं तथा वीक्ष्य सान्यच्च श्रेष्ठिनं सनमस्कृतिम् ।
श्रावकत्वेन तस्याभूद्विश्वासवशमानसा ॥ ५३ ॥
आकुलप्राणयाप्युच्चैर्मृग्येव व्याधबद्धया ।
त्वया नष्ट····तेनार्क इवास्तमयत यज्जिन (?) ॥ ५४ ॥
तद्धन्यासि त्वमेवैका नृत्यतीव कराम्बुजे ।
तव स्वर्गापवर्गश्रीः सेत्थं तेनापबृंहिता ॥ ५५ ॥ (युग्मम्)
भद्रे त्वं कासि किं चायं जिघांसुस्त्वामुपस्थितः ।
पृष्टे तेनेति सा सारप्रेमोद्गारगिरावदत् ॥ ५६ ॥
रत्नगर्भाशिरःशुभ्रपुष्पशेखरविभ्रमे ।
रौप्ये भूभृत चैताढ्येऽस्तीह राजपुरी पुरी ॥ ५७ ॥
तत्र विद्याधरेन्द्रोऽस्ति जयस्तस्य बृहस्पतिः ।
नाम्ना बुद्ध्या च मन्त्रीशः पत्नी तस्य मणिप्रभा ॥ ५८ ॥
तयो रत्नप्रभां पुत्रीं मामयं मन्दिरादथ ।
रागैकदृष्टिरानिन्ये स्वर्णमालामिव द्विकः ॥ ५९ ॥
याचमानो वैराहाय[1] चाटुकारशतैरयम् ।
ममानुत्तरदानेन दुष्कर्मेति प्रचक्रमे ॥ ६० ॥

---

१. 'विहाराय' इति भवेत्.

गाढानुरोधादस्याः स्वां सार्थपालिकथामथ ।
जगाद किं न वाच्यं हि सद्भावाञ्चिततेजसाम् ॥ ६१ ॥
इत्थं मिथः स्ववृत्तान्ते कृते कर्णरसायने ।
ताभ्यां विलोक्य दिव्यर्द्धिस्तत्र विद्याधराधिपः ॥ ६२ ॥
उत्थाय पादयोर्लग्ना स्वपितुस्तस्य कन्यका ।
उच्चैराक्रन्द शब्दं च स्वान्तर्दुःखमिवामुचत् ॥ ६३ ॥
आलिङ्गच स्वाञ्चलेनास्याः प्रोन्ममार्ज मुखाम्बुजम् ।
अङ्के कृत्वाथ तां प्राह पुत्रि धीरा भवाधुना ॥ ६४ ॥
व्यज्ञपीदं तया तात कोऽप्ययं मयि वत्सलः ।
ररक्षेऽरिकराद्येन सिंहास्यादिव गौरहम् ॥ ६५ ॥
तत्तातैतद्गुणक्रीतीं विद्धि मामिति तद्गिरा ।
सर्वज्ञोक्तवरायास्मै स सन्मानं सतां ददे ॥ ६६ ॥
सापराधमिव श्रेष्ठिवाक्यान्मन्त्री तमत्यजत् ।
सतां तुल्या मनोवृत्तिरुपकार्यपकारिषु ॥ ६७ ॥
प्रातरिन्दुरिवादृश्यपरिवारस्त्वमद्य किम् ।
मन्त्रिणः श्रुतपूर्वेदं श्रेष्ठीश्रेष्ठः[1] प्रतिष्ठया ॥ ६८ ॥
उवाच भिल्लधाटीतः स्वसार्थोल्लुण्ठनादिकम् ।
ततो मन्त्रिपतिः पल्लीमरुणत्सैन्यपेन सः ॥ ६९ ॥
कालरात्र्येव दृष्टा सा ग्रस्तेव समवर्तिना ।
ददृशे भिल्लनाथेन निर्नाथेव तदाकुला ॥ ७० ॥
अथ संधानमाधाय सह सेनाधिपेन सः ।
यदात्तं सार्थसंबन्धि तत्तस्य व्यतरद्भिया ॥ ७१ ॥
सर्वस्वेनापि संमान्य सेनानाथं निजेन सः ।
तेन सार्थेन चोपेतः श्रीमन्मन्त्रिपतिं ययौ ॥ ७२ ॥
महार्थोपायनैर्नत्वा मन्त्रिनाथमथार्चयत् ।
तेन संमानितः सोऽपि पल्लीं पल्लीपतिर्ययौ ॥ ७३ ॥

१. 'वाँयश्रेष्ठिश्रेष्ठः' इति भवेत्.

ययौ यानमथारुह्यासन्नवेगजितानिलम् ।
सह जामातृकन्याभ्याममात्यैः स्वपुरं प्रति ॥ ७४ ॥
पर्यणैषीदपर्यन्तगर्जदुत्सववैभवाम् ।
तां श्रेष्ठी मन्त्रिणा दत्तसर्वस्वकरमोचनः ॥ ७५ ॥
ततः संप्रेषितस्तेन गौरवात्स्वसुतान्वितः ।
दूरेऽनुगम्य स क्षिप्रं ययौ राजपुरीं प्रति ॥ ७६ ॥
मार्गं दुस्तरमुत्तार्य श्रेष्ठी पोत इवाम्बुधिम् ।
पृथ्वीपुरं ससार्थोऽगात्किं न श्रेयो नमस्कृतैः ॥ ७७ ॥
अथाभूत्स नमस्कारमन्त्रे भृङ्ग इवाम्बुजे ।
लीनः सिद्धिमधुश्रद्धावृद्धिबन्धुरमानसः ॥ ७८ ॥
जिनस्य भक्तिपूजाभ्यां मन्त्रसिद्धिमवाप सः ।
साश्चर्यशौर्यपुण्याभ्यां राजेवाशु जयश्रियम् ॥ ७९ ॥
सुदृष्टिरेकदा कश्चित्सुरः श्रेष्ठिनमब्रवीत् ।
वश्यो मन्त्रादितः श्राद्ध[1] तवाभीष्टकरोऽस्म्यहम् ॥ ८० ॥
तत्रत्यपृथिवीपालस्तार्तीयीकदिनेन सः ।
व्यनश्यदसुतो रोगादामकुम्भ इवाम्बुतः ॥ ८१ ॥
पञ्चदिव्यैर्गजेन्द्राद्यैः सत्कृतः स कृतो नृपः ।
नमस्कारमहामन्त्रात्किं नोच्चैः प्राप्यते पदम् ॥ ८२ ॥
बभौ तस्यासनं व्योम्नि व्योमरत्ननिभं तदा ।
देव्यश्चामरधारिण्यो दिव्यच्छत्रकराः सुराः ॥ ८३ ॥
नाकिनाथमिव क्षोणीक्षेमायेत्थमुपस्थितम् ।
श्रुत्वा नृपं भयाद्भूपास्तमेवान्ये विभुं व्यधुः ॥ ८४ ॥
गजाद्युपायनीकृत्य स्वकन्यास्तस्य ते ददुः ।
पर्यणैषीत्स रूपश्रीह्रेपिताप्सरसस्ततः ॥ ८५ ॥
एकच्छत्रं महाराज्यं न मुदेऽस्य तथाभवत् ।
यथा श्रीमज्जिनेन्द्रोक्तधर्मप्राप्तिः सुदुर्लभा ॥ ८६ ॥

---

१. हे श्रद्धासमन्वित.

भोगैर्दुर्ललितस्यास्य देवानामपि दुर्लभैः ।
श्रीनन्दनवनस्येव संतानश्रीरवर्धत ॥ ८७ ॥
अथान्यदा नमस्कारमन्त्रदं स्वगुरुं मुनिम् ।
तत्रागतं ववन्देऽसौ शुश्रावास्य च देशनाम् ॥ ८८ ॥
राजंस्त्वं राजसे शुद्ध सम्यक्त्वमणिभूषणः ।
अङ्गैरिव गणाधीशस्तथा द्वादशभिर्व्रतैः ॥ ८९ ॥
स्वर्णरत्नप्रियैर्भूप रत्नसानुविजित्वरैः ।
जिनेन्द्रमन्दिरैः पृथ्वीमण्डलं यदमण्डयः ॥ ९० ॥
प्रावर्त्यन्त त्वया तत्र नानाश्चर्यमहोत्सवाः ।
वरेण्यपुण्यपीयूषसत्राणीव शिवाध्वनि ॥ ९१ ॥
श्रुतस्य श्रोत्रिणी श्रोत्रे नेत्रे जैनास्यनर्तिनी ।
कृतार्थे सार्थसामर्थ्ये कृतैरिष्टैः स धर्मिणाम् ॥ ९२ ॥
विश्वरङ्गे जिनाधीशशासनोन्नतिनर्तकीम् ।
नरीनर्तयितुं नृत्याचार्यकं तव निर्मलम् ॥ ९३ ॥
सर्वाणि धर्मकर्माणि भूप श्राद्धोचितानि ते ।
श्रद्धाधिक्येन वर्धन्ते दानेनेव यशःश्रियः ॥ ९४ ॥
अत्र मद्वरधर्मेऽस्मिन्नित्थं तदपि भण्यते ।
राजहंस सदा राजहंसः स्या संघमानसे(?) ॥ ९५ ॥
इत्थं कर्णातिथीकृत्य तथ्यां पथ्यां गिरं गुरोः ।
ववन्दे तं ततः सापि विजहार यथासुखम् ॥ ९६ ॥
(सप्तभिः कुलकम्)

जिनेश्वराणां रथतीर्थयात्रा कल्याण्यकाद्युत्सवपुण्यकृत्यैः ।
तद्राज्यलक्ष्मीः सुभगं भविष्णुरिष्टैः फलैः कल्पतरोर्लतेव ॥ ९७ ॥

काले काले नयमिव चतुर्धापि धर्मं स चक्रे
दध्रे शक्तित्रयमिव सुधी धाम रत्नत्रयं च ।
तेनैवायं परिमलभरेणापि मन्दारशाखी
लोकं लोकम्पृणगुणगुरुर्वासयामास शश्वत् ॥ ९८ ॥

स त्रिवर्गपरभागभूषणः प्राज्यसौख्यमनुभूय सूनवे ।
दत्तराज्यविभवो दिवं ययौ द्वीपमन्यमिव सायमर्यमा ॥ ९९ ॥

स तत्र रम्यवैभवं सुरेन्द्रराज्यमन्वभूत् ।
ततश्च्युतः क्षमापतिः कृतव्रतः शिवं ययौ ॥ १०० ॥

नमस्कृतेरित्थमसौ महीपोऽनुभूतपूर्वीं च फलं निशम्य ।
स संप्रदायं जगृहे नृपस्तां सुधां पिबेद्वा नहि कः सतृष्णः ॥ १०१ ॥

मन्त्रस्य तस्य रुचिरप्रचुरप्रभावैः
सर्वत्र विश्वबलयैरपरैरगम्यः ।
श्रीमान्समस्तजनतापरिभूतिबद्ध-
कक्षैः करैरिव रविस्तिमिरैरथासीत् ॥ १०२ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के नमस्कारप्रभाववर्णनो नाम तृतीयः सर्गः ।

चतुर्थः सर्गः ।

तदनु भास्करसोदरदीपिकाद्युतिकदम्बविडम्बितवासरम् ।
सुर इवोच्चविमानममानवं शयनमन्दिरमाप महीपतिः ॥ १ ॥

इह स हंसशुभच्छदतूलिकं सुरतरङ्गवतीपुलिनोपमम् ।
विहितसांध्यविधिः सुधियां गुरुः सुरवरोचिततल्पमशिश्रियत् ॥ २ ॥

समुपगूढमनाः सुतचिन्तयेत्यलममर्षभयादिव निद्रया ।
क्षणमपीक्षणगोचरचारितानविदधेऽस्य निशेव दिवामणेः ॥ ३ ॥

ग्रहबलैः शुभशंसिनमाप्तवान्कथमपीह निशीथमसौ तदा ।
पृथुपचेलिमपुण्यवतां स्वयं किमनुकूलमुपैति च हेलया ॥ ४ ॥

अथ चलन्नचला रमणस्तदा चतुरबुद्धिरदृश्यत नापरैः ।
नयनराजदृश्यकराञ्जनो जन इवाध्वनि भूरि नराकुले ॥ ५ ॥

असितपट्टमयांशुकवेषवानसिलताकलितैककराम्बुजः ।
स्वपुरसालमलङ्घ्यमलङ्घयद्भृगुमिवाशु गिरेर्नवकेसरी ॥ ६ ॥

किमपि तत्र विनोदितलोचनः फलितपादपदेवकुलादिषु ।
पवनवेगगतिः स परिभ्रमन्समसृणोत्करुणं ध्वनिमग्रतः ॥ ७ ॥
गुरुकृपारसपूरितमानसस्तदनुसारमसावपरिश्रमः ।
नरपतिर्मरुतोऽप्यधिपङ्कृता व्रतमिवाङ्किजवेन ददद्ययौ ॥ ८ ॥
मृतककोटिकरालकलेवरप्रचुरदुःसहगन्धभरावहे ।
अभिमुखागतगन्धवहैर्मुहुर्यदतिदूरविवर्त्यपि सूच्यते ॥ ९ ॥
मिलदसंख्यशिवाकृतफेत्कृतैर्यदसुकम्पकृदूद्वितमूर्द्धजम् ।
अधिकघूकघनार्तिदघूत्कृतैः स्खलितकातरजन्तुगतागति ॥ १० ॥
भृतदिगन्तरदुःश्रवहुंकृतैर्विकृतवेषवपुर्मुखनर्तनैः ।
प्रचुरराक्षसभूतपिशाचकैर्भयकुलैरिव दुर्गपथं नृणाम् ॥ ११ ॥
विपुलमांसवसामदिरोन्मदं विततमुत्कलकेशमवस्रभृत् ।
भ्रमति यत्र सताण्डवडाकिनीकुलमकालमृतेरिव सादरम् ॥ १२ ॥
निशि च यत्र निशाचरनिर्मितामतिभयंकरकेलिविलोकनम् ।
छलयति स्म विधैर्यघनं जनं यमगृहातिथितां नयते च ताम् ॥ १३ ॥
किमिह भूरिवचोभिरुदीरितैस्तदपरं भुवि कालनिकेतनम् ।
निजगृहं स्थिरधैर्यवतां पुनः पितृवनं स ददर्श नृपस्ततः ॥ १४ ॥
(षड्भिः कुलकम्)
अथ स तत्र विवेश विशांपतिः प्रथितधैर्यधुरीणजनाग्रणीः ।
इदमभाष्यमभाषि च केनचिन्मनुजजातिनिसर्गभवद्रुषा ॥ १५ ॥
विततदारुण····कृतकर्मणा हृतवपुध्रुवमागतवानसि ।
इह हि याति नृपोऽपि पतङ्गतां निशि निशाचरकोपहुताशने ॥ १६ ॥
पितृवने हतधीस्त्वमिहागतस्तदधिपश्य ममाप्यकृतार्चनः ।
क्षयमुपेहि तदद्य मया हतस्ततरुषा नकुलेन यथा फणी ॥ १७ ॥
सरसभक्ष्यमिव स्वयमागमश्चिरबुभुक्षुतरस्य ममाग्रतः ।
त्रिभुवनेऽपि न सोऽस्ति तवाद्य यो भवति रक्षणकर्मविचक्षणः ॥ १८ ॥
निजबलं मयि दर्शय माधुना मम पुरो मनुजाः किल कीटकाः ।
असुरनिग्रहमन्त्रचणोऽसि चेत्स्मर तमेव वशीकृतदैवतम् ॥ १९ ॥

असिरयं चतुरङ्गरणे रिपुक्षितिपकण्ठविलुण्ठनलम्पटः ।
इह हि स त्रपते जनमात्रके खलु खलेऽधमवाचि नियोजितः ॥ २० ॥
इति वदन्नृपतिः स नमस्कृतेः स्मरणतो व्यधिताचलनिश्चलम् ।
तमसुरं भयवातसमाहतं हृदयपल्लवमस्य तु कम्पितम् ॥ २१ ॥
अहमहंयुरिहाभवमाभवं जगति वीरकथा खलु मे वृथा ।
यदमुनैव कृतो विमदज्वरः सहजधैर्यवशंवदचेतसा ॥ २२ ॥
अहमतीव मदान्धविलोचनं पशुरिवाविदितस्वपरान्तरः ।
अधिगुणेऽत्र जने महतागसा यदपतं विपदीत्थमनर्थकृत् ॥ २३ ॥
करुणयैव न मे हृतवानसून्प्रकटदुष्टगिरोऽपि महाशयः ।
यदि कथंचन मोक्ष्यति मामयं तदुपकारितयास्तु मम प्रभुः ॥ २४ ॥
इति निधाय निजे हृदि निश्चयं निभृतनेत्रयुगं नृपमैक्षत ।
विदितदैन्ययशः कृपयामुना स मुमुचेऽथ तथैव विधानतः ॥ २५ ॥
तदनु वैद्युतपुञ्जमिव स्थिरं मणिसुवर्णविभूषणभूषितम् ।
सपदि दिव्यवपुर्दधदेत्य तं प्रणयतः प्रणनाम स भूपतिम् ॥ २६ ॥
स्फुरितभक्तिभरादिव नम्रतां दधदधीशमसावसुरोऽवदत् ।
जय विभो शरणं श्रितवानहं बत भवन्तमनन्तयशःश्रियम् ॥ २७ ॥
प्रभुरयं प्रभविष्णुरपि क्षमां सततमेव बिभर्ति यथा क्षमाम् ।
इति गुणद्वितयी तव गीयते सुरपतेः पुरतोऽप्सरसां गणैः ॥ २८ ॥
यदपराद्धमिहापि मयाधमाधमधियाधिकदुःसहतेजसि ।
अहितहेतुरितीव तदज्ञता मम दुनोति मनो नितरामियम् ॥ २९ ॥
अनुचितं यदवोचि वचो मया तदधुना क्षमणीयमिन त्वया ।
निजकभृत्यमितः परिभाव्य मां नतजने प्रभवः खलु वत्सलाः ॥ ३० ॥
मम तवोपरि रागतरङ्गिणी गुरुतरङ्गभरैरिव नृत्यति ।
नवरवाविव चक्रपतत्रिणः प्रियतमोत्तमसंगमकारिणि ॥ ३१ ॥
त्वदपरोऽस्ति न मोक्षकृते मम क्वचन जैनमतादिव देहिनः ।
भवदनन्तगुणौघवशंवदं तदुररीकुरु मां निजसेवकम् ॥ ३२ ॥

भवतु दिव्यविचित्रमणिप्रभा प्रबलपल्लवलास्यवती मम ।
विमलमौक्तिकहारलता तव प्रथमदर्शनयोग्यमुपायनम् ॥ ३३ ॥
इयमुदात्तसुताय मृगीदृशां भवति कण्ठतले विनिवेशिता ।
इति निशम्य स तां द्रुतमाददे प्रणयिनां हि समाधिविधिस्तथा ॥३४॥
प्रकटयत्युदितं परमोचितां तव कृतज्ञकृतश्रुतिसंमदाम् ।
विमलजात्यमणेरिव लक्षणं निजकमाकरजन्म शुभावहम् ॥ ३५ ॥
इदमुदीर्य निवर्त्य च तत्र तं श्रुतविलापमभिप्रचचाल सः ।
निजभुजैकसहायतया परं विदधतेऽधिकृतार्थमिहोर्जिताः ॥ ३६ ॥
विकचचम्पकचारुवपुःप्रभः प्रवरराजजनोचितलक्षणः ।
भुजजिनेन्द्रकरीन्द्रजकारय(?)र्विधृतनिर्दययोगिपतिव्रतः ॥ ३७ ॥
अशुभकारणकर्मणि कर्मठः शठतया प्रिययेव समाश्रितः ।
इह परत्र विरुद्धकराग्रणीर्निखिलदोषदवज्वलनानिलः ॥ ३८ ॥
स्वगुरुदर्शितमन्त्रविधायिनः पृथुलभूतलवर्तितमण्डलः ।
डमरुकस्य डमद्डुमडम्बरारवभरेण भृताखिलदिङ्मुखः ॥ ३९ ॥
प्रबलभूतबलिं बलवत्तरः सकलदिक्षु समं जलधारया ।
प्रथमतः पृथुशान्तिविधित्सया व्यधित यः स्फुटकल्पविकल्पवित् ॥ ४० ॥
अकृत वाञ्छितसिद्ध्यधिदेवतां बहललोहितचन्दनचर्चिताम् ।
अरुणपुष्पचयै रचितार्चनां विहितयोग्यसमग्रबलिं च यः ॥ ४१ ॥
इह मया प्रतिकूललवोऽपि ते मुनिजनेन न कोऽपि करिष्यते ।
किमुत चिन्तितसिद्धिविधित्सया सुवदने भवती(?) समुपाहृता ॥ ४२ ॥
किमिह रोदिषि शोकवशंवदा सुतनु विश्वसिहि त्यज संभ्रमम् ।
नृपसुतेऽभ्युदयोऽपि करिष्यते तव मया विविधाद्भुतभूतिभूः ॥ ४३ ॥
इति गिरास्तभया लघुतां व्यधाद्विगतरोदनताररवां च यः ।
त्रिभुवनाखिलमीलितमायया विहितसृष्टिरिवानृतजन्मभूः ॥ ४४ ॥
उपकृपाणकृतच्छुरिकाकरं मधुरवाक्यसुधोक्षितकन्यकम् ।
अधिकृतार्थविधौ विहितोद्यमं नृपतिरैक्षत तं पुरतस्ततः ॥ ४५ ॥
(अष्टभिः कुलकम्)

अजपदिष्टनिबन्धनमुद्रया प्रकृतमन्त्रमथाहुतिमक्षिपत्।
विहितहोममतिज्वलितानले स्वमिव दुर्गतिशास्त्र(श्च)तपावके ॥ ४६ ॥
तदभिपश्यति[1]·····धराधिपे बहुलतान्तरितेऽथ स कन्यकाम्।
समवदद्भैरया[2](?)दकदेवताबलिकृते त्वमिहाद्य विनाश्यसे ॥ ४७ ॥
इयदितस्तव जीवितमात्मनः कमपि रक्षणदक्षमिह स्मर।
तदनु विक्रमसिंहमहीपतिः शरणमेव ममेति जगाद सा ॥ ४८ ॥
क्षुरिकया न हि यावदपत्रपः प्रहरतीह स तावदपात्यत।
क्षितिभुजा भुजतो द्रुतमस्य सा द्रुमलतादलवद्धन(?)वायुना ॥ ४९ ॥
समुपतस्थुषि यौ[3]····पतौ युधे गतकरेऽथ कृपाणकरे रुषा।
निजकरेण सितासिमकम्पयच्चरणताडनतश्च धरां नृपः ॥ ५० ॥
भुवि ववल्ग स वल्गुबलो ददावसिनिपातशतान्यभिभूपतिम्।
अभिभवन्ति न तानि किमप्यमुं तिमिरसंततयस्तरणिं यथा ॥ ५१ ॥
भुवि कृतैर्गुरुभिः पददर्दरैर्नमदशेषफणीन्द्रफणोन्नती(:)।
वतमजीविव(?)रोषकषायतो रणमुखेऽभवतां नृपयोगिनौ ॥ ५२ ॥
प्रहितयोनिधनाय कृपाणयोरपि कृपाजनि तत्रै[4]····योर्ध्रुवम्।
परमया सुकुमारतयान्यथा कथमिमां वहता गलताश्रयोः(?) ॥ ५३ ॥
अथ मिथोऽसिलतापरिचुम्बितौ कचन·····निर्गतलोहितौ।
वधधिया भ्रमणेन विरेजतुर्ज्वलदलातकचक्रयुगोपमौ ॥ ५४ ॥
कपटकोटिपटुः स विशांपतेः करतलादसिपत्रमपातयत्।
प्रहतवैरिवपुःक्षतजारुणं मरुदिवाशु तरोः श्लथपल्लवम् ॥ ५५ ॥
करगृहीतकृपाणलतं पुनः समरदक्षतयाद्भुतया नृपम्।
यमभिवोद्धृतदण्डकरं रिपुस्तमवलोक्य मुमोच स धीरताम् ॥ ५६ ॥
द्विषदसिं विनिहत्य निजासिना क्षितिधवोऽपि सहेलमपीपतत्।
इह भवन्ति जयर्द्धिकृते कृतप्रतिकृताय निरङ्कुशतेजसः ॥ ५७ ॥

---

१. 'तत्र' इति स्यात्. २. संपादकार्थकः पादकशब्दो भवेत्. ३. 'योगिपतौ' इति स्यात्. ४. 'त्र तयो' इति स्यात्.

अपहृतासि पराभवकोपितस्तदनु योगिपतिः कृतसाहसः।
चिरमयुध्यत मल्लयुधा क्रुधा नृपतिना सह दुःसहतेजसा ॥ ९८ ॥
विविधबन्धनिबद्धवपुः कृतः स्व इव तेन स योगगतोऽचलः।
नृपतिरप्यरिसूत्रितबन्धनं(?)मधुतवांस्तिमिरं द्युतिमानिव ॥ ९९ ॥
भुजगपाशदृढेन महीभुजा निजे[1]·····द्वितयेन पराक्रमी।
रिपुरबध्यत बन्धनपीडया मृतिपथस्थ इवाथ मुमूर्छ सः ॥ ६० ॥
तमवलोक्य तथा विवशं विशांपतिरुदीर्णकृपामृतवीचिभिः।
समभिषिच्य मुमोच पुनर्नवीकृतमिवेति हि राजकुलोचितम् ॥ ६१ ॥
सिचयपल्लववीजनवायुना विगतमूर्छमुवाच नृपोऽथ तम्।
कुरु करेऽसिलतां मम पूरय क्षेम[2] रणे रणकेलिकुतूहलम् ॥ ६२ ॥
प्रतिजगाद स किं मम सांप्रतं रणचणेन रणेन सह त्वया।
सपदि दैन्यदशां गमितोऽसि यत्तव करैस्तरणेरिव चन्द्रमाः ॥ ६३ ॥
क्षपयति स्म स तस्य विलोलतामृतपूरसहोदरया गिरा।
स्वकुलदेवतया कथितं स्मरन्नथ तथा प्रणनाम स भूपतिम् ॥ ६४ ॥
त्वयि नरेन्द्र हठादपि भूभुजां प्रणतिरायति सुन्दर संपदे।
किमु रसायनपायनमङ्गिनामनभिलाषवतामपि नो मुदे ॥ ६५ ॥
भवति कापि नरेन्द्रमहोचिती ध्रुवमनन्यसमाश्रयसंभवा।
सुरतरावि वल्गितसौरभा स्फुरति नेतरभूरुहमञ्जरी ॥ ६६ ॥
देवस्त्रीवधपापपङ्कपतनव्यावर्तनेनामुना
त्वं मेऽभूः परिणामसुन्दरतया तस्यां दयायां गुरुः।
यन्माहात्म्यपुरस्कृतं खलु जनं स्वर्भूर्भुवः संपदः
सोत्कण्ठं कुचमण्डलेषु रमयन्त्यासँससिद्धिश्रियम् ॥ ६७ ॥
युष्मत्प्रसादान्नृप मानसे मे हंसीयतां सा सुगतिं दधाना।
वदन्निदं कन्दलयांबभूव प्रमोदकन्दं हृदये स तस्य ॥ ६८ ॥
(पञ्चभिः कुलकम्)

---

१. 'स्व भु–' इति स्यात्. २. 'भुज' इति भवेत्. ३. अनुदात्तेत्त्वप्रयुक्तात्मनेपदस्यानित्यत्वादत्र परस्मैपदप्रयोगे 'सहस्व' इत्यर्थो भवेत्. ४. 'सन्नसि–' इति स्यात्.

शौर्याकृष्टा तदनु विजयश्रीकटाक्षैर्वलक्षै-
रानर्चैनं कुसुमसुभगैः सानुरागा नरेन्द्रम् ।
देवश्रेणीकृतजयरवा पुष्पवृष्ट्या च हृष्टा
पूजापात्रं भवति हि मुहुः सद्गुणोत्कर्षवत्ता ॥ १९ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीशब्दाङ्के सुरयोगीन्द्रविजयो नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

संरक्षणाय रिपुतोऽहमभूवमस्याः
संग्रामकेलिभिरियं स्मरतापतो मे ।
स्वैर्दर्शनामृतरसैस्तु समोपकार-
कन्येति तामथ मुहुर्नृपतिर्ददर्श ॥ १ ॥
अस्याः स्मितोत्पलदलं नयनद्वयस्य
कान्तेः सुवर्णममलं वदनस्य चन्द्रः ।
वाचः सुधा रतिरनुत्तररूपलक्ष्म्याः
सौभाग्यभङ्गिमनिशं स्पृहयांबभूव ॥ २ ॥
किं वागुरेयमपरा युवहृन्मृगाणां
निःस्पन्दतां दधति येन विलोकितापि ।
एकं स्मरस्य च जगत्त्रयजैत्रमस्त्रं
स्त्रैणोचिताद्भुतगुणोल्बणभूषणश्रीः ॥ ३ ॥
केयं क्व वाजनि कुले किमितीपदीदं(?)
संचिन्त्य तामभिललाप मुहुः स पश्यन् ।
दिष्ट्यासि जीवितवती सुभगे स्मरारिं
स्मेरस्मरः परिभवत्यपि दृग्बलात्ते ॥ ४ ॥
व्यालोकनेन सहसापि घनश्रियोऽस्य
हर्षप्रकर्षपरिनृत्तमनोमयूरा ।

---

१. 'लापदीयं' इति स्यात्.

अम्भःकणैरिव सुधामधुरैर्वचोभिः
सा प्राप निर्वृतिभरं क्षितिभृत्तटीव ॥ ६ ॥
अत्रान्तरे रुचिररत्नविमानमैक्षि
क्षोणीभृताद्युतितिरस्कृतभानुबिम्बम् ।
तस्मादुपेत्य सहसा सुरपुंगवेन
पूर्वोदितेन समनम्यत मानवेन्द्रः ॥ ६ ॥
प्रासादमुन्मुखमयूखशिखाव्यरत्नै-
र्दीपालिकोत्सवमिवादधतं निशायाम् ।
सिंहासनं च नवभङ्गिभराभिराम-
मारामभद्भुततमं रचयांचकार ॥ ७ ॥
तद्भक्तिगौरववशाद्विहितासनस्य
तत्र क्षणं क्षितिपतेः पुरतः सदैव ।
प्रावर्तयद्रुचिरविभ्रमहावभाव-
लीलाविलाससरसं स्वपुरंध्रिलास्यम् ॥ ८ ॥
किं सानुरागहृदया मयि कन्यकेय-
मापद्गता किमिति मां शरणं प्रपेदे ।
योगीश्वरश्च किल कोऽयमिति क्षितीन्दु-
र्विस्मेरविस्मयरसप्रसरः स दध्यौ ॥ ९ ॥
देवोऽवदत्तदनु देव निवेद्यमानं
जिज्ञासितुं निजमिदं शृणु रत्नपुर्याम् ।
जज्ञे जितारिनृपतेर्दुहितेन्दुमत्यां
श्रीः श्रीमतीयमनुजा तव पट्टराज्ञ्याः ॥ १० ॥
साश्चर्यसौर्यसुभगत्वकलाप्रभुत्व-
दानादिभिस्तव गुणैरियमत्युदारैः ।
संख्यातिगैः श्रुतिपथातिथिभिर्बभूव
श्रीः श्रीपताविव नृप त्वयि सानुरागा ॥ ११ ॥

युष्मद्वियोगविधुरा मधुराङ्गलक्ष्मीः
सङ्गाशया धृतवती नृप जीवितव्यम् ।
त्वन्नाममन्त्रमनिशं जपति स्म कामं
रूपं निरूपितवती च तदैव चित्रे ॥ १२ ॥
कुप्यत्कृतान्तदशनान्तरवर्तिनीव
सस्मार देव तव नाम तदापदीयम् ।
गीतक्षुतस्खलनजागरणे भये च
संस्मर्यते प्रियजनस्य हि नाम लोके ॥ १३ ॥
लोकंपृणोल्बणगुणा नृपराजलक्ष्मी-
र्मूर्तेव सर्वविषयप्रभविष्णुसौख्या ।
सर्वाङ्गसुन्दरतया सुभगंभविष्णुः
प्राणप्रिया तव भविष्यति कन्यकेयम् ॥ १४ ॥
वृत्तान्तमस्य शृणु योगिपतेरिदानीं
रत्नावतीत्यभिधयास्ति पुरी प्रसिद्धा ।
तत्रो**ग्रसेन**धरणीपतिरुग्रसेन-
स्तस्याभवत्प्रियतमा **मणिमञ्जरी**ति ॥ १५ ॥
पृथ्वीधरं पृथुनरेन्द्रनवावतारं
गङ्गाधरं च भुवि केतुमिवोल्लसन्तम् ।
एतावसूत तनयौ क्रमतः सती सा
वेलाम्बुधेरिव सुधारसकालकूटे ॥ १६ ॥
भ्रात्रोरनुक्रममहर्निशमुत्तरङ्ग-
प्रेमोग्रमत्सरभरप्रभवप्रवृत्त्योः ।
जज्ञे तयोः कुशलता द्विजपुंगवानां
हस्ताङ्गुलीष्विव कलासु तदाखिलासु ॥ १७ ॥
तत्रादिमः क्षितिप मन्त्रिपुरी जनाना-
मुद्यत्[1]सुदां समुदयैः सहवर्धमानः ।

---

१. 'न्मुदां' इति स्यात्.

संक्षोभणं त्रिभुवनस्मितलोचनानां
स्मेरस्मरं तदनु यौवनमाससाद ॥ १८ ॥
लोकं दहन्मुखविषोल्बणनिर्यदग्नि-
ज्वालावलीभिरिव दुर्वचनैस्तदन्यः ।
उत्रासयन्कुचरितैः कुटिलैर्गतैर्वा
दुग्धं फणी च तरुणस्तरुणत्वमाप(?) ॥ १९ ॥
आदेशतः पितुरथ क्षितिपालकन्या
रूपश्रिया जितरतीः परिणिन्यतुस्तौ ।
पृथ्वीधरे तदनु सर्वजनानुरागा-
द्राजा न्यधत्त जयशालिनि यौवराज्यम् ॥ २० ॥
क्षीणोऽन्यदा क्षयरुजा क्षितिप क्षतार्तिः
पृथ्वीधरं धरणिनाथमथो विधाय ।
योगीव योगपरभागलयोपयोगे
चेतः स्थिरं सपदि निर्वृतिमाससाद ॥ २१ ॥
अन्तःपुरे पुरजनेऽखिलराजलोके
शोकाकुले कलयति स्म सकालधर्मा ।
किं कोऽपि दण्डधरदण्डनिपातचण्ड-
दण्डस्य गोचरमुपैति न जीवलोके ॥ २२ ॥
गङ्गाधरस्य निजबन्धुकृतैः प्रसादै-
रप्युग्रमत्सरभरः स तथैव तस्थौ ।
किं मुग्ध[1]·····पटलप्लुतविग्रहोऽपि
काकः कदापि च न मुञ्चति कालिमानम् ॥ २३ ॥
तेनालघोर्लघुधियाभिमराः प्रयुक्ताः
स्नेहामृताब्धिमनसोऽपि वधाय बन्धोः ।
तेऽप्यन्धकारसचिवा ययुरीप्सिताय
प्रायः कुकर्मविधयो हि तमःसहायाः ॥ २४ ॥

---

१. 'दुग्ध' इति स्यात्.

तत्र प्रविश्य च कथंचन ते निगूढाः
पृथ्वीधरे रहसि न प्रहरन्ति यावत् ।
तावन्नृपेण रणदक्षतयास्तशस्त्राः
सर्वेऽक्रियन्त महतां न मुधा हि तेजः ॥ २५ ॥
बद्धाः पुरा नरकपात·····केन
स्वाम्याज्ञया तदनु संनिहिताङ्गरक्षैः ।
पृष्ठाः कशाभिरभिताड्यभियाभ्यधुस्ते
दुष्कर्मकारितमिदं भवतोऽनुजेन ॥ २६ ॥
किं मारणेन निजदुष्कृतमारिताना-
मेषां यतो मृतकमारणकर्म निन्द्यम् ।
प्रोद्भूतया करुणया प्रिययेति सम्य-
ग्विज्ञप्यमान·····मुचन्नरेन्द्रः ॥ २७ ॥
ज्ञात्वाप्यपास्यमपराधविधानजन्य-
मालिन्यकश्मलतमं तमपायभूतम् ।
स्वच्छाशयः स युवराजपदे चकार
क्व स्नेहमोहितधियां स्वहितप्रवृत्तिः ॥ २८ ॥
राज्याभिलाषविवशः स नरेश्वरस्य
स्वान्ते विवेश कृतकृत्रिमभूरि भक्त्या ।
मायां विना किमपि चेष्टितमद्भुतं त-
न्मुह्यन्ति येन सुतरां सुधियां धियोऽपि ॥ २९ ॥
उन्मीलता कपटनाटकपाटवेन
गूढेन गाढमखिलां नृप पर्षदं च ।
अन्यानपेक्ष्य बहुमानगुरुप्रसादै-
र्लोकंपृणैश्च स गुणैः स्ववशीचकार ॥ ३० ॥

---

१. 'नरकपातकपातकेन' इति पाठे 'नरकपातजनकपातकेन शपथं कारिताः' इति व्याख्या भवेत्.

राज्ञोऽङ्गरक्षक इवातिसमीपवर्ति
पश्चात्पुरस्तवविधौ धृतबन्दिमुद्रः ।
राज्ये प्रमाणमयमेव ततो व्यधायि
स्वात्मेव तेन ददृशे च निगूढमायः ॥ ३१ ॥

तज्ज्येष्ठबान्धववधार्थमिदं चरित्र-
मस्येति कश्चन न तत्र विदांचकार ।
ब्रह्मापि लक्षयितुमक्षम एव मायां
मायाविनामतिशयेन हि सुप्रयुक्तात् ॥ ३२ ॥

निद्रादरिद्रनयनः क्षणदावसाने
संस्तम्भितोद्धृतकृपाणकरं निरीक्ष्य ।
गङ्गाधरं स्फुरति दैन्यमथान्यदा तं
भ्रातः किमेतदिति भूमिपतिर्जगाद ॥ ३३ ॥

चक्रेव कांचन न यावदुवाच वाचं
तावत्सखेव मनुजं स जगाद साश्रुः ।
आः पाप पातकमिदं पतितं त्वयीत्थं
विश्वासघातकतया विदधे यदुग्रम् ॥ ३४ ॥

स्वस्वामिनः श्रुतगिरो द्रुतमङ्गरक्षा-
स्तत्राययुर्बहुविधा युधपाणयश्च ।
ते वारिता नृपतिना नृपवंश यस्य
दण्डो विदेशगमनं हि महागसोऽपि ॥ ३५ ॥

जातेऽथ कर्णकुहरप्रणयिन्यमुष्मि-
न्गङ्गाधरस्य चरिते त्वरितं स दुःखः ।
तत्रैत्य पौरनिकरः परुषैर्वचोभि-
स्तस्यावधूलमिव····प्रथयांबभूव ॥ ३६ ॥

दोषागमेऽधिकरुचिः खलु राजपुत्र
कार्यो मयेव भवता बहुतेजसायम् ।

दृष्टेर्न गोचरमुपैति यथातथेति
प्राप्तोदयस्तव रविर्नृप शंसतीव ॥ ३७ ॥
आकर्ण्य तूर्णमिति मङ्गलपाठकस्य
प्रस्तावसुन्दरतया स तथा चिकीर्षुः ।
तत्कालमुच्छलदनुच्छकृपापरीत-
स्तन्मोचनो(?)पयिकचिन्तनतत्परोऽभूत् ॥ ३८ ॥
पावित्र्यभाजि पुरुषेऽथ कृतावतारा
देवी समीहितकृतेऽस्य कृतावनाङ्गिः ।
कृष्णागुरुप्रवरधूपसुगन्धपुष्पैः
पृष्टावदत्तव कुले नृपदेवताहम् ॥ ३९ ॥
माहाकुलीनचरितान्यवगण्यपुण्य-
पण्यापणानिव कुकर्म विधाय शङ्कः ।
कुर्वन्प्रहारमसिना त्वयि वीक्ष्य रोषा-
दस्तम्भि गाढमपराधवशान्मयायम् ॥ ४० ॥
निस्तम्भदेहमथ देवतया विधाय
क्ष्माभृद्विदेशगमनाय तमादिदेश ।
तेजः श्रियाधिकतमस्तमसेव तेन
मुक्तः स्फुरत्कुवलयश्च रराज राजा ॥ ४१ ॥
देवी पुनर्विनयिनं तमुवाच पुत्र
प्रीत्या प्रमोदभरनिर्भरचित्तवृत्तिः ।
सायं दिवा मणिरुचामिव चक्रवालं
भाग्यं दिनानि कतिचित्तव भावि मन्दम् ॥ ४२ ॥
गङ्गाधराद्यदमुतस्तव राज्यलक्ष्म्यां
अंशो भविष्यति तथा भवितव्यतायाः ।
तन्मा विषीद पुनराप्स्यसि तां स्वजेत्रि-
क्ष्मापाक्ष्ममेश समयेऽभ्युदयो हि भानाः(?) ॥ ४३ ॥

धर्मेण सद्गतिफलेन जिनोदितेन
स्वर्गापवर्गपुरगोपुरसोदरेण।
त्वन्मौलिरत्नमुकुटस्फुटपौनरुक्त्यं
नूनं भविष्यति भविष्यदमुद्रभद्रम् ॥ ४४ ॥
आकल्पकोटि विजयस्व महीमहेन्द्र-
राज्यश्रियेति जननीव तदाशिषं सा।
दत्वास्य पूजननमस्कृतिभूरिभक्त्या
हृष्टा ययौ निजविमानममानशोभम् ॥ ४५ ॥
गङ्गाधरः कचन तत्र चिरेण राज्यं
लेभे कथंचन पुनः सगुणोज्झितोऽपि।
उद्दामसंपदुदये खलु देहभाजां
पुण्यं प्रमाणमुदितं न गुणो·····वा ॥ ४६ ॥
आबालकालकलिताधिकवैरबन्धः
स्वभ्रातरं प्रतिचचाल स भूमिपालः।
राज्यं जिघृक्षुरपनिद्रपदाम्बुलोपा(?)
यूथं यथा द्विपपतिः प्रतियूथनाथम् ॥ ४७ ॥
दुर्भेद्यशालवलयेन परैरगम्यां
शीलप्रभावविभवे न सतीमिवास्य।
आवेष्टयन्निजबलैः स पुरी बलीया-
न्मूर्त्तीं रवेरिव महापरिवेषदोषः ॥ ४८ ॥
विद्याधरा इव ततो विषमास्त्रदक्षा
विद्याधरीपरिचयं मुमुचुर्न केचित्।
वीराः परे तु नितरामवमन्य तस्थुः
शालस्य तस्य कपि·····शीर्षकाणि ॥ ४९ ॥
सा दानवैः सुरपुरीव ····रैः सुखेन
गम्या न जातु गुरुमन्त्रिमतिप्रकर्षा।

स्वस्वामिकार्यरसिकास्तदपि द्विषन्त-
स्तद्वत्प्रभञ्जनकृते समुपाक्रमन्तः ॥ ९० ॥
लुण्टाककोटिपटुलुण्ठितबाह्यलोकः
कुट्टाकलोहलगुडावलिकुट्टितारिः ।
संख्यावतीतखनकैः खनितुं खनित्रैः
प्रारम्भि शालवलयो दहनेन दग्धुम् ॥ ९१ ॥
उत्तप्ततैलदहनज्वलदिन्धनादि-
प्राकारशृङ्गजनता क्षिपति स्म तत्र ।
उत्पातकाल इव घोर(?)मनःशिलाश्च
स्वैरं ववर्ष रिपुदर्पमिवाशु भुक्तम् ॥ ९२ ॥
कुप्यत्कृतान्तभटनिष्ठुरमुष्टिपात-
प्रायैरपायपरिवर्जितयन्त्रमुक्तैः ।
पाषाणगोलकशतैर्न्यपतन्विनेषु-(?)
र्नेशुश्च केचन बहिः प्रियजीवितव्याः ॥ ९३ ॥
सेनाविपक्षनृपतेरुपशालमूलं
कूलंकषेव कुलशैलतलं समेत्य ।
तद्भञ्जने विफलितौपयिकातिखिन्ना
क्षिप्रं पलायत ततः पुरसैन्यशस्त्रैः ॥ ९४ ॥
कृत्वाथ भेदितसमस्तपरिच्छदन्तं
राज्याच्युतं स विदधे गुरुमात्मबन्धुम् ।
भूयिष्टभावविधिना सुखमेव चक्रा-
त्सूत्रेण कुम्भमचिरादिव कुम्भकारः ॥ ९५ ॥
गङ्गाधरप्रभवभेदविधानबीज-
संजातमत्सरतया विरराज पर्षत् ।
नाथं यथार्थमपि तं रिपुवद्ददर्श
सर्वं विधौ हि विमुखे विमुखं जनस्य ॥ ९६ ॥

आदाय राज्यकमलामधमः स्वबन्धोः
सूत्रत्रकारमवमत्य महोपकारम् ।
गोत्रं निजे सुरतरङ्गवती सगोत्र-
गङ्गाधरः समजनि प्रथमः कलङ्कः ॥ ९७ ॥
एकाक्ययं भवतु दूरविदेशगामी
पूर्वं यथास्य वचनादहमित्यवेत्य ।
मुक्तोऽथ तेन स चचाल ततः पदाभ्यां
पौरैः पदातिरिव साश्रुभिरीक्ष्यमाणः ॥ ९८ ॥
शश्वन्मनोरथपथं स्फुरदात्मराज्यो-
पायस्तदा भ्रमदनःप्रमनाः क्षमायाम् ।
सेवां च न क्वचन कस्यचिदेष चक्रे
स्वातन्त्र्यराज्यमसमं स्ववशं हि तस्य ॥ ९९ ॥
योगीश्वरं क्वचन भूभृदघोरघण्टं
वीक्ष्याश्रयत्परिचयोपचयात्तु तस्य ।
सोऽभूद्दयालुहृदयोऽप्यतिरौद्रमुद्रः
क्षारं न किं लवणसागरतोऽम्बुमुष्टिम् ॥ १०० ॥
निःशूकमानसतया जितदन्दशूक-
स्तुल्यो ममेति मुदितात्स्वगुरो स दीक्षाम् ।
संप्राप पाणिमिव दुर्गतिकन्यकायाः
कन्याबलं विविधसिद्धफलं च मन्त्रम् ॥ १०१ ॥
तस्यानुभाववशतो द्रुतमन्तरिक्षे
भ्राम्यन्विलोक्य नृपसौधतलाथ बालाम् ।
एतामिवानयदयं निजमन्त्रसिद्ध्यै
प्रत्यक्षमेव तव देव पुरस्तु सर्वम् ॥ १०२ ॥
पृथ्वीपुरंदर·····मेव ताव-
दात्मीयवृत्तकथनं स्वयमुत्तमानाम् ।

किं तु त्वदीयमहनीयमहोपकार-
संसारवर्णधनिकैव करोति किंचित् ॥ ६३ ॥
शुभ्रांशुशुभ्रजिनहर्म्यविभानिभेन
कृत्योपहासमिव यत्त्रिदशेन्द्रपुर्याः ।
श्रीश्रीपुरेऽजनि नृपः किल तत्र शत्रु-
चित्रासलालसमना शशिनामधेयः ॥ ६४ ॥
तस्मिन्शुभोदयदयादमदानमुख्यैः
सर्वत्र विश्रुतगुणैर्गुणिनां धुरीणः ।
श्रेष्ठी बभूव धनदो जिनधर्मकर्म-
निर्माणसंनिहितसिद्धिवधूविलासः ॥ ६५ ॥
प्राणेशलोचनचकोरसुधांशुलेखा
लावण्यधाम ललना ललितेति तस्य ।
सूनुस्तयोस्त्वमभवः फलिताम्रवृक्ष-
स्वप्नेन सूचितधनो धनदत्तनामा ॥ ६६ ॥
कान्तैर्गुणैः कृतपदस्य तदायमेव
दोष(?)सूवाजनि जगत्त्रितयप्रतीतः ।
कुक्षिंभरिर्यदसि शारदचन्द्रसान्द्र-
ज्योत्स्नासपत्नरुचिभिर्गुणिनां यशोभिः ॥ ६७ ॥
त्यक्त्वा पुराणपुरुषं नववासलाभ-
लोभादिवाश्रितमुखोऽजनि तत्र वेदैः ।
विष्णुर्द्विजः प्रणयिनी कमला च तस्य
सूनुस्तयोः समुदपद्यत देवशर्मा ॥ ६८ ॥
जन्मान्तरं तदनुयातवतोः स पित्रोः
पक्षीव तत्क्षणदभूदपपक्षभावः ।
बाल्येऽप्यनिष्टघटनाप्रभविष्णुदौस्थः
कालानपेक्ष्य पतनः खलु कालदण्डः ॥ ६९ ॥

पाठीनवल्लभतमां द्विजराजविद्या-
निर्दम्भकेलिसदनं जलसङ्गमुक्तम् ।
बाल्येऽपि तस्य तदजायत धीरवत्त्वं
यन्मित्रमावहति कस्य न नाम चित्ते ॥ ७० ॥
दारिद्र्यविद्रुतमना न मनागपि स्वं
लेभे वदान्यजनतोऽपि गुणार्गलोऽपि ।
कृच्छ्रादवाप्तकशिपुस्तु निजान्तराय-
दुष्कर्मतोऽयमभवत्कृतरङ्कशङ्कः ॥ ७१ ॥
भिक्षां भ्रमन्न तु गृहं कणमात्रवृत्तिः
क्षुत्क्षामकुक्षिरनिशं मललुप्तकान्तिः ।
नव्यः शशीव जलदान्तरितप्रकाशः
श्रेष्ठच्यङ्गजेन ददृशेऽथ सता स तेन ॥ ७२ ॥
अत्यन्ताशुभकर्मसंचयवशान्निःश्रीकचूडामणिः
सद्योऽप्येष बभूव वैभववतां धुर्यो धनस्यैक्षणात् ।
किं नो फाल्गुनफल्गुवल्गनबलात्क्षीणोऽपि वृक्षः क्षणा-
ल्लक्ष्मीर्याति विलोलपल्लवलतालास्यप्रशंस्यां मधोः ॥ ७३ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के योगीन्द्रस्वरूपनिरूपणो नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

अथोपयेमे स गिरीन्द्रपुत्रीरूपा विलेपच्छिदुरस्वरूपाः ।
महर्द्धिविप्रान्वयसंप्रसूताः कन्याः प्रभूताः स्मरशस्त्रभूताः ॥ १ ॥
रूपं मनोहारि वयो नवीनमसाधुसङ्गो धनमत्ततेति ।
मध्ये मनः सौधमनङ्गवह्नेर्घृताहुतिक्षेप इवास्य जज्ञे ॥ २ ॥
वश्यः स्वकान्तोऽपि स धावति स्म सापायसङ्गासु पराङ्गनासु ।
किं केतकीषु स्फुटकण्टकासु न याति जातीः परिहाय भृङ्गः ॥ ३ ॥

उदीर्णरागां स्मितनेत्रपत्त्रामम्भोजिनीं सायमिव द्विरेफः ।
अथैकदासौ रतिविह्वलाङ्गः पराङ्गनां प्राप च बन्धनं च ॥ ४ ॥
स नीयमानः स्फुटदङ्गयष्टिरारक्षवीरैर्दृढबन्धबद्धः ।
वध्या च नो वध्यविडम्बनाभिर्विडम्बितोऽदर्शि धनात्मजेन ॥ ५ ॥
निवर्त्य तान्भूमिपतेः प्रधानमुपायनं भूरि धनं विधाय ।
तदाज्ञयामोचि स तेन सद्योदानं विसर्वव्यसनापहारि ॥ ६ ॥
नीत्वात्मसौधे कृतमज्जनादि सर्वोपचारं सकलाङ्गसुस्थम् ।
स्वदुष्कृतोत्पन्नघनानुतापं वच्छायवक्रं तमुवाच मित्रम् ॥ ७ ॥
यदत्र जन्मन्यपि जन्मभाजां क्षेत्रं स्फुरत्तीव्रविडम्बनायाः ।
कराद्यभावव्यधबन्धबाधाविधौ च दुर्वारमिवारिचक्रम् ॥ ८ ॥
यन्निष्कलङ्कस्य कुलस्य कामं कलङ्कपङ्काय सनातनाय ।
स्फुरद्विषोर्म्मप्रतिमश्रुतीनां हेतुश्च धिक्कारपरम्पराणाम् ॥ ९ ॥
असंख्यदुःखैः खलु दुःखितानां यन्तारकाणां नरकेषु भूयः ।
वज्रानलोल्लासिशिखासमूहलोहाङ्गनालिङ्गनलम्भनाय ॥ १० ॥
वैधव्यदुःखं कुलबालिकानां दौर्भाग्यभङ्गीमनपत्यतां च ।
वियोगदावानलदाहदौस्थ्यं तनोति दौर्जन्यमिवादधद्यत् ॥ ११ ॥
प्रत्यूहसंदोहलताप्ररोहनवाम्बुवाहप्रतिहस्तमेनम् ।
तन्मित्र दूरादपराङ्गनाङ्गसंघर्षसङ्गं त्यज तीव्रपापम् ॥ १२ ॥
(पञ्चभिः कुलकम्)
शीलव्रतस्याचरणादवश्यं पुण्यावधेः सिद्धिरसादिवातः ।
कल्याणकोटिः कलयांचकार कराम्बुजे कस्य न लास्यलीलाम् ॥१३॥
मूलं जगद्व्यापि यशोद्रुमस्य समस्तसंपत्प्रतिभू सनाभिः ।
प्राभावभानूदयपूर्वशैलः शीलं सलीलं परिशीलितं हि ॥ १४ ॥
रूपं जितायुग्मजिरस्वरूपं सत्त्वं पराभूतसमस्तसत्त्वम् ।
संपद्यते देहभृतां यदत्र पुष्पोद्गमः शीलतरोः स नूनम् ॥ १५ ॥
आदेयतायाः पदमद्वितीयं विश्वासभूर्विश्वसनीयतायाः ।
शीलं समस्ताभिमतार्थसिद्धेः प्रियैकसंकेतनिकेतनं च ॥ १६ ॥

उदग्रसौभाग्यमसंख्यसौख्यं न व्यर्थता क्वापि मनोरथानाम् ।
एकातपत्रं च यदाधिपत्यं तच्छीललीलायितमङ्गभाजाम् ॥ १७ ॥
विवेककल्पद्रुममञ्जरीव स्वर्लोकमार्गे शिबिकेव दिव्या ।
पृथुप्रतोली च विमुक्तिपुर्याः प्रिया न कस्यामलशीललीला ॥ १८ ॥
इमं गृहीत्वा धनदत्तदत्तं हितोपदेशं जलवत्तृषार्तः ।
पराङ्गनासङ्गनिवृत्तिरूपं चक्रे व्रतं तेन तु सातिचारम् ॥ १९ ॥
सोऽहं परस्त्रीषु रिरंसयाथ मालिन्यभाजा किमपि व्रतेन ।
सामानि कः पुण्यजनाधिपस्य देवोऽभवं कुण्डलनामधेयः ॥ २० ॥
एवंविधेनाप्यनुशीलितेन शीलेन संपत्तिरजायतासौ ।
किं पङ्कसंपर्कजुषापि जात्यरत्नेन लभ्येत न भूरिलाभः ॥ २१ ॥
तदैहिकामुष्मिकदुःखशाखि कूलंकषां संनिभमाश्रयन्ते ।
विशुद्धिसौरभ्यभराभिरामं शीलं शुभोदर्कपराय सन्तः ॥ २२ ॥
रङ्कोपमस्यापि ममाविरासीद्दृशाविलासः परिपूरिताशः ।
युष्मत्प्रसादादिति भूमिपाल सीमासि निष्कारणवत्सलानाम् ॥ २३ ॥
प्राप्तुं परं पारमपारपारावारस्य विश्वेश कदापि शक्यम् ।
न तु त्वदीयानुपमोपकारस्नेहप्रकारस्य मया कथंचित् ॥ २४ ॥
कुलक्रमायातजिनेन्द्रधर्मकर्मैककामो धनदः पिता ते ।
श्रीसुस्थिताह्वस्य युगप्रधानगुरोरुपास्त्याशिवशर्म लेभे ॥ २५ ॥
प्रोल्लासिता देव निजेव कीर्तिर्जिनस्य भक्तिर्भवतोऽतिमात्रम् ।
महोत्सवैर्व रञ्जितलोकलक्षैस्तच्छासनस्योन्नतिरप्यनल्पा ॥ २६ ॥
दानादिभिः पुण्यविशेषकृत्यैर्नृत्यद्यशोभिः सुरभीकृताङ्गम् ।
कटाक्षलक्षैर्नृपतेर्वलक्षैस्तां मोक्षलक्ष्मीर्मुहुरीक्षते स्म ॥ २७ ॥
नरेषु बद्धायुरिति त्वमिन्द्रलक्ष्मीमुपेक्ष्येव नृलोकपुण्यैः ।
राज्ञस्तनूजो हरिविक्रमस्याभूर्भूपतेर्विक्रमसिंहनामा ॥ २८ ॥
श्रुत्वेति पूर्वं निजजन्म पश्यञ्जातिस्मृते स्वं च तथा स्वमन्त्री ।
प्रीत्या नृपो देवमथालिलिङ्ग प्रवेशनाय स्वहृदीव सद्यः ॥ २९ ॥

देवः पुनः सप्रणयं प्रणम्य विज्ञो नृपं विज्ञपयांबभूव ।
कन्येयमाधातुमनाकुलत्वं पित्रोः पवित्रा भवतोपनेया ॥ ३० ॥
निशादिनी कुर्वदिव द्युरत्नसपत्नरत्नद्युतिभिर्विमानाम् ।
आरुह्य देवस्य गिरा नरेशः श्रीयोगिराजेन निषेव्यमाणः ॥ ३१ ॥
उपात्तकन्यार्धकटाक्षवीक्षा प्रसत्वरानङ्गतरङ्गिताङ्गः ।
शृण्वन्स रामारमणीयगेयं पुरं जितारेस्त्वरितं जगाम ॥ ३२ ॥

(युग्मम्)

यक्षेन्द्रवाक्चैत्ररथैर्नरेन्द्रस्तत्तस्तदीयोपवनेऽवतीर्य ।
आमोद्यमानः सुमनःसमूहैः समं विशश्राम परिच्छदेन ॥ ३३ ॥
उद्यानपालः सहसोपलक्ष्यतां तां कन्यकां प्रीतिमतीं पतिं च ।
तत्रेयवांसं रभसाज्जितारेर्निवेद्य जज्ञे परमोत्सवाय ॥ ३४ ॥
उत्कण्ठयोच्छृङ्खलया तदानीं सप्रैर्यतः क्षोणिवधूविलासी ।
तत्राभिगन्तुं पवनः प्रवृत्त्यानुकूलया पीत इवाब्धिपारे ॥ ३५ ॥
ततः सुवर्णाभरणादिदानैर्दारिद्र्यविद्रावणजागरूकैः ।
उद्यानपालं स महीमहेन्द्रः कृतप्रसादं विससर्ज सद्यः ॥ ३६ ॥
कस्तूरिकाकुङ्कुमवारिपूरैः सिक्तेषु मार्गेषु विकर्णपुष्पैः ।
प्रीत्या सहासेव नितान्तनृत्यद्भुजेव वायुप्रचलैर्ध्वजाग्रैः ॥ ३७ ॥
उत्तालकौतूहलनिर्निमेषैः सुरेशवेश्यैर्युवभिः सयोषैः ।
तदा सलीलं परितश्चलद्भिर्जितारिपूः स्वर्गपुरीव रेजे ॥ ३८ ॥

(युग्मम्)

अथाचलच्चञ्चलवाजिराजिखुरक्षतक्षोणिरजःप्रशान्तिम् ।
कुर्वञ्जितारिः करिकुम्भमूलगलन्मदाम्भोभिरभिक्षितीशम् ॥ ३९ ॥
उपागतं स्वागतिकं स पौरं नरेश्वरं विक्रमभूमिपालः ।
चकार योग्यप्रतिपत्तिमात्रं निरन्तरसेरविवेकनेत्रम् ॥ ४० ॥
महेश्वरस्यैव नगाधिराजो राज्ञस्ततस्तस्य नृपो जितारिः ।
सिंहासन·····स्य स्वमेव संपत्त्युचितं चकार ॥ ४१ ॥

सहेलमागत्य कृतप्रणामामुदश्रुनेत्राम्बुरुहां स कन्याम् ।
उत्सङ्गमारोप्य शिरश्चुचुम्ब प्रमोदपीयूषपयोधिमग्नः ॥ ४२ ॥
संलापपीयूषविशेषवृष्टिं संक्षेपतः क्षोणिपतिर्विधाय ।
तौ कल्पिताकल्पविभूषणाङ्गौ पुरीप्रवेशे प्रगुणावभूताम् ॥ ४३ ॥
हिरण्यरत्नाभरणः करीन्द्रः श्रीविक्रमक्षोणिभृताधिरूढः ।
दध्रे सुरेन्द्राध्युषितस्य शोभामभङ्गुराजङ्गमरत्नसानोः ॥ ४४ ॥
उदारशृङ्गारतरङ्गिताङ्गी विधाय कन्यां पुरतो जितारिः ।
ऐरावणस्पर्धिनि वारणेन्द्रे पूर्वाद्रिशृङ्गेऽर्क इवारुरोह ॥ ४५ ॥
अनुज्ञया विक्रमभूमिभर्तुः शिश्राय देवोऽपि तदा विमानम् ।
क्षोणीतला संभविभूरिसावेः कौतूहलं कन्दलयज्जनानाम् ॥ ४६ ॥
अथ प्रथीयश्चतुरङ्गरङ्गच्चमूभरन्यञ्चितभोगिराजः ।
समं समस्तैरचलज्जितारिः पुरं प्रति प्रीतिसमुत्तरङ्गैः ॥ ४७ ॥
निश्वासनादैः परितः स्फुरद्भिर्वाचालयन्भूधरकन्दराणि ।
तूर्यत्रिकैः पल्लवयन्नमन्दमानन्दमापूरितरोदसीकैः ॥ ४८ ॥
विचित्रयानैर्नगरप्रधानैः सामन्तमित्रैरनुगम्यमानः ।
सुखासनेषु स्थितिमीयुषीभिरन्तःपुरीभिश्च सुसंवृताभिः ॥ ४९ ॥
स राजहंसोचितपुण्डरीकैः प्रफुल्लकासोज्ज्वलचामरैश्च ।
तत्त्वन्नकालेऽपि शरत्समृद्धिं पुरीं विवेश प्रसरत्प्रतापः ॥ ५० ॥
(चतुर्भिः कलापकम्)
कैलाशशैलप्रतिमल्लमुच्चैः प्रसादमासाद्य नरेश्वरौ तौ ।
स्फुरद्विभूतिप्रतिभासमानौ रत्नासने शिश्रियतुः सभायाम् ॥ ५१ ॥
तत्रोल्लसल्लास्यभरं तरङ्गि गीतध्वनिस्फूर्जिततूर्यनादः ।
तयोस्तदा वारविलासिनीभिर्विततेनिरे कौतुकमङ्गलानि ॥ ५२ ॥
अभ्यर्थितस्तत्र स संभ्रमेण जितारिणा विक्रमभूमिपालः ।
भ्रूसंज्ञया तस्य जगाद देवः कन्यापहारानयनादि सर्वम् ॥ ५३ ॥
उत्कर्णमाकर्ण्य वितीर्णतोषं स विक्रमं विक्रमसिंहवृत्तम् ।
चिरं चमत्कारमयीव सर्वा सभा समं भूपतिना बभूव ॥ ५४ ॥

आदेशतः पत्युरथाजगाम तत्राल्पमात्रेण परिच्छदेन ।
.....प्रमोदप्रसरेण सार्धं देवी द्रुतं प्रीतिमती प्रहृष्टा ॥ ९५ ॥
श्रीविक्रमः कुण्डलकान्तिलिप्तकपोलभित्तेरथ कुण्डलस्य ।
वृत्तं स्फुरल्लेमनिबन्धनं तत्पुरः सभायाः प्रकटीचकार ॥ ९६ ॥
यशःपताकामिव मीनकेतोरास्येन दास्यं दिशती सुधांशोः ।
पित्रोपनीतां परमोत्सवेन कन्यां नृपस्तामथ पर्यणैषीत् ॥ ९७ ॥
श्रियःपतिः कौस्तुभमुख्यरत्नैरिवार्णवः प्रीतिसमुत्तरङ्गः ।
जामातरं भूपमपूजयत्तं धराधवः सिन्धुरवाजिदानैः ॥ ९८ ॥
शचीकुचाभोगविलासयोग्यैश्चीनांशुकैर्मौक्तिकहारिहारैः ।
तैस्तैर्महार्घैं रुचिभिः पदार्थैः पुत्र्योर्मुदं मेदुरयांचकार ॥ ९९ ॥
आभ्यां समं मूर्तजयप्रतापश्रीभ्यामिवान्येद्युरसीमसैन्याम् ।
दूरेऽनुगम्य क्षितिभृज्जयन्त्यां श्रीविक्रमामुत्कलयांचकार ॥ १०० ॥
पुरीं जयन्तीं वरवैजयन्तीं श्रीविक्रमः क्षोणिपतिः क्रमेण ।
सुरेश्वरस्यापि विलोकनीयमहोत्सवां प्रीतमना विवेश ॥ १०१ ॥
उत्कण्ठितायाः स भृशं प्रियायाः सुताय कण्ठे सुतजन्महेतुम् ।
न्यधत्त तं कुण्डलदत्तहारं पुण्योदयं मूर्तमिवात्मवंशे ॥ १०२ ॥
मुखप्रशान्तप्रविशद्गजेन्द्रसिंहेन्दुसुखप्रविलोकनेन ।
संसूचिताशेषविशेषसौख्यसाम्राज्यलक्ष्मीललिताधिपत्यम् ॥ १०३ ॥
तस्य प्रभावेण बभार गर्भं दिनेऽथ तत्रैव नृपप्रिया सा ।
सद्योऽप्यभीष्टार्थफलप्रसादाः सर्वत्र दिव्या हि भवन्ति भावाः ॥ १०४ ॥
(युग्मम्)
गर्भानुभावप्रभवद्विशिष्टसौभाग्यसंभारतरङ्गिताङ्गी ।
उदेष्यदुष्णद्युतिमण्डलायाः प्राच्यास्तुलां सा बिभरांबभूव ॥ १०५ ॥
आपन्नसत्त्वामभिवीक्ष्य देवीं हर्षप्रकर्षः समभून्न कस्य ।
तद्गर्भवृद्धेः पिशुनौ स्तनौ तु बभूवतुः श्याममुखौ तदानीम् ॥ १०६ ॥
नह्यावयोरुद्धतिमेष जातः सहिष्यते हन्त विनीतवृत्तिः ।
इति स्फुरत्खेदभरादिवोच्चैस्तस्याः स्तनौ श्याममुखावभूताम् ॥ १०७ ॥

कस्यापि गर्भे समुपागतस्य पुण्यात्मनः शुद्धयशोविलासैः ।
संस्पृश्यमानेव च पाण्डिमानं कपोलपाली कलयांचकार ॥ ६८ ॥
अलक्षितोच्चैर्नयने क्षिपन्ती साक्षेपमुष्णद्युतिमण्डलेऽपि ।
समस्ततेजस्विशिरोऽवतंसमसौ तनूजं जनयिष्यतीति ॥ ६९ ॥
गाम्भीर्यवार्धेरधिगर्भमस्य समागतस्यानुपमानरागात् ।
देव्याः शरीरे त्रिवलीतरङ्गा गङ्गेव लावण्यनिभादुपागात् ॥ ७० ॥
वसुंधराभारधुरंधरस्य सुतस्य गर्भे समुपागतस्य ।
तदानुभावान्मणिकुट्टिमेऽपि चचाल सामं वरपादपातम् ॥ ७१ ॥
मातुः प्रमोदप्रसरैरनन्यैः पितुः प्रतापैर्विहितारितापैः ।
सामन्तमन्त्रीशमनोरथैश्च सार्धं सुखेनैष बभार वृद्धिम् ॥ ७२ ॥
गजेन्द्रमारूढवती प्रियेण धृतातपत्राचलचामरश्रीः ।
कादम्बिनी चात्र पुरि भ्रमन्ती दानाम्बुना कन्दलयामि वृष्टिम् ॥७३॥
इति प्रियाया बहुपुण्यगर्भमाहात्म्यजं दोहदमाकल····म् ।
अपूपुरत्पौरपरम्पराभिर्व्यावर्णगर्भाभ्युदयं महेन ॥ ७४ ॥
रेजे कृतैः पुंसवनादिकृत्यैः स गर्भसंप्रीणनभावगर्भे ।
प्रशस्यसस्याङ्कुरमध्यभागा धरेव धाराधरवारिचारैः ॥ ७५ ॥
तैस्तैर्नृपोऽस्याः सुतजन्मचित्तः सर्वात्मनोल्लासमगादवन्ध्यैः ।
रसालशाखीव च दक्षिणस्याः समीरणैः सूचितसद्रसन्तैः ॥ ७६ ॥
अतुल्यकल्याणकलापसंपत्कीर्तिप्रतापोन्नतिभिः परीतम् ।
असूत सा सूनुमनूनकान्तिं साम्राज्यलक्ष्मीकुलधाम्नि लग्ने ॥ ७७ ॥
रवच्छलाद्गीतगुणालिनीभिर्बद्धा बभूवामरपुष्पवृष्टिः ।
मुक्ता कुमारं प्रति पुण्यलक्ष्म्या कटाक्षविक्षेपपरम्परेव ॥ ७८ ॥
तस्येह माहात्म्यसुधापयोधेर्डिण्डीरपिण्डभ्रममादधानः ।
नैर्मल्यमुच्चैरथ यामिनीषु पुपोष पीयूषमयूखमाली ॥ ७९ ॥
(युग्मम्)
दिशः प्रसन्नाः शरदीव नद्यो वातास्तदामोदभृतो जनाश्च ।
बभूवुरभ्रे सुरदुन्दुभीनां पयोदनादप्रतिमा निनादाः ॥ ८० ॥

तत्र क्षणेऽभ्येत्य सुहृत्स देवः श्रीविक्रमं विक्रमिणं प्रणम्य ।
प्रमोदयामास कथाप्रबन्धैर्विशेषतोऽशेषमनीषिहृद्यैः ॥ ८१ ॥
नितम्बबिम्बस्तनभूरिभारान्नितान्तमन्दक्रमणक्रमाणाम् ।
प्रलम्बमुक्ताफलहारयष्ट्या स्खलद्गतानामतिवेगभावात् ॥ ८२ ॥
उच्छ्वासपूर्णस्य सरोरुहाणामासेदुषीणां सविधे नृपस्य ।
वक्त्रं ततोऽभ्यङ्गजजन्मवार्तां वाचां विलासोऽजनि सुन्दरीणाम् ॥८३॥
(युग्मम्)
दिष्ट्या नरेन्द्राधिप वर्धसे त्वं श्रीप्रीतिमत्याः सुतजन्मनाद्य ।
चन्द्रोदयेनेव सितद्वितीया तिथेर्जगत्प्रीतविलोकनेन ॥ ८४ ॥
पीत्वेति वाचं श्रुतिशुक्तिकाभ्यां सुधामिवासां विदधे प्रसादम् ।
स स्वर्णवस्त्रैर्मणिभूषणैश्च कन्दैरिवैश्वर्यमहाद्रुमस्य ॥ ८५ ॥
राज्ञस्तथान्यस्य सभाजनस्य तत्रोत्तरीयाणि मनोहराणि ।
निरन्तरस्वामिपदप्रसादश्रीशासनानीव तदा ददुस्ताः ॥ ८६ ॥
समादिदेशाथ नियोगिवर्गं सर्वत्र पुर्यां परमोत्सवाय ।
श्रियोऽनुरूपा सुतजन्मकाले न जायते कस्य महाप्रवृत्तिः ॥ ८७ ॥
निरीक्षितुं नन्दनमुत्सुकोऽसौ कल्पद्रुमं जातमिवात्मगेहे ।
निवेद्यमानागमनः पुरोगैर्विशांपतिः सूतिगृहोन्मुखोऽभूत् ॥ ८८ ॥
द्वारेन्द्रनीलद्युतिमांसलाभिः समन्ततो वन्दनमालिकाभिः ।
रराज····दिव्यमहोत्सवश्रीः कपोलपत्राङ्कुरविभ्रमाभिः ॥ ८९ ॥
यूपैर्यदूर्ध्वैर्मुशलैश्च भाति कौसुम्भरागारुणवस्त्रमध्यैः ।
सपद्मरागाङ्गदबाहुयुग्मैरिवोन्नतैर्मङ्गलदेवतानाम् ॥ ९० ॥
श्रीकुण्डलाख्येन सुरेण····यत्प्रेषिताभिर्निजसुन्दरीभिः ।
राजन्यकान्ताभिरपि प्रमोदात्प्रारब्धकर्णामृतवीचिगीतम् ॥ ९१ ॥
यस्मिन्कुमारस्तु पनेच्छुरभ्रगङ्गासितोल्लोचमिषादिवागात् ।
यच्चन्द्रकान्तामलभित्तिभागकस्तूरिकार्द्रस्तबकैर्वितश्रि ॥ ९२ ॥
मधुव्रतव्रातनिपीयमानसौरभ्यपुष्पप्रकरं यदुच्चैः ।
भृतान्तरिक्षैर्गुरुधूपधूमैर्घनभ्रमान्नर्तिमयूरवृन्दम् ॥ ९३ ॥

प्रेङ्खोलदुच्छृङ्खलकान्तिरत्नमालावचूलि·····वर्धितश्रि ।
यदन्तरङ्गीकृतदीप्तदीपज्योतिः कुमाराङ्गमरीचि चक्रे ॥ ९४ ॥
सर्वेन्द्रियाणामपि यत्समन्तादानन्दसाम्राज्यमिवादधानम् ।
स सूतिकावेश्म तदा विवेश विशांपतिः कौतुकनिर्निमेषः ॥ ९५ ॥
(सप्तभिः कुलकम्)
ससंभ्रमाथ प्रतिपत्तिपूर्वमुर्वीपतेरासनमाश्रितस्य ।
ततोऽनुजन्मानमिव स्मरस्य सादर्शयन्नन्दनमिन्दुकान्तम् ॥ ९६ ॥
तमङ्कमारोप्य निरूप्य सम्यक्सल्लक्षणैर्लक्षितकाययष्टिम् ।
अमन्यत क्षोणिपतिर्धरित्रीभारं समुत्तीर्णमिव स्वदोष्णः ॥ ९७ ॥
कुम्भस्तनीभिर्नवहेमकुम्भैः पण्याङ्गनाभिः स्वपितः सरागम् ।
स कल्पिताकल्पविभूषणश्रीः सद्यः सभामण्डपमाससाद ॥ ९८ ॥

कुरङ्गैरुत्तुङ्गै रणदनणुघण्टैः करटिभिः
सुवर्णैः सद्वर्णैर्वसननिकरैः सुन्दरतरैः ।
त्वयि स्वैरं वर्षत्यधिप न शिरः केन दुधुवे
विमुच्यैकं क्षोणीभरपरवशं पन्नगपतिम् ॥ ९९ ॥
एकच्छत्रं विलसति सुखस्याद्य साम्राज्यमुच्चैः
सर्वस्यापि प्रभवति शुभोदर्कसूरिष्टसिद्धिः ।
तैस्तैर्भावैर्भुवनसुभगं भावुकैः केन चित्रै-
श्चित्रीयन्ते सुकृतसुलभे त्वत्कुमारोदयेऽत्र ॥ १०० ॥
इत्थं स वैतालिकचक्रवालमुखाम्बुजप्रोल्लसितैर्वचोभिः ।
सुधातरङ्गैरिव पूर्णकर्णः स्वपुण्यलीलां परमाममंस्त ॥ १०१ ॥
विशेषविहितश्रियं विविधदानहृष्यज्जनं
स्वबन्धुजनतोचितीकृतचमत्कृतिर्भूपतिः ।
परेऽहनि शुभे सुतं स्वकुलनन्दनं नन्दनं
जयन्त इति संज्ञया द्रुतमलंचकाराद्दतः ॥ १०२ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीशब्दाङ्के पुत्रजन्मोत्सवो नाम षष्ठः सर्गः ।

सप्तमः सर्गः ।

पुष्पदन्तरुचि कुण्डलद्वयं रत्नराजिमुकुटं च भासुरम् ।
भक्तिभूषितमनास्ततः सुरः स व्यधान्नरपतेरुपायनम् ॥ १ ॥
तस्य भास्वदवरोधसुभ्रुवां मौलिरत्नमिव जीवितेश्वरीम् ।
अर्चति स्म स विभूषणाम्बरैर्विस्फुरत्किरणचित्रिताम्बरैः ॥ २ ॥
उल्बणप्रणयसंचयाञ्चितस्तस्य राजतनयस्य चामरः ।
अङ्गदं विपदपाकृतिक्षमं स व्यधत्त भुजदण्डमण्डनम् ॥ ३ ॥
श्लाघ्यमङ्गलदशोज्वलं····सर्वमप्यकृत सत्क्षमाभृतः ।
सप्रसादमनसो हि देवता सूनृते तनुमतां समीहितम् ॥ ४ ॥
पूजनीयमभिपूज्य पूजया प्राज्यया सुरमनश्च(श्च)रश्रियम् ।
प्रेमदुग्धजलधेरिवोर्मिभिस्तं वचोभिरवदन्नृपस्ततः ॥ ५ ॥
पुत्रजन्मविषयो मनोरथः क्षिप्रमेव सफलत्वमासदत् ।
त्वत्प्रसादवशतः सुरोत्तम स्यान्न वा किमिह कल्पपादपात् ॥ ६ ॥
मय्यभूस्त्वमुपकारकृत्तथा नो यथासि सुख(?)वक्तुमीश्वरः ।
भूपतेरिति निशम्य जल्पितं तं प्रणम्य स तिरोदधे ततः ॥ ७ ॥
कुण्डलामरनियुक्तदेवतापञ्चकेन परिपालितः सुखम् ।
शुक्लपक्ष इव चन्द्रमाः क्रमाद्वृद्धिमाप सुदृशोः सुधाञ्जनम् ॥ ८ ॥
अङ्कतोऽङ्कमपरं स नन्दनः क्ष्माभृतः सदसि जीववत्प्रियः ।
राजहंस इव पङ्कजन्मनः पङ्कजान्तरमशिश्रियत्तदा ॥ ९ ॥
कान्तकूर्चकचकर्षणैरसौ स्पर्शतश्चपलकोमलाङ्गजैः ।
मन्मनैश्च वचनैर्ददे पितुर्वागगोचरसुखोदयां दशाम् ॥ १० ॥
तत्र तत्र गमनं स्खलद्गतिक्रीडनानि सुभगानि शैशवे ।
प्रक्षणे क्षणरसे(?)ष्वनादरं चक्रिरेऽस्य वसुधाविलासिनः ॥ ११ ॥
आकलय्य सकलाः कलाः कलाचार्यतोऽपि सततोऽधिकोऽजनि ।
हन्त कौशलगुणेन धीमतां धीविलासविधवो ह्यनेकधा ॥ १२ ॥
तेन नीरधिरिवेन्दुना ततश्चन्द्रमौलिरिव शक्तिपाणिना ।
स्वर्गिणामिव पतिर्जयेन स श्रीजयन्ततनुजन्मना बभौ ॥ १३ ॥

उद्यदङ्गगुरुरामणीयकं कामिनीनयनमोहनौषधम् ।
प्राप यौवनमथैष पुण्यधीर्यत्त्रिवर्गपरभागभूषितम् ॥ १४ ॥
अन्यदा तु युवराजमात्मजं श्रीजयन्तमकृताकृतिस्मरम् ।
पर्यणाय यदथैष भूभुजां कन्यकाश्चतुररूपसंपदः ॥ १५ ॥
तत्र संततमुदारमानसे प्रार्थना सफलतां गतार्थिनाम् ।
नत्वनङ्गवशवर्त्तिचेतसामन्यदीयमृगशावचक्षुषाम् ॥ १६ ॥
शस्त्रशास्त्रपरभागवेदिनां प्राप स प्रतिभया धुरीणताम् ।
निर्जितेन्द्रियतया च नान्तरैर्बाध्यते स्म सुतरामरातिभिः ॥ १७ ॥
कोऽपि विक्रमकथा तथा प्रथामाप तस्य भुजवीर्यशालिनः ।
कर्णकोटरगता यथा द्विषामादधे मनसि शल्यतुल्यताम् ॥ १८ ॥
तेन कीर्तिलतिका तथाधिकं भूरिदानसलिलैरसिच्यते ।
तारकाकुसुमशालिनी यथा विश्वमण्डपतलेऽपि नो ममौ ॥ १९ ॥
विक्रमक्षितिपतिर्न केवलं पुत्रशालिषु बभार धुर्यताम् ।
तेन दर्पितरिपुप्रमाथिना पार्थिवेष्वपि धरातलेऽस्खिले ॥ २० ॥
यत्र यत्र सुकुमारपुंगवः संचचार सुभगाग्रणीः पथि ।
तत्र तत्र तमनङ्गविभ्रमात्पूजयन्ति नयनोत्पलैः स्त्रियः ॥ २१ ॥
तस्य कापि परमौचितीगुणस्तोममुत्तमतमं व्यभूषयत् ।
यामिनीरमणरश्मिभासुरं तारहारमिव नायको मणिः ॥ २२ ॥
पूर्वजन्मशुभपासनामृतैर्वर्धितः सुकृतकल्पपादपः ।
प्राज्ययानुपमया फलश्रिया तं तरङ्गितमुदं तदाकृत ॥ २३ ॥
जाड्यतः सकलविश्वदुःसहं संनिगृह्य शिशिरं कुनायकम् ।
तज्जयोर्जित इवाथ सेवितुं श्रीजयन्तमिनमाश्रयन्मधुः ॥ २४ ॥
श्रीवसन्तनृपतेः समागमे कोकिलध्वनिरुदच्छल···· ।
बन्दिवृन्दवदनाम्बुजान्तरं प्रोल्लसज्जयजयारवोपमः ॥ २५ ॥
दाक्षिणात्यपवनो यथा यथा प्रासरत्प्रसृमरस्मरानलः ।
प्रेर्यमाण इव तेन भानुमानुत्तरां दिशमगात्तथा तथा ॥ २६ ॥

केरलीकुचतटीविलासिनः कुन्तली चलितकुन्तलाञ्चलाः ।
सिंहलीवदनचुम्बनप्रियाः संचरन्ति मलयाचलानिलाः ॥ २७ ॥
तुल्यतां दयितचुम्बनोचितैः कामिनीविकचवक्त्रपङ्कजैः ।
भृङ्गपेयमधुभिर्ययासुभिर्वारिजैः समुदिताविवारिषु ॥ २८ ॥
कौन्दपुष्पमपहाय जर्जरं निर्गुणं धनुरजायताधिकम् ।
चम्पकप्रसवचापमण्डलीलाभलोलुभमना मनोभवः ॥ २९ ॥
चञ्चरीकनिकरम्बचुम्बिताश्चम्पकेषु कलिकाश्चकासिरे ।
मन्मथेन पथिकप्रमाथिना निर्मिता विषशिखा इवेषवः ॥ ३० ॥
माधवप्रणयिना मनोभुवा मानखण्डनविधौ मृगीदृशाम् ।
कोमलोऽपि कलकण्ठकामिनीपञ्चमध्वनिरमीयतास्त्रताम् ॥ ३१ ॥
यद्विलिह्य सहकारमञ्जरीः कूजितां किमपि बालकोकिलैः ।
तद्बभार विषमेषुकार्मुकज्यानिनादपदवीं विलासिषु ॥ ३२ ॥
काननेषु कुरुविन्दपाटलाः पाटला सरवरूथिनीमुखे ।
सर्वतो बत विभान्ति लोहिता वैजयन्त्य इव साधवोद्धृताः ॥ ३३ ॥
चञ्चरीकनिकरः कृपापरः शाखिनां शिरसि संरुवन्मुहुः ।
व्याजहार विरहिप्रमाथितां मन्मथस्य पथिकव्रजेष्विव ॥ ३४ ॥
तत्र चित्रितसमस्तकाननेऽनेहसि क्षपितविप्रयोगिणि ।
प्राप तापकलितेषु मानिनीमानसेषु मदनोऽतिविस्तृतिम् ॥ ३५ ॥
दक्षिणानिलचलल्लताभुजां वीक्ष्य ताण्डववतीं मधुश्रियम् ।
मन्मथेन विभुनापवर्जितानीव नीपकुसुमानि रेजिरे ॥ ३६ ॥
क्षीरनीरनिधिचारिमङ्गुलं मुञ्चतापि करजालमुज्ज्वलम् ।
रोहिणीप्रणयिना विनिर्ममे स्वैरिणीजनमनो मलीमसम् ॥ ३७ ॥
विषययुक्तनवसुभ्रुवां सखीवृन्दमाकुलमनो तु मन्दिरम्(?) ।
पृच्छदुच्चकलकोकिलध्वनिः स्तम्भनौषधमिदं तदाभ्रमत् ॥ ३८ ॥
मारुतं शरमुपाददे स्मरः कौसुमं तमपहाय सायकम् ।
नूनमादधदनूनसौरभं यन्ममाथ मलयानिलोऽध्वगान् ॥ ३९ ॥

अध्वगप्रणयिनीषु दुर्दशां वीक्ष्यते करुणयेह मल्लिका ।
रोदतीव विपुलाश्रुभिर्भृशं स्पन्दमानमकरन्दबिन्दुभिः ॥ ४० ॥
यद्बभूव सहकारमञ्जरीशुद्धकण्ठकलकण्ठकूजितम् ।
मानिनीनिवहमानि संततेस्तत्प्रवासपटहस्फुटक्रियम् ॥ ४१ ॥
माधवेन कुसुमेषुभूपतेः क्रीडनाय कलधौतपर्वताः ।
निर्मिता इव विभान्ति चम्पका सेरगौरकुसुमावगुण्ठिताः ॥ ४२ ॥
कामविश्वविजयप्रशस्तयः पुष्पसंचयविनिर्मिताक्षराः ।
चैत्रमासि नवमालिकालता लोकलोचनकृतोत्सवा बभुः ॥ ४३ ॥
स्वर्णतोरणविलासदोलयान्दोलनैः कृतगतागतैर्मुहुः ।
वीक्षितुं त्रिदिववामचक्षुषोऽभ्यासभङ्गिमिव कुर्वतेऽङ्गनाः ॥ ४४ ॥
श्यामवृत्तमुपरिस्थषट्पदं(?) किंशुकस्य कुसुमं नवं बभौ ।
स्वं निधानमिव मुद्रितं जतुन्यासतः सुरभिणाधरोर्ध्वयोः ॥ ४५ ॥
किंशुकस्य शुकचञ्चुचातुरीचारिमाणि कुसुमानि रेजिरे ।
विभ्रमं मधुवधूवनश्रियो वाससां दधति शोणरोचिषाम् ॥ ४६ ॥
त्यक्तपात्रनिकरः समन्ततश्चया(?) विरहितोऽस्मदाश्रयः ।
इत्यमूनि मधुकानि दुःखितानीव पेतुरवनीतले ततः ॥ ४७ ॥
पाटला विकचपुष्पसंपदोऽन्यैव काचन लिपिर्विजृम्भते ।
दिक्षु वल्गति यदीयसौरभेऽन्यत्र सौरभकथैव मुद्रिता ॥ ४८ ॥
माधवी विकचपुष्पलोचनैः पश्यतीव मधुभूपसंपदम् ।
यूथिकापथमुपानयद्दृशां क्षीरसागरमिव स्वकान्तिभिः ॥ ४९ ॥
प्रेयसां नवसमागमे मधौ तत्क्षणोद्यदनुरागसागरे ।
अर्पयन्ति बकुलश्रियः स्रजं स्निग्धमात्महृदयं च सुभ्रुवः ॥ ५० ॥
वीक्ष्य पुष्पितमशोकशाखिनं त्र्यम्बकाम्बकहुताशशङ्कया ।
उद्विलासलहरीस्तरङ्गिणीरङ्गनाः शरणिमादधे स्मरः ॥ ५१ ॥
चर्चरीष्वनुपदं विलासिनीवृन्दगीतकलपञ्चमध्वनिः ।
उल्ललास कुसुमेषुभूपतेः कोपहुंकृतिरिवावनीजये ॥ ५२ ॥

चर्चरीषु परमोत्सवे मधौ स्त्रैणविभ्रमविलासनर्तनैः ।
कौशुकैः सरसतां नये ययुर्योगिनो दृषद एव तेऽथवा ॥ ९३ ॥
घर्मवृष्टिशिशिरैररुंतुदाः सर्वदैव ऋतवोऽपरेऽङ्गिनाम् ।
सर्वकामदतया पुनः····श्रीवसन्तसमयः प्रियंकरः ॥ ९४ ॥
कस्य कस्य न तरोर्यथोचितैः श्लाघ्यपुष्पफलपत्रसंचयैः ।
रामणीयकविशेषनाटके सु(सू)त्रधारपदवीं दधौ मधुः ॥ ९५ ॥
सर्वतः प्रथितरामणीयकं प्रायसो जितसमाधिवैभवम् ।
योगिनामपि किमन्यदुच्यते स्त्रीविलाससरसावधौ(?) मधौ ॥ ९६ ॥
गन्धलुब्धमधुपाङ्गनारुतव्याजगीतगुणपुष्पभूषणम् ।
द्वारपालविनिवेदितस्ततोऽद्या(ध्या)नपाल उपभूपमाययौ ॥ ९७ ॥
नासिकापुटनिपेयसौरभैः पञ्चवर्णकुसुमैर्विनिर्मितम् ।
पुष्पकन्दुकमयं समर्पयन्विक्रमक्षितिपतिं व्यजिज्ञपत् ॥ ९८ ॥
त्वं कुमार इव देव सांप्रतं श्रीवसन्तऋतुरेष राजते ।
यः प्रयाति सुमनः प्रशस्यतां विश्वजिष्णुविषमायुधोदयाः ॥ ९९ ॥
मेघमण्डलविलोकनोल्लसत्तोषताण्डवजुषः शिखण्डिनः ।
तत्र तूर्णमतिशेरतां जना दर्शनेन भवतो मधूत्सवे ॥ १०० ॥
त्वन्निदेशवशतोऽथवा भवन्नन्दने विशति काननक्षितौ ।
तत्र नन्दनवनावनाविव स्वैरमेतु परिपूर्णतां महः ॥ १ ॥
आज्ञया पितुरथ प्रथीयसा वैभवेन नलकूबरोपमः ।
प्राप चैत्ररथचारु तद्वनं नन्दनः सुवदनाभिरावृतः ॥ २ ॥
सानुरागहृदयं सुलोचना लोचनैर्मधुकरैरिवोच्चकैः ।
शिश्रिये स सकलाङ्गचारिमासीमसौरभविभूतिलोलुपैः ॥ ३ ॥
गीयते स्म सुदृशां गणैस्ततस्तच्चरित्रमतिमात्रचित्रदम् ।
कौतुकादुपनतैर्यथाधिकं किंनरैरपि शिरो व्यधूयते ॥ ४ ॥
सर्वलोकरतिदानमात्मनो दर्शनान्नयवतो मते मतम् ।
इत्यमुष्य किल कुण्डलच्छलाच्छंसति स्मरवचोहरद्वयी ॥ ५ ॥

अस्य विद्धि सखि किंचनाद्भुतं लोचनत्रयमुमापतेरिव ।
एकमुल्बणविवेकलक्षणं विश्वयौवतविमोहने परे ॥ ६६ ॥
भाति हारलतिकास्य वक्षसि प्रार्थितास्पदनिवासतोषतः ।
उत्तरीयकमिवेन्दुविभ्रमं नृत्यवेगवशतश्च्युतं श्रियः ॥ ६७ ॥
अस्य वीक्ष्य ललितं तथाङ्गना जल्पितं हसितमिङ्गितं गतम् ।
सानुरागमति ताः परस्परं वर्णनं श्रवणगोचरं व्यधुः ॥ ६८ ॥
(चतुर्भिः कलापकम्)
हावभावसविलासविभ्रमैस्तत्र तत्र विहिताप्सरोभ्रमैः ।
विश्वविस्मयरसं स यौवतैर्गीतनृत्यकलयान्वभाव्यत ॥ ६९ ॥
तुङ्गविंशशिखराग्रनर्तनैश्चक्रचोरविजयिभ्रमिक्रमैः ।
लोसिकातिशयदुष्करैर्नृणामाचकर्ष हृदयं समं धनैः ॥ ७० ॥
नाटकाभिनयनैर्निरन्तरैस्तन्नदीष्णशुभपात्रसूत्रितैः ।
भूरिभङ्गिरसपाकपेशलैस्तत्र सोऽभजदपूर्वकौतुकम् ॥ ७१ ॥
विश्वविश्ववलयादुपागतैः कौतुकादिव समस्तकौतुकैः ।
स व्यधत्त जननेत्रपारणां श्रीजयन्तयुवराजशेखरः ॥ ७२ ॥
रूपयौवनविलासऋद्धिभिर्दानवर्षुकतयाद्भुतैर्गुणैः ।
तत्र तस्य सुभगं भविष्णुता कस्य कस्य न ननर्त चेतसि ॥ ७३ ॥
काञ्चीकाञ्चनकिंकिणीरणरणत्कारापनिद्रस्मरं
दोलान्दोलनकौतुकं मृगदृशामालोक्य लोकोत्तरम् ।
तत्रासक्तमनाः प्रयाति नलिनीकान्तः प्रशान्तैर्हयै-
र्मन्दंमन्दमतीव वृद्धिमधिकां पुष्णन्त्यमी वासराः ॥ ७४ ॥
एते श्रीखण्डखण्डैः प्रियसुहृद इव प्रापितामोदमुद्रा
दोलाखेलत्तिलङ्गीघनजघनतटस्फारफारैः स्खलन्तः ।
कावेरीवीचिचाटुव्यतिकरसुभगंमन्यसीमा रमन्ते
वाताः स्पर्शच्छलेन श्रवदमृतरसाश्चैत्रमैत्रीपवित्राः ॥ ७५ ॥
ज्योत्स्ना पञ्चमकोकिलध्वनिवनश्रीमण्डलाधीश्वरं
स्नेणप्रेमविलास····ललितैः पुष्टं महामन्त्रिभिः ।

साम्राज्यं मधुरं मधोर्मधुसखस्वाधीनसंपद्धरं
वैराग्याञ्चितचेतसामपि चिरं केषां न रागास्पदम् ॥ ७६ ॥
स्त्रैणैः पादप्रहारैः कुचकलशतटीताडनैरीक्षणाद्यै-
र्निश्चिन्तन्ये(?)प्यशोकप्रमुखविटपिनां पुष्पराजिच्छलेन ।
व्यक्तः कामानुरागः प्रसरति पुलकैः कामुकानामिवास्य
प्राज्ये राज्ये विलासातिशय इह मधौ कस्य धत्ते न चित्रम् ॥ ७७ ॥
इति बहुविधविस्मयाभिरामा नृपतिनयेन विलोकिता वनश्रीः ।
इयमतिसुमनाः प्रियेण सुभ्रूर्निजमिव रूपफलं समाससाद ॥ ७८ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीशब्दाङ्के वसन्तवर्णनो नाम सप्तमः सर्गः ।

अष्टमः सर्गः ।

अथ सरसमपश्यत्तत्र तां श्रीजयन्तो
युवतिनिवहदोलान्दोलनानन्दकेलिम् ।
त्रिभुवनजनहृद्यां यत्र सौभाग्यभङ्गीं
भजति रतिविलासी पूर्णिमायामिवेन्दुः ॥ १ ॥
सरभसमिह दोलान्दोलनैः कापि भाति
श्रवणयुगलखेलत्कुण्डलैः पक्ष्मलाक्षी ।
उभयतटविटङ्कप्रोल्लसच्चन्द्रसूर्या
प्रसृमरगुरुशोभा व्योमलक्ष्मीरिवोच्चैः ॥ २ ॥
कुचकलशनिपातप्रोच्छलत्तारहार-
प्रचुररुचिवितानैर्व्योम्नि दोलाधिरूढा ।
प्रबलपवनरङ्गद्व्योमगङ्गातरङ्ग-
श्रियमिव विदधाना भाति काचिन्नतभ्रूः ॥ ३ ॥
वियति चलितदोलान्दोलिताया मृगाक्ष्याः
पटुपवनतरङ्गैरुत्तरीयेऽपनीते ।
दिशि दिशि विसरद्भिर्लोललावण्यपूरै-
र्नृहृतहृदयनेत्राश्चक्रिरे के युवानः ॥ ४ ॥

इयमिह हि सलीलान्दोलिता व्योम्नि दोला
सुभगगुणविलासा चापयष्टिः स्मरस्य ।
यदि भवति सबाणा वाणिनीभिः सदासौ
त्रिभुवनमपि जेतुं हेलयालंभविष्णुः ॥ ५ ॥

व्रजति वियति काचिल्लोलदोलाधिरूढा
सह युवजननेत्रैः पद्मपत्रायताक्षी ।
चलति तदनु धन्यंमन्यदीर्घप्रसर्प-
द्भुजगभुजधृतासौ किं चितैरेव सार्द्धम् ॥ ६ ॥

नवनवरसभङ्ग्याः श्रीजयन्ताभिधान-
व्यतिकरकलगीतध्वानतानच्छलेन ।
चकितहरिणनेत्राः प्रह्वमाह्वा नयन्ति
स्मरमिव निजदोलान्दोलनालोकनायाः ॥ ७ ॥

अधरितरतिरूपं कामिनीचक्रवालं
दिशि दिशि गुरुदोलाकेलिकौतूहलैस्तैः ।
विदधदिव बभासे श्रीजयन्तस्य नेत्रा-
मृतलहरिसपत्नैरातिथेयं प्रथीयः ॥ ८ ॥

त्वरितमथ जयन्तीनाथसूनुः प्रसूना-
वचनविरचनाय प्रेयसीचक्रवालैः ।
मधुरवचनवीचिप्रेरितः संचचार
प्रियुवतिवशे वा किं न यूनां मनांसि ॥ ९ ॥

करतलपरिसर्पत्ताम्रकान्तिच्छलेन
प्रबलघुसृणपङ्कैरर्चनं संविधाय ।
अभिनवतरुलक्ष्म्याः प्राज्यसौरभ्यपुष्पा-
वचयविरचनायां चातुरी चक्रिरे ताः ॥ १० ॥

रभसतरलिताभिस्ताभिरुच्चीयते स्म
स्मितकुसुमसमूहस्तत्र बालद्रुमाणाम् ।

तदनु करजनिर्यत्कान्तिपीयूषवर्षैः
क्षतकृत इव तापः शान्तिमानीयते स्म ॥ ११ ॥
कुसुमशरनरेन्द्रस्यादुधोपायनानि
प्रगुणयितुमिवैका(?)कामिनी पुष्पजातम् ।
त्वरितमवचिकायाक्रम्य रम्यस्तनान्तैः
शिखरिशिखरशाखाशेखरेभ्यः सुखेन ॥ १२ ॥
भ्रमररवमिषेणालापपीयूषवर्षाः
स्मितरुचिरतरस्याः सौरभेणाभिरामाः ।
इह हि सुमनसोऽपि स्त्रैणजात्या समाना-
स्तदपि समुदमूल्यं ताभिरुद्यन्मदाभिः ॥ १३ ॥
प्रसृमरमकरन्दोद्दामलक्ष्मीनिवासे-
ऽनुपमकुसुमकोशे लुप्यमाने समन्तात् ।
नरपतिरमणीभिः कोऽप्यलीलां विरावः
समजनि हृतचित्तः को न वा पूत्करोति ॥ १४ ॥
गगनतलतरङ्गत्तुङ्गगौराङ्गनाभिः
क्षितिधवयुवतीनां द्रागलक्ष्मीकृतेषु ।
अवचयविधिरासीच्चम्पकेषु स्मितेषु
भ्रमरमिथुनलीलालीनतालोकनेन ॥ १५ ॥
चरणकमलमेकं पादमूले सहेलं
मृदुभुजयुगलं च स्कन्धदेशे निवेश्य ।
सरससुरतकेलिप्रोक्तमार्गेण काचि-
त्प्रियमिव तरुमुच्चैरारुरोहायताक्षी ॥ १६ ॥
अलिकुलरमणीयैर्मांसलः पुष्पजातैः
सरभसमधिरूढः केसरः सुन्दरीभिः ।
त्रिभुवनसुभगाभिः पुष्पचापस्य पुण्यैः
फलित इह नवीनः कल्पशाखीव रेजे ॥ १७ ॥

मधुकलसमनाभिं स्फारसौरभ्यसारं
कुसुमनिवहमेतां यं गृहीतुं प्रयान्ति ।
तदभिरुचितवासैस्ता अदृश्यन्त भृङ्गैः
परपरिभवकारी कः किल प्रीतिमेति ॥ १८ ॥

तरुशिखरगतायास्तत्र कस्याश्चिदुच्चै-
र्मरकतमणिरोचिर्मेचका काययष्टिः ।
विकसितसितपुष्पैर्बिम्बितैर्द्योतते स्म
स्फुरितरुचिरतारा व्योमवीथीव रात्रौ ॥ १९ ॥

कुसुममधिरसान्द्रैरावृतं तत्र पत्रैः
परमपरिमलाढ्यं सस्वनं संचरद्भिः ।
मधुकरनिकुरम्बैः कः पिबेत्यावचिक्ये
भवति हि मलिनानां संगमो भङ्गहेतुः ॥ २० ॥

कुवलयदलनेत्रां पक्वनारङ्गनव्य-
त्वगुदितरसधाराक्षेपतो व्याकुलाक्षीम् ।
विदधदथ जयन्तोऽन्यां चुचुम्बे तदग्रे
गुरुरिह चतुरत्वे कामदेवोऽस्य नूनम् ॥ २१ ॥

अतिचतुरतयैकाः शाखिशाखाशिखासु
स्मितबहुविधपुष्पाकाङ्क्षया चञ्चलाक्ष्यः ।
द्रुतपदमनिरोहन्ति स्म तत्पादशङ्का-
परिकलनभुवस्तां श्रीजयन्तं भियस्तु ॥ २२ ॥

कुचकलशनितम्बस्तम्बभारेण नम्रा
स्खलितगतिपदाब्जा बालवृक्षात्पतन्ती ।
त्वरितमथ भुजाग्रे कापि कान्तेन दध्रे
धुरि तु सुभगकान्ताचक्रवालस्य बाला ॥ २३ ॥

तरुणतरतरूणामात्तपुष्पास्तरुण्यः
करनखशिखराणां शोणकान्तिच्छटाभिः ।

विदधुरिव कृतज्ञास्तत्प्रवालद्रुमत्वं
फलति सहृदयेषु क्षिप्रमेवोपकारः ॥ २४ ॥
उदतरदवचीयस्त्रैणमाशु द्रुमेभ्यः
कुसुमपटलिमाढ्यं भावुकं सौरभेण ।
व्रजति किमु न नाशं वैभवं कुस्थितीना-
मिति वददिव नादैर्मञ्जुमञ्जीरकाणाम् ॥ २५ ॥
तपनकिरणजन्यप्रौढसंतापशान्त्यै
मृदुशिशिरसुगन्धेर्मारुतस्यार्पिताङ्गैः ।
हिमसमकुसुमानां भूषणैर्भूषितास्ताः
क्षणमतुलविलासा व्यश्रमन्नश्रमायाम् ॥ २६ ॥
बहुविहगनिनादैर्बन्दिवृन्दैरिवोक्ते
विकटविटपवीथीच्छायया शीतमार्गे ।
पृथुसरसि स हंसीमण्डलेनेव हंसः
समचरदथ तस्मिन्सार्द्धमन्तःपुरेण ॥ २७ ॥
चुलुकमनुकरोति स्वच्छमच्छोदमग्रे
भजति न महिमानं यस्य पम्पासरोऽपि ।
परिभवपदमर्ते(?)मानसं श्रीविवादैः
स्पृहयति च विभूतेस्ताण्डवं दुग्धसिन्धुः ॥ २८ ॥
दिनकरपरितप्ता दिग्गजा वारिकेलौ
दधति खलु [न]यन्तः पूतरीपोतशङ्काम् ।
कुलिशमयविमुक्ता बालशैवालवल्ली
किशलतटकुटीरे यस्य चास्थुर्नरेन्द्राः ॥ २९ ॥ (?)
लसति गुरुतरङ्गालिङ्गितव्योमरत्ने
प्रतिफलनमिषेणाम्भोदमाला च यत्र ।
अमृतरसमिवोच्चैः पातुकामा निकामं
परिहृतदहनाभक्षारनीरार्णवाम्बु ॥ ३० ॥

मधुकरनिकुरम्बैर्बम्भ्रमद्भिः समन्ता-
दुपरि परिमलाढ्यैः स्वेरपद्मासनस्था ।
अभिनवशिखिपिच्छच्छत्रशोभाभिरामाः
प्रवरपयसि यस्मिन्राजहंसा ललन्ति ॥ ३१ ॥
विकसितसितपद्मैर्वर्मितं वारि यस्मि-
न्धरितनव····मुक्ताचूर्णतुल्यं विभाति ।
फणिपतितनुभासां चक्रवालं धरित्री-
वलयकुतुकवीक्ष्योत्कण्ठयेवावतीर्णम् ॥ ३२ ॥
भयभरशिथिलाङ्गाद्द्राद्रुणा ग्रस्यमाना-
त्कथमपि पतिताधश्चन्द्रतश्चन्द्रिकेयम् ।
गगनपतनदुःखात्क्रन्दमानेव यस्मि-
न्गुरुलहरिविरावैर्लक्ष्यतेऽम्भोमिषेण ॥ ३३ ॥
रमण इव सहेलं श्रीजयन्ते पुरस्थे
कुवलयनयनैः श्रीर्यत्र तं पश्यतीव ।
पवनचलितवीचीबाहुभिर्नृत्यतीव
भ्रमरविरसनादैस्तद्रुणान्गायतीव ॥ ३४ ॥
मधुरसविभवेन स्पर्द्धते नो धराग्रै-
ररुणिमसुकुमारत्वेन पाणिप्रवालैः ।
कमलवनमितीवासूययोत्पाटयन्ती-
रविशदथ जयन्तस्ताः पुरस्कृत्य तत्र ॥ ३५ ॥
मधुभिरिव विवृद्धैः पुण्यलावण्यपूरै-
रलिभिरिव विलोलैर्लोचनैश्चाप्तशोभैः ।
पयसि विदधुरास्यैः कण्ठदघ्ने तदानी-
मपरकमलखण्डाडम्बरं तास्तरुण्यः ॥ ३६ ॥
अथ करजलयत्रैर्वारिपूरं किरद्भिः
स्फुरति वियति वर्षाडम्बरेऽन्योन्यमुच्चैः ।

जललिलिषु तासां प्रीतिवल्लीविलासं
कलयति स च शोषं मानमुद्राजवासः ॥ ३७ ॥
शुचिरुचिरुचिमुक्ताहारसौभाग्यभङ्गीं
विदधति जलधाराः कण्ठपीठे लुठन्त्यः ।
विकटकुचतटान्तःस्फारकर्पूरपूर-
प्रभवमकरिकाणां विभ्रमं चाङ्गनानाम् ॥ ३८ ॥
मुखकमलविसर्पद्भूरिसौरभ्यलुभ्य-
द्भ्रमरनिकरकल्पे कुन्तलानां कलापे ।
विकचविचकिलश्रीस्फूर्जितं तर्जयन्ति
स्मितनलिनमुखीनां कान्तमुक्ताम्बुभाराः ॥ ३९ ॥
तरति हृदि वहन्ती विश्वविश्वंभराया
भरमपि भुजदण्डैर्बिभ्रतं प्राणनाथम् ।
सरसि जलमगाधं कापि कान्ता न चित्रं
पृथुतरकुचतुण्डीडम्बरालम्बना हि ॥ ४० ॥
पयसि लघु निलीनः कौतुकेनापकर्ष-
त्परिहितसि[च]यान्तं दक्षयालक्षि कान्तः ।
तदनु च स तयोक्तः कोऽपि चौरोऽयमेवं
सरसविधि बबन्धे बाहुपाशेन सद्यः ॥ ४१ ॥
क्वचन जघनबिम्बे क्वापि तुङ्गस्तनान्ते
क्वचिदपि मुखपद्मे क्वापि कण्ठेऽम्बुपूरम् ।
प्रगुणितकरयन्त्रैरक्षिपल्लेयसीनां
करकमलमिवायं कामकेलौ विलासी ॥ ४२ ॥
बहुविधजललीलाकौतुकैः प्रीतिचित्ताः
पथमनुसृतवत्यः श्रीजयन्तस्य सर्वाः ।
जलनिबिडदुकूलव्यक्तनिम्नोन्नताङ्गच्यः
सरसमुदरसंस्ताः श्रीविलासात्सरस्तः ॥ ४३ ॥

प्रसरदगुरुधूमाध्यासितैः केशपाशै-
र्मुखशशधरदूरोत्सारितध्वान्तकल्पैः ।
शुचिरुचिरदुकूलैर्मण्डनैश्चानुकूलै-
रधितटमभिरामास्तस्थुरस्यैव रामाः ॥ ४४ ॥

पितुरथ ललितैस्तैस्तोषपीयूषवर्षं
विदधति युवराजे तत्र संध्याविरासीत् ।
प्रगुणयितुमिवोच्चैः स्फारशृङ्गारभङ्ग्या
कुवलयदलनेत्राः संगमाय प्रियाणाम् ॥ ४५ ॥

प्रथममुदयशीले मौलिमाणिक्यकान्ति-
स्तदनु गगननद्यां स्वर्णपद्मोपमोऽभूत् ।
रविरपरगिरिश्रीभालकालेयबिन्दु-
द्युतिरथ वमुरन्तः स्फु क नो(?)मण्डनाय ॥ ४६ ॥

दधति दश दिशोऽथ स्निग्धसंध्याभ्रशोणा
विविधविहगराजीकूजितो जागरूकाः ।
मसृणघुसृणभासां भूपतेः सुन्दरीणां
प्रतिकृतिमिह सिञ्चन्मञ्जुमञ्जीरकाणाम् ॥ ४७ ॥

अथ दिवसमशेषं रत्नगर्भौ विलोक्य
प्रविशति दिननाथः सूत्ररत्नाकरान्तः ।
समधिकतररागालिङ्गितः श्रीजयन्तः
प्रतिमपुरुषरत्नालोकते कौतुकीव ॥ ४८ ॥

सुरकरिधुतगङ्गाशीकराकारजैत्रै-
रथ कतिपयमात्रैस्तारकैर्व्योम कीर्णम् ।
श्रयति भुवनलक्ष्मीः सूत्रितोद्दाममल्ली-
मुकुलशबलितान्तः खेलधम्मिल्ललीलाम् ॥ ४९ ॥

विशविशदभविष्यच्चन्द्रिकावल्लिबीजै-
रिव गगनमशेषं तारकैस्तारकान्ति ।

स्मितकुसुमसमाजोत्तंसितैरिन्द्रनीलो
पलशकलशमुत्थैः कुट्टिमैः साम्यमाप ॥ ९० ॥
कलितमिव तमालैः कुन्तलीकुन्तलाली-
रुचिभिरिव तताभिश्चुम्बितं विश्वविश्वम् ।
स्थगितमिव समन्तादञ्जनै राजपट्टै-
र्घटितमिव चकासे व्याप्तमिद्धैस्तमोभिः ॥ ९१ ॥
अभिनवमृगनाभीपङ्ककृष्णाङ्गरागा
भ्रमररुचिदुकूलैर्वेषमुद्रां दधानाः ।
मरकतकृतभूषाः पक्ष्मलाक्ष्यः सलीलं
रमणमभिसरन्ति स्वैरमिद्धेऽन्धकारे ॥ ९२ ॥
सपदि दधति जातैकातपत्रं प्रभुत्वं
जगति तिमिरराजे लुप्तभूभृत्समाजे ।
तरणितरुणवीरैस्तैरवस्कन्दहेतो-
रिव बहुविशिखाढ्यैर्भूरिदीपैरदीपि ॥ ९३ ॥
तिमिरपटलयोगं हर्तुकामो जगत्या-
स्तदनु च नयनानामौषधीशः क्रमेण ।
अमृतमयशलाकासंनिभां मन्दमन्दं
रुचिमुचितकलाभृत्तत्र चिक्षेप दक्षः ॥ ९४ ॥
क्षितिपरिभवहेतुध्वान्तसंतानकोपा
दिवसमधिकरागं मण्डलं तत्र राज्ञः ।
निचितमिव चकोरीचक्षुषां वा मयूखै-
रुदयशिखरिचूडां चुम्बमानं चकासे ॥ ९५ ॥
क्षणमदधत पूर्वाशावधूवक्त्रपद्मे
घुसृणतिलकलक्ष्मीडम्बरं चन्द्रबिम्बम् ।
तदनु किरणमुक्ताजालकस्फीतशोभं
मदनधरणिभर्तुः पुण्डरीकश्रियं च ॥ ९६ ॥

अभिदुरतिमिरौघम्लेच्छसङ्घाशुचित्वं
प्रशमयितुमिव ·····वामलक्ष्म्याः ।
विनिहितमिव रेजे पावनं गाङ्गमम्भः
शशिकलशविसर्पच्चन्द्रिकाचक्रवालम् ॥ ९७ ॥
तिमिररिपुजयाय प्रस्थितस्याथ राज्ञो
रुचिरकिरणवीरैः प्रोल्लसद्भिः समन्तात् ।
[illegible] क्षिप्रमेवाविपक्षं
किमिव वसुमतां न क्ष्मातले साध्यमस्ति ॥ ९८
सह तिमिरभरेण स्वैरिणीनां प्रमोदः
प्रशममगमदुच्चैश्चन्द्रिकायां लसन्त्याम् ।
चतुरतरचकोरप्रेयसीभिः सहाभू-
त्त्रिभुवननयनानां किं च पीयूषपानम् ॥ ९९ ॥
दधति मुदमुदारां क्वापि चञ्चच्चकोरी-
ध्वनिविघटिततन्द्राश्चन्द्रिकायां चकोराः ।
क्वचिदरतिमयं ते चक्रवाकाः सशोकाः
सुखमसुखमिह स्यादात्मकर्मानुरूपम् ॥ १०० ॥
मदकलकलकण्ठीकोमलः कालिमासौ
रजनिरमणबिम्बे लक्ष्यतेऽन्तर्निलीनः ।
प्रसभमभिरहस्यध्वान्तभूभर्तुरेत्य
श्रित इव युवराजः प्राणितत्राणहेतोः ॥ १०१ ॥
भुवनमपतमिश्रं(स्रं) सर्वतोऽपि प्रपेदे-
ऽभ्युदयमुदितराज्ये कौमुदीजीवितेशे ।
तदनु च कुसुमेषोर्मार्गणैः पञ्चसंख्यै-
रपि भुवनविजित्रैर्लक्ष्यतां को न नीतः ॥ १०२ ॥
तिमिररिपुमयस्य प्रौढिमुल्लास्य दूरं
कुवलयरमणीयां चन्द्रिकासंपदं च ।

अपरदिशि चचाल क्षोणिपालायमानः
कृतसकलविधेयो यामिनीकामनीशः ॥ ६३ ॥
विगलितवसुशोभावैभवं स्वं विदित्वा
तदनु शिशिररश्मिर्जातविच्छायकायः ।
अपरगिरिशिरोभिः काममन्तर्हितोऽभू-
द्विघटितविभवानां स्फूर्जितं ह्रीपदं हि ॥ ६४ ॥
अनवरतमखण्डं मण्डलं निष्कलङ्कः
प्रथयति कमलानां काममुन्निद्रतां च ।
अयमिति परिभाव्य क्ष्मापतेर्विक्रमस्य
प्रविशति हिमरश्मिर्लज्जयेवाम्बुराशिम् ॥ ६५ ॥
अथ सरसविनोदैः प्रीतिमुद्भाव्य देव्या
निधुवनरसमुद्रानिद्रया मुद्रिताक्षः ।
रतिपतिरिव रत्या गाढमालिङ्गिताङ्गः
क्षणमिव रजनीं स क्षोणिपालो निनाय ॥ ६६ ॥
नागानां क्रमशृङ्खलाखणखणध्वानैः प्रबोधक्षणे
संपत्सुन्दरमन्दुरोदरचरद्दृप्ताश्च हेषारवैः ।
माद्यन्मङ्गलतूर्यवर्यनिनदप्रोद्दामलीलायितै-
स्तस्य क्षोणिपतेः प्रियेव चतुरा निद्रामुचल्लोचने ॥ ६७ ॥
मानोत्तानतया सखीषु कलुषाः प्रेङ्खोलरोषाश्चिरं
दूतीषु स्वयमानतेऽपि दयिते याश्चक्रिरे वक्रताम् ।
ताः प्रातश्चरणायुधध्वनिमिषादाज्ञामिवाप्य स्मर-
क्षोणीशस्य समुत्सुकाः प्रियपरीरम्भं स्त्रियस्तन्वते ॥ ६८ ॥
विस्मेराम्भोजराजीमधुरमधुरसप्रातराशाभिलाषा-
द्यावद्भृङ्गानुयाताः सुरभिसुमनसः पादपान्नर्तयन्तः ।
प्रातः शास्त्रेषु मान्या मदननरपतेर्वान्ति वातास्त एते
रत्यन्तक्लान्तवातास्तनतटघटितस्वेदमास्वादयन्तः ॥ ६९ ॥

माद्यन्मण्डलचक्रवालकलितं स्थेयः सुखश्रीकरं
संख्यातीतरथाश्च वैभवपदं नक्षत्रलोपावहम् ।
शङ्के सूरमपूर्वमीक्षितुमयं त्वं कौतुकीवाधुना
पूर्वक्ष्माधरमारुरोह नृपते पाथोजिनीवल्लभः ॥ ७० ॥
मद्वल्लभां कैरविणीमुपेत्य चुम्बन्त्यमी रागवतेति राज्ञा ।
आमोचयत्यङ्गजगुप्तिनद्वान्मित्रः प्रभाते वसुभिर्द्विरेफान् ॥ ७१ ॥
द्वारे तिष्ठति ते नरेन्द्र सुभग श्रीराजितं राजकं
सेवां कल्पतरोरिवेप्सितफलां हर्षाच्चिकीर्षच्चिरम् ।
सद्यो भूषयितुं तदर्हसि मणिभ्राजत्सभामण्डपं
जज्ञे मङ्गलपाठकोदितगिरामित्थं विलासस्ततः ॥ ७२ ॥
(पञ्चभिः कुलकम्)
स्मरविलसितंवर्यां तां परित्यज्य शय्यां
करतलमवलम्ब्य स्वप्रतीहारिकायाः ।
जयजयजयशब्दैः सार्धमुत्थाय भेजे
प्रचररुचि सभायां रत्नसिंहासनं सः ॥ ७३ ॥
अथैत्य विनमच्छिरोमुकुटकोटिरत्नाङ्कुर-
स्फुरत्किरणकोरकोत्करकरम्बिताङ्घ्रिद्वयम् ।
क्षमायुवतिवल्लभैः सकलराजलोकैः समं
स विश्रुतपराक्रमः प्रणयतः प्रणेमे प्रभुः ॥ ७४ ॥
दृशा प्रसादाञ्चितमिक्षितास्ते प्रभोः पुरस्तादुचितासनस्थाः ।
चक्रुः श्रियां धाम्नि तदास्यचन्द्रे लीनं चकोरोपमयात्मचक्षुः ॥ ७५ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के दोलाविलासपुष्पावचयजलकेलिसूर्यास्तचन्द्रोदयोऽष्टमः सर्गः ।

नवमः सर्गः ।

अथ क्षमां विक्रमसिंहभूपतेः प्रशासतः स्वर्गमिवापरेशितुः ।
दधौ जयन्तः स्वपितुश्चमत्कृतिं सदा नवश्रीपरिवर्द्धनक्रमैः ॥ १ ॥

सदोदयैस्तस्य विभूतिसंचयैः पचेलिमैः पुण्यतरोः फलैरिव ।
उपायनीभावमुपागतैः स्वयं न कश्चमत्कारमपारमभ्यगात् ॥ २ ॥
परेद्यु विद्योतितसर्वदिङ्मुखे कृतासनो रत्नमयासने नृपः ।
जयन्तमुख्यैः परिवारितो जनैर्ददर्श कंचिद्वृजराजमग्रतः ॥ ३ ॥
समाययौ यस्य मिषेण जङ्गमः क्षमाभृतस्तस्य हिमाचलः किल ।
समुन्नतिं द्रष्टुमिवातिकौतुकादनन्यसाधारणतामुपेयुषीम् ॥ ४ ॥
यदीयकुम्भस्थलतल्पशायिनीस्रवन्मदाम्भस्तटिनीतटाश्रितैः ।
मधुव्रतैः सान्द्ररुतैः कदाचिदप्यवापत स्वापसुखं समुद्रजा ॥ ५ ॥
उदारजाम्बूनदभूरिभूषणैर्ज्वलन्मणिश्रेणिशिखाविभूषितैः ।
क्षपा क्षणोल्लासि महौषधीरुचिं हिमाचलं गौरवपुर्जिगाय सः ॥ ६ ॥
स्मरार्तकान्तानयनाम्बुलावली चलाचलेन श्रवणद्वयेन यः ।
बभौ नभोलङ्घनलोलपक्षवानिवेन्द्रहस्तीन्द्रयुधे कृतोद्यमः ॥ ७ ॥
विसारिसिन्दूरपरागपिञ्जरं समुन्नतं कुम्भतटं च धारयन् ।
पिशङ्गशृङ्गस्य नवार्ककान्तिभिर्बिभर्ति यः पूर्वमहीभृतः श्रियम् ॥ ८ ॥
(कुलकम्)
तदन्तरे श्रोत्रसुखैकपारणामिवादधद्भूमिपतेर्जनस्य च ।
वचो वरादित्युदियाय दैवतं तवैष भावी खचरेश्वरः सुतः ॥ ९ ॥
शुभोदयादस्य वशंवदात्मना मयार्पितोऽत्रैष चकास्तु कुञ्जरः ।
उदन्वता श्रीकुचकुम्भलालिते हरेर्यथा वक्षसि कौस्तुभो मणिः ॥१०॥
अयं गजः सिंहलपेशभूपतेरभङ्गुरैस्तैः सुकृतैः समाहृतः ।
गृहाङ्गणं प्राप मम प्रभावतो गृहाण तं भो निगृहाण विद्विषः ॥ ११ ॥
शशाम यावत्तदमानवं वचो महीपतिस्तावदिभेन्द्रमात्मना ।
सुगन्धधूपप्रसवैरपूजयज्जयास्पदं चक्रमिवाशु चक्रभृत् ॥ १२ ॥
वचोहरः सिंहलमेदिनीपतेरथागमद्विक्रमसिंहभूभुजः ।
सभां प्रतीहारगिरा सुरेशितुः सभापि यस्याः समुपैति नोपमाम् ॥१३॥
नृपं प्रणम्यैष कृतासनोऽवदत्पयोदगम्भीरगिरा वचोहरः ।
त्वदन्तिकं प्राप मम प्रभोः करी सरोवराद्धंस इवापरं सरः ॥ १४ ॥

समज्जसं यज्जयकुञ्जरः स नस्तनोति नेत्राम्बुजकौतुकं तव ।
अवैमि तस्मिन्न च लोभसंभवं पयः प्रवेशे कतमा स्पृहाम्बुधेः ॥१५॥
सुहृत्त्वमाविष्कुरु सिंहलेश्वरे त्वमत्र तत्प्रेषणतो विशेषतः ।
विजृम्भितानिःस्पृहणीयतोद्भवं यशस्तवात्यद्भुतपुण्यजं हि ते ॥ १६ ॥
गजेन्द्ररत्ने गृहमागते स्वयं महीभुजः कस्य मनो न लुभ्यति ।
तथापि हेयः स बलीयसस्त्वया न सुन्दरः काप्यसमानविग्रहः ॥ १७॥
विपत्तये वल्गति लोभसंभवः क्षमाभुजां दाव इव क्षमारुहाम् ।
प्रमादतस्तत्र कृतोऽपि स त्वया समुच्यतां नीतिवधूविलासिना ॥१८॥
रदप्रभाणां मिषतः प्रकाशयन्नृपोऽपि नैर्मल्यमिवात्मचेतसः ।
वचोभिरुन्निद्रमना ययानुगैर्वचोहरस्योत्तरयांबभूव सः ॥ १९ ॥
इमां यदस्मासु स सिंहलेश्वरः प्रभुस्तव स्नेहविशेषवर्मिताम् ।
उवाच वाचं तददर्शतामुना छटास्वसौजन्यमहोदधेरियम् ॥ २० ॥
ममाङ्गणालंकरणं करीश्वरः सहेलमागत्य बभूव यः स्वयम् ।
तथार्पितो देवतया प्रसन्नया स दीयते चेल्लघुता तदा न किम् ॥२१॥
सुहृद्वृतः प्रेषयितुं न युज्यते ममेभराजस्तव मेदिनीपतेः ।
न चेदिदं प्रेषयतां स संप्रति स्वकीयराज्यं समृद्धिभिः सुहृत् ॥२२॥
नयागते वस्तुनि राज्यभूषणे समर्पिते दूतमुखेन कस्यचित् ।
रणाक्षमत्वप्रभवा हि भूभुजां भवेदकीर्तिर्न कथं प्रथीयसी ॥ २३ ॥
मुमोच यं दिव्यगजेश्वरं स्वयं भविष्णुसाम्राज्यवियोगसूचकम् ।
प्रभोऽस्तु वा पुण्यबलस्य तस्य का बलिष्ठतैवं कतमश्च विग्रहः ॥२४॥
प्रसेदुषी यस्य बभूव देवतार्पितद्विपेन्द्रा स बलीयसां धुरि ।
मदोद्धतः सूत्रजिघृक्षयान्धधीरयुक्तलोभः पतिरेव तावकः ॥ २५ ॥
जगाद दूतः पुनरात्मनायकप्रभुत्वशंसीति यथा धराधव ।
असंख्यहस्तीन्द्रवतोऽपि हस्तिनः परे ग्रहे ते कतमो ममाग्रहः ॥२६॥
मृगेक्षणानां सरसं समागमे स कण्ठकत्वं न तु राज्यसंपदः ।
भविष्यतीतस्तु वदन्त्युपायनात्प्रसेदुषः सिंहलभूभुजं गतः ॥ २७ ॥

न किंचिदूनं करिणामुना विना प्रभोर्ममदीयस्य तथापि स द्रुतम् ।
गृह्णिष्यते तं हठ····(?) सुवाधियः श्रिया सहासद्यरुषां धुरंधरः ॥२८॥
नरेन्द्र बुध्यस्व धियात्मनोऽथवा महेन्द्रमन्त्रिप्रतिमस्य मन्त्रिणः ।
मम प्रभो प्रेषय कुञ्जराधिपं व्रजास्य कोपार्चिषि मा पतङ्गताम् ॥२९॥
तरङ्गितान्तःपृथुकोपपावकारुणेक्षणेन क्षितिपेन नोदितः ।
श्रुवा जयन्तोऽथ वचस्विनां गुरुर्जगाद तं दूतमभूतसंभ्रमः ॥ ३० ॥
महानिधीनामधिपोऽपि चक्रभृन्नयागतं वस्तु न जातु मुञ्चति ।
मतङ्गजस्यास्य मिषात्स्वमन्दिरे रमा प्रविष्टा क्रियते कथं बहिः ॥३१॥
विभोर्ममाजौ विषमायुधाधिकप्रहारपात्रीकृतविग्रहस्तव ।
भविष्यतीशो नवसंगमे वधूजनो यथोत्कण्टककम्पसाध्वसः ॥ ३२ ॥
द्विषो न पोष्याः प्रणिपातमन्तरा निजैः पदार्थैरिति भूभृतां नयः ।
न जातु तेषां तमपश्यतां भवेज्जनाद्विशेषः फणिदुग्धपायिनः ॥ ३३ ॥
मदेन मत्तस्तव मेदिनीपतिर्दृढं ततोऽस्याजनि मन्दता धियः ।
गिरोऽप्यसभ्याः प्रचरन्ति ताः परं यतः कृतोत्साहपरंपराः परे ॥३४॥
मयि द्विपानर्पणसंभवाः क्रुधस्तवैव नाथस्य विनाशहेतवः ।
स्वतः प्रसूता निधनं धनंजयज्वलच्छिखाः किं न नयन्ति शाखिनम् ॥३५॥
न लभ्यते सद्मसमाश्रितः स्वयं महात्मनां नीतिरियं गरीयसी ।
पुरापि मैनाकमवाप वीक्षितुं न गोत्रभिद्वारिधिमध्यमाश्रितम् ॥ ३६ ॥
सुमेरुमाखोः खनितः खनित्रतां खरागदंष्ट्राशिखरैरुपागतैः ।
न दन्तभङ्गादपरं फलं यथा तथा द्विषामप्युपसर्पितामिह ॥ ३७ ॥
निशम्य निन्दामथ भर्तुरात्मनः परिस्फुरत्कोपभरारुणेक्षणः ।
जगाद दूतः क्षितिनाथनन्दनं प्रकम्पसंपक्कलितोत्तराधरः ॥ ३८ ॥
निपीड्य दोर्दण्डबलेन तत्प्रभुद्विपाधिराजं सह राज्यसंपदा ।
न यावदादास्यति तावदस्य ते प्रभोः प्रतीतिर्न भविष्यति ध्रुवम् ॥३९॥
द्विधापि बालोऽसि कुमार निश्चितस्त्वमज्ञतोद्गारगिरां प्रपञ्चतः ।
अगण्यदोषो विदुषां ततोऽधुना स्वमाननं मुद्रय मौनमुद्रया ॥ ४० ॥

गताग्रहस्त्वं जय कुञ्जरां पुरो विधाय सर्वस्वमुपायनीकुरु ।
प्रसादनायास्य जिजीविषुर्यदि प्रसेदुषो राज्यमितो लभस्व ॥ ४१ ॥
गिरा तदारुंतुदया तदार्दितः सूतः सं दूतस्य जगाद भूपभूः ।
हरिः स कूपस्य परं यदीयया कुशिक्षया ते सजलातिशायवाक् ॥४२॥
मुधात्र किं ताण्डवडम्बरैर्गिरां मदीयभूभृद्बलवल्गु वल्गितम् ।
सितासिधाराम्बुनिमज्जितारयो निवेदयिष्यन्ति महाजिभूमयः ॥ ४३ ॥
हरेर्मदीशप्रहितास्त्रदुःसहे रणक्षणे दर्शनिशीव चन्द्रमाः ।
अवस्थितिं नो कलयापि लास्यतीत्यवेत्य तस्मै विनिवेदयद्भुतम् ॥ ४४ ॥
सदात्यया वह्निरिव क्रुधा ज्वलन्समेत्य नत्वा च हरिं नरेश्वरम् ।
मुखस्य विच्छायतयैव सूचयन्व्यजिज्ञपत्कार्यमसिद्धमात्मनः ॥ ४५ ॥
नृपाधिराज द्विपराजमञ्जसा न मुञ्चते हन्त कथंचनापि सः ।
फणीश्वरः स्फारफणामणिं क्वचिज्जहाति जीवन्न हि दर्पदुद्धरः ॥ ४६ ॥
रिपोः स्वरूपं विनिवेदयिष्यति स्फुटार्थमेतन्मयि मा रुषं कृथाः ।
महीभृतां सत्यगिरो हि सेवकाः प्रसादपात्रं पुरतो हितैषिणम् ॥ ४७ ॥
परत्र वीरे नरवीर का कथा न शङ्कते जातु पुरंदरादपि ।
प्रचण्डदोर्दण्डबलावलेपतस्तृणाय न त्वामपि मन्यते प्रभोः ॥ ४८ ॥
न पुण्यलक्ष्मीजरसेव जर्जरा तवेश रक्षासु विचक्षणा ततः ।
गजेन्द्रवद्राज्यमिदं हरिष्यते तदीयपुण्यैः सुभटैरिवोद्भटैः ॥ ४९ ॥
निशम्य दूतादिति दुःश्रवं वचः प्रणष्टतत्त्वार्थविचारणः क्रुधा ।
समूलकाषं कषितुं स विद्विषं समुद्ययौ तार्क्ष्य इव क्षणात्खगः ॥ ५० ॥
विधेर्विबुध्य प्रतिकूलकारितां गजेन्द्रनाशप्रकटीकृतां ततः ।
स मन्त्रिभिर्नीतिपथैकजान्धिकैर्न्यचारि तेन द्विषतारिणं नृपः ॥ ५१ ॥
तथाप्यवज्ञाय तदीयमन्त्रितं प्रयाणमाधत्त मदोद्धतस्ततः ।
अरिष्टसंसूचितमृत्युरप्यसौ विलङ्घ्यते कैर्भवितव्यताथवा ॥ ५२ ॥
(अग्रे कुलकम्)
विलोलकर्णानिलवीचिशीतलैः सदाभिषिञ्चन्ति कराग्रशीकरैः ।
विमूर्च्छितान्यस्य भयेन दिग्गजांन्स्वजातिवात्सल्यधियेव हस्तिनः ॥५३॥

नृपोऽसहिष्णुः परशूरमण्डलं जगत्सु शूरोऽयमितीव सर्वतः ।
यदीयतुङ्गत्तुरगाः खुरोद्धतैर्धरापरागैः स्थगयन्ति तत्पथि ॥ ९४ ॥
जलाशयान्निर्जलतामिवानयन्नगाधनीरैरतिनीरधीरपि ।
मुहुर्मुहुर्मज्जनपानगाहनैरनीकभूयिष्ठतया तदा पथि ॥ ९५ ॥
धराभुजङ्गश्चतुरङ्ग·····तरङ्गभङ्गयेव तरङ्गिणीपतिः ।
असीमसामन्तमहर्द्धिडम्बरः प्रयाणभेरीरवपूरिताम्बरः ॥ ९६ ॥
स्वदेशसीमानममानमानभूः समाससाद क्रमशः स विक्रमः ।
हरिर्नरेशः सरभाङ्कितामिव क्षितिं द्विषद्दन्तिघटाविघट्टनः ॥ ९७ ॥
अथो जयन्तीश्वरचारपूरुषः समेत्य भूपं विधिना व्यजिज्ञपत् ।
विभो रिपुस्ते हरिराययौ स्वयं स्वदेशसीमानमसीमसेनया ॥ ९८ ॥
रमाकुचस्पर्शसुखेन शायिनं मुकुन्दमप्यम्बुनिधौ विविप्रयन् ।
निदेशतो विक्रमसिंहभूपतेः प्रयाणभेरीध्वनितं ततोऽभवत् ॥ ९९ ॥
मयि स्थिते हन्त निदेशवर्तिनि स्वयं प्रयासः कतमः प्रभोरिति ।
समुत्सहिष्णुः समराय राजसूर्व्यजिज्ञपन्मन्त्रिमुखेन भूभुजम् ॥ १०० ॥
द्विषन्नरेन्द्रस्य हरेः पराजयो रणाङ्गणे यद्युवराजतोऽमुतः ।
तवैव तद्देव यशःप्रशस्तये त्वदीयमूर्त्यन्तरमूर्जितं हि सः ॥ १०१ ॥
प्रयातु तज्जेतुमनेकशक्तिभृज्जयी कुमारोऽभिनवस्त्वदाज्ञया ।
प्रभाकरस्यापि विभो भवेदिदं विभाकरः किं न तमस्ततिच्छिदे ॥१०२॥
विमृश्य विज्ञप्तिमिति क्षितीश्वरः समञ्जसां चेतसि मन्त्रिसंविताम् ।
हरेर्विधातुं परितः पराजयं जयन्तमाज्ञापयति स्म सस्मयः ॥ १०३ ॥
उदात्तवीरव्रतनीतिभूषणं रणाय नम्रक्षितिपालमण्डलीम् ।
कृतप्रसादां सह गन्तुमादिशत्ततः कुमारेण जिगीषता द्विषः ॥ १०४ ॥
समूलमुन्मूलितवैरिपादपे हरीयितुं सिंहलराजकुञ्जरे ।
ततः कुमारः क्षितिभृन्निदेशतः समीहितार्थाय तदोपचक्रमे ॥ १०५ ॥
विशिष्टवेषाभरणैर्जगत्त्रयीं स कौतुकानन्दमयीमिवादधत् ।
पितुः प्रणम्यैष पदौ तदाशिषं जयश्रियः सिद्धिमिवाददे ततः ॥१०६॥

शुभे मुहूर्ते जयकुञ्जराधिपं रणे जयं मूर्तमिवाधिरूढवान् ।
स चामरग्राहिकुरङ्गचक्षुषां बभौ कटाक्षैरिव चामरैः सितैः ॥ ६७ ॥
स विक्रमक्षोणिधवान्वयाम्बरप्रभाकरः प्रीणितबन्धुपङ्कजः ।
असीमतेजःशमितारिकौशिकस्ततः प्रतस्थे चतुरङ्गसेनया ॥ ६८ ॥
चमूचराणां तुमुलेन भूयसा चलंश्चकाशे क्षितिपालनन्दनः ।
युगान्तकालोच्छलितोरुयादसो गभीरधीरध्वनिनेव वारिधिः ॥ ६९ ॥

सुरनिकरकराब्जप्रेरिता पुष्पवृष्टिः
समजनि वसुधाया हर्षहास्यप्रभेव ।
तदनु मनुजवृन्दैः श्रूयमाणः सितास्यै-
र्दिवि निरवधिरुच्चैर्दुन्दुभीनां ध्वनिश्च ॥ ७० ॥

पृष्टे स्पर्शमिषात्क्षरन्निव सुधावायुर्ववौ पक्षिणां
श्रेणीष्वाख्यदिव प्रदक्षिणगतिः कल्याणमालारवैः ।
जज्ञे तत्र निमित्तमन्यदपि तत्साम्राज्यलक्ष्म्याः परी-
रम्भारम्भमिवास्य गोत्रतरणे विज्ञापयामास यत् ॥ ७१ ॥
तव स्फूर्जच्छौर्यप्रभवयशसा चन्द्रमहसा
भृशं शुभ्रीभूतं खकचनिचयं वीक्षितवती ।
पलिक्नीत्वभ्रान्त्या कुलितहृदयात्रौषधविधेः
शची पृच्छाक्लेशे निपतति मुहुः स्वर्गिभिषजोः ॥ ७२ ॥
.....
..... ।
उपकृति(?)महिभर्तुर्भूमिभारं दधानो
गदमिव भुजदण्डे यः श्रीयुव(?)राजलक्ष्म्याः ॥ ७३ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीशब्दाङ्के दूतोक्तिवर्णनो नाम नवमः सर्गः ।

दशमः सर्गः ।

प्रयाणके तस्य ततः सहस्रैः संमर्दचारिध्वजिनीध्वजानाम् ।
उल्लोचलीला कलयांबभूवे दूरापनीतार्कमरीचितापैः ॥ १ ॥

तत्रैककालं परिवाद्यमानानिश्चान(?)वृन्दादुरितिर्निनादैः ।
क्षुभ्यत्समुद्रोर्मिजलेन सूर्यश्च·····मत्कारमकारि शीतः ॥ २ ॥
इलां ततः पङ्किलतां नयद्भिर्मदप्रवाहैर्द्विरदैश्चलद्भिः ।
स निर्झरैर्जङ्गमतां प्रपन्नै रराज शैलैरिव सैन्यमस्य ॥ ३ ॥
हस्तीन्द्रहस्तोत्करसीकराणां गणैरदर्श्यैस्त(?)नभस्तलेऽस्य ।
प्रयाणरेणुः स्थगिते खरांशौ समुद्गतानीव शुभान्यदु(मू)नि ॥ ४ ॥
एकोऽप्ययं वैरिनरेन्द्रपक्षक्षोदक्षमस्तन्मदवैभवं वचः ।
भूपैवं भृङ्गाः करिणामितीव कपोलमूले कथयांबभूवुः ॥ ५ ॥
प्रोथावलग्नैः पृथुफेनपिण्डैर्वनायुदेश्यास्तुरगास्तदीयाः ।
हेषारवैः पूरितभूरिसंख्यप्रयाणशङ्का इव रेक्षु(णु)रुच्चैः ॥ ६ ॥
तुरङ्गमास्तस्य चतुःसमुद्रीं रजःसमाजैः स्थलतां नयन्ति ।
खुरोद्धतैर्दातुमिवावकाशमपारनासीरपरंपराणाम् ॥ ७ ॥
तदास्य तङ्गत्तुरगाङ्घ्रिपातप्रेङ्खोलितोच्छृङ्खलधूलिपुञ्जैः ।
मुखानि वैरिक्षितिपाङ्गनानां दिशां च बाढं मलिनीबभूवुः ॥ ८ ॥
तत्सैन्यधूलीपटली व्यधत्त व्योमान्तरे मामवनीमितीव ।
शेषः सितच्छत्रमिषादकार्षीन्मूर्त्यन्तराणीव विवोढुमेनाम् ॥ ९ ॥
मत्तोऽधिकं तच्छिबिरं ह्रियेति विस्तार्यपि व्योम तदा विलम्बम् ।
लीनं तदीयाश्वखुरोत्थधूलीपटीकुटीकोटरकोणकोटौ ॥ १० ॥
यदश्वधारालखुरक्षतायां····निम्नतायामवनौ स्खलन्तः ।
कृच्छ्रानने च्छात्पथि रथ्यवाहा भरेण भुग्ना इव संचरन्ति ॥ ११ ॥
रथैः पराभूतनिकेतपङ्क्तिर्मतङ्गजैर्न्यक्कृतकेलिशैला ।
प्रयाणके तस्य बभूव साक्षात्सेनैव सा जङ्गमराजधानी ॥ १२ ॥
विश्वंभराभारभराय भूयस्तथा स्वसैन्यैरभवत्कुमारः ।
फणैरशेषैरपि शेषराजो यथावनम्रैः कथमप्यधत्ताम् ॥ १३ ॥
तदीयसैन्यैः प्रविलोकिनीनां विद्याधरेन्द्रामरसुन्दरीणाम् ।
कुतूहलैः पिप्रियुरीक्षणानि रणः कणैर्व्योमनि चिक्लिशुश्च ॥ १४ ॥

स प्रावृडम्भोदमयी विमोरुमायूरपिच्छातपचारणोत्थैः ।
व्रजञ्शरन्मेघमयीमिव द्यां चक्रे च विस्तारितपुण्डरीकैः ॥ १५ ॥
दुग्धाम्बुधेरप्यधिकर्द्धिभाजां पङ्काकुलत्वेन जलाशयानाम् ।
विलुप्तया भूमिरुहां श्रिया च यस्य प्रयाणोज्झितभूरलक्षि ॥ १६ ॥
हरेरथारेः प्रविवेश देशं सिंहो द्विपस्येव वनप्रवेशम् ।
गजेन्द्रसैन्यैः स परःसहस्रैर्विन्ध्याटवीविभ्रममादधानैः ॥ १७ ॥
ररक्ष देशं स्वमिवाप्यशत्रोः क्षयं स तस्यैव यतश्चिकीर्षुः ।
स्वभाववैरान्नकुलो हि सर्पं निहन्ति नो तत्सदनं प्रविष्टः ॥ १८ ॥
दूतः कुमारप्रहितोऽथ गत्वा श्रीसिंहलेशं सहसा प्रणम्य ।
समुद्रनिर्घोषविशेषसख्या वाचा ख्युभ····त्ससभं बभाषे ॥ १९ ॥
गजार्थिना दूतमुखेन रोषं निन्ये त्वया यः परुषैर्वचोभिः ।
तेनारि का····कुचपत्रवल्ली विलोपसाटोपभुजप्रतापः ॥ २० ॥
दोर्दण्डकण्डूर्भवतोऽपनेतुमसौ कुमारः प्रहितो जयन्तः ।
कल्पान्तवातोद्धतनीरराशिनीरैरिवाशु स्वबलैरुपेतः ॥ २१ ॥ (युग्मम्)
प्रसाध्य देशान्सकलांस्तवोच्चैर्निजाज्ञयासौ निकषागमत्त्वाम् ।
द्वित्रैर्दिनैरेत्य रणाङ्गणे यत्करिष्यते द्रक्षसि तत्त्वमेव ॥ २२ ॥
अनिष्टवाक्यप्रथमावतारे जातेऽथ वर्णध्वनि भूभृदूचे ।
वध्योऽसि नौ दूत इति प्रयाहि त्वामाश्रयत्वीशमिवार्धचन्द्रः ॥ २३ ॥
अथापमानादुपयातकोपः सद्यः स मत्वा स्फुरदोष्ठपृष्ठः ।
अजातपूर्वं तदरातिकृत्तं स्वस्वामिने विज्ञपयांबभूव ॥ २४ ॥
प्रयाणकं तत्क्षणमेव चक्रे श्रीराजसूनुः प्रतिशत्रुराजम् ।
सोऽप्यायय्यौ संमुखमस्य को हि प्रारब्धवैरावलिरप्युदास्ते ॥ २५ ॥
आसन्नतां जग्मुषि सैन्ययुग्मे तत्रातिमात्रं प्रतिशब्दतीर्थम् ।
प्रातः समापूरितरोदसीकं सन्नाहभेरीध्वनितं बभूव ॥ २६ ॥
आसन्नसंग्रामसमुत्सहिष्णोर्वीरव्रजस्यानशिरे मनांसि ।
हर्षप्रकर्षैः समुदञ्चदुच्चरोमाञ्चचक्रैश्च चिरं वपूंषि ॥ २७ ॥

---

१. क्रियाविशेषणमेतत्.

प्रमोदसोच्छ्वासतया तदानीं स्फुटं स्फुटत्पूर्वरणव्रणौघैः ।
अखण्डवीरव्रतबाहुदण्डैः संनद्धुमारभ्यत वैरिवृन्दैः ॥ २८ ॥
रणोत्सवोत्साहसमुद्भविष्णुरोमाञ्चचञ्चत्कवचान्तरस्य ।
एकस्य कस्यापि महाभटस्य भाति स्म कृच्छ्रेण तनौ तनुत्रम् ॥ २९ ॥
वीरोऽपरं शौर्यधुरैकधुर्यस्तत्रापि सन्नाहकृताङ्गरक्षः ।
.....रितश्च सोऽभूद्यौ न कस्यापि रिपोः कदापि ॥३०॥
स्ववल्लभायाः कमलायताक्ष्या व्यालोकनेच्छैः पुलकैर्भृतायाः ।
कस्यापि संमान्ति तनौ तनुत्रे क्षणं तिरोधाच्चतुरावधे सा ॥ ३१ ॥
सापत्न्यमप्यस्तु जयश्रिया मे नवीनया वल्लभया तवाद्य ।
प्रियाशिषं गद्गदया गिरेति श्रुत्वा ययौ कोऽपि रणेऽतिहर्षितः ॥३२॥
सामन्त.....मुद्विषतामसह्याः संनद्ध संग्रामकलास्खवाह्याः ।
बलीयसा स्वस्त्रबलेन सार्धं कुमारपादान्तिकमीयिवान्सः ॥ ३३ ॥
संमानदानादिभिरेष तेषां हर्षप्रकर्षं प्रथयांबभूव ।
मन्थाद्रयस्ते ह्यरिसैन्यसिन्धुमन्थेन भर्तुर्विजयश्रिये स्युः ॥ ३४ ॥
कृताङ्गरक्षोऽपि स देवताभिरङ्गे कुमारः कवचं चकार ।
संग्राममुद्रेति ततः प्रपेदे प्रियामिवोच्चै रणकेलिदीक्षाम् ॥ ३५ ॥
सज्जीकृतं हस्तिपकाधिपेन पुरोधसा रोपितदिव्यशस्त्रम् ।
युधैकधीर्विक्रमसूर्गजेन्द्रमैरावणं शक्रमिवारुरोह[1] ॥ ३६ ॥
सामन्तसेनापतिमन्त्रिमित्रसगोत्रराजन्यगणैरुपेतः ।
महर्द्धिचञ्चच्चतुरङ्गसैन्यसकौतुकाक्षिप्तजगच्चचाल ॥ ३७ ॥
अलंकृतायामथ युद्धभूमावन्यूनसैन्येन नृपाङ्गजेन ।
सोऽप्याययौ सिंहलभूमिपालः कालेन कोपादिव कृष्यमाणः ॥ ३८ ॥
तदाग्रसैन्ये रणतूर्यनादैः सहाच्छलद्भिस्तुमलोल्बणास्यैः ।
शितास्त्रशस्त्रैर्ववृषेऽतिमात्रं वर्षाम्बुवाहैरिव वारिवारैः ॥ ३९ ॥
योधे प्रसिद्धैर्युयुधेरिसौ(रो)धैः सहाश्ववारैः सममश्ववारैः ।
रथिप्रवीरै रथिकैश्च सार्धं समानकक्षैर्जयबद्धलक्षैः ॥ ४० ॥

---

१. 'शक्र इवा' स्यात्.

विनश्वरैरप्यसुभिः स्वकीयैरनश्वरं जन्ययशोऽर्थयद्भिः।
राजन्यकैस्तत्र चिरं····चक्रेऽहंपूर्विकापूर्वकमाजिकेलिः॥ ४१॥
भटस्य कस्यापि बभौ शितासिभिन्नेभकुम्भोच्छलिता पतन्ती।
मुक्तावली मूर्द्धनि पुष्पवृष्टिर्मुक्तेव देवैरवदानतोषात्॥ ४२॥
नाराचबाणासिभुसण्डिभल्लीचक्रार्धचक्रप्रमुखास्त्रशस्त्रैः।
भूमण्डली खण्डितवीरमुण्डमालाकुलालोहितपङ्किलाभूत्॥ ४३॥
तुरङ्गमातङ्गघटाभटाङ्गव्यासङ्गिशस्त्रौघविदारणोत्थैः।
रक्तस्रवन्ती निवहैर्वहद्भिर्दुःसंचरा क्वापि धरा बभूव॥ ४४॥
कृते कथंचिन्नृपतेः सुतस्य पराङ्मुखे शत्रुभिरग्रसैन्ये।
कल्लोलिनीजीवितवल्लभस्य तटाम्बुनीव प्रतिकूलवातैः॥ ४५॥
मा कांदिशीकत्वमिहाश्रयध्वं यशश्चिनुध्वं निजपूर्वजानाम्।
अदृष्टपूर्वं भवतां हि पृष्टं संख्येष्वपि·····वैरिवीरैः॥ ४६॥
इत्थं गिरोत्साह्य पुरः प्रवर्त्य रणाय राजन्यकमुद्धतास्त्रम्।
सेनापतिः सिंहलसैनिकेषु श्येनः शकुन्तेष्विव निःपपात॥ ४७॥
(विशेषकम्)
अश्वा न ते तत्र न चाश्ववारा न ते जगा(गजा) नापि गजाधिरूढाः।
पदातयो नो रथिनो न रथ्या ये जर्जरा नास्य शरैर्बभूवुः॥ ४८॥
छत्राणि चिच्छेद रणाग्रिमाणां तेजांसि साक्षादिव तीव्रबाणैः।
ध्वजान्स कीर्तीरिव नर्तितकीर्तिः शिरांसि वंशानिव मूलतोऽपि॥ ४९॥
कूलंकषाया इव वारिपूरैः कूलद्रुमाः क्षालितमूलजालाः।
शरैस्तदीयैरदयैर्विपक्षी बभूवुरापातपदं च केचित्॥ ५०॥
द्रूणां फलानीव शिरांस्यरीणां शाखाः प्रशाखा इव बाहुदण्डान्।
अङ्गान्युपाङ्गानि दलोपमानि चिच्छेद निर्लिशतया शिरस्य(रांसि)॥५१
कथावशेषे द्विषतामशेषे श्रीभीमसेनेन कृऽतेथ सैन्ये।
श्रीसिंहलस्यापि सुषेणनाम्ना सेनाधिनाथः प्रससार योद्धुम्॥ ५२॥
परस्परं तौ परुषैर्वचोभिराक्षेपयन्तौ निकटावभूताम्।
ततः क्रुधान्धौ वनसैरभेन्द्राविवोन्मदौ चक्रतुराहवं च॥ ५३॥

कथंचनानन्यमनाः सुखे(षे)ण प्रमद्वरं(?) तत्र स **भीमसेनः** ।
गाढप्रहारैर्विधुरीकृताङ्गं मूर्च्छामतुच्छां सुचिरं निनाय ॥ ९४ ॥
कोलाहलः सिंहलराजसैन्ये जितं जितं नः प्रभुणेत्युदस्थात् ।
मूर्च्छावसाने च स **भीमसेनो**ऽप्यथात्मसैन्यप्रमदेन सार्धम् ॥ ९५ ॥
रणे तदोत्साहमुवाह चेतः शौर्यं जयाकर्षि च बाहुदण्डः ।
श्री**भीमसेन**स्य तथा यथासौ खःसुन्दरीगेयगणो बभूव ॥ ९६ ॥
नीरन्ध्रबाणान्तरितान्तरिक्षं न्यक्कारनादैर्बधिरीकृताशम् ।
रणे तयोः स्फूर्जितमूर्जितं तद्बभूव वा गोचरमेति यत्र ॥ ९७ ॥
एतावुभावप्यनिवार्यवीर्यौ कृतश्रमौ द्वावपि चास्त्रशस्त्रौ ।
युद्धे सदक्षावथ वीक्ष्य वीर जेतानयोः कः समशेरतेत्थम् ॥ ९८ ॥
रणश्रमेणातनुना सुखे(षे)णं महाज्वरेणेव विसंस्थुलाङ्गम् ।
बुद्ध्वा स चिक्षेप विभोः पुरस्तात्ततो हरेर्मूर्तमिव प्रतापम् ॥ ९९ ॥
ततो गृहीते निजसैन्यनाथे नाथः पृथिव्याः पृथुपार्थिवश्रीः ।
क्रोधादुदस्थात्क्षयकालकेलिं कर्तुं जयन्ते विशिखानलेन ॥ १०० ॥
कुर्वन्नसौ शोणितसान्द्रपङ्कं निःशङ्कमेवारिबलं बलेन ।
व्यालोडयामास तदातपेनोपतापितः पल्वलवल्लुलायाः ॥ १०१ ॥
असीमसंग्राममहार्णवेषु पारीणतां येऽपि ययुः प्रवीराः ।
कल्पान्तवातैरिव तस्य शस्त्रैर्विनिन्यिरे तेऽपि दिशां मुखेषु ॥ १०२ ॥
रणे प्रमोदामृतवीचिसेकादिव प्रसर्पत्पुलके प्ररोहः ।
अथो तदिष्ट(?)स्वयमुग्रशौर्यः श्रीमज्जयन्तो जयकुञ्जरेण ॥ १०३ ॥
रराज तत्र क्षतकुम्भिकुम्भस्थलीगलन्मौक्तिकचक्रवालम् ।
कुमारशौर्याद्भुतरञ्जिताया रणक्षमाया इव हास्यलास्यम् ॥ १०४ ॥
बाणैः कृपाणेन च तोमरैश्च क्षिप्रं गजेन्द्रस्य च वेगगत्या ।
अलक्षि लक्षैरिव बाहुदण्डैः स मण्डितः खण्डितवैरिमुण्डैः ॥ १०५ ॥
तं वीक्ष्य भूयिष्ठबलाश्वसेनं सहेलनिर्लोठनकौतुकोत्कम् ।
स्वस्यातिदूरत्वममस्तगाढं गुणाय सप्ताश्वरथाश्वराजः(?) ॥ १०६ ॥

प्रकामसंग्रामरसः स वैरिकुम्भीनकुम्भेषु कृतोपमर्दः ।
अरिश्रियामुच्चकुचस्थलानि श्रीमज्जयन्तः स्ववशान्यमंस्त ॥ १७ ॥
सेनाजने नच्छ(श्व)रधोरणीभिः समन्ततो दृष्टिपथादतीते ।
एकाक्यभूत्सिंहलभूमिपालस्तारागणे चन्द्र इवार्कभाभिः ॥ १८ ॥
दृष्टेर्गोचरचारिणि प्रहरति श्रीमज्जयन्ते हठा-
त्तत्रोच्चैर्जयकुञ्जरे च विजयव्यापारपारंगमे ।
उ·····द्रुरुमत्सरो हरिरपि क्षिप्रं विपक्षक्षय-
·····काङ्क्षयाशनिनिभां चिक्षेप बाणावलीम् ॥ १९ ॥
छत्रं चिच्छेद तस्य प्रवररिपुजयश्रीविलासाशयासो(?)
कीर्त्या सार्धं चकर्त ध्वजमपि च सतां राजवंशावतंसम् ।
निर्जीवं चापमस्त्रैर्हरिवि····तपदं कुञ्जरेन्द्रं च चक्रे
तत्राश्चर्ये कवर्यं किमिव न विदधे वैक्रमिर्विक्रमेण ॥ ७० ॥
खड्गाखङ्गिशराशरप्रभृतिभिर्युद्धप्रकारैर्युधं
कारंकारमपारकौतुकरसं विस्तारयन्तौ दृशाम् ।
प्रत्येकं विजयश्रिया रणगुणोत्कर्षापकर्षक्षणे
कं यामीति विमुग्धया प्रतिकलं तौ·····खिन्नया ॥ ७१ ॥
अथ क्लेशावेशप्रसरविरसं सिंहलपति-
र्जगादैवं वध्यस्त्वमसि मम नासेः शिशुरिति ।
सतां निस्त्रिंशोऽपि प्रभवति न हि भ्रूणहतये
प्रपद्याज्ञां तन्मे व्रज निजगृहं रन्तुमधुना ॥ ७२ ॥
एतैस्त्वं मदविह्वलोऽसि वचनैरुच्छृङ्खलैर्लक्षितः
स्फारैः शारदवारिदैरिव निरासारैरसारैर्भृशम् ।
निग्राह्योऽसि रणे मम प्रतिभटंमन्यः क्रुधेति ब्रुवं-
श्चिच्छेदास्य शिरःसरोजमसिना श्रीमज्जयन्तस्ततः ॥ ७३ ॥
स्थिरीकर्तुमिवाङ्गेऽस्य हठात्कृष्टां जयश्रियम् ।
मन्त्रैर्जय जयेत्युच्चैः सुराः पुष्पाणि चिक्षिपुः ॥ ७४ ॥

स तस्य सप्ताङ्गसुसंगतां श्रियं जग्राह सार्धं यशसा यशोनिधिः ।
प्रभुः प्रपेदे च तदीयनन्दनैरुदेति यः कोऽपि स एव वन्द्यते ॥ ७९ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते महाकाव्ये श्रीशब्दाङ्के
हरिराजपराजयो नाम दशमः सर्गः ।

एकादशः सर्गः ।

अथ विक्रमभूभर्तुः पुत्रः प्राज्यपराक्रमः ।
प्रताप इव पिण्डस्थः प्रतस्थे दिग्जिगीषया ॥ १ ॥
श्रीजयन्तस्ततः पूर्वं पूर्वस्यामचलद्दिशि ।
चतुरङ्गचमूश्चक्रे चलयन्नचलामपि ॥ २ ॥
वल्गद्भिस्तुरगैस्तस्य द्विरदैर्मदवर्षिभिः ।
प्रापत्समन्ततः कम्पं तं च व्यस्तक्रमं मही ॥ ३ ॥
ततश्चीरखुरक्षुण्णक्ष्मापीठप्रभवैर्भृशम् ।
रजोभिरभवन्वन्ध्यावापारास्तरणेस्त्विषः ॥ ४ ॥
तस्मिंश्चलति भूपालमौलिलालितशासने ।
अहितानामवर्धन्त त्रासश्वासमहोर्मयः ॥ ५ ॥
तत्सैन्यपदसंमर्दनिर्दयोद्धूतरेणुभिः ।
भूभृतां मलिनान्यासंश्चक्राणि च शिरांसि च ॥ ६ ॥
सर्वस्वादानतः केचिन्मानभङ्गाच्च केचन ।
शरण्यं शरणीकृत्य मार्गभूपास्तमन्वयुः ॥ ७ ॥
स पूर्वपर्वतोत्सङ्गतरङ्गितमहोत्सवान् ।
विजिग्ये तरसा भूरि भिल्लानुल्लङ्घितक्रमः ॥ ८ ॥
ततः समुत्तरन्सुह्मानजिह्मितपराक्रमः ।
चकार चरणन्यस्तमस्तकानस्ततेजसः ॥ ९ ॥
नागानुपायनीकृत्य तमेवोर्जितविक्रमम् ।
सिषेवे खर्वितं जानन्गौडः शौण्डीर्यमात्मनः ॥ १० ॥
स वैरिकैरवरविर्दृप्यद्दोर्दण्डमण्डलः ।
प्रापत्तमालहिन्तालश्यामलं कूलमम्बुधेः ॥ ११ ॥

मुक्तासूत्रोर्मिभिर्मुक्ता हठेनार्त्तस्य शूलिना।
स शोकस्येव लक्ष्यन्ते बालेन्दोरश्रुबिन्दवः॥ १२॥
मम राज्ञः कुलस्यापि वनश्रीरुपकण्ठजा।
भग्नामुनावलेनाब्धिरितीव कलुषोऽजनि॥ १३॥
उपस्थितोऽपि मशोषे पानाद्यैरस्य सैन्यतः(?)।
रक्षिका क्षारतैवेति तुष्टुस्तां तुष्टुवेऽम्बुधिः(?)॥ १४॥
निवेश्य शिबिरं तत्र तीरे नीरेशतुस्ततः।
यशस्तोमैरिवात्मीयैर्डिण्डीरैरतिपाण्डुरे॥ १५॥
उत्तुङ्गान्वङ्गभूपालकीलकानुच्चखान सः।
चखान च जयस्तम्भान्निर्दम्भभुजविक्रमः॥ १६॥ (युग्मम्)
प्रतापतपनेनोच्चैः शोषयन्कपिशां नदीम्।
सममुत्कलकान्तानां कस्तूरीपत्रवल्लिभिः॥ १७॥
सैन्यकोलाहलैर्दूरं पूरयन्नोदसीमथ।
चचाल नरशार्दूलः कलिङ्गाधिपतिं प्रति॥ १८॥ (युग्मम्)
अखण्डैः खण्डितारातिभुजदर्पः प्रयाणकैः।
महेन्द्रविक्रमः प्राप महेन्द्राद्रेरुपत्यकाम्॥ १९॥
तत्र निस्त्रिंशनिर्घातत्रुटत्कङ्कटसंकटम्।
निरन्तरशरासारसूत्रितोद्दामदुर्दिनम्॥ २०॥
परस्परास्त्रसंघट्टस्फुरदग्निस्फुलिङ्गकम्।
कलिङ्गपतिना सार्धमभवद्युद्धमद्भुतम्॥ २१॥ (युग्मम्)
विलोड्याथ क्षणेनैव विपक्षबलसागरम्।
कुमारः कैटभारातिरिवोद्दध्रे जयश्रियम्॥ २२॥
तस्यावरोधनैः पुत्रभिक्षामभ्यर्थितस्ततः।
निवेश्य तत्सुतं राज्ये प्रतस्थे दक्षिणां दिशम्॥ २३॥
निशम्य भूभुजङ्गं तमुपायान्तं रसादथ।
साध्वसध्यासिता प्राप दक्षिणा कम्पसंपदम्॥ २४॥

संमुखापतितैस्तस्या दिशश्चाटुकरैरिव ।
लवङ्गवायुभिः शीतैः सिषेवे नृपनन्दनः ॥ २५ ॥
सहास्यामिव निर्मोकनिर्मलैः फेनिलैर्जलैः ।
शकुन्तकूजितैः पूर्वाभिभाषणपरामिव ॥ २६ ॥
शफरोद्वर्तनैर्मुक्तकटाक्षामिव सर्वतः ।
तरङ्गैरङ्गहारांश्च रभसा कुर्वतीमिव ॥ २७ ॥
शीकरैः पवनोद्धूतैः प्ररूढपुलकामिव ।
अथ रेवां स हेवाकमवलोकयति स्म सः ॥ २८ ॥
(त्रिभिर्विशेषकम्)
स तत्तीरतरुप्रान्तविश्रान्तैः किंनरीगणैः ।
कर्पूरगौरमाश्रौषीद्गीयमानं निजं यशः ॥ २९ ॥
तस्यास्तमालहिन्तालश्यामलास्तीरभूमयः ।
असेव्यन्त रतान्तेषु तत्सैन्यललनाजनैः ॥ ३० ॥
सा सिन्धुर्गाहनायातैस्तन्मत्तैभैररुच्यते ।
जग्मुः पयोनिधिः किंतु तेषां दानाम्बुनिम्नगाः ॥ ३१ ॥
विश्रम्य विविधैस्तत्र विनोदैर्भूरिवासरान् ।
प्रतापाग्रेसरः सोऽथ प्रतस्थे केरलान्प्रति ॥ ३२ ॥
बभौ बलभरस्तस्य तिरयन्दक्षिणां दिशम् ।
स्मरन्वैरिमिवागस्त्यं ग्रसितुं वार्धिरुद्यतः ॥ ३३ ॥
शरासने भजत्यस्य वक्रता शक्रतेजसः ।
केरलानां ललाटेभ्यः प्रोषिता भ्रुकुटिच्छटाः ॥ ३४ ॥
अहो तच्चापदण्डस्य नवीनः कोऽपि विक्रमः ।
दर्शयन्युधि यः पृष्टं निष्ठान्नयति विद्विषः ॥ ३५ ॥
प्रतापतपनेनास्य केरलैराकुलीकृतैः ।
आत्मा निर्वापितः पादनखचन्द्रमरीचिभिः ॥ ३६ ॥
अथ स्मरशिशुक्रीडासाक्षिभिर्दक्षिणानिलैः ।
सूचितोऽनाध्वना भूपः प्रतस्थे मलयं प्रति ॥ ३७ ॥

निवेश्य भूभृतो भूभृत्कटके कटकं ततः ।
अध्यास्ताध्यासितान्भोगी भोगिभिश्चन्दनद्रुमान् ॥ ३८ ॥
एलापरिमलाढ्येषु श्रीखण्डद्रुमशालिषु ।
मलयाद्रिनिकुञ्जेषु सरोमरमणीसखः ॥ ३९ ॥
वातः संतापयेदस्मान्मापुने(?)र्विरहेष्विति ।
ददुर्दरीगृहद्वारि शिलाः सेनानतभ्रुवः ॥ ४० ॥
तद्दन्तिदन्तसंघट्टस्यन्दिभिश्चन्दनद्रुमैः ।
अजायत भटस्त्रीणामयत्नेनैव मण्डनम् ॥ ४१ ॥
वैक्रमिर्विक्रमेणाथ पार्वतीयान्विजित्य सः ।
तेभ्यः सारमिवास्याद्रेरुपायनमुपाददे ॥ ४२ ॥
अथ प्रस्थानभेरीणां प्रतिशब्दैर्दरीगतैः ।
शुभं शिलोच्चये तस्मिन्मुहूर्तमिव शंसति ॥ ४३ ॥
चमूचक्रजःपुञ्जैः शोषयन्दक्षिणोदधिम् ।
जयन्तः पर्वतात्तस्माज्जेतुं पाण्ड्यांश्चचाल सः ॥४४॥(युग्मम्)
यथा यथा करोत्येष पदं तद्देशसीमनि ।
तथा तथा विपक्षाणां श्यामिका मुखपङ्कजे ॥ ४५ ॥
तस्मिन्पाण्ड्यमहीभर्तुः समूलोन्मूलनोद्यते ।
भङ्गभीतेश्च तल्लक्ष्मीर्भेजेऽस्य भुजपञ्जरम् ॥ ४६ ॥
तरसा नरशार्दूलः पाण्ड्यानालोड्य दुर्मदान् ।
सांयुगीनत्वमनयदात्मनश्चरितार्थताम् ॥ ४७ ॥
लब्धैकच्छत्रसाम्राज्यपरच्छत्रेऽर्थयेव सः ।
भूभृतां तुङ्गवंशानां सर्वान्दण्डानखण्डयत् ॥ ४८ ॥
ततः सरोजवदनां चक्रवाकपृथुस्तनीम् ।
पृथुरोधोनितम्बां स ताम्रपर्णीमसेवत ॥ ४९ ॥
पयोदपरिरम्भोत्थस्वेदबिन्दुसहोदरैः ।
मौक्तिकैः सरितस्तस्याः स जग्राहोपदामिव ॥ ५० ॥

सहसा संमुखे तस्मिन्रागिणि क्षितिपाङ्गजे ।
तस्तकाञ्चीदिवैशाथ(?) चकम्पे द्राविडक्षितिः ॥ ९१ ॥
विजित्याटविकान्प्राप काञ्चीमञ्चितपौरुषः ।
निरुद्धविषयग्रामो वशीव परमं पदम् ॥ ९२ ॥
बभौ बलभरेणास्य परितः परिवेष्टितम् ।
काञ्ची····रवगाहेण लङ्केव जलराशिना ॥ ९३ ॥
अपश्यन्नथ काञ्चीशः शरणं कांचिदात्मनः ।
सर्वस्वमुपदीचक्रे स्वीचक्रे चास्य शासनम् ॥ ९४ ॥
अथ कर्णाटकान्तानां मदविभ्रमघस्मरैः ।
अपूर्यत प्रयाणेऽस्य रोदसीपटहस्वनैः ॥ ९५ ॥
पश्चादुड्डीनमेतस्य रजोभिः सैन्यसंभवैः ।
प्रत्यर्थिभूभृतां प्राणैः पूर्वमिथ्यावशादिव ॥ ९६ ॥
विपद्भिर्भूभृतस्तस्य न सेहे वाहिनीरयः ।
महोन्नतैरतिस्तब्धैरपि तालद्रुमैरिव ॥ ९७ ॥
विजित्य जगति प्राप्तवर्णः कर्णाटभूपतीन् ।
चकार चरणोपान्तविश्रान्तशिरसः कृणोत् ॥ ९८ ॥
निवेशितबलस्तत्र तीरे दक्षिणनीरधेः ।
अमन्यत गताशङ्कः स लङ्कामङ्कगामिव ॥ ९९ ॥
नभोनिर्झरिणीनीरनर्तिभिर्दुन्दुभिस्वनैः ।
कुर्वन्नुर्वीधरापातप्रतिभामम्भसांनिधेः ॥ १०० ॥
अहितानां हितानां च समं संतापसंमदः ।
तेजोभिश्च यशोभिश्च परितः परिवर्धयेत् ॥ १०१ ॥
सैन्धवीनां कपोलेषु लुम्पन्पत्रलताङ्कुरान् ।
रजोभिः सैन्यसंभूतैः प्रतस्थे पश्चिमामथ ॥ १०२ ॥
(त्रिभिर्विशेषकम्)
तस्य प्रस्थाननिस्वानध्वनिभिर्बधिरा इव ।
अशृण्वन्तः शुभोदर्कमपि वाक्यं विपश्चिताम् ॥ १०३ ॥

तत्सैन्यपांशुभिश्चान्धीभूता इव निरङ्कुशैः ।
अपश्यन्तः पुरस्तात्तं मृत्योर्द्वारमिवात्मनः ॥ ६४ ॥
बान्धवैरिव निर्बन्धादनिमित्तैर्धृता अपि ।
निपेतुस्तमभिक्षायाश्चा····(?)त्पारणरागिणः ॥ ६५ ॥
(त्रिभिर्विशेषकम्)
बलपाथोधिना सोऽथ निजेन नृपनन्दनः ।
आपतन्तीमरातीनां प्रतिजग्राह वाहिनीम् ॥ ६६ ॥
आततज्यधनुर्ध्वानैर्निस्वानानां च निस्वनैः ।
अभूद्भीरुभटश्रेणीस्ततः शब्दो(?)रणक्षमः ॥ ६७ ॥
सोमग्रहणशङ्काभूदातपत्रैः समस्तकैः ।
दिवापि दिवि दीव्यद्भिः शितशस्त्रसमुद्धृतैः ॥ ६८ ॥
गजेन्द्रात्क्षेपितैर्वीरैः स्वैरमाधोरणा बभुः ।
प्रीतये प्रेतनाथस्य प्रस्तुतोपायना इव ॥ ६९ ॥
परस्परास्त्रसंघट्टाद्रेक्षुरग्निस्फुलिङ्गकाः ।
वीरैर्विलोकनायेव कृता दीपा जयश्रियः ॥ ७० ॥
मत्तमातङ्गसंघातनिघातनसमुद्भवम् ।
बभूव क्षीबताहेतु क्षतजं जाङ्गलाशिनाम् ॥ ७१ ॥
अथ व्यथितमालोक्य सैन्यं धनुषि राजसूः ।
कृतान्तभ्रुकुटीभङ्गभीषणो दत्तवान्दृशम् ॥ ७२ ॥
तस्मिन्पर्जन्यवत्तत्र शरासारं विमुञ्चति ।
राजहंसैः समुड्डीनमुद्भूतं कीर्तिकन्दलैः ॥ ७३ ॥
भयंकरं भयस्यापि कृतान्तस्यापि कम्पकृत् ।
चकार वैक्रमिर्वैरिकुलान्तःकरणं रणम् ॥ ७४ ॥
अथारातिसमुद्दीप्ते तेजोऽग्नौ राजसूर्निजे ।
पुरोवर्तिना निःशङ्कमुपयेमे जयश्रियम् ॥ ७५ ॥
तस्मिन्सुरकरोन्मुक्ता प्रस्तनेप्रकरो(?) बभुः ।
कटाक्ष इव शौण्डीर्यसंतुष्टाया जयश्रियः ॥ ७६ ॥

इति निर्जित्य पाश्चात्यभूपतीनवनीपतिः ।
स्वविक्रमकथोद्घोषे चक्रे वैतालिकं न कम् ॥ ७७ ॥
अथ मानवतां मूर्ध्नि पदमुद्दामविक्रमः ।
कुर्वन्नुर्वीपतिर्भोजे धनदाधिष्ठितां दिशम् ॥ ७८ ॥
तस्मिन्नपूर्वमार्तण्डे कौबेरीं दिशमीयुषि ।
विद्विषां समवर्धन्त निशीथिन्यो दिनानि च ॥ ७९ ॥
दुर्निवारप्रतापोऽस्य प्रससार धरापतेः ।
हृदि विद्विषतां किंतु संतापः समवर्धत ॥ ८० ॥
तप्तं तत्तेजसात्यन्तं यशसा शीतलीकृतम् ।
स्नानपानक्रियायोग्यमभूद्वङ्गनदीपयः ॥ ८१ ॥
संजाते संमुखे तस्मिन्दैवे च विपराङ्मुखे ।
मनो हूणनरेन्द्राणां दध्रे देशश्च शून्यताम् ॥ ८२ ॥
हूणाः सोढुमपर्याप्ताः सत्प्रतापं रणाङ्गणे ।
इतीव व्योमवाहिन्याः पयःपूरमशिश्रयन् ॥ ८३ ॥
दिशन्पराजयक्षोभमुत्तराशापतेरपि ।
हिमाद्रिमारुरोहाथ पृथ्वीनाथो जयोद्यतः ॥ ८४ ॥
तत्सैन्यभरमुद्वोढुमक्षमः क्ष्माभृतां पतिः ।
ररास कन्दरावक्त्रप्रतिशब्दैरितीव सः ॥ ८५ ॥
पुण्डरीकप्रभास्तस्य क्रीडन्तः सानुसीमनि ।
अलक्ष्यन्त गिरेरस्य गण्डशैला इव द्विपाः ॥ ८६ ॥
तदापातभयान्नक्तं निलीनाः कन्दरोदरे ।
असूयन्ति महौषध्ये ज्वलन्त्यस्तस्य वैरिणः ॥ ८७ ॥
विजिज्ञे फलकव्यग्रपाणिभिः पादचारिभिः ।
गिरिशृङ्गगतानश्मवर्षिणः सक्षणा द्विषः ॥ ८८ ॥
प्रणतिलुलितमौलयः पुरस्ताद्रुततरमेत्य वनेचराः कुमारम् ।
विविधमणिसुवर्णरत्नदानैः शिरसि कृताञ्जलयोऽथ भेजिरे ते ॥ ८९ ॥

ततः समुत्तीर्य गिरेरनुद्रुतो वनेचरैर्विश्ववशंवदः पदम् ।
बबन्ध कालागुरुगन्धबन्धुरे स कामरूपामधिदेशसीमनि ॥ ९० ॥

विश्वंभराविजयजाग्रदुदग्रवीर्यं
तं कामरूपनृपतिः स्वपुरं प्रवेश्य ।
तैस्तैरुपायनशतैरभिनन्द्य पूर्व-
मुर्वीपतिं तदनु शासनमाददेऽस्य ॥ ९१ ॥

इत्थं पृथ्वीवलयमखिलं पादमूले स कृत्वा
कीर्तिस्तम्भस्तबकितपयोराशिवेलावनान्तः ।
कुर्वन्नुर्वीपरिवृढशिरःशेखरम्लानिमुच्च-
त्तेजःपुञ्जैः स्वनगरमथ श्रीजयन्तः प्रतस्थे ॥ ९२ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के दिग्विजयो नामैकादशः सर्गः ।

द्वादशः सर्गः ।

अथ धरणिधवः पतिर्जयन्त्या निजतनयस्य समस्तदिग्जयेन ।
श्रवणपथगतेन सप्रमोदस्तबकभराञ्चितमानसो बभूव ॥ १ ॥
बहुविधरसभङ्गिसङ्गि लास्यं निजपुरि वर्धनकं व्यधापयत्सः ।
रिपुविजयमनु क्षितीश्वराणां भवति पुरीषु न का महोत्सवश्रीः ॥ २ ॥
कतिपयदिवसव्यतिक्रमेऽस्य श्रवसि विवेश वचो यथात्मसैन्यात् ।
नृप तव तु जयं जहार कश्चिन्निधिमिव भूमितलाददृष्टरूपः ॥ ३ ॥
समजनि पितुराकुलं त्वमन्तस्तदशुभसंभवशङ्कया सुतस्य ।
प्रथयति हि तनुत्वमम्बुराशेरविरवियोगदिशापि शीतरश्मेः ॥ ४ ॥
उदितसुतवियोगदुःखभारप्य(?)वनितौ शुभशंसिभिर्निमित्तैः ।
किमपि मनसि निर्वृतिं विधाय स्थितवति धैर्यमहानिधावितश्च(?)॥५॥
शिखरकखितशीतराशिबिम्बस्रवदमृतस्रपनैरिवातिशुभ्रे ।
क्षितियुवतिशिरोवतंसकाल्यरजतगिरौ स्वचराधिवासधाम्नि ॥ ६ ॥
तदुपरि धरणीविचित्ररोचिर्मणिमुकुटोत्कटडम्बरं समृद्ध्या ।
सुरपुरविजयाय जागरूकं गगनविलासपुरं पुरं समस्ति ॥ ७ ॥

रिपुधरणिभुजां भुजावलेपप्रसरतमिस्रसरोजिनीभुजङ्गः ।
प्रसमरजिनशासनोन्नतिर्यः पवनगतिर्नृपतिः स तत्प्रशास्ति ॥ ८ ॥
त्रिभुवनविजयाय मीनकेतोर्निरुपममेकमिवास्त्रमस्य राज्ञी ।
समजनि जगदर्थ्यरूपलक्ष्मीर्जिनमतपुण्यमयीव चित्रलेखा ॥ ९ ॥
रतिरमणनृपान्तरङ्गसेना निरवधिरूपवतीषु लब्धरेखा ।
समजनि तनया क्रमेण तस्याः कनकवती कनकाभिगम्यकान्तिः॥१०
सरसमथ सुपुत्रजन्मनीव क्षितिभृदकारयतोत्सवं तथास्याः ।
असुभगमिह जन्म कन्यकानामजनि यथैष वृथा प्रवादपङ्कः ॥ ११ ॥
क्षितिपतिकुलकन्यकोचिताभिः सकलकलाभिरलंकृता क्रमेण ।
अवनिपतिसमा सुवर्ण्यरूपप्रमुखगुणा सुखमेधते स्म तन्वी ॥ १२ ॥
इयमतिशयसौरभाभिरामे कमल इवालिवधूर्जिनेन्द्रधर्मे ।
निरवधिमधुनेव सिद्धिलक्ष्मीः सततसुखेन मनोहरेऽभिरामे ॥ १३ ॥
कुसुमशरसुधारसायनं सा युवजननेत्रचकोरचन्द्रिकाभः ।
प्रसृमरगुणचित्रचित्रसौधं सकलविलासमयं वयः प्रपेदे ॥ १४ ॥
शुभकुल····रूपशौर्यराज्यैर्नृपतिशतैः सविता सुतामयाचि ।
नलिनगुणतया स तानमुञ्चत्सदृशगुणौर्हि समागमो गुणाय ॥ १५ ॥
निजतनयकृते नभश्चरेन्द्रः पवनगतिं प्रणयादयाचतैनाम् ।
अभिलषति वरं न देव कंचिन्मम तनयेत्यथ तेन स न्यषेधि ॥ १६ ॥
तदसुखभरसंक्रमार्तचित्तः क्षितिपतिरौपयिकं विचिन्त्य तत्र ।
अभिमतफलकल्पशाखिशाखा जिनविभुशासनदेवता जयार्च्या ॥१७॥
अवददिति निजाशयं सुतायास्तदनु च योजितपाणिपल्लवा सा ।
स्वजनकवचनं प्रपद्य शेषामिव समुपाक्रमत····क्रमेण ॥१८॥ (युग्मम्)
द्युतिमति सदने कृतासनेयं शुचिघपुरात्तपवित्रशुभ्रवस्त्रा ।
अकृत जिनपदार्चनं प्रमोदाद्यदिदमशेषशुभान्तरायहारि ॥ १९ ॥
मृगमदघनसारकुङ्कुमाद्यैः प्रसृमरसौरभवासितान्तरिक्षैः ।
सुरतरुसुमनःस्रजां समाजैर्मधुपवधूमधुपानकेलिपात्रैः ॥ २० ॥

प्रसरदगुरुधूपधूम्रधूमैर्नभसि घनभ्रमतः स केकिकेकैः ।
अकृत सुकृतिनीष्टदेवतार्चामधिकलभक्तिभरादिवावनम्रा ॥ २१ ॥
(युग्मम्)

तदनु कृशतनुस्तपोविशेषादधिगतदेवतयैक्यमावहन्ती ।
क्षणमिव दिवसान्निनाय यत्नादभिमतयोगसुखाय योगिनीव ॥ २२ ॥
सुरभिपवनमिश्रपुष्पवृष्टिः समजनि सप्तमवासरेऽथ तत्र ।
रुचिविजिततडिल्लता पुरस्ताज्जगदिदं समुपेत्य देवता सा ॥ २३ ॥
अयि नृपतनये तवेतिभक्तेरिह जिनशासनदेवताहमागाम् ।
फलतु वरमनोरथस्तवायं तरुरिव दोहदतः प्रसादतो मे ॥ २४ ॥
चतुरुदधिपयःपवित्रसीमक्षितिवलयैकविलासिना वरेण ।
भव रजतगिरिप्रसिद्धविद्याधरनृपवन्द्यपदा जयन्तनाम्ना ॥ २५ ॥
मम वचनमिदं निवेद्य सद्यो जनयितुरिष्टवरस्य संगमाय ।
व्रज निजपरिवारवर्धितश्रीर्जिनसदनोपवनेऽपनीतखेदे ॥ २६ ॥
इदमुदितवती तयार्चितासौ सपदि तिरोभवदाहता तदुक्तम् ।
उषसि शशिमुखी तथैव चक्रे हितवचने हि रताः शुभं लभन्ते ॥२७॥
सकलनृपतिचक्रमेकहेलं स्फुरदनुभाववशंवदं विधाय ।
निजनगरमभिप्रयान्तमेषा झटिति जयाथ जयन्तमाजहार ॥ २८ ॥
प्रकटितहृदयानुकूलभावं मुखमवलोक्य विकस्वरं स तस्याः ।
पदकमलयुगं त(न)नाम देव्या विनयगुणाञ्चितमानसा हि सन्तः २९
अथ निजजननीव सा बभाषे नृपतनयाहमिहानयं नगे त्वाम् ।
तव गगनचरेषु चक्रिलक्ष्मीप्रभवगुणा नृपकन्यकां प्रदित्सुः ॥ ३० ॥
ध्वजपटमिषतो वरेण्यपुण्यप्रभवगुणा तयेव(?) जगत्सु दक्षपात्रे ।
इह सुरसदने जिनेन्द्रबिम्बं ····नयनामृतसारणिं स्वनेत्रे ॥ ३१ ॥
वियदिव परिमातुमुच्छ्रितानां विकसितपुष्पमिषेण पादपानाम् ।
घनमुपहसतीव नन्दनाह्वं वनमपि यन्निजवैभवोदयेन ॥ ३२ ॥
सरसफलभरावनम्रशाखद्रुमशिखरैः पवनेन यन्नमद्भिः ।
प्रणमदिव जिनं शिरोभिरस्यालयमतुलं परिवृत्य तिष्ठति स्म ॥ ३३ ॥

सुरगगनचरेन्द्रसुन्दरीभिः सितनयनाञ्जलिभिः प्रपीयमानः ।
तदिदमुपवनं स्वलीलयालंकुरु भविता च तयेह संगमस्ते ॥ ३४ ॥
समयसमुचिते कृतेऽथ कृत्ये मितपरिवारविभूषितस्तयासौ ।
हितजनवचनं बुधैर्विधेयं ध्रुवमिति जैनगृहे जगाम हृष्टः ॥ ३५ ॥
अहमहमिकया जिनेन्द्रबिम्बं खचरनृपैर्विहितोत्सवं स तत्र ।
सरभसमवलोकयांबभूव ध्रुवशिवसौख्यतरोरवन्ध्यबीजम् ॥ ३६ ॥
निरवधिमकरन्दबिन्दुवृन्दैः सततवशंवदषट्पदैः प्रसूनैः ।
मुखकमलनिलीनलोचनोऽसौ सरभसमर्चयति स्म····त्कुमारः ॥ ३७ ॥
विपुलपुलकमांसलः सदेवं प्रणयवशीकृतमानसः प्रणम्य ।
शुचिरुचिपटलीजटालमुच्चैर्मणिमयमण्डपमासदत्तदग्रे ॥ ३८ ॥
जनकुमुदततेः कुमुद्वतीनां पतिरिव यः परितश्चकास्ति तत्र ।
घनसमय इवोपशान्तिवल्लेः कुमतकरीन्द्रघटासु केसरीव ॥ ३९ ॥
फलमिव परिपाकि दाडिमीनां चिरपरिचुम्बितनिष्कषायभावम् ।
सततमपि मनो यदीयमास्ते····नमिव सत्करुणोदयैश्च हृद्याम् ॥ ४० ॥
विषयविषविषङ्गवैशसस्य(?) स्फुरति लवोऽपि न यस्य मानसान्तः ।
प्रतिकलमिह खेलति स्म यस्मात्प्रसृमरशान्तरसामृतप्रवाहः ॥ ४१ ॥
समतृणमणिलोष्ठकाञ्चनस्य त्रिकरणशुद्धिवधूधवस्य यस्य ।
क्रमकमलनमस्ययापि जन्तोस्त्यजति सुदुस्तरतामदं भवाब्धिः ॥ ४२ ॥
सुरगिरिवयसस्तटैः स रत्नैस्तरुरिव सौरभशालिभिः प्रसूनैः ।
शिवपथपथिकैकसार्थवाहः प्रथितयशाः स्खलितस्मरप्रतापः ॥ ४३ ॥
दशविधमदधद्यतीन्द्रकृत्यं गुणमिव यः सुकवेर्महाप्रबन्धः ।
अवितुमिव जगन्ति मोहशत्रोरधिगुणधर्मधरः समन्ततोऽपि ॥ ४४ ॥
भविकशिवपुरीप्रवेशतूर्यध्वनिमधुरैर्वचनैर्जिनेन्द्रधर्मम् ।
खचरसुरजनस्य कीर्तयन्तं स तमवलोक्य ननाम धर्मसूरिम् ॥ ४५ ॥
(अष्टभिः कुलकम्)
गुरुरपि नृपजं स धर्मलाभप्रवितरणेन मुदास्पदं चकार ।
सुरभयति न कं शिरोवतंसीकृतमभितः सितपारिजातपुष्पम् ॥ ४६ ॥

शृणु सगुण जयन्त जैनधर्मं सकलसुखोपयिकं भवद्वयेऽपि ।
इति गुरुवचने स बद्धतृष्णः समजनि चातकवत्पयोदनीरैः ॥ ४७ ॥
सपदि शिवपदाय वीतरागं परममवेहि जिनेन्द्रमेव देवम् ।
किमपि मृगदृशां कटाक्षपातैः शिरसि कृतस्मरशासनैः किमन्यैः ॥४८॥
घनसमयपयोदगर्जिनादैः स्फुटसुमनस्त्वमुपैति केतकीव ।
द्रुतमपि जनता यदीयवाक्यैर्भज सुगुरुं तमपास्तसर्वसङ्गम् ॥ ४९ ॥
परिहर परिहार्यमार्य वीर्यैः कुपथमपथ्यमिवातुरः सकर्णः ।
इतरजनसमानतैव यस्मिन्विषयजुषां खलु देवता गुरूणाम् ॥ ५० ॥
विषयसुखमशेषदेहभाजां मुखमधुरं परिणामदारुणं च ।
इति विदुरधियामपीह शक्तिर्विलसति मोहमहीन्द्रशासनं हि ॥ ५१ ॥
तरुणतनुमतां वराङ्गनेव क्षितिपतनूज दया यदि प्रिया ये(ते) ।
द्रुतमनुभविता तदा ह्यनङ्गव्यतिकररम्यतमां दशां सदैव ॥ ५२ ॥
मुखकमलमलंकरोति सत्य····· ।
····· ॥ ५३ ॥
जनितयुवपतङ्गदेहदाहं ज्वलितगुणं च शिखायमानरूपम् ।
परयुवतिवपुः प्रदीपकल्पं भवति सदा यतधीर्न जातु जन्तुः ॥ ५४ ॥
विविधविभवभोगभूरितृष्णा ज्वरलहरीव भवावधिप्ररूढा ।
जनयति हृदि तापमित्यमन्दं प्रशमय निस्पृहतासुधारसैस्ताम् ॥ ५५ ॥
बलमिव परितश्चतुःप्रकारं जिनगदितं कुरु दानमुख्यधर्मम् ।
नरसुरशिवसंपदां पदं स्वं सपदि चिकीर्षसि चित्प्रियं प्रियाणाम् ॥५६॥
सकलसुकृतकल्पपादपानां दवदहनप्रसरोपमं समन्तात् ।
नय चतुरशमं कषायवर्षं प्रशमरसेन सुधासधर्मणा त्वम् ॥ ५७ ॥
संवेगामृतपूरसुन्दरसुरस्रोतस्विनीस्रोतसि
स्नातुं हन्त नदीप्लु(?)तां वज रजःसंभारसर्वंकषे ।
अर्हन्निर्मलधर्म····विधिनाशृङ्गारसारेण च
स्वं शृङ्गारय यत्प्रभावसुभगं त्वामेति सिद्धिः स्वयम् ॥ ५८ ॥

संजातायां तदनु सुगुरोर्देशनायां जयन्तः
शुद्धः श्रद्धाकवचितमनाः स्वाञ्चितं धर्मकर्मा ।
प्राप्याक्षीणं निधिमिव मुदा मेदुरः सादरोऽयं
जज्ञेऽनन्याभ्युदयसुभगं भावुकश्रीविलासः ॥ ९९ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के कुमारधर्मप्रतिपत्तिवर्णनो नाम द्वादशः सर्गः ।

त्रयोदशः सर्गः ।

अञ्जलिं शिरसि बिभ्रददभ्रव्यक्तभक्तिरसकुम्भमिवोच्चैः ।
श्रीमुनीन्द्रमथ पार्थिवसूनुस्तं प्रणम्य च चचाल यथेष्टम् ॥ १ ॥
तस्य जैनसदनस्य विनिर्यच्चन्द्रकान्तिमणिकान्तिपयोभिः ।
नित्यमुक्षितमिवालिकुलाभं कौतुकादुपवनं स विवेश ॥ २ ॥
यत्र यत्र स चचार वधूभिस्तत्र तत्र सुभगः परिवव्रे ।
श्रीयते हि मधुसौरभसारं पारिजातकुसुमं भ्रमरीभिः ॥ ३ ॥
तद्वपुर्लवणिमामृतपूरैः सूत्रलोलनयनाभिरपाङ्गैः ।
पीयते स्म कुसुमायुधजन्यस्मेरतापमपहर्तुमिवाशु ॥ ४ ॥
लोचनैरिव विकस्वरपुष्पैः पल्लवैः करतलैरिव शौणैः ।
उत्कुचैरिव फलैर्वनलक्ष्म्यास्तत्र विस्मयमतीव सा भजे ॥ ५ ॥
यामिनीचरमयामचिरामे चक्रवाक इव संभृतरागः ।
स प्रियां नृपतिवंशपताकां तां तदेक्षितुमभूदनिमेषः ॥ ६ ॥
देवतावचनतो नृपपुत्री मीनकेतननिकेतनमेकम् ।
साप्यथोपवनमुत्सुकचित्ता संचचार सुकुमारशरीरा ॥ ७ ॥
मार्गसत्वरगमश्रमजातस्वेदबिन्दुभरदन्तुरिताङ्गी ।
अन्तरुल्लसितरागपयोधेर्मौक्तिकैरिव बभौ निचिता सा ॥ ८ ॥
यूथविच्युतमृगीव विलोलक्षिप्तचक्षुरखिलास्वपि चक्षुः ।
तस्य दर्शनकृतेऽत्र वने सा क्वापि केलिनिलये·····सा ॥ ९ ॥

आस्यसौरभमिलन्मधुपालिध्वानमांसलितनूपुरनादैः ।
तत्र कांचन विभाव्य मृगाक्षीं सोऽपि कौतुकवशेन विवेश ॥ १० ॥
तां तडिद्द्युतिविजित्वरकान्तिं रूपतर्पितजगत्त्रयनेत्राम् ।
वीक्ष्य विस्मयतरङ्गितचेताः स व्यचिन्तयदिदं युवराजः ॥ ११ ॥
पर्वते किमिह पर्वतपुत्री पर्वतश्रियमवेक्षितुमागात् ।
किं रतिः किमु रमा खलु नैव मर्त्यलोकललनैव निमेषात् ॥ १२ ॥
पादपङ्कजतले खलु रागः पद्मरागरुचिरः प्रथितेऽस्याः ।
निर्ममे मम मनोद्रुमरागं सांप्रतं कृतपदेयमतीव ॥ १३ ॥
लाक्षया विहितरागतरङ्गैः साङ्कुरैः स्मरतरोरिव बीजैः ।
पादपङ्कजनखैः समयूखैः शोभते रजनिजानिमुखीयम् ॥ १४ ॥
विद्रुमद्रुममरीचिसगोत्रैः पादयोर्नखमयूखशिखाग्रैः ।
एतदङ्गलतिका स्मरभूभृद्दोःप्रतापपटलीव विभाति ॥ १५ ॥
एतदङ्घ्रिसुभगाकृतिलक्ष्मीलाभलम्पटतयेव सदापि ।
क्षोणिभारवहनव्रतचर्यासेवनैव रसिकोऽजनि कूर्मः ॥ १६ ॥
सुभ्रुवः क्रमपरिक्रमणेऽस्या जात्यहेममणिनूपुरनादैः ।
बोभवीति मकरध्वजभूभृन्निद्रया सततमेव दरिद्रः ॥ १७ ॥
हारिणीं क्रमगतिं हरिणाक्ष्याः शिक्षितुं सुचिरमभ्यसनेऽपि ।
केलिहंसललना न शशाक खल्पधीः खलु जलाशययोगात् ॥ १८ ॥
रामणीयकमनङ्कुशमस्या जङ्घयोरनघयोरवलोक्य ।
नूनमुद्गतपराभवदुःखा सस्मरेणललना वनवासम् ॥ १९ ॥
एतदूरुमिषतः पृथुरम्भास्तम्भयुग्ममिव यौवनलक्ष्म्याः ।
उद्गतः प्रविशतः पुरमध्ये मन्मथक्षितिपतेः प्रतिभाति ॥ २० ॥
दीपदीप्तमणिकाञ्चनकाञ्ची किङ्किणीकणमिषान्नृपपुत्र्याः ।
यौवनोन्मदकरीन्द्रपुरस्ताड्डिण्डिमारव इव प्रतिभाति ॥ २१ ॥
उल्लसल्लवणिमामृतवीच्या नाभिमण्डलगभीरसरस्याः ।
रोमराजिरुपकण्ठजदूर्वा प्रातिभं वहति चारुदृशोऽस्याः ॥ २२ ॥

उन्नतिः कठिनयोः कुचयोर्यत्स्थानमप्युपरि मे मृदुनोऽस्याः ।
तत्सुदुःसहमतीव बभूव क्लेशवश्यमुदरं कृशमस्याः ॥ २३ ॥
भारितं गुरुभरेण कुचाभ्यां विस्तृतेन जघनेन च रुद्धम् ।
इत्यसह्यतमवेदनयेव प्राप्तमेतदुदरं ननु कार्श्यम् ॥ २४ ॥
एतदुच्चकुचसद्मनि निश्रेणीव भाति ललिता त्रिवलीयम् ।
गच्छतो रतिपतेरवलम्बस्तारहारलतिकोभयतोऽत्र ॥ २५ ॥
कण्ठसौष्ठवगुणैर्गमितोऽयं कम्बुरम्बुजदृशा परिभूतिम् ।
नूनमन्तरधुनापि दधात्यावर्तरूपमतिदुःखमितीव ॥ २६ ॥
सुभ्रुवो मदनकेलिगुरुत्वं प्राप्तवत्यतितरां कुचयुग्मे ।
निर्भराम्बुभरविभ्रममेति स्फारहारलतिकोभयतोऽस्याः ॥ २७ ॥
केतकीदलदृशः स्तनपीठे सूत्रयत्यधरपल्लवकान्तिः ।
अप्रयत्नभवकुङ्कुमरागश्रीविलासमनुवेलममुष्याः ॥ २८ ॥
एतदीयसरलोन्नतनासा वंशपार्श्वगतलोचनयुग्मम् ।
एकनालकमलद्वयशोभा वैभवं दधदिव प्रतिभाति ॥ २९ ॥
लङ्घितुं श्रवणयोश्चिरसीमां लोचने मृगदृशो विवदाते ।
निर्विवादविषयेऽपि विवादः शश्वदश्रुतिमतां किमु चित्रम् ॥ ३० ॥
नित्यभूषणजुषः श्रुतियुग्मस्योपमास्तु किमु मौक्तिकशुक्त्या ।
या विदार्य परिमुञ्चति मुक्तामण्डनं निजमखण्डमरीचि ॥ ३१ ॥
अग्नितापघटनैर्घटदुःखं यच्च रत्नखचनाद्युपसोढुम् ।
तत्कपोलतलचुम्बनतोऽस्याः कुण्डलद्वयममन्यत सौख्यम् ॥ ३२ ॥
अष्टमीशशिनिभेऽधिकनीलं भ्रूयुगं लसति भालतलेऽस्याः ।
वल्लरीद्वयमिवास्यसरस्याः संभृतं लवणिमामृतपूरैः ॥ ३३ ॥
तारकावलयवैभवभाजा व्योमपार्वणहिमद्युतिनेव ।
कान्तिमौक्तिकवृतेन नताङ्ग्याः शोभतेऽलिकतलं तिलकेन ॥ ३४ ॥
कुन्तलैरलिकुलैरिव नीलैः केसरैरिव रदद्युतिपूरैः ।
कण्ठनालपरिवर्धितशोभं शोभते वदनवारिजमस्याः ॥ ३५ ॥

आहृतेन जगतामपि लावण्यामृतेन ससृजे वपुरस्याः ।
वेधसा युवतिसृष्टिकलायां स्वस्य कौशलधरामिव मातुम् ॥ ३६ ॥
स्त्रैणसृष्टिनिपुणेन विधात्रासर्जि नूनमियमेव मृगाक्षी ।
श्रोत्रनेत्रपथमेति यदन्या नेदृशी क्वचन काचन तन्वी ॥ ३७ ॥
रूपगर्वमयतां स्मरकान्ता पार्वती सुभगतामदमेतु ।
स्त्रैणसर्वगुणगौरवपात्रं किं त्वियं परमिति प्रतिभा मे ॥ ३८ ॥
खेचरेन्द्रदुहितापि कुमारं रूपसंपदपहस्तितमारम् ।
वीक्ष्य तत्क्षणमभूदनुरागक्षीरसागरतरङ्गनिमग्नाः ॥ ३९ ॥
प्रेरितैः प्रथमतः प्रणयेन व्रीडया विचलितैरथ किंचित् ।
तिर्यगञ्चितपुटैर्नयनैः सा तं ददर्श मुहुरम्बुरुहाक्षी ॥ ४० ॥
श्रीजयन्तजगदद्भुतरूपस्तम्भिताङ्गलतिकां नृपपुत्रीम् ।
तां विभाव्य सरसोक्तिसनाथं तत्सु(त्स)खी शशिमुखीति बभाषे ॥४१॥
संपदास्य पुरतस्तृणमिन्द्रस्तेजसा कमलिनीहृदयेशः ।
मीनकेतुरपि भासुररूपश्रीविशेषललितैः प्रतिभाति ॥ ४२ ॥
स्वर्गराज्यहरणोल्बणशङ्काशङ्कुसंकुलमना इव शक्रः ।
अस्य विश्वजयिनः श्रुतशौर्यः कौतुकादपि न भूतलमेति ॥ ४३ ॥
दानशौर्यगुणगौरयशोभिर्भूषितं सुभगमस्य चरित्रम् ।
गीयते स्मरतरङ्गितगात्रं स्वर्वधूभिरखिलास्वपि दिक्षु ॥ ४४ ॥
भाति भोगिषु तथा न फणीन्द्रस्तारकेषु न च तारकराजः ।
भासुरेषु न सुरेषु सुरेन्द्रः क्ष्माविलासिषु यथैष कुमारः ॥ ४५ ॥
विक्रमप्रथितविक्रमसिंहक्षोणिवल्लभकुलाम्बरचन्द्रम् ।
आत्मतुल्यगुणमाशु भजैनं दुर्लभो हि सदृशैः खलु सङ्गः ॥ ४६ ॥
धारयेव नववारिदपङ्क्तेः कान्तवर्णनगिराथ तथास्याः ।
केसरैरिव बभौ पुलकौघैः सा कदम्बसुमनःपटलीव ॥ ४७ ॥
साचि संचरणदक्षिणचक्षुः क्षिप्तमौक्तिकसदृक्षकटाक्षैः ।
वीक्षितो मृगदृशाथ जयन्तस्तत्करग्रहणसौख्यमिवाप ॥ ४८ ॥

सा विकासिवदनापि कुलीना लज्जया निगदितुं न शशाक ।
किं तु कम्पपुलकाञ्चितगात्रैरेव तं वरतया प्रतिपेदे ॥ ४९ ॥
प्रेर्यमाणमिव हर्षतरङ्गैरालिचक्रमचिरेण कुमार्याः ।
एत्य भूपमभिनम्य च सम्यक्तां व्यजिज्ञपयदीप्सितसिद्धिम् ॥ ५० ॥
तां विलोक्य जिनशासनदेवीं तत्र राजतनयापि तुतोष ।
श्रीकुमारवरदाननिदानव्यक्तभक्तिरथ पूजयति स्म ॥ ५१ ॥
निःसमानबहुमानविधानात्सप्रमोदहृदया सविशेषम् ।
देवता तदनु साजनि तस्याः कामधेनुरिव कासितदानैः ॥ ५२ ॥
अभ्यगादथ नृपः स महर्द्ध्या तं नरेन्द्रतनयं सह देव्या ।
सोऽपि तस्य विदधे प्रतिपत्तिं नौचितीं त्यजति जातु कुलीनः ॥ ५३ ॥
तौ कथां प्रथयतः स्म मिथस्तां प्रेमवारिनिधिवीचिमिवोच्चैः ।
या श्रुता सुरगुरोरपि चेतः स्मेरविस्मयरसं विदधाति ॥ ५४ ॥
कन्यका **कनकवत्य**भिधाना पादपङ्कजयुगे निजपित्रोः ।
सा सहेलमलिनीव महीयः स्नेहसौरभवशेन सिषेवे ॥ ५५ ॥
स व्यचिन्तयदिदं मम यू(नू)नं सांप्रतं विधिरभूदनुकूलः ।
मामकीनतनयावरयोर्यच्चन्द्रिकाशशभृतोरिव योगः ॥ ५६ ॥
रूपवैभवकलाद्भुतभाग्येनामुना जगति कोऽपि सदृक्षः ।
अस्य ते न तनया मम योग्या पाणिपीडनकृते कृतवर्ण्या ॥ ५७ ॥
इत्युदीर्य निजबन्धुसमक्षं विक्रमक्षितिपतेस्तनयाय ।
तं महेन महता स महीन्द्रः शौरये श्रियमिवाब्धिरदत्त ॥ ५८ ॥
सिक्तमार्गमथ कुङ्कुमनीरैर्यद्विचित्रकुसुमप्रकरं च ।
आम्रकम्रदलवन्दनमालं गोपुराग्रमणितोरणराजि ॥ ५९ ॥
वीज्यमानहरिदश्वरथाश्वैः केतुभिर्बहु चितं सितसौधम् ।
यद्विचित्रमणिभूषणरेखारामणीयकतरङ्गितपौरम् ॥ ६० ॥
श्रीमदम्बरविलासपुरे स्वः(स्वे) स्वःसमानगुणसंपदि तत्र ।
देवतार्पितविमाननिषण्णः पावनं **पवनगत्य**भिधानः ॥ ६१ ॥

संविधाय पुरतः खचरेन्द्रः श्रीजयन्तयुवराजविमानम् ।
आतपत्रचलचामरलक्ष्मा दत्तविस्मयरसं प्रविवेश ॥ ६२ ॥
(चतुर्भिः कलापकम्)
वैक्रमेस्तदनु कुण्डलसंज्ञस्तत्र सत्वरमुपेत्य····ह्वान्तिः ।
उक्ततातकुशलोऽथ समीपे काञ्चनासनमलंकुरुते स्म ॥ ६३ ॥
निश्चितेऽप्रतिमलग्नदिनेऽथ क्ष्मापतेर्मुदि मनो निममद्य(ज्ञ) ।
कृत्यजातमपि बन्धुवधूभिर्भूपसंपदुचितं विदधेऽत्र ॥ ६४ ॥
प्रत्यहं करयुगाङ्गुलिपर्वीश्रेणिभिस्त्वरितमेणदृशोऽस्याः ।
लग्नपूर्वदिवसान्गणयन्त्याः कान्तसंस्मृतिरभूत्खलनाय ॥ ६५ ॥
तां तदाभ्युदयभाजि मुहूर्ते विष्टरे मणिमये विनिवेश्य ।
सर्वमप्यविधवाः कुलवध्वस्तेनिरेऽथ विधिना विधिजातम् ॥ ६६ ॥
उद्यदम्बुरुहिणीप्रियरोचिः संगमारुणसरोरुहलक्ष्मीम् ।
सान्द्रयावकरसेन तदीयं रञ्जितं पदतलं जयति स्म ॥ ६७ ॥
निर्मिते च रुरुचेऽरुणरोचिः पादपङ्कजनखव्यपदेशात् ।
तत्तनोः कृतपदस्य सपर्यां बन्धुजीवकुसुमैः कुसुमेषोः ॥ ६८ ॥
निःसपत्नविनिवेशितरत्नैः पञ्चवर्णकिरणाङ्कुरितैः सा ।
भूषणैरुपचिताङ्गविभूषा कल्पशाखिलतिकेव रराज ॥ ६९ ॥
यत्प्रसाधनमसूत्रि(त्र)त तस्याः सर्वतो लवणिमातिशयाय ।
तत्सुधाधवलनं तुहिनांशोः स्वादुताथ सितया च सुधायाः ॥ ७० ॥
निर्मितानि किरणैरिव चान्द्रैः पारिणेत्रसिचयान्यथ कन्या ।
पर्यधायि कृतकङ्कणबन्धा सूत्रितोचितविवाहविधेया ॥ ७१ ॥
सा विवाहसदनं नृपपुत्र्या देवता व्यरचयद्रुतमेव ।
भूरिभङ्गिरचनाञ्चितशोभावैभवादनिमिषैर्नृभिरीक्ष्यम् ॥ ७२ ॥
कामधेनुनवगोमयपूतं कल्पशाखिदलवन्दनमालम् ।
इन्द्रचापचतुरद्युतिदण्डैस्तोरणैर्मणिमयैरधिकश्रि ॥ ७३ ॥ (युग्मम्)
तत्र साङ्कमधिरोप्य कयाचिन्मातृदेव्यभिमुखं लघु नीत्वा ।
पादयोर्नतिमकार्यत तासामासिता च रुचिरासनमग्रे ॥ ७४ ॥

सप्रमोदपुलकं कलकण्ठध्वानगानजनितप्रमदाभिः ।
तत्क्षणोचितविधिप्रवणाभिः कृत्यवस्तुनि कृते प्रमदाभिः ॥ ७५ ॥
भूषितः सुरवितीर्णमयूखप्रेङ्खदुल्बणविभूषणमुख्यैः ।
आवृतः परिकरेण समन्ताच्चारुवेषरचनारुचिरेण ॥ ७६ ॥
विक्रमक्षितिपतेरथ सूनुः पाणिपीडनसमुत्सुकचेताः ।
प्राचलत्समधिरुह्य विमानं कामिनीनयनकैरवचन्द्रः ॥ ७७ ॥
(त्रिभिर्विशेषकम्)
वैत्रिणेव सुहृदा दिदशेन(?) स्नेहतः सपदि दर्शितमार्गः ।
द्वारि खेचरपतेः सदनस्य प्राप शंभुरिव सोऽथ हिमाद्रेः ॥ ७८ ॥
आगताभिरभिराजवधूभिः सूत्रनेत्रकमलैः परितोऽपि ।
पूज्यमानतनुरुत्तरति स्म स्मेरपङ्कजमुखः स विमानात् ॥ ७९ ॥
तस्थिवानथ मरुद्भुजदण्डं.....बमवव्यकरेण ।
कल्पपादपलताश्रितहस्तै(?)रावतश्रियमुवाह कुमारः ॥ ८० ॥
मङ्गलानि धवलानि च गायन्तीभिरद्भुतरसं वरवध्वोः ।
अर्थदानमथ कङ्कणबन्धसूत्रितस्य विदधे सधवाभिः ॥ ८१ ॥
ताः कुसुम्भरसरञ्जितवस्त्रं कण्ठकन्दललते विनिवेश्य ।
सौधमध्यमनयन्मृगनेत्राः श्रोत्रपेयकलगीतविलासम् ॥ ८२ ॥
श्रीजयन्त इति नामनि मन्त्रे योगिनीव मतकारिणिनीला ।
सास्ति यत्र कुसुमास्त्रपताका मातृपूजनमसौ विदधेऽत्र ॥ ८३ ॥
(युग्मम्)
वाससा शशिरुचाथ स तन्वीं तामशय्य(पश्य)दवगुण्ठितदेहम् ।
क्षीरसागरविसारितरङ्गैरावृताङ्गलतिकामिव लक्ष्मीम् ॥ ८४ ॥
कारिते हृदयहारिणि तारामेलके लघु यथाविधि तत्र ।
हृष्टयो मिथुनकस्य विरेजुः कामशाखिकुसुमोद्गमकल्पाः ॥ ८५ ॥
वेदिकाम्बरमितः सह वध्वा स्त्रैणमुल्लसितगीतमनैषीत् ।
तत्क्षणं च मकरध्वजराजं प्रोढमानमिह विश्वजयाय ॥ ८६ ॥

आसने कनकरत्नमयेऽसौ मोदमेदुरमना निषसाद ।
तस्य पार्श्वमभजन्नृपपुत्री वल्लरीव वनकल्पतरोः सा ॥ ८७ ॥
देवताभिरवरोधवधूभिर्बन्धुभिश्च विविधैरथ पौरैः ।
मन्दिरं नृपजनैरपरैस्तद्दाडिमीफलमिवाजनि बीजैः ॥ ८८ ॥
निःस्वने निभृतचक्षुषि लोके सावधानहृदये च नरेन्द्रे ।
झल्लरीध्वनिमुखेन विदित्वा लग्नमुच्चसकलग्रहरम्यम् ॥ ८९ ॥
हस्तलेपमतिपावनशम्यश्च्छ(त्थ)चूर्णमति तूर्णमथार्द्रम् ।
श्रोत्रियः करतले नृपपुत्र्या न्यदिप(ध)त्स्मरतोरिव बीजम्(?)॥ ९० ॥
(युग्मम्)

सेक्तुकाम इव तत्क्षणजातस्वेदबिन्दुनखरक्षरणेन ।
तच्च पाणिकमलेन कुमारः सोत्सवं स पिदधे सुमुहूर्ते ॥ ९१ ॥
तत्क्षणं धवलमङ्गलमिश्रैरुच्छलद्बहुलतूर्यनिनादैः ।
मण्डलानि स·····परितोऽभ्रैर्निर्वृतिं च खचरक्षितिभर्तुः ॥ ९२ ॥
तत्र मण्डलचतुष्कसमाप्तौ खेचराधिपतिरात्मसुतायाः ।
पाणिमोचनमचीकरदुच्चैराज्यसारविभवेन कुमारम् ॥ ९३ ॥
तत्र दानसमये खचरेन्द्रः प्राज्यवाजिकरटीन्द्रघटाभिः ।
स्वर्णरत्ननिकरैश्च स चक्रे श्रीपतिं हरिमिवार्थिसमाजम् ॥ ९४ ॥
याप्ययानरथवाजिगजस्थै राजलोकनिवहैः स्मितचक्रैः ।
आवृतैः स्वशरभूमिभृतायं प्राज्यऋद्धिपरिवारवृतेन ॥ ९५ ॥
दम्पती समधिरुह्य विमानं छत्रचामरतरङ्गितकान्ती ।
पौरवर्ण्यगुणरूपविभूती प्रापतुस्तदनु तौ सदनं स्वम् ॥ ९६ ॥
(युग्मम्)

वैजयन्तमिव भूमितलेऽन्यं वासमन्दिरमगात्सह वध्वा ।
कामकेलिखुरलक्षितकल्पं यत्र कल्पितमदृश्यत तल्पम् ॥ ९७ ॥
यत्परस्परसमर्पितचि····साचि संचरितनेत्रयुगं तत् ।
यन्मनोभवमनोरथपात्रं तत्तयोरजनि दर्शनमत्र ॥ ९८ ॥

रूपकौतुकविलोकनलोलं लोचनाम्बुजयुगं च मिथस्तौ ।
हर्षबिन्दुभिरिवार्थयतः स्म स्वाभिवाञ्छितकरः खलु पूज्यः ॥ ९९ ॥
तौ मिथोऽप्रतिमकौतुकरूपं श्रीविलोकनविमोहितनेत्रौ ।
तत्क्षणादमृतसिन्धुतरङ्गस्नापिताविव तदा समभूताम् ॥ १०० ॥
मुद्रितेक्षणयुगः सुखनिद्रामुद्रयानववधूपरिरम्भात् ।
उत्तरङ्गरतिसागरमग्नस्तत्क्षणं क्षणमिवैष निनाय ॥ १०१ ॥

देव त्वल्लीलयोच्चैर्धरणिधरशिरःश्रेणिषु न्यस्तपादः
पद्मोल्लासं समन्ताद्विदधयदुदयैः पद्मिनीप्राणनाथः ।
निद्रामुद्रादरिद्रे विरचय नयनाम्भोरुहे तत्कुमार
प्रातःकृत्यप्रवृत्तिं प्रकटय निकटस्पष्टकल्याणमालाम् ॥ १०२ ॥
इत्थं वैतालिकानां मुखकमलकलोत्तालकोलाहलेन
स्फूर्जन्मङ्गल्यतूर्यप्रसमरमधुरध्वानसंवर्गितेन ।
कान्ताविस्तारितुङ्गस्तनकलशतटाश्लेषसौख्ये निमातः
क्षिप्रं निद्राममुञ्चत्सकलसमयविद्विश्वविश्वैकवीरः ॥ १०३ ॥
प्रणतिपरनरेन्द्रश्रेणिरोचिष्णुरोचि-
र्मणिमुकुटविटङ्काङ्केषु संक्रान्तमूर्तिः ।
स विभुरथ बभाषे भक्तितस्तैरुदूढ-
प्रतिम इव समासे संनिभायां सभायाम् ॥ १०४ ॥
पवनगतिमथैत्य स्वामिदूतो बभाषे
तव कनकवतीति ख्यातिमत्यस्ति कन्या ।
निजतनयकृते तां याचते स्नेहगर्भं
गुरुविनयमय त्वां चक्रवर्ती महेन्द्रः ॥ १०५ ॥
तस्येति दूतस्य निशम्य वाचं तं प्रत्यवादीत्स मुदावनम्रः ।
राज्यं कुटुम्बं विभवश्च सर्वाः प्राणश्च मेऽस्येव विभोः किमन्यत् ॥ १०६ ॥
दत्ता मया किंतु जयन्तनाम्ना भूगोचरेण क्षितिपाङ्गजेन ।
सा पर्यणायीति विभोर्निवेद्यं मदीयभक्त्या प्रथमं प्रसाद्य ॥ १०७ ॥

उवाच दूतोऽथ नरेन्द्रपूर्वं यत्प्रार्थितोऽपि प्रभुणा तथेयम् ।
ददे परस्मै तनया त्वया तन्नूनं कृतान्तः प्रगुणीकृतोऽयम् ॥ १०८ ॥
महापराधेन तव श्रुतेन क्रुद्धे विभौ कः शरणं जगत्सु ।
उत्क्षोपिते यष्टिमुखेन सिंहे क्षेमो हि कौतस्कुतमङ्गभाजः ॥ १०९ ॥
विराजमानं युवराजलक्ष्म्या श्रीचक्रिणोऽप्यस्य सुतं विहाय ।
भूगोचरस्यापि कथं त्वया सा द्विकस्य हंसीव ददे परस्य ॥ ११० ॥
एनं प्रत्यवदज्जयन्तसचिवो नीतिप्रियैः क्षत्रियै-
दूतोऽसीति न वध्यसे स्फुटतरं वध्योऽपि दुर्भाषणात् ।
यस्त्वं किंतु कुधीरवादयदिदं तं दुर्मदान्मेदुरं
युद्धे जीवितसंशयं मम विभोर्नेष्यत्यपास्य श्रियम् ॥ १११ ॥
हेलादिग्विजयार्जितोऽर्जितयशःशस्तप्रशस्ताक्षरै
रम्यां स्तम्भपरम्परां निहितवान्सर्वाब्धितीरेषु यः ।
हीलां कारयितुस्त्वदीयनृपतेरिच्छत्वा शिरःपङ्कजं
संग्रामाङ्गणदेवताङ्घ्रिकमले प्रक्षेप्तुमभ्येति सः ॥ ११२ ॥
श्रीस्वामिदर्पेण पुनर्विवक्षुः कण्ठप्रदत्ताप्रतिमार्धचन्द्रः ।
शश्वत्प्रहारौर्वीहितः कठोरैर्वाक्यैः सभाया निरकाशि..... ॥ ११३ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते श्रीजयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के विवाहोत्सववर्णनत्रयोदशः सर्गः ।

चतुर्दशः सर्गः ।

अथेति दूतादवगम्य सम्यग्विद्याधराणामधिपः प्रवृत्तिम् ।
करालकोपस्फुरदोष्ठपृष्टः क्षणादभूद्भ्रूकुटिभीषणास्यः ॥ १ ॥
जयश्रियं संयति लब्धुमिच्छोस्तस्याबभुः स्वेदलवाः शरीरे ।
सापत्न्यसंभावनया विमुक्ता बाष्पाम्बुलेशा इव राजलक्ष्म्याः ॥ २ ॥
तस्याट्टहासः प्रससार दन्तप्रभाप्ररोहैरुपचीयमानः ।
परं समुल्लासमुपेयुषोऽन्तः शौर्याम्बुधेः फेनिलवानुकारः ॥ ३ ॥

दोष्णः कृपाणे च रुषाभिताम्रा तस्याघदृष्टिः शुशुभे पतन्ती ।
संग्रामकालस्य जयाय पूजानिमित्तमम्भोरुहमालिकेव ॥ ४ ॥
रराज गुञ्जारुणनेत्रकान्तिकरम्बिता तस्य कृपाणलेखा ।
समस्तवैरक्षितिपालशौर्यसूर्यास्तसंध्येव परिस्फुरन्ती ॥ ५ ॥
करीन्द्रकुम्भाहतिकर्कशेन स ताडयन्नंसतटं करेण ।
चिराय वैरिव्ययतः प्रसुप्तं प्रबोधयञ्शौर्यमिव व्यराजत् ॥ ६ ॥
इत्युल्लसत्तीव्रतराभिषङ्गः संग्रामसाध्यं रिपुमाकलय्य ।
अमात्यवृद्धानवधीर्य दर्पात्तं प्रत्यचालीद्रघुनूपुरेशः ॥ ७ ॥
तस्य प्रयाणक्षणवाद्यमाना समाननिस्वानमहानिनादः ।
स संभ्रमैर्निश्चलकर्णतालमाकर्णितो दिक्करिभिर्विवग्मैः ॥ ८ ॥
भेरीरवस्तत्र समुल्ललास तथा यथा ध्यानजुषां मुनीनाम् ।
स संभ्रमाणां करपङ्कजेभ्यो द्रुतं निपेतुः स्फटिकाक्षमालाः ॥ ९ ॥
तत्रोल्लसद्भिः पटहप्रणादैर्दिशां मुखानि प्रतिशब्दवन्ति ।
कुर्वन्ति सामन्तमहीपतीनामकारणं कारणतः स्वभर्तुः ॥ १० ॥
तत्रैककालं परिवाद्यमाननिश्चा(स्वा)नभेरीपटहप्रणादैः ।
संस्थापिता सारथिना त्रसन्तः कथं कथंचित्तरणेस्तुरङ्गाः ॥ ११ ॥
समारुरोहाथ समुल्लसद्भिर्ध्वजैः समन्तादुपढौकितश्रि ।
स चित्ररत्नद्युतिचित्रिताशं विमानमुन्निद्रतराभिमानः ॥ १२ ॥
जाते नभःप्राङ्गणसंगतेऽथ विद्याधरेन्द्रस्य तदा विमाने ।
क्रमेण सामन्तमहीपतीनां विमानपङ्क्तिः पिदधेऽन्तरिक्षम् ॥ १३ ॥
विद्याधराणां रुचिरैर्विमानैर्निरन्तराले पवमानमार्गे ।
श्री····कतैवांशुमतः समन्तादभूदभिज्ञानकृतें तदानीम् ॥ १४ ॥
तस्याथ दैवे प्रतिकूलभावमुपेयुषि प्रोषितपुण्यराशेः ।
समुल्ललासाभिमुखो नभस्वान्कुर्वन्निवोच्चैर्गलहस्तितानि ॥ १५ ॥
तेन प्रचण्डेन समीरणेन समूलमुन्मूलयता पताकाः ।
विनिर्मिता खेचरभूपतीनां विलूनवेणीव विमानमाला ॥ १६ ॥

समन्ततः शोणितपङ्कपिण्डविडम्बनाडम्बरमादधानः ।
बभूव दुष्प्रेक्ष्यतरः खरांशुरवस्थितोऽन्तःपरिवेषमुच्चैः ॥ १७ ॥
दिवाकराधिष्ठितदिग्विभागमाश्रित्य फेत्कारपरम्पराभिः ।
भृशं शिवाः कातरजन्तुजातमुत्रासयन्त्यः प्रकटीबभूवुः ॥ १८ ॥
गच्छन्ति मार्गे सममेव गृध्रश्येनादयः क्रूरपतत्रिणस्तैः ।
व्यापारयन्तो नयनान्यभीक्ष्णं तेषां शरीरेष्वतिमांसलेषु ॥ १९ ॥
पतिप्रयाणां स्खलतोऽप्यभीक्ष्णं स दुर्निमित्तैरिति खेचरेन्द्रः ।
आकृष्यमाणाः किल कालपाशैः स्वदेशसीमानमलंचकार ॥ २० ॥
अत्रान्तरे चारमुखात्तदीयं प्रस्थानमाकर्ण्य स कर्ण्यवर्ण्यः ।
महीपतिर्वायुगतिर्जयन्तममात्यवृद्धांश्च तदेत्यवोचत् ॥ २१ ॥
असौ समागच्छति खेचरेन्द्रः सान्द्राभिषङ्गः किल संयुगाय ।
प्रचण्डदोर्दण्डबलावलेपादपि त्रिलोकीं कलयंस्तृणाय ॥ २२ ॥
जानामि तावद्भुजवीर्यमस्य जानामि राज्याङ्गसमग्रतां च ।
एतच्च जानामि यदस्य दैवमन्यायवृत्तेः प्रतिकूलमेव ॥ २३ ॥
अतः समायान्तममुं निशम्य संग्रामकामं न मदीयमेतत् ।
दोर्दण्डयुग्मं सहते विलम्बमतः परं यूयमिह प्रमाणम् ॥ २४ ॥
इत्थं समाकर्ण्य वचस्तदीयं न्यायानुविद्धं च समुद्धतं च ।
कालोचितं नीतिपथप्रवीणैः पुरस्कृतं मन्त्रिवरैस्तदेव ॥ २५ ॥
यातव्य एवायमयं न साध्यो विद्याधरेन्द्रस्तव देव सद्यः ।
उपेक्ष्यते कोऽभ्युदयी समीपं समीयिवांसं रिपुमस्तशस्त्रम् ॥ २६ ॥
समस्त्यसाध्यं भुवनत्रयेऽपि किं नाम देवस्य सदैव यस्य ।
हठोद्धतारातिबलावलेपः सहायतामेव जयन्तदेवः ॥ २७ ॥
इत्थं च नैमित्तिकभाषितं तत्कृतार्थतामेतु जयन्तदेव ।
अतः प्रचण्डेऽपि नभश्चरेन्द्रजयाय नूनं विजयोद्यमो वाम् ॥ २८ ॥
इतीरितं नीतिपथानुकूलममात्यवृद्धैर्वचनं निशम्य ।
महीपती तौ रभसादभूतां निपीतपीयूषरसाविवोच्चैः ॥ २९ ॥

महीपतिर्वायुगतिस्तदानीं विद्या समग्रा अपि सानुबन्धाः ।
प्रीत्या कुमाराय ददौ स तस्मै किमस्त्यदेयं हृदयंगमानाम् ॥ ३० ॥
अनन्तरं विक्रमसिंहसूनोः प्रत्यग्रपुण्योपचयाञ्चितस्य ।
असाधिता अप्यनुकूलभावं प्रपेदिरे ताः किल पाठसिद्धाः ॥ ३१ ॥
ततः प्रतस्थे स्थिरचित्तवृत्तिः शुभे मुहूर्ते पुरुहूतकान्तः ।
सामन्तसेनापतिमन्त्रिमुख्या नानन्द सद्यः स पुरस्क्रियाभिः ॥ ३२ ॥
प्रयाणतूर्यध्वनिभिः समन्तान्नभोगणं नादमयं वितन्वन् ।
विमानमालाभिरपि प्रकामं समुद्गतार्कै दु(?)सहस्रशोभि ॥ ३३ ॥
(युग्मम्)
तस्मिन्क्षणे दुन्दुभिमेघनादमाकर्ण्य तद्वीर विदूरभूमिः ।
मुमोच रोमाञ्चचयापदेशाद्रत्नाङ्कुरश्रेणिमिव प्रकामम् ॥ ३४ ॥
गभीरभेरीरणितैरमर्त्यमर्त्येषु दूरं बधिरीकृतेषु ।
तदात्मनः सर्पकुलं श्रुतीनामभावमुच्चैर्बहु मन्यते स्म ॥ ३५ ॥
तस्य प्रयाणक्षण एव देवैः प्रसूनवृष्टिर्मुमुचे नभस्तः ।
छन्दानुवर्तीव समीरणोऽपि मार्गानुगामी समजायतास्य ॥ ३६ ॥
वामेतरेणाक्षिसरोरुहेण प्रस्यन्दमानेन तथा भुजेन ।
तदात्मनः संयति सांयुगीनः स निश्चिकायाभ्युदयं जयन्तः ॥ ३७ ॥
तस्य प्रतापेन पुरस्कृतो वा बभूव भानुर्द्विगुणप्रतापः ।
सु(स्व)श्रीकृतानीव तदीयकीर्त्यः प्रसादमापुः ककुभां मुखानि ॥ ३८ ॥
उपक्रमोऽयं विजयाय भावी तस्येति नूनं शकुनाः शशंसुः ।
प्रदक्षिणावर्तमिषेण येन ददुर्निजं दक्षिणहस्तमस्मै ॥ ३९ ॥
इत्युल्लसद्भिः शकुनैरनिन्द्यैरानन्दसंदोहतरङ्गिताङ्गः ।
अलंचकार क्षितिपालचन्द्रः स्वदेशसीमानममानमानः ॥ ४० ॥
समीपभावं समुपागतेऽथ विद्याधराणां शिबिरद्वयेऽपि ।
परस्परं यामिकसैनिकानां भवत्सु कोलाहलडम्बरेषु ॥ ४१ ॥
अन्योन्यशौण्डीर्यगुणप्रकर्षप्रकाशनोत्तालकुतूहलेषु ।
मिथः प्रयुक्तेषु च संचरत्सु तदन्तरे बन्दिपुरंदरेषु ॥ ४२ ॥

निरूपिते निर्भरसङ्गराय दिनेऽथ दैवज्ञगुणैर्गुणाढ्यैः ।
भेरीरवापूरितरोदसीकं सैन्यद्वयं तत्प्रगुणीबभूव ॥ ४३ ॥
(त्रिभिर्विशेषकम्)

पूर्वाचलं चुम्बि(म्ब)ति चण्डरश्मौ विस्मेरवक्त्राम्बुरुहो जयन्तः ।
प्रत्यूषकृत्यं विधिवद्विधाय संस्मृत्य चान्तःस्मरणीयमिष्टम् ॥ ४४ ॥
प्रदक्षिणीकृत्य पतिं प्रभूणामुदञ्मुखः संगरबद्धलक्ष्यः ।
आनन्ददानैरनुजीविवर्गं संग्रामभूमिं समलंचकार ॥ ४५ ॥ (युग्मम्)

अनन्तरं वायुगतिर्नरेन्द्रः समस्तसामन्तसनाथपार्श्वः ।
लब्धाध्वरेखः समराजिरेषु तस्याग्रतोऽभूदसमाभिमानः ॥ ४६ ॥
विद्याधरेन्द्रोऽपि सहस्रसंख्यैः सामन्तसेनापतिभिः परीतः ।
सुते पुरोवर्तिनि सांयुगीने रत्नाङ्गदे संगररङ्गमागात् ॥ ४७ ॥
अवन्ध्यविद्याबलतस्तदानीं पक्षद्वयेऽपि प्रसरत्प्रतापम् ।
आविर्बभूव प्रतिपन्थिका(सा)र्थविक्षोभदक्षं चतुरङ्गसैन्यम् ॥ ४८ ॥
ततः कृतान्तभ्रकुटीकरालकोदण्डचण्डध्वनिपूरिताशम् ।
समं समानैः परिपन्थिसार्थैः प्रारब्धमायोधनमग्रसैन्यैः ॥ ४९ ॥
समुल्लसद्भूरितरान्धकारे निरन्तराभिः शरधोरणीभिः ।
दिवापि निर्भर्त्सितभानुबिम्बं नभस्यभूत्तारकचक्रवालम् ॥ ५० ॥
धनुर्धरः कश्चिदवार्यवीर्यः शौर्यातिरेकाद्युगपत्क्षुरप्रैः ।
प्रत्यर्थिवीरस्य पतत्रिपङ्क्तिमौर्वीजयाशां च[1]····छुलाव ॥ ५१ ॥
निशातनिस्त्रिंशविशीर्णजीर्णशरीरबन्धैर्युधि वीरवर्गैः ।
संप्राप्य दिव्यं वपुराशु मेने परापकारोऽप्युपकार एव ॥ ५२ ॥
परस्परप्रेरितशस्त्रसंघसंघट्टजन्मा जगतः पतीनाम् ।
जयश्रियः पाणिसमागमेऽभूत्प्रदक्षिणा योग्यदशः कृशानुः ॥ ५३ ॥
प्रमादिनं वीक्ष्य विपक्षवीरमरातिसूतः प्रयतः प्रहर्तुम् ।
तदीयनिस्त्रिंशहतोरुयुग्मः सद्यः प्रपेदेऽरुणसारथित्वम् ॥ ५४ ॥

---

१. 'जवा' इति स्यात्.

प्रचण्डदण्डाहतिचूर्णितानां रथस्थितानां रथिनामुपेत्य ।
परस्परास्त्रोन्मथनप्रसूतः पर्यन्तकृत्यं दहनश्चकार ॥ ९५ ॥ (युग्मम्)
प्राणांस्तृणीकृत्य विपक्षकुम्भिकुम्भस्थलीपाटनलम्पटोऽन्यः ।
तदीयमुक्ताफलबीजवापमसूत्रयत्कीर्तिलतोद्गमाय ॥ ९६ ॥
आधोरणानामभितः पतद्भिर्विपक्षविक्षोभकरैश्च कुन्तैः ।
तुरङ्गिणः कीलितकायकाण्डाः समं तुरङ्गैरगमन्रसायाम् ॥ ९७ ॥
तुरङ्गमातङ्कनरोत्तमाङ्गैर्निरन्तराले रणरङ्गपीठे ।
परस्परं लोचनगोचरस्थैरपि प्रहर्तुं चकमे न वीरैः ॥ ९८ ॥
परिच्युतं संयति गाढघाताच्छिरः शिरस्त्रप्रतिबद्धमेव ।
परामृशन्पक्षगणस्तदापत्त्रोटत्रुटेरन्यदहो न किंचित् ॥ ९९ ॥
निशातशस्त्रप्रविदीर्णदेहैर्नागैर्नगेन्द्रप्रतिमैर्निपत्य ।
शिरःसरोजाभरणाः कियन्त्यः कीलालकुल्या परिकल्पिता न ॥ १०० ॥
इति प्रवृद्धे समरोपरागेऽप्यरागवत्तीव्रजवैर्मरुद्भिः ।
श्रीमज्जयन्तस्य विपक्षसैन्यैर्बलं बलिष्ठैः परितोऽवधूतम् ॥ १०१ ॥
ततः प्ररूढप्रमदो मदान्धैर्भूपालवृन्दैरनुगम्यमानः ।
जयन्तमुद्दिश्य विवृद्धकोपो विद्याधराधीशसुतः प्रतस्थे ॥ १०२ ॥
तं वीक्ष्य विक्षोभकरं परेषां परापतन्तं रभसादसह्यम् ।
तदन्तरे वायुगतिर्नरेन्द्रः प्रत्यग्रहीदग्रसरो रणेषु ॥ १०३ ॥
तयोरथोल्लम्भितभीमनादमुदारनाराचतिरोहिताशम् ।
त्रुटत्तनुत्रं भरभग्नपत्रं त्रस्यज्जनं जन्यमजायतोच्चैः ॥ १०४ ॥
समुच्छलद्भिर्गजगर्जिनादैर्हेषारवैरश्वमतल्लिका···· ।
प्रवीरकण्ठध्वनिभिश्च विश्वं विश्वं तदा नादमयं बभूव ॥ १०५ ॥
कश्चित्प्रवीरः परिपन्थिशस्त्रप्रहारमूर्च्छाविधुरोऽतिमात्रम् ।
प्रयातु कामानपि नातु मेने प्रतिप्रहारप्रविधित्सयासून् ॥ १०६ ॥
दृप्तप्रतिद्वन्द्विकृपाणलूने शिरस्यथो सायककीलितेऽन्यः ।
निहत्य सामर्षतया विपक्षं विलक्षकीर्तिर्दिवमारुरोह ॥ १०७ ॥

---

१. 'जा' इति स्यात्.

57650

प्रहारमूर्छाप्रविलुप्तसंज्ञं वरार्थिनी कंचिदुपेत्य वीरम् ।
पुनः प्रवृत्तं प्रधनाय दृष्ट्वा जगाम लज्जां विधुरा सुरस्त्री ॥ ६८ ॥
आधोरणैस्तीव्ररुषः प्रयुक्ताः करैः प्रवीरान्करिणोऽभिगृह्य ।
चक्रुः समाक्रम्य वपुः पदाभ्यां शिरःसरोजैर्बलिमन्तकाय ॥ ६९ ॥
रथाङ्गधीरध्वनिनादमुद्यत्प्रहारकूजत्करिकण्ठनादम् ।
नृत्यत्कबन्धं समराङ्गणं तत्कृतान्तसंगीततुलां प्रपेदे ॥ ७० ॥
गतेऽथ दैवे प्रतिकूलभावं विद्याधराधीश्वरसूनुसैन्यम् ।
कुलं द्विपानामिव सिंहनादादरातिशस्त्रोन्मथनाद्विशीर्णम् ॥ ७१ ॥
ततः प्रहस्य प्रहतप्रवीरकपालमालाकुलितं रणाग्रम् ।
रत्नाङ्गदं वायुगतिर्विधृत्य जयन्तपादान्तिकमानिनाय ॥ ७२ ॥
निशम्य सूनोरपमानमुच्चैर्नभश्चरेन्द्रोऽप्यथ सान्द्रकोपः ।
अनन्यसाध्यं रिपुमाकलय्य प्रचक्रमे स स्वयमाहवाय ॥ ७३ ॥
तस्मिन्समाक्रामति च प्रदोषे तमःसमूहैरिव भूरिसैन्यैः ।
रणाङ्गणं पूर्वमहीधरं वा जयन्तशीतांशुरलंचकार ॥ ७४ ॥
ततस्तयोः संप्रयुजे प्रकोपप्रकम्पमानाधरयोः क्षणेन ।
दृशाथ दृष्टिर्वचसा च वाक्यं शस्त्रेण शस्त्रं युगपत्प्रहर्त्रोः ॥ ७५ ॥
वितेनतुर्निर्विवरं प्रवीराववन्ध्यपातैरिषुभिस्तु तस्थौ ।
नभोऽङ्गणं संगरदर्शिनीनां शूराङ्गनानां जनिताभ्यसूयौ ॥ ७६ ॥
शस्त्रैर्धनुःखड्गभुशण्डिभल्लनाराचचक्रप्रमुखैः सरोषम् ।
कुर्वाणयोः संगरकर्म तीव्रं तयोर्न कश्चित्परभागमाप ॥ ७७ ॥
स दुर्गतस्येव मनोरथेषु समस्तशस्त्रेषु फलीभवत्सु ।
विद्याधरेन्द्रोऽरिवधाय दृप्तं मुमोच दिव्यं द्विरदास्त्रमुच्चैः ॥ ७८ ॥
रणाङ्गणे वैरिवरान्कराग्रैरुल्लासयन्तः कलभास्ततोऽस्मात् ।
निश्चक्रमुः संगरसंमुखानां स्वर्गं स्वदेहैरिव दर्शयन्तः ॥ ७९ ॥
प्रचण्डदन्तावलदन्तदण्डविखण्डितं वीक्ष्य जयन्तदेवः ।
सैन्यं विपक्षक्षयबद्धलक्ष्यः पञ्चाननास्त्रं विससर्ज सद्यः ॥ ८० ॥

बिम्बादिव व्योममणेर्मयूखाः सहस्रशः केशरिणः प्रसस्रुः।
तस्मादकस्मादिभकुम्भपीठं विपाटयन्तः कुटिलैर्नखाग्रैः॥ ८१॥
विद्याधरेन्द्रोऽप्यथ वारणेन्द्रान्पारीन्द्रवृन्दैर्निहितानवेत्य।
समाददे तद्वधबद्धकक्षमक्षीणशक्तिः शरभास्त्रमुच्चैः॥ ८२॥
उदस्तहस्ताः शरभास्ततोऽस्मात्पञ्चाननान्कन्दुकलीलयैव।
समुत्क्षिपन्तो नवनीरवाहगभीरधीरध्वनयो निरीयुः॥ ८३॥
तिरस्कृतान्वीक्ष्य विपक्षमुक्तैः सिंहानथासौ शरभैर्नृसिंहः।
आग्नेयमस्त्रं त्रिपुराय पूर्वं पुरान्तकारीव मुमोच दृप्तम्॥ ८४॥
धूमावलिश्यामलिताम्बरान्तैर्बभौ भटित्रीकृतवीरवारम्।
जाज्वल्यमानैर्ज्वलनैः कृतान्तमहानसं वा समराजिरं तत्॥ ८५॥
भस्मीकृतान्खेचरचक्रवर्ती शिखिप्रपञ्चैः शरभानवेत्य।
ततस्तदाटोपहरं तपस्वी पाथोधरास्त्रं तरसा मुमोच॥ ८६॥
ततोऽन्धकारीकृतदिग्विभागैः स्तनद्भिरुल्लासिसुरेन्द्रचापैः।
तडिल्लतादन्तुरितैः प्रदृष्टमुच्चैस्तरां तत्र घनाघनौघैः॥ ८७॥
अथानले चञ्चलदीप्तिदम्भादम्भोधराणां शरणं प्रपन्ने।
पयोदसंमर्दविधाववन्ध्यं वायव्यमस्त्रं नृपतिर्मुमोच॥ ८८॥
दिशो दिशं तूलमिव क्षिपन्तः पयोदवृन्दं मरुतस्ततोऽस्मात्।
निरीयुरायोधनकर्मवन्ध्यं प्रत्यर्थिसैन्यं च महाजवेन॥ ८९॥
ततः प्रकोपप्रसरत्कदुष्णश्वासानिलान्दोलितहारयष्टिः।
विद्याधरेन्द्रः पवनाशनास्त्रं मुमोच तच्चापलदोषहारि॥ ९०॥
प्राणान्पिबन्तस्त्रिजगज्जनानां कौटिल्यमुच्चैरुपदर्शयन्तः।
क्षतं विनैवाङ्गभृतां लगन्तस्ततः प्रसस्रुः प्रसभं द्विजिह्वाः॥ ९१॥
भुजङ्गपूगग्रसनादजस्रं प्रभञ्जने भङ्गुरतां प्रयाते।
प्रत्यस्त्रमुच्चैरमुचन्महीपो महीपतिः पन्नगरथेन्द्रसंज्ञम्॥ ९२॥
उत्पातवातो····तपक्षपातप्रकम्पिताशेषनगाः खगेन्द्राः।
तस्मान्निरीयुर्निजकायकान्त्या पतिं प्रभाणामपि भर्त्सयन्तः॥ ९३॥

मृणालनालोपमया निमेषाद्भुजङ्गपूगे कवलीकृते तैः।
मुमोच गुञ्जामुखमेव कामं नभश्चरेन्द्रस्तिमिरास्त्रमुच्चैः ॥ ९४ ॥
तमालतालीगवलालिनीलैर्नीलीरसेन स्नपितामिवोर्वीम्।
कुर्वद्भिरुद्भूतमथान्धकारैः कारानिकेतप्रतिमैः परेषाम् ॥ ९५ ॥
निमीलिता लोचनचक्रवाले विहङ्गमानामनुजीविनां च।
ध्वान्तस्ततस्तत्परिपन्थिभूतं प्रद्योतनास्त्रं नृपतिर्मुमोच ॥ ९६ ॥
ततः किरन्तः करजालमुच्चैर्विस्रेरयन्तो नयनाम्बुजानि।
विशोषयन्तः परवाहिनीं च प्रादुर्बभूवुस्तपनाः समन्तात् ॥ ९७ ॥
निराकृते संतमसः प्रचारे स्वरांशुभिः खेचरचक्रवर्ती।
दिशद्दृशां दीनतरामरीणां विधुंतुदास्त्रं तरसा मुमोच ॥ ९८ ॥
देहं विनाप्याश्रितविग्रहोग्रास्तमःस्वरूपा अपि तज्जितार्काः।
निकृत्तकण्ठा अपि चित्समग्राः प्रसस्रुरुच्चैरथ सैंहिकेयाः ॥ ९९ ॥
स्वर्भाणुभिर्भास्करचक्रवाले बलावलेपात्कवलीकृतेऽथ।
श्रेणीद्वयस्यापि भविष्णुचक्री चक्रायुधास्त्रं तरसा मुमोच ॥ १०० ॥
देहप्रभापीवरिताम्बरान्तास्तस्मादकस्मान्मुरविद्विषोऽथ।
निश्चक्रमुश्चक्रगदाकृपाणकोदण्डदण्डाञ्चितबाहुदण्डाः ॥ १०१ ॥
तेषां च तीव्रांशुसितांशुरूपे विजृम्भिते लोचनचक्रवाले।
कृतापराधैरिव यत्तमोभिः पलायितं हन्त किमत्र चित्रम् ॥ १०२ ॥
गतेषु दूरं विधवाङ्गनानां लावण्यरूपेष्विव निष्फलत्वम्।
अस्त्रेषु शस्त्रेषु च खेचरेन्द्रस्त्रपावनम्रो जगदे नृपेण ॥ १०३ ॥
हंहो महावीर विमुञ्च लज्जां रणान्निवर्तस्व भव स्वराज्यम्।
किं नाम तारुण्यबलावलेपो भवन्तमद्याप्युपरीकरोति ॥ १०४ ॥
श्रुत्वेति कोपान्धितधीर्नरेन्द्रः सोऽप्याह योग्योऽस्मि न तेऽधुनापि।
गम्योऽस्ति गोमायुशिशोः कदाचिद्गृध्रोऽपि किं रे हरिणाधिराज१०५
अस्मादिदं दुर्वचनं प्रवृत्तमितीव रोषान्त्रिपुरान्तकास्त्रम्।
अमोघमस्मै नृपचक्रवर्ती मुमोच चिच्छेद च कण्ठपीठम् ॥ १०६ ॥

अथ सुरपथवल्गद्दिव्यभेरीनिनाद-
द्विगुणितकलभृङ्गारावगर्भं नभस्तः ।
शिरसि सुरकराब्जप्रेरितं पुष्पवर्षं
न्यपतदवनिभर्तुर्मङ्गलोद्गारसारम् ॥ १०७ ॥
पुरमथ रथनूपुराभिधानं गगनचरैः परिवारितः प्रविश्य ।
अभजत निजपौरुषोपनीतामवनिपतिः खचराधिराजलक्ष्मीम् ॥ १०८ ॥
तदनु विनयवामना नरेन्द्राः खचरपतेरनुजीविनः प्रणम्य ।
अवनिपरिवृढं किरीटकोटीघटितकराः शिरसा दधुस्तदाज्ञाम् ॥१०९॥
विलेभे विषयान्सद्यस्तेषामपि महीपतिः ।
न नाम महतां सेवा भजते जातु वन्ध्यताम् ॥ ११० ॥
राज्याभिषेकमनुभूय नभश्चरेन्द्र-
सूनुं निदेशगतमत्र निवेश्य यानम् ।
श्रीमान्स वायुगतिसंनिहितोऽधिरुह्य
स्वं राज्यमम्बरचराधिपतिः प्रतस्थे ॥ १११ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते श्रीजयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के आयुधवर्णनो नाम चतुर्दशः सर्गः ।

पञ्चदशः सर्गः ।

इतश्च सुस्थितः सूरिः श्रीजयन्त्यां समाययौ ।
निजै रराज यः शिष्यैः कल्पशाखीव पल्लवैः ॥ १ ॥
मूर्तिमानिव यो धर्मः कुलशान्तेरिवामलम् ।
कृपावरेण्यपण्यस्त्रीलास्यलीलैकरङ्गभूः ॥ २ ॥
उद्यत्तीव्रं तपस्तेजः सोमत्वं च परं दधत् ।
यो बभौ मिश्रितैः सृष्टः पुष्पदन्तदलैरिव ॥ ३ ॥
यः केवलावलोकेन विरेजे संशयच्छिदा ।
व्योमेव व्योमरत्नेन ध्वान्तध्वंसपटीयसा ॥ ४ ॥
यद्गुणैर्हृतचित्तोऽपि तत्त्वार्थविदुराग्रणीः ।
जायते जनता चित्रं कस्य नेदं विवस्वतः ॥ ५ ॥

श्रुतपूर्वी समायातं निजोद्याने महीपतिः ।
गत्वा विक्रमसिंहस्तं ववन्दे सपरिच्छदः ॥ ६ ॥
ततश्च दशनज्योतिर्ज्योतिताधरपल्लवः ।
आनन्द्य धर्मलाभेन तमारेभे स देशनाम् ॥ ७ ॥
सार्वसर्वोपमातीतः समस्ताद्भुतवैभवः ।
श्रीसर्वज्ञपरं देवः सतां निःश्रेयसः श्रिये ॥ ८ ॥
तदाज्ञामौलिमाणिक्यः सुसाधुश्च गुरुर्मतः ।
यतः पारीणतां याति जन्तुः संसारवारिधेः ॥ ९ ॥
लोकंपृणः पृणीतस्तैर्धर्मो जीवदयाग्रणीः ।
यो मनोरथवल्लीनां स्पर्द्धते निजदोहदैः ॥ १० ॥
जैनं जनस्य दानानि धर्मकर्म चतुर्विधम् ।
राजसैन्यमिवानन्यदन्तरारि जयश्रिये ॥ ११ ॥
सुगतिप्रेयसी पुंसां बोभवीति वशंवदा ।
जृम्भमाणे जिनेन्द्रोक्तधर्मैकार्मणकर्मणि ॥ १२ ॥
इति देशनया सूरेर्मिथ्यात्वममुचन्नृपः ।
निःशङ्कं पङ्कसंपर्कं शरदेव सरिज्जलम् ॥ १३ ॥
श्रद्धासमृद्धिसंबन्धबन्धुरो धरणीधवः ।
श्राद्धधर्मधुराधीरधौरेयत्वमधात्ततः ॥ १४ ॥
अत्रान्तरे द्विजः कश्चित्पाण्डित्यमदमेदुरम् ।
वाचमुल्लासयामास सर्वज्ञाभावसिद्धये ॥ १५ ॥
मत्सरो नात्र मे राज्ञा सर्वज्ञो मन्यतेऽद्य यत् ।
अप्रमाणेन तेनायं किं त्वेतैर्विप्रतारितः ॥ १६ ॥
सर्वज्ञो नास्ति यद्ग्राह्यः प्रमाणैः पञ्चभिर्न सः ।
यदेवं तद्धवेदेवं यथा व्योमसरोरुहम् ॥ १७ ॥
[1]'.....रम्याक्षहारिण्यो यथा रूपं मृगीदृशः ।
विलोकते तथा चक्षुः सर्वज्ञस्य न जातुचित् ॥ १८ ॥

---

१. 'मनो' इति स्यात्.

वधूनामधरस्येव मधुरां मधुसंपदम् ।
नैव सर्वज्ञतां जातु गृह्णीते रसनेन्द्रियम् ॥ १९ ॥
ग्रामरागादिसंदर्भगर्भसौभाग्यभूषणम् ।
गीतिभङ्गीमिवादत्ते श्रोत्रं सर्वज्ञतां नहि ॥ २० ॥
कर्पूरागरुकस्तूरीविचित्रकुसुमोद्भवम् ।
सौरभ्यमिव नादत्ते सर्वज्ञं प्राणमिन्द्रियम् ॥ २१ ॥
सर्वज्ञोऽस्तीति न ज्ञानं स्पृशति स्पर्शनेन्द्रियम् ।
कुष्टिन्यङ्गमिवानङ्गसमाङ्गो जातु धीधनः ॥ २२ ॥
प्रत्यक्षं पञ्चधाप्येवं सुधासर्वज्ञसाधने ।
तत्प्रतिष्ठाविधौ मानं जातु मानं च वल्गति ॥ २३ ॥
लिङ्गेन लिङ्ग्यते लिङ्गी साध्यधर्मविभूषितः ।
अविनाभावसंबन्धं संबन्धेन च नात्र तत् ॥ २४ ॥
सर्ववित्तोपमानेन प्रमाणेनैष गृह्यते ।
प्रवर्तते हि सादृश्यात्तद्गोगवययोरिव ॥ २५ ॥
परेषां नागमेनापि सर्ववित्साध्यते बुधैः ।
अन्योन्याश्रयदोषो हि निर्विवादोऽत्र वादिनाम् ॥ २६ ॥
नार्थापत्तिप्रमाणं च सर्वज्ञास्तत्त्वसिद्धये ।
तत्र साध्या विनाभावभावो यत्रास्ति कश्चन ॥ २७ ॥
प्रमाणपञ्चकस्यैवं सर्वज्ञो नास्ति गोचरः ।
तदभावप्रमाणेनाभावस्तस्येति मन्यताम् ॥ २८ ॥
अनुज्ञयः गुरोस्तस्य क्षुल्लको वादिसत्तमः ।
प्रतिवादिवचोऽनूद्य दूषयामास वादिनः ॥ २९ ॥
न सर्वज्ञः प्रसिद्धस्ते साध्यधर्मीह साधने ।
अप्रसिद्धविशेष्यत्वं पक्षदोषः स्फुटस्ततः ॥ ३० ॥
हेतुमप्याश्रयासिद्धहेतु·····दूषितम् ।
अन्धुमन्ध इवाग्रेऽपि कुदृष्टे त्वं न पश्यसि ॥ ३१ ॥

प्रमाणपञ्चकं तस्याग्राहकं तव चेन्मतम् ।
आत्मीयं परकीयं वा तार्किकंमन्य तद्वद ॥ ३२ ॥
प्रत्यक्षाद्यैस्तवाज्ञातं यदि वस्तु न विद्यते ।
तदा पितामहाद्याः स्युरसंभवपदं तव ॥ ३३ ॥
ततस्तवापि नो जन्म संभवीति प्रसज्यते ।
पण्डितैस्तदहो श्लाघ्यं पाण्डित्यं खण्डितान्वयम् ॥ ३४ ॥
द्वितीयके तु पक्षे स्यान्नूनं सर्वज्ञता तव ।
यो वेत्ति तत्र सर्वेषां प्रत्यक्षाद्यपवर्तनम् ॥ ३५ ॥
ब्रूषेऽथ साध्यधर्मीह सर्वज्ञः परसंमतः ।
ततश्च पक्षहेमू(तू)क्तदोषो श्लेषोऽपि कोऽपि न ॥ ३६ ॥
तेन निर्मूलमेवेदं साधनं यत्त्वयोदितम् ।
प्रामाण्यकोटिसंटङ्कं कथमाटीकते ततः ॥ ३७ ॥
प्रमाणमप्रमाणं वा पराभ्युपगमस्ततः ।
प्रमाणं चेत्त्वयैवेदं साधितं नः समीहितम् ॥ ३८ ॥
अप्रमाणे तु तत्र स्युः सर्वे दोषास्तथैव ते ।
पाण्डित्यमुखयोर्मूर्खमालिन्याय मखीसखा ॥ ३९ ॥
अथ ब्रूषे प्रमेयोऽयं कल्पनयैन(?) कल्पितः ।
विद्यमानस्य सा तस्या विद्यमानस्य वामता ॥ ४० ॥
पक्षे सा प्रथमे व्यर्था तस्य सत्वाद्विनापि ताम् ।
तद्विधानेऽपि वेदादौ भवेत्सातिप्रसङ्गतः ॥ ४१ ॥
स तु कल्पनया हन्ति निरासो नोचितस्ततः ।
विरुद्धसाधकत्वेन विरुद्धो हेतुरत्र ते ॥ ४२ ॥
अथास्याविद्यमानस्य कल्पनाभिमता तव ।
एवं न कोऽपि हेतुः स्यादाश्रयासिद्धिभोजनम् ॥ ४३ ॥
बौद्धं प्रत्यात्मनित्यत्वे साध्येऽनुत्पत्तिराहता ।
सुकल्पसाध्यधर्मित्वात्सद्धेतुः स्यात्प्रसङ्गतः ॥ ४४ ॥

प्रमाणपञ्चकाभावः सर्वज्ञाभावसिद्धये ।
ज्ञातोऽनवस्थयाक्रान्तो ज्ञातोऽज्ञस्यापि किं न सः ॥ ४५ ॥
संबन्धग्रहणं तत्र न मानाग्राह्ययोस्तयोः ।
इत्यज्ञाते स्वरूपेऽस्यस्वरूपासिद्धता भवेत् ॥ ४६ ॥
पुरुषत्वान्न सर्वज्ञः सोऽस्मदादिवदित्यपि ।
न युक्तमत्र संदिग्धविपक्षावृत्तिसाधनात् ॥ ४७ ॥
किं च पश्यत्ययं सर्वमिन्द्रियापेक्षया न वा ।
सर्वज्ञो नादिमे पक्षे यन्नातीन्द्रियभाववित् ॥ ४८ ॥
पक्षान्तरेऽपि सर्वज्ञाः स्युरन्धबधिरादयः ।
इति चेत्तदसद्येनाभ्युपागमपराहतम् ॥ ४९ ॥
किं च ज्ञानं न सर्वज्ञविज्ञानत्वाद्यथा तव ।
नेदं सम्यगिहोपाधिर्यज्ज्ञानाचरणोदयः ॥ ५० ॥
प्रागभावं यदि ब्रूषे प्रध्वंसाभावमस्य वा ।
पश्चात्पूर्वं तदस्ति त्वं सर्वज्ञस्य न वेत्सि किम् ॥ ५१ ॥
अस्येतरेतराभावे सत्त्वं कुम्भेभयोरिव ।
स्यान्नात्यन्तमभावोऽपि सतोऽनुमानतोऽमुतः ॥ ५२ ॥
अस्त्यतीन्द्रियविज्ञेयः साक्षात्कारीह कश्चन ।
चन्द्रार्कग्रहणादीनामालिङ्गाद्युपदेशतः ॥ ५३ ॥
तथोपदेशको यत्र यः साक्षात्कुरुते स तम् ।
अस्मदादिर्यथा स्वानुभूते भावे तथा च सः ॥ ५४ ॥
प्रमाणपञ्चकेत्यादिहेतुर्मो(र्मू)लांशतस्ततः ।
स्वरूपासिद्धिमध्यास्ते शलभोऽग्निशिखामिव ॥ ५५ ॥
सर्वज्ञे संशयः प्राप्तः साधकं बाधकं विना ।
मानं त्वयेति नाशङ्क्यं मदुक्तव्यक्तयुक्तितः ॥ ५६ ॥
अथ ब्रूषे निराकारं ज्ञानं सर्वविदो यदि ।
तत्तदाकारशून्यत्वान्नाप्यर्थग्रहणे प्रभुः ॥ ५७ ॥

निजाकारेण साकारे तत्र नार्थावभासनम् ।
प्रसज्येत पराकारदरिद्रं तद्यतो मतम् ॥ ९८ ॥
अथार्थैरर्पिताकारे तत्र विश्वस्य शून्यता ।
प्रसज्यते ततो ज्ञानं तत्र गोचरयत्वदः ॥ ९९ ॥
अर्थैः समर्पिताकारैरनन्तैस्तत्समाकुलम् ।
सजातीयविजातीयभेदनिर्ना(र्णा)यकं कथम् ॥ १० ॥
अत्रोच्यते त्वयोद्दिष्टा दोषा ज्ञाने हि कोऽपि न ।
अर्थग्रहणरूपेण परिणामि हितं मतम् ॥ ११ ॥
ततोऽनन्तस्वभावत्वादनन्तार्थोपलम्भकम् ।
ज्ञानं सिद्धमितः सिद्धिः सर्वज्ञस्येति मन्यताम् ॥ १२ ॥
निर्जिते मुनिना वादे निग्रहस्थानमागतः ।
निर्भर्त्स्य मत्सरी राज्ञा स ततो निरकास्यत ॥ १३ ॥
प्रशशंस विशामीशस्ततस्तं वादिनं मुनिम् ।
इत्थं प्रभावना जज्ञे त्वत्तोऽद्य जिनशासने ॥ १४ ॥
विकल्पजालकल्लोलैर्जल्पकल्लोलिनीपतौ ।
पातालप्रणयिन्यत्र धीरभूत्तस्य वादिनः ॥ १५ ॥
मुनेऽद्य मौनमुद्रास्ये वैलक्ष्यं वास्य वादिनः ।
ददे त्वयाददे वाशु जल्पकौशलजं यशः ॥ १६ ॥
अथ विद्याधरः कश्चिदवतीर्य विमानतः ।
मुनिं नत्वा नृपं चास्य व्यजिज्ञपदतिप्रियम् ॥ १७ ॥
योऽपजह्रे सुतस्तेऽसौ वैताढ्यं सानुकूलया ।
चक्रे देवतया राजकन्येशश्चक्रवर्त्यपि ॥ १८ ॥
सोऽयमायाति भूमीन्द्र प्रसाध्य जगतीमिह ।
जयन्तः स्वभुजप्राप्यशौर्यनिर्जितशात्रवः ॥ १९ ॥
सुरस्रोतस्विनीस्रोतः स्नुतं वारीव शीतलम् ।
राज्ञोऽथ तद्वचोऽपास्य तापं पुत्रवियोगजम् ॥ ७० ॥

अभूदवीचिभिः स्नातः सस्नेहं सुतवार्तया ।
दिदृक्षुरक्षिपच्चक्षुस्तं ततः स नभस्तले ॥ ७१ ॥
आययौ खेचरश्रेणिचक्रवर्तिश्रियः प्रियः ।
विमानैः पूरयन्नाशा मुदा च नयने पितुः ॥ ७२ ॥
जिनेन्द्रमिव देवेन्द्रः समुत्तीर्य विमानतः ।
नमश्चक्रे नमस्यार्हं श्रीजयन्तो गुरुं ततः ॥ ७३ ॥
आश्चर्यैकपदैर्गुणैस्त्रिभुवने श्राम्यद्यशःसौरभै-
स्तैस्तैरभ्युदयैरसी····सुकृतप्रागल्भ्यलभ्यैर्भृशम् ।
दिग्यात्रासु जयैश्च तस्य जनको नारब्धि राजा तथा
श्लाघ्यैः श्रीजिनधर्मकर्मभिरपि प्रीत्या गृहीतैर्यथा ॥ ७४ ॥
पितुः स विद्याधरचक्रवर्ती सुश्रावकत्वेन गुणी गुणेन ।
तदा कुमारोऽपि मुदम्बुपूरैः समुद्रमुद्रां बिभरांबभूव ॥ ७५ ॥
मुखालोकैः प्रौढप्रणयसुभगैस्तस्य सुगुरोः
कृतार्थीकुर्वाणो नयननलिने भूपतिरथ ।
पदोरर्चां कृत्वा मणिमुकुटिदीप्तांशुकुसुमै-
रलंचक्रे शक्रानुज इव विभूत्या स सदनम् ॥ ७६ ॥
सर्वत्र क्षितिमण्डले क्षितिधवैः श्रीविक्रमक्ष्मापते-
रादेशेन विनिर्मिताद्भुततमा जैनेन्द्रहर्म्यावलिः ।
उन्मीलन्मणिकिंकिणीक्वणमिषादाख्यातुमभ्युद्यते
वाभादद्भुतपुण्यकीर्तिपटला कान्ता प्रभुत्वाश्रया ॥ ७७ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के नरेन्द्रसम्यक्त्वप्रतिपत्तिवर्णनो नाम पञ्चदशः सर्गः ।

षोडशः सर्गः ।

अन्यदा सदसि राजशासनाद्वेत्रिणा सपदि संप्रवेशितः ।
विक्रमक्षितिपतेः पुरः पुमान्कश्चिदेवमवदत्कृताञ्जलिः ॥ १ ॥

अस्ति **हास्तिनपुरं** भवसुराम्नातिदूरभुवि देव विश्रुतम् ।
येन दक्षिण[दि]गङ्गनामुखाम्भोरुहे तिलकचारुता दधे ॥ २ ॥
चन्द्रकान्तमणिसान्द्रकान्तिभिर्यज्जिनेन्द्रसदनैर्मनोरमैः ।
स्वं पुरीमिव हसत्यनुक्षणं गोत्रभिद्विहितनीतिसंपदम् ॥ ३ ॥
यत्र वेदमुखरा द्विजातयः सप्तमीं भवनभूमिमाश्रिताः ।
संवदन्ति निजवासनोद्धतं कुम्भजन्ममुनिना सहान्वहम् ॥ ४ ॥
पालयत्यवनिपालमण्डलीमौलिलालितपदस्तदद्भुतम् ।
वैरिसिंह इति वैरिसुन्दरीलोचनाञ्जनतमिस्रभास्करः ॥ ५ ॥
स्फारपुष्करकदम्बचुम्बिता यस्य खड्गलतिका कराम्बुजे ।
युद्धनाशितहतावनीभृतानामवर्णवहिकाश्रियं दधे ॥ ६ ॥
भाग्यसंपदिव पुष्पधन्वनः सृष्टिसारमिव पद्मजन्मनः ।
तस्य देव कमलेव वारिधेरद्भुतास्ति **रतिसुन्दरी** सुता ॥ ७ ॥
तत्स्वयंवरविधानकौतुकोत्साहदर्शनसमीहया नृपः ।
रूपयौवनमदाभिमानिनः सर्वतः क्षितिपतीनजूहवत् ॥ ८ ॥
किंतु सन्तु शतशः परे नृपा रूपसंपदधिकाभिमानिनः ।
श्रीजयन्तमपहाय नापरस्तन्मनोन्तरधिकं विजृम्भते ॥ ९ ॥
वाचमेवमवनीपुरंदरः सुन्दरामथ निपीय सादनम् ।
तत्क्षणं कृतयथोचितक्रियं राजदूतमवदत्प्रमोदतः ॥ १० ॥
इत्थमस्ति यदि दूत नूतनस्नेहमोहितमना महीपतिः ।
श्रीजयन्तमवलम्बितक्रमं प्रेषयामि सममेव तत्त्वया ॥ ११ ॥
संमतेन निजगोत्रमन्त्रिणां वासरेऽभ्युदयशंसिनि द्रुतम् ।
श्रीजयन्तमथ स व्यसर्जयद्भूरिसैन्यभरभङ्गुरावनिम् ॥ १२ ॥
दुन्दुभिध्वनिभरेण रोदसीं पूरयन्नपरिमेयविस्तरः ।
सोऽचलद्बलविमर्दरेणुभिर्दर्शयन्नहनि दर्शयामिनी ॥ १३ ॥
अध्वनि प्रतिदिनं स नूतनैः कौतुकैस्तरललोचनाञ्चलः ।
वासरैः परिमितैरपि द्रुतं प्राप **हास्तिनपुरं** नरेश्वरः ॥ १४ ॥

---

१. 'भवे सुराम्ना' इति पाठे सुराट् संबोधनम्.

तं समागतमवेत्य पूरुषैर्वैरिसिंहनृपतिः प्रमोदतः ।
संमुखं निखिलसैन्यसंचयन्यञ्चितावनितलस्तदाचलत् ॥ १५ ॥
उत्सहिष्णुहृदयौ समन्ततस्तत्र तौ क्षितिपती वितेनतुः ।
····वितीमथ मिथः प्रथीयसा गौरवेण गुणरत्नरोहणौ ॥ १६ ॥
भूपतिस्तदनु भूरिसत्कृति प्रीतिमप्रतिमरूपसंपदम् ।
श्रीजयन्तयुवराजमादरा[दा]निनाय निजमुद्भुजं पुरम् ॥ १७ ॥
भूरि पौरजरतीकरक्षरल्लाजलाञ्छितशिरः शिरोरुहः ।
तत्र सत्वरनरेन्द्रदर्शिते वेश्मनि स्मितमुखः स तस्थिवान् ॥१८॥
हर्षनिर्भरमहीभृदाहृतातिथ्यसुस्थितवपुः परि····· ।
·····दः ॥ १९ ॥
बन्दिवृन्दनिनदेन बोधितः प्रातरेव कृतदेवतार्चनः ।
तत्स्वयंवरविधानमीक्षितुं तत्क्षणादकृत स प्रसाधनम् ॥ २० ॥
दिव्यभूषणगणैः स भूषितः कान्तिचक्रकृतशक्रकार्मुकैः ।
[कां]चन श्रियमवापदद्भुतां दाहतः प्रथममङ्गजो यथा ॥ २१ ॥
रूपसंपदनुरूपमण्डनाडम्बराहितमहाकुतूहलः ।
तत्स्वयंवरसमाहृताखिलक्षोणिपालमगमत्सभाङ्गणम् ॥ २२ ॥
तत्र चित्ररचनामनोहरं काञ्चनोपचितमञ्चमुच्चकैः ।
आरुरोह स नरेन्द्रदर्शितं तुङ्गभूधरमिवाशु केसरी ॥ २३ ॥
विस्फुरत्यथ स दक्षिणेक्षणे पाणिपीडनविधानशंसिनि ।
पूर्वभूधरतटीमिवार्यमा हेमविष्टरमलंचकार च ॥ २४ ॥
भूभृतः सदसि तस्य भूषणोद्भाषिरत्नमुकुरेषु बिम्बितः ।
रूपसंपदपहस्तिता क्षणादाश्रितास्तमिव सेवनेच्छया ॥ २५ ॥
यैः पुरा स्फुरदुरुप्रभाभराद्राजभिः सदसि भास्करायितम् ।
श्रीजयन्तयुवराज्यसंनिधौ ते दधुर्दिनविधूपमेयताम् ॥ २६ ॥
तत्र पौरनिकरेषु कौतुकोत्तानलोचनपुटेष्वनुक्षणम् ।
मागधेषु निजबुद्धिवर्धितोद्दामकाव्यरचनाभिधायिषु ॥ २७ ॥

१. 'निन' इति स्यात्.

उल्लसत्यगुरुसौरभे जनघ्राणतर्पणविधौ पटीयसि ।
मूर्छति प्रतिपदं च दुन्दुभिध्वानमांसलितशङ्खनिस्वने ॥ २८ ॥
गीतमङ्गलकुतूहलोन्मुखे भूरिपौरयुवतीकदम्बके ।
स्वाचितासननिवेशदर्शितप्रीतिषु क्षितिवधूविलासिषु ॥ २९ ॥
सान्द्रचन्द्रकरसोदराम्बरा चारुचन्दनतरङ्गसंगता ।
मूर्तिमत्युदितवक्त्रवारिजा स्वर्धुनीव कुचचक्रशालिनी ॥ ३० ॥
अङ्गसंगतिविचित्रभूषणोद्गीर्णकान्तिकृतशक्रकार्मुका ।
उत्तमद्रुरुपयोधरोद्धुरा मेघकालकमलेव जङ्गमा ॥ ३१ ॥
श्रोणिबिम्बकुचकुम्भगौरवान्माशु गच्छतु रसा रसातलम् ।
दानमेदुरमतङ्गसालसं मन्थरां गतिमितीव तन्वती ॥ ३२ ॥
चक्रभृत्करधृतस्वयंवरोद्दामदामनि निविष्टलोचनाम् ।
गन्धलुब्धमधुपाङ्गनाथ····· ध्वानमत्सरभरादिवानिशम् ॥ ३३ ॥
कामिनीजननिसर्गसज्जया लज्जया विनतचक्रवारिजा ।
वाञ्छिताभिनवभर्तृदायिनः कुर्वतीव नतिमङ्गजन्मनः ॥ ३४ ॥
आविरास रसनागुणक्वणत्किङ्किणीनिकरबोधितस्मरा ।
वैरिसिंहनरनाथनन्दिनी नन्दिनी निखिलभूपचक्षुषाम् ॥ ३५ ॥
(कुलकम्)

भासयत्युरु सभा नभोऽङ्गणं तां जयन्तयुवराजभास्करे ।
चेतसापि विजहुः क्षितीश्वरा वासरश्रियमिवांशुतारकाः ॥ ३६ ॥
व्यालिलेख मुहुरङ्गिणा महीं सा चकर्ष भृशमंशुकाञ्चलम् ।
श्रीजयन्तयुवराजदर्शने कारिता किमु न पुष्पधन्वनः ॥ ३७ ॥
एतदीयवदनेन्दुदर्शनादुत्तरङ्गगुरुरागसागराः ।
चेष्टितानि विदधुर्वसुंधराधीश्वराः सदसि ते स्मरोद्धतम् ॥ ३८ ॥
प्राप्तरेखमखिलेषु भूभुजां भूषणेषु निजहारमुज्वलम् ।
उन्नतेन हृदयेन सर्वतः कोऽप्यदर्शयदखर्वगर्वतः ॥ ३९ ॥

---

१. 'म' इति स्यात्.

हन्ति पञ्चभिरपीषुभिः स्मरो मां तदेनमभिहन्मि हेलया ।
कोऽप्यभाषत नृपः कृपाणिकावल्गुवल्गनमितीव सूचयन् ॥४०॥
नागवल्लिदलवीटिकामिषादङ्गुलीरिव मुखे विनिक्षिपन् ।
कोऽप्यलक्ष्यत पतिंवरेच्छया मन्मथस्य पुरतः क्षितीश्वरः॥ ४१ ॥
अङ्गुलीयमणिदर्पणे महत्येणनाभितिलकं न्यभालयत् ।
कोऽपि भूपदुहितुः समीहयेवाक्षरावलिमलीकसंगताम् ॥ ४२ ॥
पाटवं वचसि नाटयन्मुधा मीनलाञ्छनगुरोर्निदेशतः ।
नव्यकाव्यरचनासु चातुरीं कोऽप्यदर्शयदुदारदर्शनः ॥ ४३ ॥
संभ्रमाद्विवृतमीक्षणाम्बुजं कोऽप्यधत्त वसुधापुरंदरः ।
पातुमेकसमयं नृपाङ्गजारूपसंपदमृतच्छटा इव ॥ ४४ ॥
कीर्तनं विशतु मा स्म कन्यका काङ्क्षिणामपरभूभृतामिव ।
अङ्गुलीकिसलयेन कश्चन श्रोत्रसंपुटमिति व्यघण्टयत् ॥ ४५ ॥
व्यालिलेख सदसि क्रमाङ्गुलीपल्लवेन तपनीयविष्टरम् ।
तत्र सुप्तमधिकं परिश्रमाद्बोधयन्निव झषध्वजं पुरः ॥ ४६ ॥
बन्दिवृन्दनिनदं स संमदां संनिरुध्य मधुरोद्धतध्वनिः ।
भूपतीन्विदितवंशविक्रमान्वेत्रभृत्क्रमवशादकीर्तयत् ॥ ४७ ॥
शंभुशैलमभिमानलीलया वामपाणिकमले निधाय यः ।
आचकाङ्क्ष किल दक्षिणे करे कर्तुमुच्चम····राचलं बली ॥ ४८ ॥
पुष्पलावमवलूय मस्तकानर्चयत्यसमविक्रमे क्रमान् ।
यत्र तद्रुणवरं विलोकयन्नाकुलः समभवत्त्रिलोचनः ॥ ४९ ॥
तं सुरासुरसमाजरावणं रावणं रणधुरीणविक्रमम् ।
प्रेतभर्तुरतिथिं वितन्वता येन शान्तिकमतन्यत क्षितेः ॥ ५० ॥
तस्य मैथिलसुताविलासिनो राम इत्यनघनामशालिनः ।
अन्वये शशिमुखि क्षणं पुरः पश्य भूपमनुरूपवैभवम् ॥ ५१ ॥
एतदङ्कशयनीयशायिनी नेत्रनीलनलिनावलोकनैः ।
राघवान्वयपुरीं निरन्तरं त्वं कृतार्थय कुरङ्गलोचने ॥ ५२ ॥

तं निरूप्य नृपतिः पतिंवरा किंचिदञ्चितपुटेन चक्षुषा ।
अत्र रागविमुखादिति·····व्युत्ससर्ज फणिवल्लिपल्लवान् ॥ ९३ ॥
क्षोणिवल्लभमथापरं पुरः स्मेरकैरवसमानलोचनम् ।
वेत्रभृन्मृगदृशो वशीकृतास्तोकराजकमदर्शयद्द्रुतम् ॥ ९४ ॥
यत्प्रतापतपनोपतापितैः कौशिकैरिव जवादरातिभिः ।
नामसाम्यमधिगम्य भूभृतां कन्दरासु परिकल्पिता स्थितिः ॥ ९५ ॥
सैष चन्द्रमुखि वेदनायकः सायकाम्बुशमितारिपावकः ।
अस्ति तेऽत्र यदि नेत्रकौतुकं तद्वृणीष्व विषयाभिलाषिणि ॥ ९६ ॥
रूपवत्यपि गुणैकभाजने तत्र सा समभवत्पराङ्मुखी ।
प्रेमपूर्वजनुरर्जितं क्वचिज्जायते हि किमिवात्र कौतुकम् ॥ ९७ ॥
संमुखं सपदि वेत्रधारिणा तामथान्यनृपतेर्निनाय सा ।
हंसिकामिव तरङ्गपद्धतिः पङ्कजादपरपङ्कजं क्षणात् ॥ ९८ ॥
सिन्धुरोधसि यदीयसिन्धुराः संचरन्ति मदवारिदुर्धराः ।
सांयुगीननिजशौर्यचर्यया दिग्गजानिव विजेतुमूर्जितान् ॥ ९९ ॥
उज्जयन्यधिपतेस्तनूद्भवः सोऽयमद्भुतविलासमन्दिरम् ।
पाणिपीडनविधाविहाधुना मन्निकर्मणि तवाशु मन्मथः ॥ १०० ॥
विस्फुरत्तरलमीननेत्रया चक्रयुग्मकुचकुम्भशोभया ।
राजहंसगतयाब्जहस्तया सख्यमस्तु तव देवि सिप्रया ॥ १०१ ॥
एवमाहितुरसापि सा दधे नाभिलाषमपि तत्र भूपतौ ।
सौकुमार्यरसिका कुमुद्वती भास्वतीव महसां समाश्रयौ ॥ १०२ ॥
तामथापरमहीमहेश्वरस्याभिमुख्यमनयन्मृगेक्षणाम् ।
नीतियुक्तिरिव भाग्यशालिनः संपदं सपदि वेत्रधारिणी ॥ १०३ ॥
यत्तुरङ्गखुरपातदारितक्षोणिरेणुनिकरेऽम्बरस्पृशि ।
धातुरिष्टपरिमाणसंग्रहव्यग्रहाजनि चिरात्परिग्रहे ॥ १०४ ॥
सोऽयमङ्गनृपतिः सुराङ्गनागीयमानभुजदण्डविक्रमः ।
दृष्टिरस्तु तव देवि साक्षिणी सन्निवेशविधयेऽत्र चेतसः ॥ १०५ ॥

भारती वसति वक्त्र·····वारिधेः सुता ।
अस्य चाङ्कमधिगम्य निर्मलं त्वं तयोर्भव शुभे तृतीयका ॥ १६ ॥
तामनादरवतीमिहाधिकं सावितर्क्य सुकुमारया गिरा ।
अन्यमुन्नतभुजं महीभुजं ख्यातकीर्ति·····द्रुतम् ॥ १७ ॥
शिश्रिये निशितशस्त्रघट्टनप्रोच्छलच्छिखिशिखामिषेण यः ।
संभ्रमाद्युधि जयश्रिया हरे व्यत्ययादिव वसानयांशुकम् ॥ १८ ॥
भस्मसात्कृतमवेत्य मन्मथं मन्मथारिनयनोत्थतेजसा ।
भूप एव तमिवाधिकद्युति यं व्यधत्त विधिरद्भुतावधिम् ॥ १९ ॥
सोऽयमञ्जनयने ककुब्जये कुब्जतामहिपते करोति यः ।
कन्यकुब्जनृपतिश्चमूमरैर्नेत्रपङ्कजरुहगोचरोऽस्तु ते ॥ ७० ॥
क्षेप्तुमस्य शिरसीव तत्क्षणं पादपद्ममुदपातयत्····· ।
गन्तुमन्तिकमसौ समुत्सुका श्रीजयन्तनृपतेः समीहितम् ॥ ७१ ॥
यानपास्य नृपतीन्पतिंवरा सा जगाम गुरुकामविह्वलान् ।
ते तयाञ्जनघनैर्विलोचनैः श्यामतां दधुरिवाक्षमेक्षिताः ॥ ७२ ॥
सा विहाय नृपतीनथाजनि श्रीजयन्तमभि भूपतेः सुता ।
नाकिनोऽनुपमरूपसंपदः श्रीर्मुकुन्दमिव मन्थनेऽम्बुधेः ॥ ७३ ॥
तत्र चित्रितजगन्नयाधिकं सानुरागमनसं विशङ्क्य ताम् ।
वेत्रभृत्तदनु तापमुच्चकैरभ्यधत्त मधुराक्षरामिति ॥ ७४ ॥
यत्करेऽरिकरिकुम्भभेदनोन्मुक्तमौक्तिकभरेण दन्तुरः ।
भात्यसिः समिति वीक्ष्य नश्यतः सत्त्वरानुपहसन्निव द्विषः ॥७५॥
विष्टपत्रयजयैकधुर्यया निर्जितः स्वभुजशौर्यचर्यया ।
कुण्डलाख्यविबुधो मदोद्धतोऽप्याशु दास्यमभजद्यदग्रतः ॥ ७६ ॥
जैनजैत्रभुजशालिना प्रजा पालिताभ्यधिकऋद्धिवृद्धिभिः ।
निन्दति स्म मरुतामपि श्रियं सोऽस्ति विक्रम इति क्षितीश्वरः ॥७७॥
संमुखः सखि स एष शोथितद्वेषि पङ्कनिकरः स्वतेजसा ।
उल्लसन्निजकुलैकभास्करः श्रीजयन्त इति तत्तनूद्भवः ॥ ७८ ॥

उच्छलत्प्रबलपक्षशालिनाप्याधिमुख्यमुपगम्य चापलात् ।
यत्प्रतापदहनेऽतिदुःसहे सिंहलेन शलभायितं युधि ॥ ७९ ॥
सिंहलीवदनचन्द्रचन्द्रिकां सिंहिकासुत इवासि भीषणः ।
यस्य बाहुरसहिष्ट विष्टपानिष्टलुण्ठनपटुर्न संगरे ॥ ८० ॥
खेचरेशमतिदुःसहैः शरैः कुर्वतापि नृपतेः कुटुम्बिनम् ।
चक्रवर्तिपदसंपदात्मसाद्येन राजतगिरो व्यधीयत ॥ ८१ ॥
यश्चकार शरघोरणिक्षतान्खेचरान्समिति भूमिगोचरान् ।
तद्वधूनयनबाष्पबिन्दुभिः सार्धमुद्व····ति पुरः पुरः स्मरान्(?) ॥८२॥
आदिकोलकुलशैलकच्छपाम्भोधिभोगिपतिदिग्मतङ्गजाः ।
सन्ति संप्रति चिरात्सुखोन्मुखा भारमुद्धरति यद्भुजे भुवः ॥८३॥
चन्द्रमाः शशमलीनसच्छविस्तापकृत्तरणिरुग्रतेजसा ।
तन्न किंचिदसृजद्विधिश्चिरादस्य येन मुखमेति तुल्यताम् ॥ ८४ ॥
कस्य तस्य सखि भूपसंपदं स्तोतुमेति रसना समर्थताम् ।
यस्य विश्वजनतातिशायिनो मन्मथेन तुलनापि लाञ्छनम् ॥८५॥
कौशलेन कलया कुलेन च त्वं तमेनमनुरूपमात्मनः ।
एहि मुग्धहृदये वृणु द्रुतं रोहिणीव हरिणाङ्कमुत्सुका ॥ ८६ ॥
आकर्ण्य कर्णमधुरामिति वाचमुच्चैः
किंचित्रपामरमपास्य नरेन्द्रपुत्री ।
मालां स्वयंवरमहोत्सवसाक्षिणीं तां
श्रीमज्जयन्तनृपतेः क्षिपति स्म कण्ठे ॥ ८७ ॥
अंसदेशनिहितामथ मालां तां दधन्नरपतिर्विरराज ।
शेषभूमिपतिकीर्तिपताकामाहितामिव मनोभवभर्त्रा ॥ ८८ ॥
उद्गच्छद्गुरुमत्सरोद्धुरधियोऽप्यन्येऽथ पृथ्वीभुज-
स्तत्राशङ्क्य जयन्तखेचरपतिं दुर्जेयमाजिक्रमे ।
मन्दं मन्दमपत्रपाभरभवन्नीचैर्दृशः प्राभृता-
न्यादायाधृत वैरिसिंहविहितान्यासत्प्रतीपंगमा ॥ ८९ ॥

समं तया भूमिपतेस्तनूजया जयन्तभू(?)तत्सपरिच्छदः सदः ।
कुतूहलोत्तालपुरंध्रिमङ्गलैर्महोत्सवं मांसलयन्नथाचलत् ॥ ९० ॥

अद्य श्रिया हरिरभाजि विराजतेऽद्य
पाथोपतिः सुरतरङ्गवतीसनाथम् ।
देवी शिवा प्रणयिनं हरमद्य लेभे
पुष्पायुधं रतिरवाप किलाधुनैव ॥ ९१ ॥

सफलतामधुनैव हि वेधसः श्रमभरोऽपि जगाम विदारयम्(?) ।
यदनुरूपवरेण समागमः समजनि स्मितपङ्कजचक्षुषः ॥ ९२ ॥

पौराणामित्थमम्यर्णे कर्णे कुर्वन्गिरः पथि ।
मन्दिरं मङ्गलोद्भासि सोऽथ प्राप महीपतेः ॥ ९३ ॥
(त्रिभिर्विशेषकम्)

हर्षोत्कर्षाद्भुतमुभयतः संगताभिर्वधूभिः
स्पर्द्धावन्ध्यादधिकरुचिरे कृत्यजाते कृतेऽथ ।
लग्ने सौम्यग्रहबलयुजि स्वानुभावानुरूपं
तस्मिन्नुर्वीपतिदुहितरं पर्यणैषीज्जयन्तः ॥ ९४ ॥

प्रमोदनटनत्रुटत्पणपुरंध्रिहारावली-
र्गलत्तरलमौक्तिकैः पथि चतुष्कमापूरयन् ।
ततोऽभिनववल्लभामवनिवल्लभः सादरं
हरिः श्रियमिवानयन्निजनिकेतमुत्तोरणम् ॥ ९५ ॥

अनुभवन्ननया सह भूपतिस्तदनु वैषयिकीं श्रियमद्भुताम् ।
कतिपयान्दिवसान्पितृदर्शनोत्सुकमना अपि तत्र निनाय सः ॥९६॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीशब्दाङ्के स्वयंवरवर्णनो नाम षोडशः सर्गः ।

सप्तदशः सर्गः ।

अथ श्रिया निर्जितवैजयन्तं श्रीमज्जयन्तो जगदेकवीरः ।
अध्यारुरोह प्रियया तयेन्द्रः शच्येव सार्धं सविलाससौधम् ॥ १ ॥

सर्गे·····त····· ।
····· ॥ २ ॥
·····केन प्रमदाकुलानां कर्णामृतैर्वाग्मिगिरां विलासैः ।
श्रीवैरिसिंहेन विधीयमानयथोचितार्चस्य दिनानि यान्ति ॥ ३ ॥
परेद्यवि श्रीरतिसुन्दरीदं प्राणप्रियं विज्ञपयांबभूव ।
उल्लासयन्ती दशनांशुजालैः सा मीनकेतोरिव वैजयन्ती ॥ ४ ॥
कस्माद्विमुच्यान्यनरेन्द्रवृन्दं त्वां तूर्णमेवावृणवं सहेलम् ।
आद्यावलोकेऽपि च तेऽवनीश दिवामणेरम्बुजिनीव जाता ॥ ५ ॥
विद्याधराणामधिपः स विद्यादेव्या मुखेनोत्तरयांबभूव ।
प्रियप्रियालापसुधावसेका·····दिवाङ्गत्पुलकाङ्कुरश्रीः ॥ ६ ॥
उवाच सा पूर्वभवे भवस्य स्निग्धा भवानीव सधर्मिणीयम् ।
बभूव तेऽत्रापि ततोऽनुरागात्स्वभ्यस्तमभ्येति भवान्तरेऽपि ॥ ७ ॥
तथाहि यस्यां कुचकुम्भचक्षुर्नीलोत्पलास्येन्दुनितम्बबिम्बैः ।
श्लेषं चकाशे चतुरङ्गसैन्यैरिवोल्बणैः पञ्चशरस्य राज्ञः ॥ ८ ॥
श्रीस्वस्तिमत्यां पुरि तत्र भूभृद्बभूव वज्रायुधनामधेयः ।
हेलाहतानम्रनरेन्द्रकान्तानेत्राम्बुसंवर्धितवारिराशिः ॥ ९ ॥
आसीच्च तत्रैव समुद्रदत्तः कलानदीष्णोऽपि सदा दरिद्रः ।[2]
स्वपूर्वकर्मस्फुरितानुसारं शुभाशुभं देहभृतां फलं हि ॥ १० ॥
स कुन्तली कुन्तलभासि पक्षे दिने दिने चन्द्रिकया च चन्द्रः ।
संपूर्णभिक्षाविरहे तदोच्चैः क्षीणः सपत्न्या सह कान्तिमत्या ॥ ११ ॥
एकातपत्रेऽपि सुभिक्षराज्ये वदान्यताभाज्यपि तत्र लोके ।
सुदुर्लभा तस्य बभूव भिक्षा क्व मन्दभाग्यस्य समीहितं वा ॥ १२ ॥
गृहे गृहे तत्र समं सपत्न्या बभ्राम भिक्षामपि मुक्तमानः ।
दुष्पूरसीमोदरपूरणाय प्राज्ञोऽपि दुष्कर्म करोति किं न ॥ १३ ॥
निरन्तरासद्बदुग्न्तदुःखदारिद्र्यमुद्राज्वरजर्जिताङ्गौ ।
तौ दम्पती जीवितनिर्व्यपेक्षौ शैलं समारोढुमथ प्रवृत्तौ ॥ १४ ॥

---

१. 'दं' इति भवेत्. २. सर्वासु कलासु चतुरोऽपि दरिद्रः

तमालतालीवनराजिनीलः कालाग्निधूमः किल कौतुकीव ।
यद्याजतः पूरितरोदसीको निर्गत्य भूभागमलंचकार ॥ १५ ॥
तङ्गत्तरङ्गैः सरितां प्रवाहैर्महो यदीया सततं चकास्ति ।
वामभ्रुवामुच्चकुचस्थलीव स्फुरत्प्रभैर्मौक्तिकहारिहारैः ॥ १६ ॥
तस्मिन्तपस्यन्नथ साधुरैक्षि न्यस्तार्कदृष्टिर्विहितोर्ध्वबाहुः ।
हस्तावलम्बाय शिवोन्मुखानां भवाम्बुधौ पातभियेव ताभ्याम् ॥ १७ ॥
महात्मनो दुष्करकारिणोऽस्य पादप्रणामः खलु शम्बलं नौ ।
प्रेत्य प्रयाणेऽस्त्विति दध्यतुस्तौ हृद्यं हृदम्भोरुहि भावि भद्रम् ॥ १८ ॥
श्रीमन्मुनिं तन्मिथुनं ववन्दे हर्षप्रकर्षोद्धुषिताङ्गयष्टिः ।
सधर्मलाभेन ततः कृताशीरादत्तदा तत्र कृतोपयोगः ॥ १९ ॥
मुक्ताफलं न्यस्तमिव स्वहस्ते ज्ञानेन निर्णीय तयोः स्वरूपम् ।
आलापयद्भद्र न भद्रमेतत्प्राणं प्रहाणं युवयोरिहैवम् ॥ २० ॥
निन्द्यं बुधैरात्मवधं विधत्ते कथं सुधीरप्यधमत्वधाम ।
न चामुतः किंचिदपैति दुःखं व्याधिः कुपथ्यादिव वर्द्धते तु ॥ २१ ॥
जलाञ्जलिं दित्ससि चेन्निजानां दुष्कर्मणां दुःखशतप्रदानाम् ।
समीहितार्थौपयिकं तदेकं सुपात्रदानं कुरु भिक्षयापि ॥ २२ ॥
अङ्गीचकारेति गुरूपदेशं कल्पद्रुमस्येव फलं बुभुक्षुः ।
ततः प्रमाणं कृतपूर्व्यपूर्वभक्त्या पुरस्तन्मिथुनं प्रतस्थे ॥ २३ ॥
प्रायेण विद्वज्जनमण्डलीव समन्ततो निर्जलतां तनोति ।
या ब्रह्मशापप्रहतेरिवोच्चैर्विनाकृता स्वादुफलैर्द्रुमौघैः ॥ २४ ॥
यादोभिरुग्रैरिव वारिराशिर्या श्वापदैर्हिंस्रतरैः कृतार्तिः ।
दुर्लक्ष्यमार्गा गहनैस्ततस्तां भीमाटवीं तन्मिथुनं विवेश ॥ २५ ॥
तौ प्राणसंदेहदशामसह्यां तत्रानुभूयाथ तृषाक्षुधार्तौ ।
सत्त्वादलङ्घ्यामपि तां विलङ्घ्य श्लाघ्यं पुरं प्रापतुरिभ्यलोकैः ॥ २६ ॥
बम्भ्रम्यमाणं मिथुनं श्लथाङ्गं तत्राथ भैक्षाय तदा तदाप ।
संपूर्णमिष्टं च कुतोऽपि दातुः स्थले तृषार्तो जलदादिवाम्भः ॥ २७ ॥

दुःस्थामवस्थामपि जग्मिवांसौ कृच्छ्रात्तभिक्षामभिभोक्तुकामौ ।
तौ दम्पती तत्र जलाशयान्ते स्थानं ततः शीतलमाश्रयेताम् ॥ २८ ॥
मासोपवासादितपोविशेषैस्त्वगस्थिशेषाङ्गमनङ्गरूपम् ।
तस्मिन्पुरे पारणकाय यान्तं तौ ददृशतुः सुकृती मुनीन्द्रम् ॥ २९ ॥
सुदुर्लभं सर्वरसप्रशस्यं त्रिलङ्घनान्ते ददतस्तदन्नम् ।
मुनेस्तदा सर्वमखर्वभावो किं दुष्करं धर्मधनस्पृहां हि ॥ ३० ॥
तद्दानतस्तौ परमप्रकर्षप्रमोदपीयूषविशेषपानैः ।
अवेदनाज्ञौ स तृषः क्षुधोऽपि सुखं शिवस्येव तदान्वभूताम् ॥ ३१ ॥
राजन्समागत्य सुरः सुदृष्टिर्मुनीन्द्रभक्त्याथ तयोरुपान्ते ।
विद्युत्प्रभाभासुरकायकान्तिर्विद्युत्प्रभाख्योऽभिदधे सितास्या ॥ ३२ ॥
अहो महादानमिदं तवाभूच्छ्रीमन्मुनेस्तीव्रतपोऽवसाने ।
महाद्रुमस्येव घनाघनाम्भः संभारवृष्टिः शुचितापशेषे ॥ ३३ ॥
यद्दुष्करं दुष्करकारिणेऽस्मै विश्राणनं त्वत्करपङ्कजेन ।
सुपात्रदानानुगुणेन तेन त्वयि प्रसन्नोऽस्मि समुद्रदत्त ॥ ३४ ॥
विधेहि वाग्गोचरसंवरिष्णुः स्ववाञ्छितं तद्विदधामि येन ।
एवं हि मे नृत्यतु दानधर्मानुमोदनालक्षणपुण्यलक्ष्मीः ॥ ३५ ॥
कृताञ्जलिर्वीक्ष्य ससंभ्रमस्तं व्यजिज्ञपत्सोऽपि विनम्रमौलिः ।
सुदुर्लभं श्रीजिनशासनं यल्लेभे मया तत्किमितोऽर्थनीयम् ॥ ३६ ॥
तथापि सा धार्मिकवत्सलानां प्रभावसौभाग्यतरङ्गितानाम् ।
प्रसादवाक्यं भवतां सुरेश मन्मस्तके यातु किरीटसख्यम् ॥ ३७ ॥
जिनेन्द्रधर्मस्य समुन्नतीनां सार्वत्रिकीणां परभागभाजाम् ।
सदेहलोकेऽपि भवत्प्रसादान्निबन्धनं स्यामिति मेऽभिलाषः ॥ ३८ ॥
ततः सुरो चिन्तयदस्य पुण्यैः प्राज्यैरुदेति स्म शुभाशयोऽयम् ।
जागर्ति यः सिद्धिसुखोत्तरायै नरामराधीश्वरसंपदेऽपि ॥ ३९ ॥
संपत्स्यते ते स्वयमेव पुण्यैस्त्रिविष्टपाभीष्टकरैस्तदिष्टम् ।
साहाय्यमात्रं त्विह मत्प्रभावस्तं प्रत्यवादीत्रिदशः प्रहृष्टः ॥ ४० ॥

बिभ्रत्यदभ्रां सुरपद्मलक्ष्मीं सौधे समस्ताद्भुतवस्तुभाजि ।
रूपश्रिया प्रीणितनेत्रया च चक्रे स तौ स्वर्मिथुनायमानौ ॥ ४१ ॥
ततो विमाने किरणैर्मणीनां दिवामणेर्विभ्रममादधाने ।
निवेश्य दिव्यर्द्धिविशेषरम्ये स श्रीपुरोद्यानमवापयत्तौ ॥ ४२ ॥
तदास्य भूभर्तरि कालधर्मः क्रोडीकृते दैववशादपुत्रे ।
समाकुले राजकुले समन्तादस्तंगते भानुमतीव चक्रे ॥ ४३ ॥
लुण्टाकलोकेन विलुण्ट्यमाने गृहे गृहे पौरजनस्य चित्ते ।
नीराजराज्यग्रहणाग्रहेण डोढौक्यमानेऽपरराजलोके ॥ ४४ ॥
निधीयमाने च धने धरायां सर्वत्र विस्फूर्जति वैयसे च ।
राजानमैच्छज्जनता तदानीमुपप्लवानामुपशान्तिहेतुम्॥४५॥(विशेषकम्)
उपद्रवं सर्वमपास्य देवः पयोधरस्येव पयो दवाग्निम् ।
प्रदर्शयामास ततः कुमारं राज्योचितं राजसभासदां सः ॥ ४६ ॥
अनेन नाथेन सनाथतां नः श्रीमत्कुमारेण विभो विधेहि ।
सुरेश्वरेणेव विधिः सुराणां तैर्व्यज्ञपीदं स नमच्छिरोभिः ॥ ४७ ॥
मुदाभिषिक्तोऽथ स तेन तत्र रराज राजा शरदीव शूरः ।
यस्य प्रतापः प्रतिपन्थिकान्ताकपोलपद्माङ्कुरशोषणोऽभूत् ॥ ४८ ॥
सुपर्वणा पर्वणि तत्र दत्तश्रीराजसिंहापरनामधेयः ।
सामन्तमुख्यैरथ स प्रणेमे पृथुप्रभावो जयशब्दपूर्वम् ॥ ४९ ॥
तूर्यत्रयं तत्र सुराङ्गनानामपूर्वरूपं रसभावरम्यम् ।
राज्योत्सवेऽभूत्तदशेषविश्वं प्रमोदमुद्राङ्कितमेव यत्र ॥ ५० ॥
एकातपत्रं विदधे स्वराज्यं स धर्मधुर्यो जिनशासनं च ।
दिव्यप्रभावात्प्रभविष्णु किं न त्रिवर्गसर्वस्वमितीन्दुकीर्ति ॥ ५१ ॥
यदद्भुतं किंचन देहभाजां यद्वर्णनाव्यग्रमुखा नरेन्द्राः ।
यदैहिकामुष्मिकसौख्यमूलं विश्राणितं तत्त्रिदशेन तस्य ॥ ५२ ॥
अयं घनस्येव समुन्नतिं यज्जिनेन्द्रधर्मस्य शुचिः करोति ।
तदुक्तनिर्वाहधुरंधरेऽत्र स्थाने मभासौ सफलः प्रसादः ॥ ५३ ॥

इति प्रमोदासृतवीचिमज्जन्मनाः सुरेन्द्रप्रतिमः स देवः ।
विद्युत्प्रभः क्ष्मापभृतमुवाच वाचस्पतेरपि प्रीतिकरैर्वचोभिः(?) ॥९४॥
धर्म्यैर्गुणैस्ते हृदयं मदीयं वशीकृतं गौरयशोवतंसैः ।
नरेन्द्र शार्दूलसमूलचूलसंसारवृक्षक्षयबद्धकक्षैः ॥ ९५ ॥
सद्भावभाजा विनयेन भक्त्या संदानितात्मेव न गन्तुमीशः ।
तवाद्य यद्यप्यमरेन्द्रपुर्यां तथापि मामुत्कलयोचितज्ञः ॥ ९६ ॥
सम्यग्दृशां देव शिरोमणिस्त्वं स्वयं सुरेन्द्रेण निबद्धसख्यः ।
अन्वग्रहीर्मामपि तादृशं यल्लोकोत्तरं ते चरितं यदीश ॥ ९७ ॥
स्तुत्वेति तं भक्तिभरावनम्रः संपूज्य पूज्यं विहितोपकारम् ।
स प्रार्थयामास दृशोः सदास्तु त्वद्दर्शनानन्दमयोत्सवो मे ॥ ९८ ॥

तदनु तदनु रागेणान्तरङ्गीकृतात्मा
शुचि यशसि चरित्रै राजसिंहस्य देव ।
सुरपरिवृढबन्धुर्विस्मयस्मेरनेत्रं
जगदपि विदधानः स्वश्रिया स्वर्जगाम ॥ ९९ ॥

अथ सकलधराया मण्डनाङ्गं सराज्यं
.....सुकृतज्ञः कार्मणं सिद्धिवध्वाः ।
त्रिभुवनमपि कीर्तेर्लास्यलीलैकरङ्गं
गुणिषु निपुणदानं श्रीनिदानं चकार ॥ १०० ॥

राज्ये निवेश्य तनयं समये जितारिं
राजा तया मृगदृशा सह कान्तिमत्या ।
कोटिं....समधिरुह्य च भावनाया
दिव्यं विमानमिव स त्रिदिवं जगाम ॥ १०१ ॥

वृन्दैरप्सरसां विलस्य विनमत्स्वःसद्मचूडामणि-
श्रेणीषु प्रतिबिम्बचुम्बिचरणां भुक्त्वेन्द्रराज्यं चिरम् ।
क्षोणीमण्डलपालनाय करुणोद्रेकादिवावातरः
स त्वं विक्रमसिंहभूपतिकुले श्रीमज्जयन्तो नृपः ॥ १०२ ॥

प्रथितलटभरूपान्तःपुरीचक्रवाले
तुलित····लिकलक्ष्म्याः कान्तिमत्याश्च जीवः ।
अजनि स मुनिदानादिन्द्रसामानिकश्री-
स्तदनु नृपतिपुत्री प्रेयसी ते च भूप ॥ ६३ ॥
विद्यादेवीनिजगतिभुवा तत्र जातिस्मरेण
व्यक्ते हस्तामलकतुलया पूर्वजन्मस्वरूपे ।
शुद्धे पक्षे शशिसमुदयेनाम्बुराशेरिवाम्भः-
स्तस्य प्रेमानवधि मिथुनस्याथ विस्तारमाप ॥ ६४ ॥
इतः प्रत्यक्षं ते चरितमुदितश्रीपरिकरं
परं किं किं ब्रूमोंऽपरनृपयशःकैरवरवे ।
इदं विद्यादेवी निगदितवती तेन महिता
विसृष्टा हृष्टा सा द्रुतमथ तिरोऽभूत्तडिदिव ॥ ६५ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के नरेन्द्रपूर्वभववर्णनो नाम सप्तदशः सर्गः ।

अष्टादशः सर्गः ।

अथ निरन्तरया रतिसुन्दरीमुखसुधाकरचन्द्रिकयाञ्चितः ।
अपि समागतमुष्णशतं नृपः शशिरकालमिवाकलयत्तदा ॥ १ ॥
यदभिसंगमतः खलु मित्रतोऽप्युदयते परितापभरो भुवि ।
उपदवादिव वीरुधिदारुणः किमु निदाघऋतुः स न दुर्जनः ॥ २ ॥
अकृत सृष्टिमुष्य सरस्वती सुचिरशोषकृतोऽपि ऋतोर्विधिः ।
भुवि पुराणपुमानिति मंन्दधीरति कलङ्कपदं स ततोऽजनि ॥ ३ ॥
दिनकरः करदण्डनिपातनैस्त्रिजगतां परितः परितापदः ।
तदपि पङ्कजिनीष्वमृतायते प्रियतमासु न को हि मृदुर्यतः ॥ ४ ॥
पथिषु पान्थजनस्य चरेणवस्तपनतापवनं····नखंपचाः । (?)
स्फुरितवह्निकणैरिव वर्षिणः सततगाश्वनितान्तमरुंतुदाः ॥ ५ ॥
बहुनृपेव रसारसपानतस्तरणिरेष महाभरदुर्वहः ।
अभवदस्य रथाश्वगतिः शनैर्ध्रुवमतो दिनवृद्धिरजायत ॥ ६ ॥

सरसचन्दनपङ्कविलेपनैः सुपनसारपरागतरङ्गितैः ।
शिशिरतादिगुणैः खिभि(?)रञ्चितैः सततगैः सुरतक्रमहारिभिः ॥ ७ ॥
घननिभैः कदलीदलमण्डपैः स्मरविबोधनबन्धुरपण्डितैः ।
विमलमौक्तिकभूषणभूषया तुहिनरश्मिरुवाच जलार्द्रया ॥ ८ ॥
हिमरुचे रुचिरैः करकोरकैरुपवनैर्मधुधौतधरातलैः ।
स्मितसरोजरजःसुरभीभवन्न····पयस्सु रयस्सु वमज्जनैः ॥ ९ ॥
अभिमतैः शिशिरैरपरैरपि स्मरनरेन्द्ररसाढ्यरसायनैः ।
जगति भोगिजनेन पुरस्कृतैर्लघुनिदाघऋतुः परिभूयते ॥ १० ॥
(चतुर्भिः कलापकम्)
सरसकेलिमिथाङ्गनिपीडनैर्दृढमनङ्गसुखैः खलु वञ्च्यते ।
यदिह भोगिजने घनधर्मतस्तदिहमुग्रकृतोः खलु वल्गितम् ॥ ११ ॥
व्यरचि यो मृगलोचनया प्रपा सुरभिकुम्भजलेन युवा तृषः ।
लवणिमामृतनिर्भरपानतोऽजनि स तत्कुचयोस्तृषितोऽद्भुतम् ॥ १२ ॥
गिरिदवानलदग्धवनोद्भवं भ्रमति भस्मसितं विततीकृतम् ।
जगति बन्दिजनैरिव वायुभिर्यश इवोष्ण ऋतोरवनीपतेः ॥ १३ ॥
खररुचे रुचिभिः परितापितैः प्रकुपितैरिव मण्डलमादधे ।
अनिलतो विततैर्दिवरेणुभिः कलितपाकपलाशदलोपमम् ॥ १४ ॥
न परमुग्रमयं रतिसुन्दरी प्रियतमः सहते निजशासनात् ।
इति भयादिव कम्पितमानसस्त्वरितमुग्रऋतुः प्रपलायत ॥ १५ ॥
जय जयोन्मुखमङ्गलपाठकैरिव कलापिकुलैः कलनादिभिः ।
घनघनाघनघोषमिषेण च प्रसृमरैर्जयदुन्दुभिनिःस्वनैः ॥ १६ ॥
जलदमध्यचलद्विशकण्टिकावनिमिषाच्चमरैश्च चलाचले ।
स्फुटशिलन्ध्रिततातपवारणैर्भुवि तपात्ययभूभृदवातरत् ॥ १७ ॥
वितनुते भुवनाद्भुतवैभवं त्वमिव किंतु मुखे मलिनत्वमभूत्(?) ।
अयमिति प्रियमुक्तवती सती समभवद्रतये रतिसुन्दरी ॥ १८ ॥
मिथुनकैर्नववारिदवायुना पुलकितैरमृतोर्मिविवर्षिणा ।
अथ मिथः परिरम्भसुखैस्तदा नवमिवाक्रियते स्मरशासनम् ॥ १९ ॥

जलदकालनृपस्य घनो भटः परिलसत्तरवारिसमुद्भटः ।
तडितमुग्रऋतो स्म दिदृक्षया क्षिपति दृष्टिमिवातिरुषां नृणाम् ॥२०॥
भृतनभस्तलवारिदवृष्टिभिर्नयनयोर्द्रुतमर्पितकौतुकः ।
विलसतां सह वल्लभया भृशं भवति वारिमुचां समयः प्रियः ॥ २१ ॥
भुवनमप्यमृतेन पयोधरः सुखयति प्रहतातपवैशसः ।
विरहिणीर्दहति स्मरवह्निना पुनरहो चरितं विविधं विधेः ॥ २२ ॥
कवलितं सकलं किल तेजसं पटलमुल्बणमुग्रऋतोरिव ।
पवनवल्गितदीप्तदवानलप्रशमनच्छलतो घनवारिभिः ॥ २३ ॥
जलदवारिकणैः परिचुम्बितं नवकदम्बमुदञ्चितकेसरम् ।
अनुकरोति विलासिनमुच्चकैः पुलकितं दयितापरिरम्भणैः ॥ २४ ॥
गिरिशिरःपरिपातितरङ्गिणीतरलतुङ्गतरङ्गपयःप्लवः ।
त्रिजगतामुपकारितया श्रमच्यश इव प्रतिभाति पयोमुचः ॥ २५ ॥
जगविलासमयेऽपि मनस्विनी स्फुरितमानविखण्डनपण्डिते ।
नवघने बहुमानपरम्परा निशमभूदुपकारिणि कामिनाम् ॥ २६ ॥
स्मितवती कुटजैः स्फुटकेतकीद्युतिभिरिद्धकटाक्षपरम्परा ।
घनविभूतिरियं जगतीतले ललति रञ्जितकामनरेश्वर ॥ २७ ॥
रुचिरतां चिनुते स्म परां घनः किशलपुष्पफलैश्च वनश्रियाम् ।
मृगदृशामिव यौवनमुन्नतं स्मरविलासकुलैरिव विभ्रमैः ॥ २८ ॥
रविमवेत्य निदाघमिवापरं जगदरुंतुदमम्बुधरः क्रुधा ।
वसुविलासमपास्य विनिर्ममे कवलिताखिलमण्डलमुच्चकैः ॥ २९ ॥
जगदुपद्रवणेषु सहायतां विदधतोग्रऋतोरहिमांशुना ।
मिलति दशदिनेष्वरिणा ततः····रुचि गिलितस्तनयिबुना(?) ॥ ३० ॥
रुचिरकाञ्चनचित्रमणिप्रभा वलयपल्लवभृन्मुकुटश्रियम् ।
दधदिवेन्द्रशरासनमण्डलं घनऋतो नृपतेः प्रविराजते ॥ ३१ ॥
सम····वर्षणतः सफलीभवत्कृषिवलो·····दृशां दृशाम् ।
परिचयादिव वारिमुचां चयः शुचिमरीचिमरीचिनिभो बभौ ॥ ३२ ॥

प्रतितसर्वजनीनसमुन्नतौ विगलितायुषि वारिदभूभुजि ।
अथ जयन्तनरेन्द्रमुपाययौ स्मरशरैर्विधुरेव शरद्वधूः ॥ ३३ ॥
कुसुमसायकनायकपत्तनप्रतिनिधिं स च सौधमधिश्रितः ।
प्रणयिनीमथ कर्णरसायनं वचनमेवमुवाच महीपतिः ॥ ३४ ॥
प्रियतमे रतिसुन्दरि निश्चितं शरदियं तव याति सदृक्षताम् ।
अपकलङ्कशशाङ्कमुखी भवेद्यदि सदा स्मितकैरवलोचना ॥ ३५ ॥
इह मरालकुलं कमलाकरे सरभस रमते कलकूजितम् ।
विशदपक्षवतां गुणिसंगमः कलयतीष्टतरेषु धुरीणताम् ॥ ३६ ॥
जलदबन्धनमुक्तिमहे विधोः स्नपयितुर्जलधेरिव वीचितः ।
पतितमुज्ज्वलमौक्तिकमण्डलं स्फुरति तारकचक्रमिषादिव ॥ ३७ ॥
जगति पङ्कमकारि मम द्विषा जलभृता सरितश्च विवर्धिता ।
इति रुषेव रविस्तदशोषयत्प्रविदधेति तनूरबला हिताः ॥ ३८ ॥
अहनि तापमधत्त परं रविर्घनघनां च शशी निशि चन्द्रिकाम् ।
शरद इष्टतरावधिकारिणाविव निदेशवशात्कुरुतस्तथा ॥ ३९ ॥
दिनकरस्य करैः परिपाकतो जलमशेषजलाशयसंगतम् ।
सरसतां शरदि प्रतिपद्यते निशि शशिद्युतिभिः शशिकान्तिभिः॥४०॥
मदभरोच्छलनेन निरङ्कुशाः प्रबलदर्पभरादिह कुञ्जराः ।
ततकरोन्नमनैर्गलगर्जिभिर्विदधतीव सुरद्विपतर्जनम् ॥ ४१ ॥
कविजुषामपि कान्तरसात्मनां विदधते सरितां तटपाटनम् ।
इह वृषाः शितशृङ्गशिखायुधैः क खलु दुर्मदिनामुचितज्ञता ॥ ४२ ॥
कलमशालिवनं नवगोपिका मृगदृशः परिपान्ति मृगादितः ।
कलरवैस्तरुणान्नवसंगमे कुसुमसायकसायकपाततः ॥ ४३ ॥
विलसदङ्कुरसत्पुलकाञ्चिताः शरदि हृद्यरसश्रुतिविश्रुताः ।
अलिकुलामदलावलिकुन्तलाः प्रियतमा इव भान्ति भुवीक्षवः ॥ ४४ ॥
मृगदृशां कलगीतरसे निशि प्रणयिनीह जगन्मुदमाययौ ।
मृगवियोगभिया मृगलाञ्छनः पुनरभूदतिपाण्डुवपुर्ध्रुवम् ॥ ४५ ॥

जगति राजसि रक्षय मण्डलैर्धनसमृद्धिबलैश्च विभूषितः ।
इति **जयन्त**नृपः सुभगैर्गुणैर्हृतहृदा शरदा समुपासत ॥ ४६ ॥
नृपसुताक्षितिपाधिपयोस्तयोरतिरतिप्रिययोर्नवयोरिव ।
सरसकान्तकुतूहलकेलयेऽजनि शरत्समयः समयोः श्रिया ॥ ४७ ॥
कतिपयेषु दिनेषु गतेष्वथ स्वपितरोहितधीः परमार्हती ।
जिनमते प्रतिबोधयति स्म सा स्मितसरोजमुखी नृपनन्दिनी ॥ ४८ ॥
स परिपाकविवेकभराङ्कुरप्रतिमरोमसितं नरपुंगवम् ।
समवलोक्य जराज्वरजर्जरं नृपतिरेवमचिन्तयदेकदा ॥ ४९ ॥
वपुरिदं प्रथमं सुखसाधनं तदपि रोगजरादिभिरस्थिरम् ।
किमिह मिष्टफलं प्रभवं वनं वनजवह्निशिखाभिरभङ्गुरम् ॥ ५० ॥
सरसमाकुलपङ्कजलोचना ललितलोचनचञ्चलमङ्गिनाम् ।
प्रथितमायुरुपैति च यौवनं तरणितापितपुष्पदलश्रियम् ॥ ५१ ॥
लवणिमा सुरकार्मुकसोदरः सुभगता तु सखा वफला रुचाम् ।
अतुलरूपबलाद्यपि देहिनां समदसिन्धुरकर्णचलाचलम् ॥ ५२ ॥
नववधूप्रियसंगमसंभ्रमस्खलतटीतलहारलतातुलम् ।
जगति राज्यमशेषधराधराधिपशिरोमणिलालितशासनम् ॥ ५३ ॥
स्फुरितकोपफणीन्द्रफणावलीतलनिवासरतिं भजतामिव ।
विषयसेवनमुक्तिमुपेयुषां मुखविषादिव दुर्गतितो भयम् ॥ ५४ ॥
भवति शारदनीरदसोदरं सकलमेव भवप्रभवं सुखम् ।
परिणतौ विरसं मधुरं मुखे विषतरोरिव पक्वफलं नृणाम् ॥ ५५ ॥
त्रिभुवनेष्वपि नित्यमनित्यताकवलितं निखिलं खलु खेलति ।
तदविलम्बमनन्तसनातनानुपमशर्म करं व्रतमादधे ॥ ५६ ॥
क्षितीवधूधव **विक्रमसिंह**भूस्त्रिभुवनाक्रमणैव पराक्रमः ।
मम सुतापतिरेष विशेषतः प्रणयभूरसतस्य सुतोऽधुना ॥ ५७ ॥
निजकुलागतराज्यसमर्पणं ध्रुवममुष्य ममाप्यतिसुन्दरम् ।
इति विचिन्त्य चिरं मणिमञ्जरीपतिरमात्यमतं जगृहेऽत्र सः ॥ ५८ ॥

अभिषिषेच जयन्तनरेश्वरं तमधिराज्यमुदारमहेन सः।
कनककुम्भमुखोच्छलिताम्बुभिः पुरजनोऽप्यनुरागसुधारसैः ॥ ९९ ॥
स जिनसङ्घपदाम्बुजपूजनं प्रमुदितार्थि च दानमनेकधा।
क्षितिभृतां व्रतराज्यपरिग्रहे यदुचितं तदशेषमचीकरत् ॥ १० ॥
सह जयन्तनृपेण स हास्तिनापुरपतिर्गुरुमेत्य विनत्य च।
शिरसि मौलिमिवाञ्जलिना परं विरचयन्नतिधर्ममयाचत ॥ ११ ॥
सानन्दं गुरुणा ततः करनखज्योतिःप्रवाहाम्बुना
राज्ञस्तस्य विनिर्मिते व्रतमहाराज्याभिषेकक्रमे।
तत्रासौ मुमुदे शुचौ च सुचिरं श्रीमज्जयन्तः पुन-
स्तत्त्वज्ञोऽपि विमुह्यतीष्टविरहे धिङ्मोहलीलायितम् ॥ १२ ॥
चक्रेऽथ बन्धुरवचः किरणैस्तदीयं
स्वान्ताम्बुजं विगतशो····विकोचमुद्रम्।
सूरिर्दिवाकर इति प्रथितो गुणेन
नाम्ना च चित्रमभृतं क्षरतीक्षणेषु ॥ १३ ॥
स्नेरास्यः श्रीविलासः सुचिरमथ गुरोः पादपङ्केरुहाणां
प्रीत्योपास्तिं विधाय प्रणतिमपि मुनेस्तस्य भूवल्लभस्य।
पीयूषस्यैव वृष्टिं निजसुकृतयशःशाखिनस्तन्मिषेण
क्षोणीनाथ प्रकाण्डः क्षितिपगृहमगात्स श्रियां डम्बरेण ॥ १४ ॥
चूडारत्नायमानः समजनि महतां यः क्षमापालकानां
विश्वश्लाघ्याद्यरेष(ख)श्चरणगुणगणैर्धर्मलीलाबलेन।
जित्वा मोहं ससैन्यं त्रिभुवनजयिनं केवलज्ञानलक्ष्मीं
लब्ध्वा श्रीमन्मुनीन्द्रो रमयति हृदये वैरिसिंहाभिधानः ॥ १५ ॥
सार्धं करैः शूर इवाथ सूरिः स केवली केवलिमुख्यशिक्षैः।
कदाचिदन्यत्र पुरे प्रतस्थे भव्यारविन्दप्रतिबोधनाय ॥ १६ ॥
तदनु तमनुगम्य श्रीमुनीन्द्रं नरेन्द्रो
मुदकलयदसन्दं(?) साश्रुनेत्रोऽभिवन्द्य।

तमपि गुरुरथाशीर्वाददानेन कामं
व्यदधदमृतपूरेणेव निष्पापतापम् ॥ १७ ॥
निर्व्याजस्मरकेलिनिर्भररसे प्रोज्जृम्भमाणेऽनिशं
सोत्कम्पा रतिसुन्दरी प्रणयिनी जज्ञे स्फुरत्साध्वसा ।
उन्मीलद्धनकण्टका च परितः क्षोणी तु नो जातुचि-
त्तस्मिञ्शासति राज्यमूर्जितनये श्रीमज्जयन्ते नृपे ॥ १८ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये
श्रीशब्दाङ्के ऋतुत्रयवर्णनो नामाष्टादशः सर्गः ।

एकोनविंशः सर्गः ।

अथान्यदाध्यासु सभां स भूपः सुधर्मयापि स्पृहणीयशोभाम् ।
अत्यन्तविस्मारितवैरिसिंहक्षमाधिराजः स्वगुणैः प्रजानाम् ॥ १ ॥
अमात्यमात्मीयपितुर्नृपस्य द्वितीयमात्मानमिवेयिवांसम् ।
निवेदितं वेत्रधरेण वीक्ष्य चक्रे स विद्याधरचक्रवर्ती ॥ २ ॥
कृतप्रणामं सविधासनस्थं संमान्य मान्यं समपृच्छदेनम् ।
नरेन्द्रनम्या मम तातपादाः कल्याणिनः संप्रति मन्त्रिराजः ॥ ३ ॥
स क्षेम लक्ष्म्या ललितैर्विलासैर्निरन्तरं दुर्ललितः क्षमेन्द्रः ।
त्वां द्रष्टुमुच्चैरुदकण्ठतेति व्यजिज्ञपन्मन्त्रिपतिर्जयन्तम् ॥ ४ ॥
ततः प्रतापेन विवर्ध्यमाने साम्राज्यसौस्थे सकलेऽपि तत्र ।
राजा स राज्यस्थितयान्वयुङ्क्त स्वमन्त्रिणं तातविलोकनोत्कः ॥ ५ ॥
दिव्यैर्विमानैः खचरेश्वराणां मणिप्रभाकृत्सुरेन्द्रचापैः ।
सैन्यैर्वरेण्यैश्च धराधराणां स रोदसीं संकटयंश्चचाल ॥ ६ ॥
श्रीमज्जयन्तः स्वपुरीं जयन्तीमालोक्य लोकोत्तरकान्तलक्ष्मीम् ।
आवासयामास विशामधीशे समन्तदुद्यानभुवं विदूष्य ॥ ७ ॥
कुमारसैन्यादथ मन्त्रिराजं स प्रेषितात्मीयनरान्निशम्य ।
समागतं नन्दजयन्तनामा.....नमितो जयन्त्याः ॥ ८ ॥
ततः स वैरिक्षितिपालमौलिमालासु खेलाद्गुरुशासनश्रीः ।
अचीकरत्तां नगरीं प्रवेशमहोत्सवाशेषविशेषभूषाम् ॥ ९ ॥

सामात(?)राजन्यकमन्त्रिराजमुख्यैरशेषैरपि राजलोकैः ।
पुरः प्रधानैश्च समेत्य तत्र स स्वामिसुनुर्मुदितैरनामि ॥ १० ॥
राज्ञो निदेशात्समुपेत्य तत्र प्रणम्य मन्त्री विबुधः कुमारम् ।
उत्कण्ठितस्ते मुखदर्शनाय पितेत्युदीर्याचलयन्नगर्याम् ॥ ११ ॥
मौहूर्तिकेनाथ शुभे मुहूर्ते निवेदिते स क्षितिपालसूनुः ।
तत्र प्रवेष्टुं प्रगुणीबभूव विधाय सर्वं समयानुरूपम् ॥ १२ ॥
अन्तःपुरालंकृतयाप्यमाने विद्याधराधीश विमानवृन्दैः ।
पदातिहस्त्यश्वरथप्रतानैः सकौतुकं स्वःपतिनापि दृश्यैः ॥ १३ ॥
सुधांशुबिम्बेन भियेव राहोः श्रितेन शुभ्रातपवारणेन ।
लक्ष्मीजयश्रीप्रहितैः कटाक्षैरिवोच्छलद्भिश्चमरैर्विलक्षैः ॥ १४ ॥
माङ्गल्यमन्त्रैरिव शङ्खनादैः समुल्लसद्भिः सह पञ्चशब्दैः ।
बन्दीन्द्रकोलाहलमांसलैश्च जयारवैर्हर्षयशोधिचन्द्रे ॥ १५ ॥
करीन्द्रघण्टारवडम्बरेण निश्वासनादेन भृताम्बरेण ।
साम्राज्यलक्ष्म्या च विराजमानस्ततश्चचाल क्षितिलोकपालः ॥ १६ ॥
(चतुर्भिः कलापकम्)
अत्रान्तरे राजसुतप्रवेशमहोत्सवालोकसमुत्सुकानाम् ।
उपेयुषीणां पुरसुन्दरीणां विलासलीलायितमेवमासीत् ॥ १७ ॥
कुमारलावण्यरसं निपीय काचित्सतृष्णान्तरुदीर्णकम्पा ।
कन्दर्पवैद्यं स्वपुरस्थमास्य सौरभ्यलोलालिरवैरिवाह्वत् ॥ १८ ॥
कन्दर्पशिष्योपनिषत्स्वरूपैर्लीलाविलासैः स्फुटमाक्षिपन्ति ।
उपेक्षिता काचन तेन तन्वी मुमोच सौभाग्यमदातिरेकम् ॥ १९ ॥
ययौ न या गोचरमीक्षणानां मनोरथैरप्यकलङ्कशीला ।
तस्याः सुखेन स्तनसङ्गभङ्गी यूनस्तदा कस्य न कस्य जज्ञे ॥ २० ॥
यद्वीक्षणासक्तमना जनौघसंमर्दतः स्वस्तनितम्बवस्त्रा ।
विलोकिता कापि न कं चकार सहास्यतेऽलं समकालमेव ॥ २१ ॥
त्वं मन्थरायां हि गतौ गुरुर्न स्वपामहे तेऽद्य तया न धातुः ।
इतीव कष्टाज्जगदे स्वनादाच्छलेन काचित्किल केलिहंसैः ॥ २२ ॥

एकेन कर्णोत्पलरेणुपातादुदश्रुणान्येन विकाशिनोऽक्ष्णा ।
सशोकहास्याभिनयैककालं काचित्स्मराभूत्स्मरनर्तकीव ॥ २३ ॥
नृपात्मजालोकनकौतुकाय समुत्सुका काचन कैरवाक्षी ।
नितम्बबिम्बं स्तनमण्डलं च निनिन्द मन्दां गतिमादधानम् ॥ २४ ॥
तं राजहंसं····भुजस्थ·····त्केलिकौतूहलतश्चिकीर्षुः ।
प्रसारयन्ती निजबाहुयुग्मं दूरेऽपि लोकैः समहस्यतान्या ॥ २५ ॥
किं चावदत्कापि विलाससारा सारङ्गकान्ताकमनीयनेत्रा ।
स्मरोऽङ्गलक्ष्म्यायमपूर्वरूपस्तत्पूजयैनं सखि नेत्रपुष्पैः ॥ २६ ॥
चन्द्रानने नित्यमखण्डवृत्तः स्मराम्बुराशेर्जनकः प्रतीतः ।
कलङ्कमुक्तोऽयमपूर्वराजः पुरः समभ्येति विलोकयैनम् ॥ २७ ॥
दृशां सहस्रैर्निचितं यदङ्गं रूपेण संमर्दभियेव मुक्तम् ।
मुग्धा शची तत्र रता सुरेन्द्रे सखीह रूपेऽपि सतीहरूपे ॥ २८ ॥
कन्दर्पराजेन निवेशितानां स्वराज्यमन्त्रीशपदेऽङ्गनानाम् ।
वैदग्ध्यदग्धानि तथा वचांसि शृण्वन्स भूपः स्वपुरीं विवेश ॥ २९ ॥
आत्मैव यस्योपमितिः समृच्छ्या जगत्यसाधारणतां गतस्य ।
तस्य स्वसौधस्य समीपमाप श्रीविक्रमक्षोणिपतेस्तनूजः ॥ ३० ॥
विलोचनैरात्मजवक्त्रचन्द्रज्योत्स्नां निपीयाथ चिरं नरेन्द्रः ।
उत्तीर्यसौधोपरिभूमिकायाः सद्यः समाभूमिमलंचकार ॥ ३१ ॥
प्रातः सहस्रांशुरिवांशुजालैर्बद्धानुरागैर्नभसि प्रदीपैः ।
राजंस्तदा तत्र स राजकाद्यैर्विवेश विद्याधरचक्रवर्ती ॥ ३२ ॥
भा(ता)भिः प्रणामाञ्जलिपाणिपाणिरुहां स्फुरद्दीपशिखासखीभिः ।
ताडङ्कनीलोत्पलरश्मिदूर्वाङ्कुरैः स्फुरद्दृष्टिभिरक्षतैश्च ॥ ३३ ॥
हारप्रभाशुद्धसुधाभिरामैस्तुङ्गैः स्तनैरुच्छ्रितपूर्णकुम्भैः ।
माङ्गल्यमादौ सुदृशां तदासीत्पश्चात्प्रदीपप्रमुखैश्च तस्य ॥ ३४ ॥
पुरंदरस्यैव पितुर्जयन्तस्ततः प्रणामं प्रणयेन चक्रे ।
मातुस्तथा श्रीरतिसुन्दरी च कुल्याः कुलाचारविधिप्रिया हि ॥३५॥

आलिङ्ग्य सर्वाङ्गमथावनीशस्तमात्मजं मौलितले चुचुम्ब ।
निसर्गतः प्रेमपदं हि पुत्रः पितुर्विशेषेण महोदयं तु ॥ ३६ ॥
निषेदुषि श्री····नृपो जयन्ते यथोचितं सर्वसभाजने च ।
अचीकरत्तत्र महीमहेन्द्रो महोत्सवं विश्वतरङ्गितोषम् ॥ ३७ ॥
स तस्य सूनोरजनिष्ट भक्त्या निरन्तरं पल्लवितप्रमोदः ।
राज्ञोऽपि मुख्यं गृहवाससारं श्लाघ्यं हि बन्धोः प्रतिपत्तिरेव ॥ ३८ ॥
परेद्युव(द्यवि)क्षोणिधवस्तरङ्गत्संवेगसर्वस्वसुधासमुद्रः ।
राज्यादिसंपत्परिरम्भसौख्ये पराङ्मुखश्चिन्तितवानथैवम् ॥ ३९ ॥
वंशेऽवतंसध्वजतुल्यमस्मिञ्जयन्तमेनं विनिवेश्य राज्ये ।
त्वरे महानन्दपदाय धीमान्विलम्बते कः परलोककार्ये ॥ ४० ॥
सदस्यभिप्रायमिमं निवेद्य सुतस्य सर्वं विदधे तथैव ।
अन्ते च योगेन तनुत्यजां स शिश्राय मार्गं सुधियां नृपाणाम् ॥४१॥
श्रुताभिषेकं जनकस्य राज्ये तमेत्य भूगोचरखेचरेन्द्राः ।
नत्वोपढौक्योऽद्भुतढोकनानि सिषेविरे नम्रशिरःकिरीटाः ॥ ४२ ॥
प्रमोदितास्तेन महाप्रसादैर्निजं निजं राज्यमयुर्विसृष्टाः ।
महीपतेस्तस्य गुणैरनन्यैः संदानितान्तःकरणस्ततस्ते ॥ ४३ ॥
कुमद्वतीनामिव स प्रजानां लक्ष्मीविलासाय बभूव राजा ।
समूलकाषं कषितोरुदोषश्चित्रीयते तेन न कस्य चेतः ॥ ४४ ॥
हठो भवेच्छौर्यशठस्य जन्तोः क्षिप्रं विपक्षे बलिनि क्षयाय ।
कुण्ठत्वमायाति हि वज्ररत्ने निशातधारापि कृपाणयष्टिः ॥ ४५ ॥
शुभाशुभाय प्रभविष्णुपूर्वं कर्मैव किं तत्र समुद्यमेन ।
यदेव भाव्यं भविता तदेव कर्म द्वितीयं व्यभिचारि चेदम् ॥ ४६ ॥
बीजं यथा वारि विनाङ्कुराय तथोद्यमं कर्म फलाय नैव ।
भवेदतो दूरितदोषमासीच्छ्रेयस्करं कर्म नयश्च तस्य ॥ ४७ ॥
अङ्गैस्ततः सप्तभिरप्यवन्ध्यं प्रवृद्धशक्तित्रयकीर्तिरेषः ।
राज्यं शशासापरवैरिनाशाञ्षडन्तरङ्गानविजित्य शत्रून् ॥ ४८ ॥

तेन प्रयुक्तापणबन्धमुख्या गुणा न वैफल्यमयुः कदाचित् ।
उप्ता नरैरुत्तमभूमिकासु सुवृष्टियोगादिव सस्यसङ्घा ॥ ४९ ॥
काले च पञ्चाङ्गमपि प्रकाममात्यवृद्धैः सह मन्त्रमेषः ।
चकार दुर्वारतरारिवारनिवारणेऽसौ यदमोघमस्त्रम् ॥ ५० ॥
प्रशासतस्तस्य नयेन भूमिं क्रमादभूदङ्कगतं जिगीषोः ।
सिद्धित्रयं निर्ममतान्वितस्य यदेह दण्डत्रितयं मुमुक्षोः ॥ ५१ ॥
धर्मार्थकामत्रयमण्डनेन स मण्डयामास नृपप्रकाण्डः ।
जन्म स्ववीर्यं जिनरम्यहर्म्यश्रीताण्डवेन क्षितिमण्डलं च ॥ ५२ ॥
देवी क्रमाद्वा····युगेस्तनूजा(?) तनुप्रभापूरनिरस्तशूरम् ।
असूत सूनुं रतिसुन्दरी च संचारिणं क्षात्रमिवाथ धर्मम् ॥ ५३ ॥
आद्यस्तयोर्वज्रधराधिवीर्यो बभूव वज्रायुधनामधेयः ।
चक्रायुधोऽन्योऽरिवधूकपोलपत्राङ्कुरग्रासरसासिधेनुः ॥ ५४ ॥
यौ दानभोगाविव वैभवस्य व्योमाङ्गणस्येव च पुष्पदन्तौ ।
सौभाग्यरूपे इव यौवनस्य शोभाभरं बिभ्रतुरस्य राज्ञः ॥ ५५ ॥
सदा यतिं धारयता समन्तात्तथा सुवृत्तेन सदार्जवेन ।
भुजद्वयेनेव निजेन तेन रराज राजा तनयद्वयेन ॥ ५६ ॥
श्रुतेन शीलेन गुणोदयेन स्थाम्ना च धाम्ना च वपुःश्रिया च ।
अभूतपूर्वामपि तैरभूतां तावेव तस्योपमिती नृपस्य ॥ ५७ ॥
प्रज्ञातिरेकेण बला बभूवुस्तयोः समालिङ्गनतः कृतार्थाः ।
उदग्रसौभाग्यगुणोदयेन वशंवदा राजसुताश्च का ताः ॥ ५८ ॥
अथाद्यमात्मानमिवात्मजं स शुभे निवेश्याहनि यौवराज्ये ।
निनाय कालं ललितैर्विलासैस्तत्संनिधानात्तनुराज्यचिन्तः ॥ ५९ ॥
स्फुटप्रसूनप्रकरप्रसर्पत्सौरभ्यलुभ्यन्मधुपाङ्गनासु ।
कदाचिदासन्नवनावलीषु चिरं स रेमे रमणीसहायः ॥ ६० ॥
समीरणान्दोलितवारिपूरतरङ्गरङ्गत्कमलोपहारैः ।
कृतातिथेयेषु सरःसु कान्ता वृतः कदाचिद्विदधेऽम्बुकेलिम् ॥ ६१ ॥

कदापि स प्रेम वशाद्वधूनां कपोलपालीकुचमण्डलीषु ।
चकार पत्राङ्कुरचक्रवालं परार्ध्यरोमाञ्चचयेन सार्धम् ॥ ६२ ॥
प्रियः प्रियालापविलासलास्यैराश्चर्यकृद्भिः स्मरकेलिभिश्च ।
कदाचिदन्तःपुरचक्रवालैश्चिरं स रम्यै(त्यै) रमयांबभूवे ॥ ६३ ॥
व्यलीकमालोक्य समाकुलाभिरीर्ष्याभराकुञ्चितलोचनाभिः ।
तत्राश्रुबिन्दुच्छलतः प्रियाभिः कदाप्युपालम्भि विनाक्षरं सः ॥ ६४ ॥
कदाचिदासीत्स विलासिनीनां विलाससर्वस्वरसे निमग्नः ।
स नर्तयामास कदाचिदेताः सौन्दर्यचर्यापरिभूतरम्भाः ॥ ६५ ॥
गजेन्द्रशिक्षाचतुरो गजेन्द्रानदाम्यदुद्दाममदान्कदाचित् ।
कदाचिदुद्वेल·····प्रवाहसंवाहसंदोहमवाहयच्च ॥ ६६ ॥
विचित्रशास्त्रार्थविचारसारैर्वाचस्पतेर्वि-
कदापि गोष्ठीषु विशारदानां स धूनयामास मुदा शिरांसि ॥ ६७ ॥
कदाचन श्रीजिनशासनस्य प्रभावनादद्भुतपुण्यकृत्यैः ।
सुधाप्रवाहैरिव विस्फुरद्भिः श्रेयः फलां वल्लिमिवैधयत्सः ॥ ६८ ॥
अन्तः प्रसर्पत्परमप्रमोदप्रपञ्चचञ्चत्पुलका कुचश्रीः ।
कदाचिदुच्चैर्जिनमन्दिरेषु चकार पूजोत्सवमुत्सहिष्णुः ॥ ६९ ॥
क्वापि क्षणोऽसौ क्षणदेन्दुकीर्तिः श्रीमद्गुरूणां वदनारविन्दे ।
वाचं दधानां मकरन्दमुद्रां भृङ्गी भुजङ्गोपमया पपौ च ॥ ७० ॥
तस्मिन्महीं पालयति क्रमात्तां नयाञ्चिते पञ्चमलोकपाले ।
ववर्ष काले जलदः समस्तप्रशस्यसस्योद्गममूलबीजम् ॥ ७१ ॥
तत्र प्रजानां पितरीव काम्ये प्रतापनिर्दग्धविपक्षकक्षे ।
स्वचक्रतो नोऽपरचक्रतो वा बभूव भीतिः परिशासति क्षाम् ॥ ७२ ॥
कदाचिदानन्दितपौरवृन्दः पुरंदरस्पर्धिपरार्ध्यऋद्धिः ।
ययौ जगल्लोचनकैरवेन्दुर्नदीश्वरं द्वीपमदृष्टपूर्वम् ॥ ७३ ॥
स तत्र विश्वत्रितयाङ्गिनेत्रचकोरचन्द्रातपनिर्विशेषाम् ।
विधाय पूजां जिनमन्दिरेषु प्रेक्षाक्षणं क्षोणिपतिर्ददर्श ॥ ७४ ॥

इतश्च सौधर्मपतिः स्वकल्पस्ववासिभिर्भूरिभिरभ्युपेतः ।
कर्तुं जिनेन्द्रायतनेषु पूजामहोत्सवं तत्र समाजगाम ॥ ७५ ॥
प्रेक्षाक्षणं चाद्भुतभूरिभङ्गीसंगीतकव्यग्रसमग्रलोकम् ।
विभाव्य पूजामतिशायिनीं च शचीपतिर्भूमिपतिं बभाषे ॥ ७६ ॥
धन्योऽसि राजन्सफलं तवैव राज्यं धनं जन्म च जीवितं च ।
दुःस्थार्दितेऽपीह मनुष्यभावे यस्यातिभक्तिर्जिनपुंगवेषु ॥ ७७ ॥
अतः प्रसन्नोऽस्मि करोमि किं ते मनः प्रियं ब्रूहि पुरंदरोऽहम् ।
अथ क्षितीशोऽपि सहस्रनेत्रं विनम्रमौलिर्विनयाद्बभाषे ॥ ७८ ॥
देव प्रसूतोऽस्मि कुले प्रशस्ये सर्वोत्तमं चास्ति ममाधिराज्यम् ।
सुदुर्लभं जन्मशतैरपीह प्राप्तं मया श्रीजिनशासनं च ॥ ७९ ॥
किमयं प्रभो स्यात्किमतः परं मे येनार्थितां यामि तवेत्युदीर्य ।
स्थिते नृपेऽनिस्पृहतातिरेकाद्विशेषहृष्टस्तमुवाच शक्रः ॥ ८० ॥
अद्यप्यलुब्धस्य तवास्ति कार्यं न नाम केनापि तथापि राजन् ।
श्रीविष्णुतीर्थेश्वरवैभवेन तवास्तु सख्यं मम निर्व्यपेक्षम् ॥ ८१ ॥
उक्त्वैवमालिङ्ग्य निजासनार्धे निवेश्य कृत्वा क्षणमिष्टगोष्टी ।
पुरंदरः क्षोणिपुरंदरश्च निजं निजं स्थानमथेयतुस्तौ ॥ ८२ ॥
वाः सत्पात्रदानात्प्रसृमरपरमश्रद्धया तद्विधातुः
प्रत्यक्षीभूय जन्तोर्विदधति सुदृशः प्राज्यराज्यप्रसादम् ।
किमस्यापि पुण्यापचयपरिचयादासमुद्रान्तपृथ्वी-
पृथ्वीपालैर्विनम्रस्फुटमणिमुकुटैश्चुम्ब्यपादारविन्दम् ॥ ८३ ॥
लक्ष्मीर्वेश्मनि दानभोगसुभगा वाणी प्रसन्नानने
दोर्दण्डद्वयमण्डपे च विजयश्रीमुक्तभूपान्तरा ।
कीर्तिर्नृत्यति दुग्धसिन्धुलहरीलीलाचरित्रे चिरं
श्रद्धापूर्वकसाधुदानजनिते पुण्येऽङ्गिनां जाग्रति ॥ ८४ ॥
त्रैलोक्यं ललितैर्यशोभि ..... यत्पूर्यते देहिनां
कायः कान्तगुणानुबन्धमधुरैः श्वेतांशुशुभ्रैर्गुणैः ।

यच्च श्रीजिनशासनोन्नतिनटीनाट्यप्रमोदैर्मन-
स्तन्मन्ये शुभपात्रदानसुकृतप्राग्भावविस्फूर्जितम् ॥ ८५ ॥
इत्थं नन्दोपनिषदुदयात्स्वानुभूतप्रभावं
स्तावं स्तावं मुनिवितरणं भक्तिसंदर्भगर्भम् ।
सार्वः सर्वं गुरुरिव जनं तत्र सोत्कण्ठमुच्चैः
कुर्वन्नुर्वीमवनितिलकः श्रीजयन्तः प्रशास्ति ॥ ८६ ॥

इति श्वेताम्बरश्रीमदभयदेवाचार्यविरचिते जयन्तविजयनाम्नि महाकाव्ये श्रीशब्दाङ्के नरेन्द्रराज्यस्थितिवर्णनो नामैकोनविंशः सर्गः ।

ग्रन्थकर्तुः प्रशस्तिः ।

आसीच्चन्द्रकुलाम्बराम्बरमणिः श्रीवर्धमानप्रभोः
पादाम्भोरुहचञ्चरीकचरितश्चारित्रिणामग्रणीः ।
स श्रीसूरिजिनेश्वरस्त्रिपथगापाथःप्रवाहैरिव
स्वैरं यस्य यशोभरैस्त्रिजगतः पावित्र्यमासूत्रितम् ॥ १ ॥
अभवदभयदेवः सूरिरस्मात्स यस्य
प्रभुरभजत तोषं स्तम्भने पार्श्वनाथः ।
प्रकटितविकटार्थां सङ्घसाम्राज्यवृद्ध्यै
व्यधित निधिसमानां यश्च वृत्तिं नवाङ्गयाः ॥ २ ॥
तच्छिष्यो जिनवल्लभः प्रभुरभूद्विश्वंभराभामिनी-
भास्वद्भाललललामकोमलयशःस्तोमः शमारामभूः ।
यस्य श्रीनरवर्मभूपतिशिरःकोटीररत्नाङ्कुर-
ज्योतिर्जालजलैरपुष्यत सदा पादारविन्दद्वयी ॥ ३ ॥
कश्मीरानपहाय संततहिमव्यासङ्गवैराग्यतः
प्रोन्मीलद्गुणसंपदा परिचिते यस्यास्यपङ्केरुहे ।
सान्द्रामोदतरङ्गिता भगवती वाग्देवता तस्थुषी
धारालामलभव्यकाव्यरचनाव्याजादनृत्यच्चिरम् ॥ ४ ॥
भृङ्गस्तद्धिकमले जिनशेखराहः
सूरिस्ततः प्रशमवर्धितकायष्टिः ।

जिग्ये जगत्त्रयजयप्रयतोऽपि येन
वीरव्रतं कलयता रतिजीवितेशः ॥ ५ ॥
वैराग्यं याति रागे भजति विधुरतां क्रोधयोधे विमाने
माने नष्टाभिमाने कपटपटुभटे क्षोभमाप्ते च लोभे ।
पञ्चेषौ कुञ्चितेषौ समिति निजमिति प्रेक्ष्य सैन्यं सदीन्यं
मुक्त्वा येषां जयाशां निभृतमपसृतं मोहराजेन दूरम् ॥ ६ ॥
प्रगुणितकरुणः क्षमया विराजितश्चारुविग्रहस्तदनु ।
अजनि वशीकृतविषयग्रामः पद्मेन्दुमुनिराजः ॥ ७ ॥
उत्फुल्लमल्लीप्रतिमल्लकान्तिः कीर्तिर्भ्रमन्ती भुवनेषु यस्य ।
श्रिया समं सौहृदकाङ्क्षयैव मुष्णाति विष्णोरपि कृष्णभावम् ॥ ८ ॥
विश्वत्रयप्रथितकीर्तिलतस्य तस्य
शिष्यः प्रशस्यमहिमाभयदेवसूरिः ।
काव्यं जयन्तविजयं रचयांचकार
सारस्वतप्रसृमरप्रतिभाविलासः ॥ ९ ॥
दिक्करिकुलगिरिदिनकर(१२७८)परिमितविक्रमनरेश्वरसमायाम् ।
द्वाविंशतिशतमानं शास्त्रमिदं निर्मितं जयतु ॥ १० ॥

जयन्तविजयकाव्यं परिपूर्णमिति भद्रम् ।

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY

KAVYAMÂLÂ. 76.

THE GANGÂVATARAṆA OF NÎLAKAṆṬHA DÎKSHIT.

EDITED BY

PAṆḌIT KEDÂRANÂTHA S'ÂSTRÎ,

SON OF

MAHÂMAHOPÂDHYÂYA PAṆḌIT DURGÂPRASÂDA

OF

JAIPUR

AND

VÂSUDEVA LAXMAN S'ÂSTRÎ PANAS'IKAR.

PUBLISHED BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF THE "NIRṆAYA-SÂGAR" PRESS.

Bombay:

1916.

Price 8 Annas.

OR 391 : 1
Nil Gan
57650

(All rights reserved by the publisher.)

Published by Tukaram Javaji and Printed by Ramchandra Yesu Shedge,
at the Nirnaya-sagar Press, 23, Kolbhat Lane,
BOMBAY.

काव्यमाला. ७६.

श्रीनीलकण्ठदीक्षितविरचितं

गङ्गावतरणम् ।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसादतनयपण्डित-
केदारनाथशास्त्रिणा, मुम्बापुरवासिपणशीकरोपाह्वविद्वद्वरलक्ष्मण
शर्मात्मजवासुदेवशर्मणा च संशोधितः ।

द्वितीय संस्करणम् ।

तच्च

मुम्बय्यां

तुकाराम जावजी श्रेष्ठिभिः

स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये स्वायसाक्षरैर्मुद्रयित्वा प्रकाशितः ।

शाकः १८३७, खिस्ताब्दः १९१६.

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपतेरेवाधिकारः ।)

मूल्यं ८ आणकाः ।

Px. L. 90

श्रीनीलकण्ठदीक्षितः ।

तत्समकालिका द्रविडदेशीया अन्यकवयश्च ।

जानन्ति खलु सर्वेऽपि पण्डिता दक्षिणदेशेषु श्रीमति भरद्वाजान्वये कृतावताराः श्रीमदप्पयदीक्षितेन्द्रा इति । तेषामेव दीक्षितमणीनां 'अप्पयदीक्षिताः', 'अप्पय्यदीक्षिताः', 'अप्पदीक्षिताः', इत्यपि नामान्तरद्वयं संदृश्यते ग्रन्थेषु । श्रीकण्ठमतप्रतिष्ठापनाचार्य–चतुरधिकशतप्रबन्धनिर्वाहक–महाव्रतयाजिन इति तेषां बिरुदावलिः । ते हि गतेषु ४६५४ कल्यब्देषु, तथातीतेषु १५५४ खिस्ताब्देषु, काञ्चीपुरपरिसरवर्तिनि अडयप्पलनाम्न्यग्रहारे भरद्वाजकुलोत्पन्नस्य छन्दोगस्य श्रीमदाचार्यदीक्षितस्य सूनोः श्रीविश्वजिद्याजिरङ्गराजमखिनो लब्धजन्मानो द्वासप्ततिं संवत्सरान्प्राप्य परःशतान्ग्रन्थान्निर्ममुः । सर्वतन्त्रस्वतन्त्राः श्रीमन्तो दीक्षितेन्द्राः । तत्रापि तेषामनितरसाधारणी नैपुणी पूर्वोत्तरयोर्मीमांसयोः । भक्तिश्च भगवति चन्द्रचूडे । द्राविडी (Tamil) तेषां जन्मभाषा । तेषां जन्मवत्सरादिकं सर्वमपि वृत्तान्तं विशदं व्याहरति दीक्षितचरिते शिवानन्दयोगीन्द्रः—

'वीणातत्त्व(४६५४)ङ्गसंख्यालसितकलिसमाभाक्प्रमातीचवर्षे
कन्यामासे तु कृष्णप्रथमतिथियुतेऽप्युत्तरप्रोष्ठपाद्धे ।
कन्यालग्नेऽद्रिकन्यापतिरमितदयाशेवधिर्वैदिकेषु
श्रीगौर्यै प्राग्यथाह स्म समजनि विरिञ्चीशपुर्यां कलेशः ॥' इति ।

एकादश रुद्रा इव तेषां समजनिषत तावन्तः पुत्राः । सर्वेऽपि कृतविद्या विनयोज्ज्वलाश्चावर्तिषत समीप एव तेषां निर्याणसमये । निर्याणं च श्रीमति चिदम्बरक्षेत्रे समभूत् । इयं हि तेषां चरमा सूक्तिरिति श्लोकममुं पठन्ति विद्वांसः—

'चिदम्बरमिदं पुरं प्रथितमेव पुण्यस्थलं
सुताश्च विनयोज्ज्वलाः सुकृतयश्च काश्चित्कृताः ।

---

१. 'मुनिरस्ति भरद्वाजः ख्यातस्त्रिभुवनेष्वपि ।
अन्वैर्यस्य जहौ रामोऽप्यरण्यभ्रमणश्रमम् ॥
तस्यान्वये महत्यासीत्क्षीरोद इव चन्द्रमाः ।
श्रीकण्ठचरणासक्तः श्रीमानप्पयदीक्षितः ॥
इति गङ्गावतरणकाव्ये प्रथमे सर्गे ।

'अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥'
इति तत्त्वसिद्धान्तदीपिकायाम् ।

'विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलिरस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥'
इति सिद्धान्तलेशसंग्रहे ।

वयांसि मम सप्ततेरुपरि नैव भोगे स्पृहा
न किंचिदहमर्थये शिवपदं दिदृक्षे परम् ॥' इति ।

उच्यते च शिवलीलार्णवमहाकाव्ये नीलकण्ठमखीन्द्रेण—

'कालेन शंभुः किल तावतापि कलाश्चतुःषष्टिमिताः प्रणिन्ये ।
द्वासप्ततिं प्राप्य समाः प्रबन्धाञ्छतं व्यधादप्पयदीक्षितेन्द्रः ॥'

इति १ सर्गे ६ श्लोकः ।

तैः कृताः कृतयश्चतुरधिकं शतमिति परिगण्यन्ते विज्ञैः । त इमे दीक्षितेन्द्रा वेलूर्-(Velur)आख्यनगराधीश्वरेण चिन्नवीरप्पनायकपुत्रेण लिङ्गमनायकस्य पित्रा चिन्नबोम्मभूपालेन सादरं नितरां संभाविताः संमाननामिः । वसन्तस्तस्य समीप एव तत्र नगरे बहुशोऽत्यवाहयन्स्वजीवितकालम् । उच्यते च ग्रन्थेषु—

'हेमाभिषेकसमये परितो निषण्णसौवर्णसंहतिमिषाच्चिनबोम्मभूपः ।
अप्पय्यदीक्षितमणेरनवद्यविद्याकल्पद्रुमस्य कुरुते कनकालवालम् ॥

कर्णश्रीचिन्नबोम्मक्षितिपतिरभितो लम्भयज्जातकुम्भ-
स्तोमं हेमाभिषेकप्रणयनसमये यस्य मूर्तिं प्रशस्याम् ।
रेजे श्रीरङ्गराजाध्वरिवरकलशाम्भोधिलब्धप्रसूते-
र्विद्याकल्पद्रुमस्य स्वयमिव कलयज्जातरूपालवालम् ॥'

इति समरपुंगवदीक्षितकृत-यात्राप्रबंधचम्पूकाव्ये ।

'नानादेशनरेन्द्रमण्डलमहायत्नातिदूरीभव-
त्कादाचित्कपदारविन्दविनतेरप्पय्ययज्वप्रभोः ।
शैवोत्कर्षपरिष्कृतैरहरहः सूक्तैः सुधालालितैः
फुल्लत्कर्णपुटस्य बोम्मनृपतेः पुण्यानि गण्यानि किम् ॥'

इत्यन्यत्र च ।

अनन्तरं चाराधिता दीक्षितेन्द्राः पेन्नुगोण्डाधीशेन श्रीरङ्गरायसोदरेण तिरुमलरायतनू-

---

१. असौ चिन्नबोम्मभूपालो विजयनगराधीशस्य नरसिंहवंशीयस्य सदाशिवमहारायस्य, पेन्नुगोण्डाधीशस्य कर्णाटराजस्य श्रीरङ्गमहारायस्य च, सामन्तोऽभूत् । चिन्नबोम्मभूपालस्यास्य प्रार्थनया सदाशिवमहारायेण श्रीरङ्गमहारायेण च दत्तानि सप्त दानशासनपत्राणि वेलूर्(Velur)ज्वरखण्डेश्वरदेवायतने शिलायामुत्कीर्णानि सन्ति । तानि च १४८८ (A. D. 1566) शकाब्दे, १४९७ (A. D. 1575) शकाब्दे च उत्कीर्णानि । (Vide pp. 69–75, Vol. I., South Indian Inscriptions, by Dr. E. Hultzsch.)

जेन वेङ्कटदेवेन । नियोगेन चास्याकुर्वन्कुवलयानन्दं नामार्थालंकारप्रबन्धम्—

'अमुं कुवलयानन्दमकरोदप्पदीक्षितः।
नियोगाद्वेङ्कटपतेर्निरुपाधिकृपानिधेः ॥'

इति कुवलयानन्दे ।

अनन्तरं च दीक्षितेन्द्रा अतीतेषु १५४८ शालिवाहनशकाब्देषु, यातेषु च १६२६ ख्रिस्ताब्देषु, 'अक्षय'नाम्नि संवत्सरे शैववैष्णवानां विवादं कमपि निर्णेतुं पाण्ड्यदेशाधिपतिना तिरुमलैनायकमहाराजेन बहु प्रार्थितास्तत्रागमन् । प्रतीयते चायमंशः "ओरिएण्टल् हिस्टॉरिकल् म्यान्युस्क्रिप्ट्स्'आख्यग्रन्थतोऽपि । अथ स्वदेशमागत्य कियता

---

१. वेङ्कटदेवराज्यसमयश्च १५०८ (A. D. 1586) शकाब्दादारभ्य १५३५ (A. D. 1613) शकाब्दावधीति निर्णीतम् । (Vide p. xiii, Second Report on Sanskrit Manuscripts, by Dr. E. Hultzsch.)

२. 'Oriental Historical Manuscripts' translated by W. Taylor, Vol. II, p. 149:—

"In the year S. S 1544, in Dundubhi year, the 17th of Masi month, Muthu-Tirumalai Naicker came to Madura in order to be anointed (or installed) to receive the sceptre and other ensigns of royal authority.

"Having thus arranged the plan, the whole was thus begun to be carried into execution at once on the 10th of Vaiyasi month, of Akshaya year during the increase of the moon. From that time fo rward as the master came duly to inspect the work, it was carried on with great care. As they were proceeding first in excavating the Teppakkulam they dug up from the middle a Ganapati (or image of Ganesa) and caused the same to condescend to dwell in a temple built for the purpose. As they were placing the sculptured pillar of the Vasanta-mandapam and were about to fix the one which bore the representation of Yekapada-murti they were opposed by the Vaishnavas. Hence a dispute arose between them and the Saivas, which lasted during six months and was carried on in the presence of the Sovereign. Two arbitrators were appointed, Appa Dikshitar on the part of

कालेन कालधर्मं गता दीक्षिताः । अतः सर्वथा निर्णीयते १६२६ तमाब्दात्पूर्वं न तेषां निर्याणसमय इति । शाब्दिकसार्वभौमः श्रीमान्भट्टोजिदीक्षितोऽपि तानेव गुरून्प्रार्थयमानस्तेभ्य एवाध्यैष्ट श्रीमद्भाष्यं ब्रह्मसूत्राणां श्रीमच्छंकरभगवत्पादप्रणीतम् । एवं व्याहरन्ति दाक्षिणात्या ऐतिहासिकाः—'श्रीमान्भट्टोजिदीक्षितः स्वयं विरचितान्ग्रन्थान्बहूंल्लेखकैर्लेखयित्वा प्राहिणोद्बहुभ्यः पण्डितेभ्यः । ते च दृष्ट्वा तां सरणिमतिमञ्जुलां नूत्नां चापाठयंस्तामेव शिष्यान् । अथ बहुना कालेन स एव दक्षिणां दिशं प्रपेदे सह शिष्यैः । तदा किल ददर्श क्वचिन्निकटे चिदम्बरस्य वसतः श्रीमदप्पयदीक्षितेन्द्रान् तत्र च सति प्रसङ्गे तानसावधिजग्मिवानखिलशास्त्रवेदनचणानधिगतवेदान्तरहस्यान् । तेषामेव मुखात्प्रयतः शुश्राव कौमारिलं तन्त्रम्, श्रीमद्भगवत्पादशंकरमुनिप्रणीतं ब्रह्मसूत्रभाष्यं च ततः कुर्वन्गुरवे दक्षिणां ग्रन्थान्ते चोदितः स्वयं गुरुणा पूर्वोत्तरमीमांसयोः कर्तुमेकैकं ग्रन्थम् । प्राणैषीदसौ 'तन्त्रसिद्धान्तदीपिकाम्', 'श्रीमत्तत्वकौस्तुभं' च । तन्त्रसिद्धान्तदीपिकायां श्रीमदप्पयदीक्षितेन्द्रानात्मनो गुरून्व्याहरति श्रीभट्टोजिदीक्षितः । यथा—

'अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥' इति ।

तत्त्वकौस्तुभे च द्वितीयपरिच्छेदोपक्रमे 'प्रायशो विदुषां मुदे' इति चायमंशः सूचित इति । तथा ततः परं श्रीमति व्याकरणेऽपि ग्रन्थकरणं प्रार्थितैर्दीक्षितचरणैर्विरचिता श्रीमति नक्षत्रवादावली । यत्र च प्रतिद्वन्द्वितया 'अधुना पाणिनितन्त्रे विदुषां प्रीत्यै विरच्यन्ते' इति स्पष्टं तस्य ग्रन्थस्य विद्वत्प्रीतिहेतुत्वं विशिष्योक्तमिति च । औत्तराहास्तु—गङ्गायात्रार्थमुदीचीं गतैः श्रीमदप्पयदीक्षितैःसह समागमः श्रीभट्टोजिदीक्षितस्येत्यामनन्ति। सत्यं गङ्गायात्रामकुर्वञ्छ्रीमदप्पययज्वानः । उच्यते च 'गङ्गावतरण'काव्ये श्रीनीलकण्ठमखीन्द्रेण—'गङ्गायां यः पुरा स्नातो देवश्चन्द्रार्धशेखरः । गाङ्गेयेन पुनः सस्नौ सोऽवतीर्य यदात्मना ॥' इति प्रथमसर्गे श्रीमदप्पयदीक्षितप्रशंसायाम् । सर्वथा श्रीमदप्पदीक्षितानां न्यूनवयाः समकालिकश्च श्रीमान्भट्टोजिदीक्षित इति सिद्धम् ।

---

the Saivas, and Ayya Dikshitar Ayyan on the part of the Vaishnavas: these then consulted Sanskrit authorities and made the Shastras agree; after which the pillar of Yekapada-murti was fixed in its place".

१. लघुसिद्धान्तकौमुद्या मध्यसिद्धान्तकौमुद्याश्च प्रणेता वरदराजोऽस्यैव भट्टोजिदीक्षितस्य शिष्यः—

'नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम् ।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम् ॥

श्रीमदप्पयदीक्षितस्य समानकालिकाः कवयः पण्डिताश्च—

(१) सुप्रसिद्धः श्रीमान्रत्नखेटदीक्षितः, (२) आलंकारिकचूडामणिर्महाकविर्जगन्नाथपण्डितः,(३) वैयाकरणसार्वभौमः श्रीमान्भट्टोजिदीक्षितः,(४)अद्वैतविद्याचार्यश्चोलभूवल्लभस्याच्युतनायकस्य तत्तनयस्य रघुनाथभूपालस्य च मन्त्री विश्वविश्रुतौदार्यो गोविन्ददीक्षितश्च।

रत्नखेटदीक्षितस्य श्रीनिवासदीक्षित इत्येव स्वपित्रा कृतं नाम । तस्य रत्नखेटश्रीनिवासदीक्षित इत्यपि भूयान्व्यवहारः । तस्य संध्यावर्णनचातुर्यात्प्रमुदितेन राज्ञा कृतं नाम रत्नखेटाध्वरीति । उच्यते चैवं तस्य पुत्रेण राजचूडामणिदीक्षितेन प्रणीतस्य रुक्मिणीपरिणयमहाकाव्यस्य व्याख्यानारम्भे व्याख्यात्रा बालयज्ञवेदेश्वरेण—

'संध्यासंधुक्षिताम्भोधरनलिकगणादुद्गतान्सीसखण्डां-
स्ताराकाराञ्शिरोद्धुं शशिरविकपटाद्बिभ्रतो रत्नखेटौ ।
अन्योन्यं युध्यमानावुदयचरमभूभृत्प्रवीराविति द्रा-
गुक्त्या ख्यातापराख्यः क्षितिपतिवचसा रत्नखेटाध्वरीति ॥'

श्रीमतो रत्नखेटदीक्षितस्य कृतयः—(१) शितिकण्ठविजयकाव्यम्, (२) भावनापुरुषोत्तमनाटकम्,(३)अद्वैतास्रवकौस्तुभम्,(४) वादतारावली,(५) मध्वध्वंसनम्,(६)बौद्धतन्त्रमथनम्, (७)वेदान्तवादावली, (८) मणिदर्पणम्,(९) समयसर्वस्वम्, (१०)विधिनिर्णयम्, (११) रत्नप्रदीपम्। अन्ये च सन्ति बहवस्तत्प्रणीताः प्रबन्धाः । उच्यन्ते च तत्कृतप्रबन्धानां नामानि पूर्वोक्तव्याख्याने । यथा—

'अद्वैतास्रवकौस्तुभं व्यरचयद्यो वादतारावलीं
मध्वध्वंसनबौद्धतन्त्रमथने वेदान्तवादावलीम् ।
प्रख्यातं मणिदर्पणं समयसर्वस्वं विधेर्निर्णयं
तत्त्वानां परिशुद्धिबोधविमलं रत्नप्रदीपं स्मृतेः ॥ १४ ॥

विद्याविशेषमणिजालखनेर्गुरुश्रीभट्टोजिदीक्षितमुखाम्बुनिधेर्गृहीत्वा ।
सिद्धान्तमध्यमवनौ प्रकटीकरोति कश्चिद्धनी वरदराज इति प्रसिद्धः ॥'

इति तञ्जोर्राजकीयपुस्तकालयस्थ-लघुसिद्धान्तकौमुदीप्रारम्भे ।

'नत्वा वरदराजः श्रीगुरून्भट्टोजिदीक्षितान् ।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम् ॥'

अन्ते च—

'एषा वरदराजेन बालानामुपकारिका ।
अकारि पाणिनीयानां मध्यसिद्धान्तकौमुदी ॥
कृतिर्वरदराजस्य मध्यसिद्धान्तकौमुदी ।
तस्याः संख्या तु विज्ञेया खबाणकरवह्निभिः ॥

इति श्रीरविटिकंटिकंटिवरदराजभट्टकृत-मध्यसिद्धान्तकौमुदी ॥'

इति तञ्जोर्राजकीयपुस्तकालयस्थ-मध्यसिद्धान्तकौमुद्याम् ।

यो भावनापुरुषवर्यमुखान्यकार्षीदष्टादशापि च दशाद्भुतरूपकाणि ।
भावोत्तराणि शतकण्ठजयादिमानि काव्यानि षष्टिमतनोदमृतायितानि ॥ १५ ॥
ध्वन्यध्वन्यमनोविनोदनिपुणाः साहित्यसंजीविनी-
भावोद्भेदरसास्रवादिकृतयः पारेशतं यत्कृताः ।
अन्ये क्षौद्ररसार्द्रसुन्दरगिरः क्षुद्रप्रबन्धाः शतं
छन्दोज्यौतिषमन्त्रतन्त्रविषया भाषाप्रबन्धास्तथा ॥ १६ ॥
अन्याश्च यस्य कृतयो निखिलागमान्तसिद्धान्तितान्तरनिरन्तरसूक्तिगुम्फाः ।
षड्दर्शनीसकलमर्मविवेककर्मकर्मक्षमाः सुकृतिनां मुदमावहन्ति ॥ १७ ॥'[1]

रत्नखेटदीक्षितस्य परम्परा यथा—

श्रीभवस्वामी (भाष्यकारः)
|
श्रीकृष्णार्यः (आह्निकप्रणेता)
|
कुमारभवस्वामी (अद्वैतचिन्तामणिकारः)
|
श्रीकृष्णार्यः
|
श्रीभवस्वामिभट्टः
|
श्रीरत्नखेटश्रीनिवासाध्वरी

तथा चोच्यते रुक्मिणीपरिणयकाव्यस्य व्याख्यानारम्भे—

'यः षष्ठो भाष्यकर्तुः क्रतुवरमहितश्रीभवस्वामियष्टुः
श्रीकृष्णार्यस्य दैनंदिनकृतिकृतिनः सोमपः पञ्चमो यः ।
नप्ता योऽद्वैतचिन्तामणिविरचयितुः पौण्डरीकादियष्टुः
सर्वज्ञातुः कुमाराह्वयमिलितभवस्वामियज्वाभिधस्य ॥ ५ ॥
श्रीकृष्णार्यस्य पौत्रः प्रतिदिवसमविश्रान्तमन्नप्रदातु-
र्ज्योतिष्टोमादियष्टुर्विविधकृतिकृतः सर्वविद्याधिकस्य ।
यः श्रीवैकुण्ठघण्टामणिरिति महितश्रीभवस्वामिभट्ट-
स्याद्वैतज्ञातधूताखिलकलुषगणस्यात्मजः स्वात्मवेत्तुः ॥ ६ ॥'

यदुच्यते श्रीमदप्पयदीक्षितकृत 'सिद्धान्तलेशसंग्रह' ग्रन्थस्य प्रारम्भे दीक्षितवृत्तान्तलेखनप्रवृत्तैर्भट्टश्रीनारायणशास्त्रिभिः 'अस्य (अप्पयदीक्षितस्य) समकालिकाः कवयः पण्डिताश्च विलिख्यन्ते' इत्यारभ्य 'आनन्दरायमखी विद्यापरिणय–जीवानन्दादिप्रणेतास्य मान्यतमो वृद्धः' इति, तत्प्रमादकृतम् । अयमानन्दरायमखी भोसलवंशभूपतिकुलामात्यस्य

---

१. 'श्रीमद्भोसलवंशभूपतिकुलामात्येषु विख्यातिमा-
न्भारद्वाजकुलार्णवेन्दुरुदभूद्वावाजिरग्न्याहितः ।

बावाजिनाम्नो नप्ता, तञ्जनगराधीशस्यैकोजिमहाराजस्य मन्त्रिणो गङ्गाधराध्वरिणःपौत्रः, तस्यैव राज्ञो मन्त्रिणस्त्रिपुरविजयचम्पूप्रबन्धस्य निर्मातुर्नृसिंहरायमखिनस्तनूजः, स्त्रीधर्मादिग्रन्थकृतरुग्यम्बकरायमखिनस्तद्वैमात्रेयस्य मुकुन्दविलासकाव्य-राघवाभ्युदयनाटकादीनां प्रणेतुर्भगवन्तरायस्य च भ्रातृव्यः, शहजि-शरभोजि-तुक्कोजिमहीपालानां मन्त्री च। स्वयं विद्यापरिणय–जीवानन्दादिनाटकप्रणेता, आश्वलायनगृह्यसूत्रव्याख्याता च। तेषां राज्ञां राज्यारम्भकालोऽधस्तात्संदर्श्यते—

एकोजिराजस्य	१६७६	ख्रिस्ताब्दाः।
शहजिराजस्य	१६८४	,,
शरभोजिराजस्य	१७११	,,
तुक्कोजिराजस्य	१७२९	,,

तुक्कोजिमहाराजः १७३६ वत्सरावधि सप्तसंवत्सरान्राज्यमकरोत्। असावानन्दरायमखी स्वपितृव्यकृतमखानुष्ठानसमये धातृवर्षे (१६९८ ख्रिस्ताब्दे) अनतीतकौमारोऽभूत्—

पुत्रस्य किलैकभूपतिमणेर्मन्त्री सदैवादृत-
स्तेनासीद्गुरुवत्प्रगल्भधिषणो गङ्गाधराख्योऽध्वरी ॥
तस्य द्वौ तनयावुदारचरितौ कृष्णाम्बिकागर्भजा-
वेकक्ष्मापतिलालितौ गुरुपदे चारोप्य संमानितौ।
तत्पुत्रेण च शाहजिक्षितिभृता ज्येष्ठानुवृत्त्यादृतौ
तत्तादग्विविधाग्रहारकरणाद्विद्वत्प्रतिष्ठापकौ ॥
ज्येष्ठस्तत्र सदावदातचरितः श्रीमान्नृसिंहाध्वरी
गायत्रीसमुपासनादिभिरपि श्रौतैश्च सत्कर्मभिः।
आत्मानं परिपूर्य तं सुचरितैः पुत्रैः प्रतिष्ठाप्य च
त्रेधा ब्रह्महिताय सत्कृतिचितान्स ब्रह्मलोकानगात् ॥
तस्यात्मत्रितयेऽग्रजस्तु धृतिमानानन्दरायाध्वरी
कौमारात्प्रभृति प्रगल्भधिषणः श्रीशाहराजादृतः।
इष्टापूर्तसदन्नदानसुहितत्रैविद्यवृद्धैः सह
श्रुत्युक्तार्थपरिष्क्रियापटुमतिः सत्कर्मनिष्णातधीः ॥

*　　*　　*　　*　　*

ज्येष्ठे तत्र नृसिंहयज्वनि दिवं यातेऽनुजस्तत्सुता-
न्पश्यन्पुत्रवदग्रजापचितिमप्यानन्दराये दधत्।
वैतानानि च कारयन्सुचरितान्येतैः स्वपुत्रेण च
श्रीमानत्र महाग्निचिद्विजयते श्रीत्र्यम्बकार्योऽध्वरी ॥'

इति ढुण्ढिव्यासरायययज्वकृते मुद्राराक्षसव्याख्याने।

'धातृवर्षे यदा यज्ञसेवार्थमहमागतः ।
श्रीमहाराजराजस्य मन्त्रिणस्त्र्यम्बकप्रभोः ॥
महाराजस्तु मां प्रीत्या स्वसभायामवासयत् ।
भारतश्रवणार्थाय रात्रिंदिवमुदारधीः ॥
यदा मासत्रयादूर्ध्वं प्राप्यानुज्ञां महीपतेः ।
गन्तुमिच्छामि च तदा धर्मशास्त्रनिबन्धने ॥
महाराजेन चाज्ञातो गौरीमायूरमागतः ।
तस्मिन्वर्षे वृश्चिकार्के धर्मशास्त्रसुधानिधेः ॥
एकेनैव मया पुत्रयुक्तेन शनकैः कृते ।
बुद्धिदण्डेन मथने रात्रिंदिवमनेकधा ॥
अष्टभिर्लब्धवानस्मि वत्सरैस्तत्फलं महत् ।
आचारनवनीतं तन्मृदु सर्वमनोहरम् ॥
महाराजस्य दयया तत्संग्राह्यमभूद्भुवि ।
समाप्तं पञ्चदशभिः सहस्रैर्ग्रन्थसंख्यया ॥
प्रचारोऽस्य महाराजाधीन एव हि सर्वथा ।
अहमप्पाध्वरी नाम्ना महाराजेन सादरम् ॥
दत्तां महीं समादाय.....दिसंभृतैः ।
धान्यैः परम्परासिद्धे ग्रामे कृष्या समार्जितैः ॥
कुर्वन्कुटुम्बभरणं पुत्रपौत्रैः समावृतः ।
श्रेयः प्रार्थयमानः सन्महाराजस्य संततम् ॥
आयुःशेषं सुखं वस्तुमिच्छाम्यग्निक्रियान्तिके ।
मनोरथो महानेष महाराजेन पूर्यताम् ॥
एकक्ष्मापतिपूर्वपुण्यसुकृतोत्कर्षेण लब्धोदयो
दीपाम्बोदरवासभाग्यमहिमप्रख्यातपुण्योच्चयः ।
श्रीशाहक्षितिराट् प्रशास्तु वसुधामाचन्द्रमप्पाध्वरी
यद्दत्तान्नबलेन धर्मविषयं शास्त्रं समग्रन्थयत् ॥'

इत्यप्पादीक्षितविरचित आचारनवनीते ।

सूत्रधारः—अद्य भारद्वाजकुलजलधिकौस्तुभेन त्र्यम्बकरायमखिना समारब्धस्य क्रतोर्दिदृक्षयागतेन नानादिगन्तवासिना विद्वज्जनसभाजनेन सबहुमानमाहूय समादिष्टोऽस्मि ।

पारिपार्श्विकः—वैदेशिकोऽस्मीति पृच्छामि कः पुनरयं त्र्यम्बकमखी नाम ।

सूत्रधारः—किं न जानासि निजगुणगणकुसुमसुरभीकृतदिगन्तमेतमपि । तथा हि ।

कुर्वाणः सकलान्यदीयधिषणामालम्ब्य राज्यक्रमा-
नालोक्यानुदिनं निजामुपचितामामोदमानः श्रियम् ।
नित्यं भोसलवंशवारिधिविधुः शाहावनीवासवो
यस्मिन्नेव गुणोज्ज्वले कलयते वाचस्पतेर्गौरवम् ॥

अपि च ।

यस्यैवाचारगाम्भीर्यशौर्यौदार्यादिभिर्गुणैः ।
वसिष्ठवार्धिविजयकर्णाद्याः पुनरुक्तयः ॥

अन्यच्च ।

नियन्त्रितात्मा निगमान्तविद्यामधीत्य धीमानमलप्रसूतिः ।
ध्यायन्नसौ ब्रह्म निजात्मरूपं तदात्मना भावयति प्रपञ्चम् ॥

पारिपार्श्विकः—(सप्रत्यभिज्ञम् ।)

एकक्ष्माधिपतेरिदंविधगुणः साचिव्यधुर्यः श्रुतः
प्राज्ञः कश्चिदजातशत्रुसदृशो गङ्गाधरार्याभिधः ।
तैस्तैर्येन निजैरनन्यसुलभैरावर्ज्यमानो गुणै-
राचार्यप्रतिपत्तिमेव कलयन्नासीदमुष्मिन्नृपः ॥

सूत्रधारः—दिष्ट्या जानासि तं महाभागम् । तर्हि तस्यात्मसंभवं नृसिंहरायमखीति सुगृहीतनामधेयं महानुभावमपि भवान्जानीयात् ।

पारिपार्श्विकः—बाढं जाने । यस्य किल

कृतः पित्रा बाल्ये निरुपमगुणाढ्यो निजपदे
निजैरेकक्षोणीपतिहृदयमाराध्य चरितैः ।
तदेवायं भूत्वा चरति नियतं मूर्तिमदिति
प्रपञ्चे विख्यातिस्तदितरदुरापा विजयते ॥

सूत्रधारः—तस्यैवायमनुजन्मा ।

पारिपार्श्विकः—ननु तदनुजत्वमेव पर्याप्तं प्रख्यात्यै ।

सूत्रधारः—सत्यमुक्तं भवता ।

पारिपार्श्विकः—संप्रति यज्ञवाटं प्रविष्टोऽहं शालान्तरप्रविष्टमनतीतकौमारमन्यं कमपि यजमानमद्राक्षम् । तं पुनर्न जानामि ।

सूत्रधारः—कथं न जानासि ।

साचिव्यधुर्यो विहितः पितृव्येणादृत्य शाहक्षितिपालमौलेः ।
आनन्दनामा विमलप्रसूतिः पुत्रो नृसिंहाध्वरिणः स एषः ॥

पारिपार्श्विकः—भाव, कीदृशः परिषदादेशः ।

सूत्रधारः—तस्यैव त्र्यम्बकरायमखिनः समनन्तरानुजेन भगवन्तरायनामधेयेन सत्कविसार्वभौमेन संप्रति प्रणीतं राघवाभ्युदयं नाम नाटकमभिनेतव्यमिति ।'

इति राघवाभ्युदयनाटके ।

अतोऽयमानन्दरायमखी श्रीमदप्पयदीक्षितानां स्वर्गारोहणकाले १६२६ ख्रिस्ताब्दे जातमात्रोऽपि नाभूदिति स्पष्टम्। एवं स्थिते कथमस्य संभाव्यते दीक्षितैः सह समकालिकता, कथमस्य प्रसज्येत दीक्षितैरपि माननीयता वा।

अपरं च। तस्मिन्नेव दीक्षितवृत्तान्तप्रकरणे 'दीक्षितानां समानकालिको न्यूनवया राजचूडामणिदीक्षितो भावनापुरुषोत्तमनाटककृत्' इति भट्टश्रीनारायणशास्त्रिणो वदन्ति। प्रसज्येत दीक्षितैः सह समकालिकत्वं तदपेक्षया न्यूनवयस्त्वं च श्रीमतो राजचूडामणिदीक्षितस्य। परं तु न्यूनवयसा राजचूडामणिदीक्षितेन कृतं भावनापुरुषोत्तमं स्वमते दीक्षितानामपि मान्यतमो वृद्ध आनन्दरायमखी विद्यापरिणयनाटके कथं चिरादेव निर्वर्तितं व्याहरतीति शास्त्रिणां चिन्तालवोऽपि चेतःपदवीं नारूढ इव। एवमस्ति किल प्रस्तावनायां विद्यापरिणयनाटकस्य—

'पारिपार्श्विकः—भाव, कृष्णमिश्रप्रसूतिभिरत्र प्रबोधचन्द्रोदय इति, संकल्पसूर्योदय इति, भावनापुरुषोत्तम इति च न्यबन्धि नाम बहुधा प्राचीनैः। किमनेनाभिनवसंरम्भेण।' इति।

अत्रोपरितनवाक्यादानन्दरायमखिनः प्राचीनो भावनापुरुषोत्तमकृदिति सिद्धम्। वस्तुतो भावनापुरुषोत्तमनाटकस्य प्रबन्द्धा न राजचूडामणिदीक्षितः, किंतु तस्य पिता तोण्डीरमण्डलान्तर्वर्तिशूरसमुद्राग्रहारवास्तव्यः कृष्णभट्टारकपौत्रः, भवस्वामिनो लक्ष्म्याश्च पुत्रः, रत्नखेटश्रीनिवासदीक्षित इति सुप्रसिद्धः कविरिति तस्मादेव ग्रन्थतः स्पष्टीभवति। तथा च भावनापुरुषोत्तमनाटके—

'नटी—ईरिसप्पबन्धणिव्वाहइत्तओ को वा कई भवे।

सूत्रधारः—अये, किमेतमपि न जानासि। अस्ति खलु कश्चित्तोण्डीरेषु श्रीशूरसमुद्राभिधानो महानग्रहारः।

तत्रास्ति कश्चित्तरुणाग्निहोत्री षड्दर्शनीसागरपारदृश्वा।
शतावधानीत्यपराभिधानः श्रीश्रीनिवासाध्वरिसार्वभौमः॥

नटी—केण वा ण जाणीअदि सो।

सूत्रधारः—स एव विश्वामित्रवंशमुक्तामणिः श्रीकृष्णभट्टारकपौत्रः श्रीभवस्वामिभट्टसूनुर्लक्ष्मीगर्भसंभवः श्रीकविवादिगजकेसरी भट्टाचार्यः प्रतिदिनप्रबन्धकर्ता तत्तादृशसकलविद्याचमत्कृतवादव्याख्यानोपन्यासकौशलेन चोलभूवल्लभेनास्थानीरचितपत्रावलम्बः षड्भाषासार्वभौमः सर्वतन्त्रस्वतन्त्रः श्रीमदभिनवभवभूतिः श्रीरत्नखेटश्रीनिवासाध्वरीन्द्रोऽत्र प्रबन्द्धा।' इति।

एवं यदुच्यते भट्टश्रीनारायणशास्त्रिभिश्चिन्नबोम्मनायको विजयनगराधीश इति, तस्य पिता कृष्णराज इति, ज्येष्ठो भ्राता नरसिंह इति. तत्सर्वं भ्रमप्रयुक्तमश्रद्धेयमविचाररमणीयं च।

तत्तादृशनिरतिशयमहिम्नां श्रीमदप्पयदीक्षितानां यवीयसो भ्रातुराचादीक्षितस्य पौत्रः

सुप्रसिद्धः श्रीमान्नीलकण्ठमखीन्द्रः । अस्य नारायणाध्वरी पिता । माता चास्य भूमिदेवी । अयं तयोर्द्वितीयो नन्दनः । भ्रातरश्चास्य चत्वारः समभूवन् । सर्वेऽपि ते सुशिक्षिताः सर्वास्वपि विद्यासु कवयश्च । परमेक एव तेषु नाम्ना ज्ञायते कुशकुमुद्वतीयनाटकस्य प्रबन्धा अतिरात्रयज्वा । श्रीनीलकण्ठमखीन्द्रस्य जीवनकालः सप्तदशशतकपूर्वभाग इति सष्टमुपलभ्यते तदीयनीलकण्ठविजयचम्पूकाव्यतः । यतः प्राबभ्रात्कविस्तं प्रबन्धमतीतेषु ४७३८ कल्यब्देषु । उच्यते च कविना स्वेनैव तत्र ग्रन्थे—

'अष्टत्रिंशदुपस्कृतसप्तशताधिकचतुःसहस्रेषु ।
कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम् ॥' इति ।

शिवलीलार्णवमहाकाव्यस्य नवमसर्गे गङ्गारोधसि हिमवत्प्रान्ते देव्यास्तटातकायाः सेनानिवेशमुक्त्वा तत्प्रदेशवर्णनप्रवृत्तस्यास्य मुखात् 'अस्मादृशाः क्षितिसुराः पुनराहरन्त भागीरथीतटरुहाणि कुशाङ्कुराणि ।' इत्ययत्नपूर्वकं निःसरन्त्या वाण्या प्रथमवर्णजत्वं शिष्टाचारसंपन्नत्वं चास्य सम्यङ्निरूप्यते । श्रीकण्ठमतसर्वस्ववेदी चायम् । अस्य दृढोऽभिनिवेशः श्रीमति शैवसिद्धान्त इति प्रतिभासते । स्वयमाह च—'शैवा वयमा चतुर्वदनात्' इति वैराग्यशतके, 'आ गर्भादा कुलपरिवृढादा चतुर्वक्त्रतोऽपि त्वत्पादाब्जप्रपदनपरान्वेत्सि नश्चन्द्रमौले' इत्यदसीयशान्तिविलासे च । एवमन्यत्रापि । यथा नीलकण्ठदीक्षितस्य महती प्रथा, न तथा श्रीमदप्पयदीक्षितेन्द्रतनुभुवामपि । नान्यः कोऽपि तदानींतनेषु तदधिकस्तत्सदृशो वा दर्शनेषु साहित्ये वा । अयमेव श्रेष्ठः कवीनामस्य समकालिकानाम् । मञ्जुलपदसंनिवेशा विचित्रोल्लेखा रसनिर्भरा विशङ्कटप्रवाहा चास्य साहित्यसरणिः । नैव क्लिश्नाति स्वचेतः परचेतांसि वा केवलशब्दचित्रेषु यमकेषु वा । 'नीलकण्ठमखिनां सदसि सकृत्प्रविष्टस्यापि समुज्जृम्भते सरसपदसंदर्भवैदग्धी' इत्युद्घोषयति 'प्रत्यग्रपतञ्जलिरभिनवप्राचेतसः' श्रीरामभद्रमखीन्द्रः शृङ्गारतिलकभाणे । अस्य साहित्यवैदग्धी सर्वत्र प्रद्योततेऽस्य लघुकाव्येषु महाकाव्येषु च । अस्य लघुकाव्यानि—(१) कलिविडम्बनम्, (२) सभारञ्जनम्, (३) अन्यापदेशशतकम्, (४) शान्तिविलासः, (५) वैराग्यशतकम्, (६) आनन्दसागरस्तवः । एते नीलकण्ठदीक्षितस्य षड् ग्रन्था इति व्यपदिश्यन्ते । अस्य महाकाव्येषु श्रेष्ठं शिवलीलार्णवमहाकाव्यं द्वाविंशतिसर्गपरिमितम् । द्वितीयं च गङ्गावतरणकाव्यमष्टसर्गपरिमितम् । श्रीमदप्पयदीक्षितानां स्वर्गारोहणतः परं द्वादशसंवत्सरेषूतवाधिकेषु गतेषु श्रीनीलकण्ठविजयाभिधश्चम्पूप्रबन्धो निरमायि । नीलकण्ठविजय इव नान्यत्र तस्य ग्रन्थेषु ग्रन्थनिर्माणकालः प्रोच्यते । ग्रन्थानां पौर्वापर्यं केनापि प्रकारेण स्फुटं न परिस्फुरति । परंतु सुगमं श्रीमदप्पयदीक्षितानां स्वर्गारोहणानन्तरमेव सर्वेषामपि करणमिति । केचिद्वादशहायनेन कविना नीलकण्ठविजयो निर्वर्तित इत्याचक्षते । तन्न श्रद्धेयं प्रमाणाभावात् । श्रूयते अन्या अपि सन्ति बह्व्यस्तदीयाः कृतयः काव्येषु दर्शनेष्वपीति । तासु च (१) नलचरितनाटकम्, (२) कैय्यटव्याख्यानम्, (३) शिवतत्त्वरहस्यम्, इत्येता एवाद्य नामतो ज्ञायन्ते । गृह्यन्ते च तासां नामानि कुशकुमुद्वतीयनाटके,

तस्य तृतीयनन्दनेन गीर्वाणेन्द्रेण कृते शृङ्गारकोशभाणे च । यथा—'एष खलु द्वितीय-शंकररूपाणामप्पयदीक्षितानां नप्ता नलचरित्रनाटकप्रबन्धा' इति कुशकुमुद्वतीयनाटके, 'कैय्यटव्याख्यानशिवतत्त्वरहस्याद्यनेकप्रबन्धनिर्मातुः * * पवित्रकीर्तेर्नीलकण्ठमखिनः' इति पूर्वोक्ते च भाणे समुपलभ्यते । श्रीनीलकण्ठमखीन्द्रो मधुरानगर्यां तिरुमलैनायक-महाराजस्य सदसि पण्डितसार्वभौमोऽमात्यप्रवरश्चाभूत् । तत्पुत्रा अपि तामेव पश्चादध्य-वात्सुरित्ययमंशः सूच्यते गीर्वाणेन्द्रेणापि 'शृङ्गारकोशो नाम भाण इत्यधुनैव खलु निवेदितं मधुरापुरादागतेन रङ्गकेतुना' इति वाक्येन । श्रीनीलकण्ठदीक्षितस्य अय्यादीक्षित इति चाभून्नामान्तरम् । तथा च तमद्यापि व्यवहरन्ति विज्ञाः । अत्र च तज्जनगरे वेदमूर्ति-जम्बुनाथभट्टानां सरस्वतीभाण्डागारे समधिगम्यते नीलकण्ठविजयचम्पूप्रबन्धस्य प्राचीनं कोशद्वयम् । तत्र कोशद्वयेऽप्यवसानयोर्लिखितं संदृश्यते—'समाप्तं चेदमय्यादीक्षितवि-रचितं चम्पूकाव्यम् ॥' इति नीलकण्ठमखीन्द्रस्य तथा नामान्तरेणाप्याकारणं न विना-कारणम् । विदितमेव हि सर्वेषामस्माकमस्मद्दे शीयाः प्रायशो बिभ्रति पितामहानां नाम । तच्च किंचिद्विकृतमेव कीर्तयन्ति मातरः श्वशुराणां साक्षान्नामग्रहणमनुचितमिति । अत एवं नामपरम्परा आसन् श्रीमदप्पयदीक्षितानां वंशे । यथा—आचार्यदीक्षितः, आचार्य-दीक्षितपौत्र आचादीक्षितः (आचार्यदीक्षितः), तत्पौत्र अय्यादीक्षितः (आचादीक्षितः), इति । श्रीनीलकण्ठमखीन्द्रस्याशयमनुरुन्धान एव सर्वमपि हालास्यनाथस्योत्सवं निरवर्त-यत्तिरुमलैनायकमहाराजः । नीलकण्ठमखीन्द्रोऽपि निर्लोड्य शास्त्राणि यथादृष्टं तेषु कारया-मास सर्वमप्युत्सवादिकम् । ततः सर्वा अपि लीला भगवतो हालास्यनाथस्य काव्या-त्मना निर्ममे कविः । तदेव प्रथते शिवलीलार्णवमहाकाव्यनाम्ना—

'यः संरम्भः कृतिविरचने दुष्कवीनामभेद्यो
यच्चैकाग्र्यं तदुचितपदान्वेषणे चित्तवृत्तेः ।
लभ्यं तच्चेदपि कवयतामन्ततस्त्रीण्यहानि
स्यादेवं किं सरसकविताराज्यदुर्भिक्षयोगः ॥'

---

१. W. Taylor's Oriental Historical Manuscripts, Vol. II., p. 153:—

"In Tai Month of Srimuga year (i. e. S. S. 1548) a mandapam in the Teppa-Kulam * * was completed. Besides agreeably to the declaration of Ayyâ Dikshitar, a brahmin versed in ancient language the King commanded that the celebration of all the sacred amusements of the God should be conductd by the temple attendants according to the ordinances of the ancient books."

अनेन नीलकण्ठविजयस्थेन श्लोकेन स्वस्य सदापि कार्यबाहुल्यमासञ्जितमिति व्यञ्जयति कविः । तच्च कार्यं राज्यनिर्वाहरूपमित्यनुमीयते ।

श्रीनीलकण्ठमखीन्द्र आत्मानं वार्तिकाभरणस्य प्रणेतुर्वेङ्कटेश्वरमखिनः शिष्यं व्याहरति गङ्गावतरणकाव्ये कथावतारसर्गे । यथा—'वार्तिकाभरणग्रन्थनिर्माणव्यक्तनैपुणः । श्रीवेङ्कटेश्वरमखी शिष्ये मय्यनुकम्पते ॥' इति । अयं साग्निचित्यासवाजपेययाजी वासिष्ठवंशोद्भवः श्रीवेङ्कटेश्वरमखी । श्रीवेङ्कटेश्वरमखिनः पिता श्रीमानद्वैतविद्याचार्यः साग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्यासवाजपेययाजी गोविन्ददीक्षितः । यः कौमारिलदर्शनस्य विश्रुतां व्याख्यां रचयामास । यं तञ्जपुराधिनाथो रघुनाथः स्वार्धासनदानेन सभाजयति स्म । येन स्वकृतसर्वतोमुखमहासत्रे निखानेताश्चिरावस्थितेर्युक्तरूपाः शिलायूपाः कावेरीतीरेषु । यस्य वाजपेयेन यजतः स्वयं जग्राह श्वेतच्छत्रं स्वपित्रा नियुक्तो युवराजो रघुनाथभूपालः । प्रतीयतेऽमुना गोविन्दमखीन्द्रेण कृतमासीत्षड्दर्शनीसारभूतं प्रशस्यं किमपि ग्रन्थान्तरमिति वक्ष्यमाणपद्याभ्याम्—

'अद्वैतविद्याविभवावलम्बान्गोविन्दयज्वेन्द्रगुरूनुपासे ।
निर्मथ्य षड्दर्शननीरधीन्ये धियैव सारं ददते बुधेभ्यः ॥'

इति यज्ञनारायणदीक्षितविरचिते साहित्यरत्नाकरे ।

---

१. (१) राघवानन्द–नीलापरिणय–सभापतिविलासादिनाटकानां प्रबन्द्धा वेङ्कटेश्वरोऽन्य एव । स निङ्गुवकाश्यपान्ववायजो धर्मराजमनीषिणस्तनूजो वैद्यनाथसूरिणः पौत्रः, 'मणलूर्'पुरवास्तव्यश्च ।

(२) चित्रबन्धरामायणाख्यकाव्यस्य कर्ता वेङ्कटेश्वरस्त्वपरस्तृतीयः । तस्य परम्परा यथा—



'षड्दर्शनाभिनवदुग्धसरित्पूरिण्यो निर्मथ्य यत्नरहितं निजया धियैव ।
विश्राणयन्ननुदिनं विबुधावलीनामेतद्रसं मुरारिपुं भुवि योऽतिशेते ॥'
इति रघुनाथविलासनाटके ।

उच्यते च—असौ गोविन्दमखीन्द्रो रघुनाथभूमिपालस्य पित्राच्युतभूपालेनापि नितरां मानितस्तस्य मन्त्री च बभूवेति । तत्र पुरातनं श्लोकममुं पठन्ति पुराविदः पण्डितजनाः—

'त्रिनामाद्यन्तनामानौ महीक्षिद्दीक्षितावुभौ ।
शस्त्रे शास्त्रे च निपुणावाहवेषु हवेषु च ॥'

श्लोकस्यास्य पूर्वार्धेनाच्युतभूमिपालगोविन्ददीक्षितावुच्येते । अच्युतानन्तगोविन्देति त्रिनामानि । अच्युतानन्तगोविन्देति नामसमुदायस्यैव त्रिनामसंज्ञा सुप्रसिद्धा । अयं गोविन्ददीक्षितो महाराजतः स्वयं प्रतिगृह्य बहूनग्रहारान्ब्राह्मणेभ्यो ददौ । मध्यार्जुने मायूरे कुम्भघोणे पञ्चनदेऽन्यत्र च स्थलेषु कावेर्याः पारेषु स्नानघट्टान्पुष्पमण्डपानि च रचयामास यान्यद्यापि संदृश्यन्ते सुदृढानि किं तु क्वचित्क्वचिज्जीर्णानि, न पुनरिदानींतनेन केनापि धर्मबुद्धिना समुद्धृतानि । कदाचिदयं गोविन्ददीक्षितः शिष्यान्कल्पतरुमध्यापयन्मध्यार्जुनक्षेत्र उवास, ददर्श तत्र गतान्श्रीमतोऽप्पय्यदीक्षितेन्द्रान् । इयेष च तान्कानिचित्स्वसंशयस्थानानि कल्पतरौ विवरीतुम् । विवरणे तदीयां पटुतां संवीक्ष्य प्रार्थयामास तान्कल्पतरोर्व्याख्यानं कर्तुम् । श्लोकोऽयं गोविन्ददीक्षितस्येत्युदाहरन्ति जनाः—

'अप्पदीक्षित किमित्यतिस्तुतिं वर्णयामि भवतो वदान्यताम् ।
सोऽपि कल्पतरुरर्थसिद्धये त्वद्विरामवसरं प्रतीक्षते ॥' इति ।

श्लोकममुं बालकविनोक्तं व्याहरन्त्यन्ये । सर्वथा संभाव्यते श्रीमतो गोविन्ददीक्षितस्य समकालिकत्वं श्रीमदप्पय्यदीक्षितेन्द्रैः । यदुच्यते 'तञ्जोर् म्यान्युअल्'(Tanjore Manual) आख्यग्रन्थे विजयराघवभूपालस्य मन्त्री गोविन्ददीक्षित इति, तत्प्रमाणान्तरसापेक्षं स्वतो न प्रमाणम्, असंभावितं च । अस्ति हरिवंशसारचरितं नाम त्रयोविंशतिसर्गपरिमितं महाकाव्यं गोविन्दमन्त्रिकृतम् । अस्ति च तस्य व्याख्या श्रीमदप्पय्यदीक्षितकृता । परमिदमद्य न निश्चिनुमः स एवायं गोविन्दमन्त्री योऽध्यासितार्धासनः समं रघुनाथभूपेन इति । यतो हरिवंशसारचरितस्य प्रबन्द्धा गोविन्दमन्त्री शाण्डिल्यवंशोत्पन्नः कोण्डमनायकमन्त्री च इत्येवं तद्ग्रन्थव्याख्यानतः प्रतीयते । यतो हरिवंशसारचरितस्य मूलकोशस्त्वद्य मया नोपलभ्यते । अतः श्लोकोऽयमुद्धृतो व्याख्यानतः—

'शाण्डिल्यान्वयहारमौक्तिकमणिः श्रीधल्लिमन्त्री पिता
माता यस्य पतिव्रतैकमहिमाकल्पा च कुप्पाम्बिका ।
तस्य श्रीहरिवंशसारचरिते गोविन्दमन्त्रिप्रभोः
सर्गः पूर्तिमगान्निसर्गललितः काव्ये महत्यादिमः ॥' इति ।

श्रीवेङ्कटेश्वरमखिनो ज्येष्ठसोदरो विद्यागुरुः साग्निचित्यसर्वप्रष्ठाप्तोर्यामयाजी श्रीयज्ञनारायणदीक्षितः । अखण्डितमस्य पाण्डित्यं सर्वेष्वपि व्याहारेषु । सुशिक्षितोऽयं काव्य

रीतौ।अयं रघुनाथभूपालालब्धजीवनो रघुनाथभूपविजय–रघुनाथविलासनाटक–साहित्य-रत्नाकरकाव्यादिकांस्तमेव राजानमधिकृत्य निर्ममे ग्रन्थान्। ददावस्मै यज्ञनारायणदीक्षिताय कर्णाभरणं निजं पतकं पादाङ्गदं कङ्कणं च रघुनाथभूपालः। अयं स्वयमाध्वर्यं चकार स्वपितृकृते आप्तवाजपेयनाम्नि सप्ततन्तुवरे। अस्य समकालिकाः पण्डितमणयः—(१) विधुतालंकारिकविबुधाहंकारः कृष्णयज्वा, (२) डिण्डिमकुलमण्डनः पण्डितशिखामणिः सोमनाथः, (३) पारिजातनाटकस्य प्रबन्धा रघुनाथभूपालाश्रितः कुमारताताचार्यश्च।

श्रीवेङ्कटेश्वरमखिनः कृतिषु—(१) टुप्टीकाव्याख्यानं वार्तिकाभरणम्, (२) कर्मान्तमीमांसाया व्याख्या कर्मान्तनिबन्धदीपिका इत्युभे एव केवलमिदानीं नामतः परिज्ञायेते। चोदितोऽनेनैव रचयामास तन्त्रशिखामणिं श्रीमान्राजचूडामणिदीक्षितः प्रख्यातः कर्ता काव्यदर्पणस्य।

श्रीनीलकण्ठमखीन्द्रस्य समकालिका विद्वन्मणयः—

(१) श्रौतधर्म इव मूर्तिमान् मान्यश्चोक्कनाथमखीन्द्रः। अयं कौशिकगोत्रोद्भवः। द्वादशाहादियज्वनो नारायणदीक्षितस्य गणपत्यभिधायां सहधर्मिण्यां समुत्पन्नः। प्रख्यातनाम्नो रामभद्रमखीन्द्रस्य श्वशुरः पदविद्यागुरुश्च। अद्याप्यस्य वंशीयेषु तत्संबन्धिनां च संदृश्यते कन्यकास्वपि गणपतीति नामकरणम्। शब्दकौमुदी–धातुरत्नावली–भाष्यरत्नावल्य इदानीमस्य समुपलभ्यमानाः कृतयः। त्रिशिरःपुरस्य प्रान्ते मुत्तरशनल्लूराख्यग्रामे पुदुक्कोट्टराज्ये पिन्नडुडिनाम्नि च ग्रामेऽन्यत्र च नदीतीरेषु वृत्त्यर्थमस्य कल्पयामासुरुत्तमश्लेत्राणि तत्र तत्र तदानींतना राजान इति पुराविदः पण्डिताः। भाष्यरत्नावल्याम्—

'धातारं सूत्रकारं शिवनुतिसहितं पाणिनिं वाक्यकारं
विष्णुं कात्यायनं तं गिरिशमहिवराधीश्वरं भाष्यकारम्।
तातं नारायणं श्रीगणपतिमपि तां मातरं सादरं ता-
नाचार्यान्सर्वतन्त्रप्रणयननिपुणानानमेः कर्म कुर्मः॥

* * * * *

धीमद्वाक्यपदप्रमाणगहनप्रच्छादितोच्चावच-
स्फीतार्थप्रतिपादनातिनिपुणः श्रीनीलकण्ठाध्वरी।
यं भाष्यप्रकटीकृतौ पटयते द्वेधार्थदानात्कृती
तस्यान्ये सुधियः कथं न विमलाः पुष्णीयुरर्थप्रदाः॥' इति।

(२) श्रीरामचन्द्रोदयमहाकाव्यस्य कर्ता स्वयमेव तद्व्याख्याता च महाकविः श्रीवैष्णवः श्रीवेङ्कटेश्वरः। अयं गतेषु १५१८ संख्याकेषु शालिवाहनशकाब्देषु, तथा १५९५-९६ खिस्ताब्देषु काञ्चीनगरसमीपे श्रीनिवासार्यतो जनिमुपगतः। अयमतीतेषु ४७३६कल्यब्देषु तथा गतेषु १५५७ शालिवाहनशकाब्देषु स्वस्य चत्वारिंशे वयसि काशीं गत्वा तत्रैव काव्यमिदं समग्रन्थयत्। तथा च रामचन्द्रोदयमहाकाव्ये—

'अभ्रपूर्णगुणपावनपद्यं व्योमवह्निसमसर्गमुदारम् ।
काव्यमङ्गगुणशैलयुगाब्दे वेङ्कटोऽकृत कलौ कविवर्यः ॥'

[व्याख्या—अभ्रपूर्णगुणपावनपद्यं आकाशवत् पूर्णगुणानि पावनानि पद्यानि यस्य। त्रिंशताधिकत्रिसहस्रपद्यमित्यर्थः । ३०३० । व्योमवह्निसमसर्गं व्योमवत् निर्मलाः वह्निवदुज्ज्वलाः सर्गाः यस्मिन् तत् । त्रिंशत्सर्गमित्यर्थः । तत् काव्यम् । कलौ अङ्गगुणशैलयुगाब्दे सति षट्त्रिंशदधिकसप्तशताधिकचतुःसहस्रवर्षे सति । वेङ्कटः कविः । अकृत प्रणीतवान् ॥]

'षट्त्रिंशदत्र वृत्तानि छन्दांसि तु चतुर्दश ।
खार्कप्राणा इह श्लोका अनुष्टुप्संख्यया मताः ॥
आत्रेयश्रीनिवासाह्वयगुरुतनयः काव्यरत्नं व्यतानी-
त्सीतानाथप्रसादप्रकटितधिषणो रामचन्द्रोदयाख्यम् ।
आ सीतेशाभिषेकादुदितशुभकथं त्रिंशता यत्तु सर्गै-
स्तस्मिन्नामाभिषेकाभ्युदयशुभकथस्त्रिंश आभाति सर्गः ॥
धृतितिथि(१५१८)मिते शकाब्दे संजातेनोपकाञ्चि मयकेन ।
काशीं गतेन क्लृप्तं काव्यं मुनिबाणतिथि(१५५७)मिते हि शके ॥'

ग्रन्थस्यास्य व्याख्याने च—

'नृसिंहार्यपौत्रस्य पौत्रः कवीन्द्रस्तथा वेङ्कटेशार्यपौत्रः प्रसिद्धः ।
स्वयं श्रीनिवासार्यसूनुः स्वकाव्यं लघु व्याख्यदाप्त·····वेङ्कटेशः ॥
धृतितिथिमिते शकाब्दे जनिमानुपकाञ्चि वेङ्कटेशकविः ।
काव्यमिदं व्याचष्ट स्वयमेव सतां नियोगमासाद्य ॥'

ग्रन्थान्ते च—

'यतीन्द्रकरुणापात्रं तन्महानसकिंकरम् ।
आत्रेयप्रवरं नौमि प्रणतार्तिहरं गुरुम् ॥ १ ॥

---

१. रामचन्द्रोदयकाव्यस्य कर्तुर्वेङ्कटेशस्य परम्परा—

१. यतिराजः
२. (तत्सुतः) पद्मनाभः
३. (तत्सुतः) रामानुजार्यः
४. (तत्सुतः) पद्मनाभः
५. (तत्सुतः) पुरुषोत्तमः
६. (तत्सुतः) नरसिंहार्यः
७. (तत्सुतः) शठकोपः
८. (तत्सुतः) नृसिंहः
९. (तत्सुतः) पुरुषोत्तमः

तातकारुण्यसंप्राप्तज्ञानभक्तिरसामृतम् ।
यतिराजाह्वयं वन्दे देशिकं दिव्यदर्शनम् ॥ २ ॥
यतिराजगुरोः सूनुं पाषण्डमतखण्डनम् ।
आचार्यपद्मनाभाख्यं भवसंतारकं भजे ॥ ३ ॥
नमो रामानुजार्याय वेदान्तार्थप्रदायिने ।
आत्रेयपद्मनाभार्यसुताय गुणशालिने ॥ ४ ॥
रामानुजार्यसंप्राप्तसर्वविद्यासमृद्धये ।
पद्मनाभाय महते तत्सुताय नमो नमः ॥ ५ ॥
पद्मनाभगुरोः सूनुं तत्कृपावाप्तवैभवम् ।
पुरुषोत्तममाचार्यं गुणसिन्धुमुपास्महे ॥ ६ ॥
तातपाददयापात्रं मायावादतमोरविम् ।
व्याख्यातन्यायकुलिशं नरसिंहार्यमाश्रये ॥ ७ ॥
नृसिंहदेशिकावाप्तज्ञानविज्ञानसंपदे ।
आत्रेयशठकोपाय नमो वैराग्यसिन्धवे ॥ ८ ॥
श्रीशठकोपपदाम्बुजभृङ्गं तत्करुणेक्षणलम्भितबोधम् ।
देशिकमत्रिकुलाम्बुधिचन्द्रं नौमि नृसिंहमनन्तगुणाब्धिम् ॥ ९ ॥
श्रीमन्नृसिंहार्यसुतं महान्तं वेदान्तयुग्मव्यवहारशीलम् ।
आचारहेतुं करुणापयोधिं वन्दे वदान्यं पुरुषोत्तमार्यम् ॥ १० ॥
पुरुषोत्तमपादाब्जसेवासंप्राप्तसंपदे ।
नमः श्रीवेङ्कटेशाय गुरवे भक्तिसिन्धवे ॥ ११ ॥
पराङ्कुशशठारातिकृपासंप्राप्तसंपदम् ।
श्रीवेङ्कटेशतनयं श्रीनिवासार्यमाश्रये ॥ १२ ॥' इति ।

(३) कवेरस्य नीलकण्ठमखीन्द्रस्यानुजन्मा कुशकुमुद्वतीयनाटकस्य प्रबन्धा प्रतिरघुवंशादिकर्ता अतिरात्रयज्वा ।

कुशकुमुद्वतीयनाटके—

'विद्वद्वादविवादकालयुगपद्विस्फूर्त्यहंपूर्विका-
निर्यद्युक्तिसहस्रदर्शितनिजाहीन्द्रावताराकृतिः ।
कर्तुं कारयितुं तथा रसयितुं काव्यानि नव्यान्यलं
भूष्णुर्भाति सभासभाजितमतिः श्रीनीलकण्ठाध्वरी ॥

---

१०. (तत्सुतः) वेङ्कटेशः
११. (तत्सुतः) श्रीनिवासः
१२. (तत्सुतो रामचन्द्रोदयकाव्यस्य कविः) वेङ्कटेशः ।

* * * * *

अयं किल भरद्वाजकुलपारावारपारिजातः सकलसाम्राज्यसिंहासनाधिपतिस्तत्रभवतः श्रीमतो नारायणाध्वरिणस्तपःपरिपाकः कर्ता काव्यानां व्याकर्ता तन्त्राणां आहर्ता क्रतूनां व्याहर्ता सकलनृपसभेषु दिगन्तरविश्रान्तकीर्तिरपारमहिमा मानवाकृतिः साक्षादेव दाक्षायणीवल्लभः श्रीकण्ठमतसर्वस्ववेदी श्रीनीलकण्ठाध्वरी । * * एष खलु द्वितीयशंकररूपाणामप्ययदीक्षितानां नप्ता नलचरितनाटकप्रबन्धा ।

नटी—को णु किंणामहेओ एअ णाडअप्पणेदा ।

सूत्रधारः—नन्वस्यैव सभानेतुरनुजन्मा विदितवेदितव्यः कविलोकमित्रमतिरात्रयाजी । * * स किल प्रतिरघुवंशादिकर्तेति रसिकगोष्ठीषु जोघुष्यते ।'

(४) शब्दचित्रस्वरूपभेदप्रतिपादक 'चित्ररत्नाकर' ग्रन्थस्य रुक्मिणीपरिणय–जानकीपरिणय–गौरीपरिणय–द्रौपदीपरिणयादीनां नाटकानां च कर्ता श्रीचक्रकविः ।

चित्ररत्नाकरे—

'श्रीलोकनाथं जनकं रामचन्द्रं पतञ्जलिम् ।
नत्वाग्रजं च क्रियते चित्ररत्नाकरो मया ॥
रुक्मिणीजानकीगौरीद्रौपदीपरिणीतयः ।
कृतयो यस्य तस्यैषा कृतिश्चक्रकवेः शुभा ॥'

तस्यैव ग्रन्थस्यावसाने—

'पुत्रं चक्रकविं गुणैकवसतिः श्रीलोकनाथः सुधी-
रम्मा चाजनयत्सतीजननुता यं मानितं सज्जनैः ।
षष्ठस्तस्य कृतावजायत परिच्छेदो नुते पाण्ड्यराट्-
चोलोर्वीपतिनीलकण्ठमखिभिः श्रीचित्ररत्नाकरे ॥' इति ॥

टी. एस्. कुप्पुस्वामिशास्त्री ।

तञ्जोर् ।

काव्यमाला ।

श्रीनीलकण्ठदीक्षितप्रणीतं
गङ्गावतरणम् ।

प्रथमः सर्गः ।

अद्भुतं किमपि द्वन्द्वमस्तु तन्मम शर्मणे ।
स्वस्तिकस्तनुते यस्य सुदृढाश्लेषनिर्वृतिम् ॥ १ ॥
व्यासमेव स्तुमो यस्य वाचं गणयितुं विधिः ।
विषीदति वृषाङ्केण विलूने पञ्चमानने ॥ २ ॥
कान्तः सहृदयो वाचः कविरेवं चिरंतनः[1] ।
जडे जगति येनैव च्छन्दः प्रागन्वरुध्यत ॥ ३ ॥
कवितामफलद्वीटी कालिदासमुखेऽर्पिता ।
पत्युर्मुखे तु सा गौर्याः परुषं निगमाक्षरम् ॥ ४ ॥
नारायणाध्वरीन्द्राय[2] नमोऽस्तु ज्ञानसिन्धवे ।
शारदा यत्कटाक्षाणां साप्यवेतनकिंकरा ॥ ५ ॥
कल्पनेत्यस्ति तत्किंचित्कविलोकस्य जीवितम् ।
प्रविश्येव गृहीतं यद्भारत्याः कोशमन्दिरात् ॥ ६ ॥
स संदर्भः कवीन्द्राणां शारदा यं पदे पदे ।
श्लाघते विस्मयावेशस्मेरमन्थरया दृशा ॥ ७ ॥
शीलिते कविलोकेन सिद्धे ब्रह्मणि वाङ्मये ।
पामराः कलहायन्ते पश्यासिन्नन्यथान्यथा ॥ ८ ॥
अस्ति सारस्वतं चक्षुरज्ञातस्वापजागरम् ।
गोचरो यस्य सर्वोऽपि यत्स्वयं कर्णगोचरः ॥ ९ ॥

---

१. आदिकविः वाल्मीकिः २. नारायणाध्वरीन्द्रः कवेः पिता.

सत्यर्थे सत्सु शब्देषु सति चाक्षरडम्बरे।
शोभते यं विना नोक्तिः स पन्था इति घुष्यते ॥ १० ॥
शृण्वन्तोऽपि न शृण्वन्ति जानन्तोऽपि न जानते।
साहितीमितरे तस्या ज्ञाता श्रोता च यः कविः ॥ ११ ॥
न लक्षणेषु निष्कर्षो न वा काव्येषु कौशलम्।
संदर्भनिर्णयायालं स ह्यदृष्टैकमूलकः ॥ १२ ॥
भारतीषु कवीन्द्राणां यावती सुकुमारता।
तावती काव्यमर्मज्ञसंमर्दैकसहिष्णुता ॥ १३ ॥
अचमत्कृतसंदर्भमर्थं नैवाद्रियामहे।
अत्यन्तभोगौपयिकमैश्वर्यमिव देहिनाम् ॥ १४ ॥
स्वर्गः कस्यास्तु सुधियः श्लाघन्ते चेन्निजं पदम्।
ततोऽन्यः कोऽस्ति निरयस्तत्र ते यद्युदासते ॥ १५ ॥
हतः श्लोको हतं काव्यं हता बुद्धिर्हतं यशः।
सद्भिरुद्भावितो दोषो यदि नाभ्युपगम्यते ॥ १६ ॥
अन्धास्ते कवयो येषां पन्थाः क्षुण्णः परैर्भवेत्।
परेषां तु यदाक्रान्तः पन्थास्ते कविकुञ्जराः ॥ १७ ॥
विदुषां मत्सरग्रन्थिर्विभेद्यो वचसां गुणैः।
नैव केनापि दुर्भेदश्चोद्यमर्कटमुष्टयः ॥ १८ ॥
आजन्मनः प्रबन्द्धृणां पद्यबन्धेषु यः श्रमः।
सोऽपि सामाजिकायत्तः कष्टं धिक्कविजीवितम् ॥ १९ ॥
नार्थमुल्लिखितुं यत्नो नापि ग्रन्थयितुं गिरः।
श्रवणात्प्रागनाक्षेपः श्रोतुरभ्यर्थ्यते परम् ॥ २० ॥
दूषणाय न काव्यानां दुर्जनाक्षेपसंभवः।
शफरीपरिवर्तैः किं सरसी न प्रसीदति ॥ २१ ॥
सव्यङ्ग्यापि कवेर्वाणी सापभ्रंशा न शोभते।
लम्बस्तनीं को वीक्षेत रम्भामप्युर्वशीमपि ॥ २२ ॥

क्व नु नाम सभा राज्ञां दुराक्षेपैकशिक्षिता ।
क्व नु वाचः सुधीलोकलालनैकरसाः कवेः ॥ २३ ॥
व्यङ्क्तुमस्फुरतो दोषान्भङ्क्तुमुत्स्फुरतो गुणान् ।
ईर्ष्ये भगवति ब्रूहि का त्वदन्यां प्रगल्भताम् ॥ २४ ॥
किं मदक्ष्णोरयं दोषः किं तद्वस्त्वेव तादृशम् ।
कामं यन्मौलिरज्ञानां कम्पते कविसूक्तिषु ॥ २५ ॥
पुष्णन्तु स्वेति मधुरां परस्यापि कृतिं जनाः ।
स्वोक्तिभिर्यत्कचित्कर्णौ दहन्ति तदरुंतुदम् ॥ २६ ॥
स्तुत्यं न स्तुवते मूढाः पद्यं यत्तन्न दारुणम् ।
अपदे यत्प्रशंसन्ति तन्मे मर्माणि कृन्तति ॥ २७ ॥
जानीमो ज्यायसीं लक्ष्म्या जातु ते न तु शारदे ।
आः स्मृतं ननु सा वक्त्रेष्वास्ते दुष्कविसंसदाम् ॥ २८ ॥
न यदाह मनुर्वध्यान्न च नासृजदब्जभूः ।
न वान्तकः कविंमन्यान्नयते तन्मदंहसा ॥ २९ ॥
आमये यमके जाग्रत्यपमृत्यौ च दुष्कवौ ।
वाणि प्राणिषि तन्मन्ये वज्रेणैवासि निर्मिता ॥ ३० ॥
नाहमासं नृपः स्यां चेन्ननु कुर्यां तथा महीम् ।
विचिन्वतापि नेक्ष्यन्ते यथा दुष्कविताङ्कुराः ॥ ३१ ॥
पातिव्रत्यक्रमः कोऽयं प्राणभङ्गावधिस्तव ।
सर्गतः कविपाशानां शारदे वारय प्रियम् ॥ ३२ ॥
दूयामहे दुष्कविभिर्दत्तकर्णज्वरा वयम् ।
न वा वदामो वाग्देवि ननु त्वमपि तैर्हता ३३ ॥
विज्ञप्तिः श्रूयतामेका विधातः करुणा यदि ।
मूकान्सृज कविंमन्यान्बधिरान्विदुषोऽथवा ॥ ३४ ॥
जना नीराजनीयास्ते जानन्ति स्वयमेव ये ।
कथंचिदपि वा सर्गैः काव्यमङ्कैश्च नाटकम् ॥ ३५ ॥

प्राचेतसेन यानीता पालिता भवभूतिना ।
सर्वतश्चर्व्यते वाणी सैवाद्य कविमानिभिः ॥ ३६ ॥
निःशङ्कं न प्रवृत्तोऽस्मि निन्दितुं कविमानिनः ।
निन्दामपि विगायन्ति यतः श्लाघामिवात्मनः ॥ ३७ ॥
मुनिरस्ति भरद्वाजः ख्यातस्त्रिभुवनेष्वपि ।
अन्नैर्यस्य जहौ रामोऽप्यरण्यभ्रमणश्रमम् ॥ ३८ ॥
तस्यान्वये महत्यासीत्क्षीरोद इव चन्द्रमाः ।
श्रीकण्ठचरणासक्तः श्रीमानप्पयदीक्षितः[1] ॥ ३९ ॥
विधित्रयी यदाक्षिप्ता नान्यत्र लभते गतिम् ।
जयन्त इव दुर्दान्तजानकीशशरार्दितः ॥ ४० ॥
आगमैरप्यसंवेद्यमाद्यं यत्तत्त्वमैश्वरम् ।
आकुमारं परिज्ञातं तदेवासीद्यदुक्तिभिः ॥ ४१ ॥
श्रीकण्ठदेशिकग्रन्थसिद्धान्तद्योतचन्द्रिका ।
श्रीमती निर्मिता येन शिवार्कमणिदीपिका ॥ ४२ ॥
गङ्गया यः पुरा स्नातो देवश्चन्द्रार्धशेखरः ।
गाङ्गेयेन पुनः सख्यौ सोऽवतीर्य यदात्मना ॥ ४३ ॥
अमोषणीयैरक्रय्यैरमूल्यैरमलीमसैः ।
यत्प्रबन्धैः शतेनैव भारती परिकर्मिता ॥ ४४ ॥
यं विद्म इति यद्ग्रन्थानभ्यास्यामोऽखिलानिति ।
यस्य शिष्याः स्म इति च श्लाघन्ते स्वं विपश्चितः ॥ ४५ ॥
नाकेऽपि सति देवानां माहात्म्यकलहे मिथः ।
वादः शाम्यति यद्वाचि विन्यस्य निखिलंभरम् ॥ ४६ ॥
आमोदिभिर्वचःपुष्पैरर्चितो येन शंकरः ।
तत्याज काशधत्तूरधारणोपहितां रुजम् ॥ ४७ ॥
तत्समानप्रभावस्य तदनन्तरजन्मनः ।
आसीदाच्चादीक्षितस्य पुत्रो नाणयणाध्वरी ॥ ४८ ॥

---

१. अप्पयदीक्षितः कवेः पितामहस्य ज्यायान्भ्राता.

जयन्ति तनयास्तस्य पञ्च सौभ्रात्रशालिनः ।
गर्भदासा महेशस्य कवयश्च विपश्चितः ॥ ४९ ॥
तेषामहं द्वितीयोऽस्मि भूमिदेवीतनूभुवाम् ।
नीलकण्ठ इति ख्यातिं नीतः शंभोः प्रसादतः ॥ ५० ॥
वार्तिकाभरणग्रन्थनिर्माणव्यक्तनैपुणः ।
श्रीवेङ्कटेश्वरमखी शिष्ये मय्यनुकम्पते ॥ ५१ ॥
कुर्वती श्रवणे वाणी कोमलां यस्य साहितीम् ।
कर्णपूरशिरीषेऽपि काठिन्यमिव पश्यति ॥ ५२ ॥
भान्ति शिष्याः पुरो यस्य पाणिविन्यस्तपुस्तकाः ।
तत्सूक्तिजाह्नवीपूरत्रासेनेव धृतप्लवाः ॥ ५३ ॥
सति सह्यसुतातीरे सति त्रय्यन्तशीलने ।
गन्तुं निश्चितवानस्मि गङ्गां केनापि हेतुना ॥ ५४ ॥
तपसा लभ्यतां तस्यास्तपसश्च कठोरताम् ।
पश्यन्वाचा तपस्यामि काव्यसंदर्भरूपया ॥ ५५ ॥
मूकोऽपि मुखरायेत यत्र स्मृतिपथं गते ।
उपेक्षितव्यं तद्वस्तु कथं कवयता मया ॥ ५६ ॥
भगीरथमुखाद्वाचः स्तुवन्ति मम जाह्नवीम् ।
प्रभावे चन्द्रचूडस्य पर्यवस्यन्ति तत्त्वतः ॥ ५७ ॥
चन्द्रशेखरसव्याङ्गचरणोन्मार्जनाम्भसाम् ।
विवर्ता जगदुत्सङ्गे विहरन्ति मदुक्तयः ॥ ५८ ॥
भक्त्या कृतेति जाह्नव्याः प्रभावं वदतीति वा ।
सन्तः समनुगृह्णन्तु निर्गुणामपि मद्गिरम् ॥ ५९ ॥
आसीद्भगीरथो नाम राजा रविरिवापरः ।
येन साक्षात्कृतः शंभुर्येन गङ्गावतारिता ॥ ६० ॥
सदयं सानुरागं च भुञ्जानं तं वसुंधराम् ।
ऐच्छदिन्द्रवशापि चौरन्तः कुलवधूरिव ॥ ६१ ॥

गोवर्धनधरस्यापि यदि तावद्यशो हरेः ।
कियन्न वर्ण्यः स भुवं बिभ्रत्सगिरिकाननाम् ॥ ६२ ॥
स पौरान्पादमूलस्थानरक्षदिति नाद्भुतम् ।
यद्दिगन्ते यशोऽरक्षत्प्रतापं शारिवेश्मसु ॥ ६३ ॥
दयालुरथ भूतेषु दण्ड्येष्वासीत्स निर्दयः ।
संजीवनोऽपि लोकानां चन्द्रमाः पथिकान्तकः ॥ ६४ ॥
न दण्ड्यं मुमुचे कंचिन्न वा कंचिददण्डयत् ।
तथापि युक्तदण्डः स दयालुरिति पप्रथे ॥ ६५ ॥
उचितेष्वदिशद्दृष्टिमुदासीनः परेषु च ।
शुश्राव च न शुश्राव स वाचमनुजीविनाम् ॥ ६६ ॥
उचितज्ञतया तस्मिन्नन्वरज्यन्यथा प्रजाः ।
न तथा तस्य दानेन न तथा चोपलालनैः ॥ ६७ ॥
तस्मिन्दुर्जनदुर्धर्षे समं पश्यति च प्रजाः ।
सर्वोऽप्यासीदपिशुनः सर्वोऽपि गतमत्सरः ॥ ६८ ॥
स यावल्लालयामास क्रीडन्निव हसन्निव ।
उपासांचक्रिरे तावद्भूतास्तमनुजीविनः ॥ ६९ ॥
जातः कोपो न भृत्येषु जातोऽपि न निगूहितः ।
निगूहितोऽपि न चिरमास्त चित्तेऽस्य कोमले ॥ ७० ॥
वैरायतां विरिञ्चोऽपि विप्रकर्तुं क्षमेत सः
अज्ञातविमतोत्पादामभुङ्क्त तदपि क्षितिम् ॥ ७१ ॥
प्रणाममात्रसंप्रीतस्तेजस्वी चोदयस्थितः ।
कूटस्थं रविमैक्ष्वाको गुणैरनुययाविव ॥ ७२ ॥
तस्यासन्प्राक्तना एव सेनामन्त्र्यनुजीविनः ।
नवं यशो नवः कोशो नवं राज्यं च केवलम् ॥ ७३ ॥
षष्ठांशं जगृहे नेति तुष्टुवुस्तं तपस्विनः ।
न त्वबुध्यन्त गृह्णन्तमुपायेनाखिलं तपः ॥ ७४ ॥

स्रस्तमंसतलात्पान्थैः संव्यानमपि वर्त्मसु ।
सातङ्कमाददे भूयस्तरद्भिस्तस्य शासनम् ॥ ७५ ॥
अख्यातपूर्वविजयानतृणीकृतजीवितान् ।
अक्षत्रियानयूनश्च न स संजगृहे भटान् ॥ ७६ ॥
अवितीर्णमहाग्रामैरकृतस्वर्णवृष्टिभिः ।
कटाक्षैर्न बभूवेऽस्य कविवक्त्रनिपातिभिः ॥ ७७ ॥
संग्रामाङ्गणमारूढः स समक्षं विरोधिनाम् ।
तिरस्कारमिवामंस्त चापस्यापि शिरोनतिम् ॥ ७८ ॥
प्रददावेव सोऽर्थिभ्यः प्रतिजग्राह न क्वचित् ।
वासवादसकृद्वृष्टिं लिप्समानस्त्वलज्जत ॥ ७९ ॥
सायाह्नापचयेनापि मर्यादां लङ्घतेऽर्णवः ।
स तु तावत्प्रवृद्धोऽपि मर्यादां नात्यलङ्घत ॥ ८० ॥
दातुं प्रवृद्धश्चन्द्रोऽपि पक्षे पक्षेऽपचीयते ।
स तु भूयोऽप्यवर्धिष्ट संततं वितरन्नृपः ॥ ८१ ॥
पदं किमेतावदुदारतोचितं प्रयुज्य शंसेयममुष्य दातृताम् ।
पदेषु यत्प्रत्यय एव नाशितः प्रयोगशूरैः कविभिः समन्ततः ॥ ८२ ॥
यदस्य युद्धेषु महत्कुतूहलं य उद्यमो यत्प्रतिपालनं च वा ।
इदं किमङ्ग श्रुतमीक्षितं नु वा महीभुजोऽन्यस्य महोत्सवेष्वपि ॥ ८३ ॥
एकैकां क्रमभाविनीमपि कलामिन्दोः समास्वाद्य यैः
कण्ठोद्वीवितजीवितैर्निरवधिः कालः कथंचिज्जितः ।
तैरेवोदरपूरमध्वरहविः स्फारं तदावर्जितं
भुञ्जानैस्त्रिदशैरधारि जठरप्रायं तदानीं वपुः ॥ ८४ ॥
परिज्ञातं तत्त्वं निखिलमपि विद्यासु विदुषां
परिज्ञातं भूयः परिषदि सतां श्लाघितमपि ।
फलैर्योक्तुं तत्तत्क्रमसमुचितैः श्लाघितमपि
प्रगल्भः कोऽन्यः स्यात्त्रिभुवनवदान्यो यदि न सः ॥८५ ॥

साम्राज्यं यदि सप्तमार्णवतटीविश्राम्यदाज्ञाक्षरं
सौन्दर्यं यदि मुद्रिताः स्मरगिरः सा चेन्मतिः को गुरुः ।
शौर्यं चेत्पुनरन्यदेव तदिति स्तोत्रं विचित्रं सतां
शृण्वन्नेव भगीरथक्षितिपतिर्निन्ये सहस्रं समाः ॥ ८६ ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध-
निर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण
नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते
गङ्गावतरणे कथावतारो नाम प्रथमः सर्गः ।

द्वितीयः सर्गः ।

पौरजानपदपार्थिवलोकप्रस्तुतस्तुतिवचोमुखरायाम् ।
जातु संसदि निषद्य सुहृद्भिः संलपन्नतिनिनाय स कालम् ॥ १ ॥
स प्रसङ्गकृतसंगति वक्तुं प्रस्तुतं किमपि बान्धववृद्धैः ।
सावधानमशृणोदपदानं सर्वमेव सगरात्मभवानाम् ॥ २ ॥
अध्वमेधमकरोत्सगरो यच्च तत्र तनया विनियुक्ताः ।
अन्वयुर्यदपि ते तुरगं तं यच्च तं शतमखोपजहार ॥ ३ ॥
यत्ततः सगिरिकेतुवनान्ता तैर्व्यचीयत मही निखिलेयम् ।
यच्च तैः पितृवचोऽनुसरद्भिः सिन्धुरेव समखन्यत भूयः ॥ ४ ॥
मन्दिरं फणभृतामवतेरुः सागरोदरपथेन च ते यत् ।
पादकर्णसमवायत एव प्राकृतैः फणिभिरद्भुतदृष्टाः ॥ ५ ॥
तं तुरंगमपि यद्दृदृशुस्ते तापसस्य कपिलस्य समीपे ।
चोर इत्यमुमभिद्रवतां यद्ध्वसतामदित हुंकृतिरस्य ॥ ६ ॥
अंशुमानपि समेत्य हयं तं यच्चकार सगराध्वरपूर्तिम् ।
सर्वमेतदवकर्ण्य स वीरो विस्मितोऽजनि विषण्णमुखश्च ॥ ७ ॥
दातुमम्बुपरिपारणमेषां कोऽभ्युपाय इति पृच्छति तस्मिन् ।
संनिकर्षमुपसृत्य वसिष्ठः शंसति स्म जगतः सुकृतेन ॥ ८ ॥
कन्यकास्ति कुटिलेति हिमाद्रेर्ज्यायसी स्मरणतोऽप्यघहन्त्री ।
शंकराय वितरीतुममर्त्याः सत्यलोकमनयन्त शिशुं ताम् ॥ ९ ॥

आकलय्य विबुधोपहृतां तामष्टमिश्च नयनैर्द्रुहिणः प्राक् ।
नार्हतीश्वरमियं तु वराकी मुच्यतामिति गिरा निरतक्षत् ॥ १० ॥
उद्यतां किमपि वक्तुमथैनां गर्वितां कमलभूरुपलभ्य ।
शापमित्थमसृजज्जलरूपां सद्य एव भवती भवितेति ॥ ११ ॥
सा ततो गिरिसुताकलयन्ती तं च निग्रहमनुग्रहमेव ।
ऊर्मिभिः प्रलयसागरघोरैरुत्पपात कवलीकरणाय ॥ १२ ॥
अप्रतर्कितविधेयमपोढस्थैर्यमर्धविरतश्रुतिपाठम् ।
शुष्कतालु वदनं च तदानीं पद्मभूरपि परिश्रमति स्म ॥ १३ ॥
सावलेपनिपतत्सुरसिन्धुस्वैरचंक्रमतिरस्करणाय ।
सर्वतः स निगमान्किल सेतूनाबबन्ध चतुरश्चतुरोऽपि ॥ १४ ॥
सा च वामनपुराणवचोभिः स्पष्टमेव विवृता विदिता ते ।
नागलोकमवतार्य नदीं तां देयमम्बु सगरात्मभवेभ्यः ॥ १५ ॥
आशरीरपतनं व्रतचर्यामाचरन्नपि सुपर्णवचोभिः ।
अभ्रसिन्धुमवतारयितुं तामंशुमानपि शशाक न धीरः ॥ १६ ॥
तत्सुतोऽपि न ददर्श दिलीपस्तत्समानयनकर्मणि योगम् ।
दृष्टिमत्र निदधासि यदि त्वं सिद्धिमेति नियमादयमर्थः ॥ १७ ॥
इत्थमूचिषि मुनौ करणीयं निश्चिकाय न तु तं निजगाद ।
सिद्धमप्यभिलपन्ति न सन्तः का प्रसक्तिरपि साधयितव्ये ॥ १८ ॥
सेत्स्यतीति यदवादि भवद्भिः सिद्धमेव तु ततोऽभिमतं नः ।
इत्युदीर्य स विसृष्टसमाजः पार्थिवः प्रतिययाववरोधम् ॥ १९ ॥
सोऽथ जातु नृपतिः परितुष्टादाशिषं समधिगम्य वसिष्ठात् ।
निर्ययौ सुरनदीमुपनेतुं न्यस्य राज्यमखिलं सचिवेषु ॥ २० ॥
तीरसीमनि स दक्षिणसिन्धोराश्रमं कमपि संपरिकल्प्य ।
आरराध नियमैरतिमात्रैर्देवमम्बुजभवं नरदेवः ॥ २१ ॥
हेमकुम्भसलिलैरभिषिक्तो मौलिरस्य मुनिवेषधरस्य ।
वीचिकासु लवणासु पयोधेर्वीतशङ्कमहनि त्रिरमज्जत् ॥ २२ ॥

आश्रमं नगरमासनदर्भान्भद्रपीठमुटजं मणिवेश्म ।
संभ्रमाद्व्यवहरन्क्षितिपालोऽलञ्जत त्रिचतुराणि दिनानि ॥ २३ ॥
स क्षणादजयदासनभेदाञ्शिक्षणाच्चिरतरं खुरलीषु ।
जानता निखिलमभ्यसितव्यं कस्य कुत्र न भवेदुपयोगः ॥ २४ ॥
अत्यशेत स मुनीनपि दिव्यान्वासरैः कतिपयैर्वसुधेशः ।
संस्तवे भवतु नाम विलम्बः संस्तुतं मतिमतां किमसाध्यम् ॥२५॥
किं स पूर्वमपि नाजयदक्षान्किं तु वा न ववृते शुचिरेवम् ।
तस्य केव तपसा परिहानिः प्रत्युतैष न ररक्ष तदोर्वीम् ॥ २६ ॥
स्वं च राज्यमपहाय सतोऽस्य स्वर्गराज्यमिति तत्कियदास्ते ।
तद्विदञ्छतमखो न शशङ्के तत्तपश्चरणतः कणशोऽपि ॥ २७ ॥
बाहुजोऽयमथ भानुकुलीनस्तत्र चाप्रतिभटः स्वमहिम्ना ।
तावतापि तपसा यदि युक्तस्तत्समीक्षितुमपि क्षमते कः ॥ २८ ॥
यद्गजेषु तुरगेषु भटेषु क्षोणिपु क्षितिपतिष्वपि सक्तम् ।
तन्मनस्तत इतोऽपि विकृष्य स्थापितं तपसि तेन कठोरे ॥ २९ ॥
नान्नमाद्रियत नाम्बु न मूलं का भविष्यति कथापि फलानाम् ।
मारुतं परमभुङ्क निदाघस्तं च हर्तुमिव तस्य तदाभूत् ॥ ३० ॥
चण्डमारुतचलन्मृदुघासग्रासलालसतया गतिमान्द्यम् ।
प्रस्तुवत्यहिमभानुतुरङ्गे द्राघिमाणमलभन्त दिनानि ॥ ३१ ॥
तापमातपतरङ्गितमुच्चैः क्षन्तुमक्षमतया दिनलक्ष्मीः ।
किं चिरायति निशेति वितीर्णोद्ग्राहिकेव वपुरायतमूहे ॥ ३२ ॥
वक्रचंक्रमणवल्गनधाटीमण्डलश्रमणमन्दगतानि ।
सादिनः स्वयमशिक्ष्यत धर्मात्तुन्दिलो मदनजैत्रतुरंगः ॥ ३३ ॥
आरुरोह गिरिमाप वनान्तानभ्रमीदनुदिशं परिधाव्य ।
अग्रहीदपि तृणानि समीरो निग्रहैकरतिभाजि निदाघे ॥ ३४ ॥
भानुभिः प्रलयपावकतीव्रैरापिबत्युदकमम्बुजबन्धौ ।
दूरदूरमपदिश्य मरीचीर्दुद्रुवुर्दिशि दिशीव सरस्यः ॥ ३५ ॥

शक्यमञ्जलिपुटैः सलिलार्द्रैः सान्द्रमातपभरं प्रविकीर्य ।
जीर्णपर्णजटिलानि तदानीं विष्वगुज्ज्वलयितुं विपिनानि ॥ ३६ ॥
अङ्किताः किमपि शैवलखण्डैरातपाच्छकलितैरसिनीलाः ।
कोण एव सरितामवहन्त प्रान्तलीनपथिका जलवेण्यः ॥ ३७ ॥
कामिनः पथि तलेषु तरूणां गाढनम्रविटपेषु निवेश्य ।
अध्वखेदमहरन्त वधूनामम्बुभिः कमलिनीदलनीतैः ॥ ३८ ॥
उत्तरीयमहरत्कुचकुम्भादुन्ममार्ज मुखघर्मपयांसि ।
अङ्गमङ्गमपि पान्थवधूनामालिलिङ्ग सुकृती वनवातः ॥ ३९ ॥
आगतैरपि पथातिविदूरादध्वगैस्तरुतलेषु निषद्य ।
स्पन्दितुं च पटुभिर्न बभूवे संनिकृष्टसलिलग्रहणाय ॥ ४० ॥
किं प्रपासु कुहचित्तरुणीनामास्पदं कुचतटेष्वधिगम्य ।
विध्यति स्म विजने पथि पान्थान्कुण्ठविक्रमतया कुसुमास्त्रः॥४१॥
सत्यपि श्रमविनोदिनि कामं तालवृन्तपवने तरुणानाम् ।
प्रेमभाजनमभूत्परमेकः प्रेयसीकुचदुकूलसमीरः ॥ ४२ ॥
फूत्कृतैरजहदूष्मतरङ्गैर्भूयसा मसृणितोष्ठदलानि ।
अखदन्त सुदृशामभिकेभ्यो मुग्धघर्मकणितानि मुखानि ॥ ४३ ॥
न प्रणामरचनैर्न चटूक्त्या न व्यनीयत सखीवचनैर्यत् ।
कञ्चुकं तदपनिन्युरुरोजात्कामिलोकसुकृतेन नवोढाः ॥ ४४ ॥
मारुतो न मधुरप्युपरेमे किं पिकैरमुखरैरिति खिन्नः ।
संदधे धनुषि नैव मनोजः सायकं त्रिचतुराणि दिनानि ॥ ४५ ॥
हारदाम्नि हरिचन्दनपङ्के शीतरोचिषि शिरीषदलेषु ।
कामिनीकुचतटेषु च लिल्ये पञ्चभिः किमसुभिः कुसुमेषोः ॥ ४६॥
सर्वरात्रमपि संलपनाद्यैर्विभ्रमैः समपनीय विभाते ।
अप्रमर्दितकुचं युवतीनामङ्कपालिमलभन्त युवानः ॥ ४७ ॥
नास्ति मन्दपवनो न वसन्तः कूणितं च चरितं कुसुमेषोः ।
तावता विरहिणां किमिवासीत्तेषु मन्मथकणोऽपि कृतान्तः ॥४८ ॥

अन्नमन्यदवमन्य यमेकं सेवते सुलभ इत्यहिलोकः ।
सोऽपि नैव सुलभो मरुदासीद्दुर्जयो जगति दैवनियोगः ॥ ४९ ॥
प्राणिमात्रपरिजीवनहेतोः शत्रवस्त्रय इमे पवनस्य ।
शुष्कतापसनिदाघभुजंगास्ते पतन्ति निरये क्व न विद्मः ॥ ५० ॥
उष्णमम्बु रविरुग्रमयूखः सान्द्रमुर्मुरकिरश्च समीराः ।
भूः पफाल पुनराः कथमासीत्पान्थपातकिदशापरिपाकः ॥ ५१ ॥
स्वापकालमनुपाल्य गुरूणां विप्रलभ्य च चिरेण सपत्नीः ।
प्रस्थितासु कुलटास्वपि घर्मैः पातकी किमपि नानुचकम्पे ॥ ५२ ॥
वारिविभ्रममहोत्सवदानैर्यं पुरा परिचचार निदाघः ।
तापमस्य वितनार तदासौ किं भिदा न धनिनां कृपणेभ्यः ॥ ५३ ॥
तौ परस्परमहःपरिणामस्पर्धयेव नृपतिः सविता च ।
गाढयौवनमुपेयुषि घर्मे दुर्निरीक्ष्यतरतामवहेताम् ॥ ५४ ॥
स्नातुमम्बु न कुतश्चन लभ्यं पातुमस्ति न कथाप्यनिलस्य ।
स्थातुमास्त यमिनां तरुमूलं दूषितं तदपि दावशिखाभिः ॥ ५५ ॥
यावदित्थमधिकोऽजनि घर्मस्तावदस्य तपसा विजजृम्भे ।
तद्विपाकचकिता दिवि देवास्तापमापुरवनेरपि तीव्रम् ॥ ५६ ॥
तिष्ठतस्तपसि तस्य कठोरे काङ्क्षतश्च सुरसिन्धुनिपातम् ।
वासरा निमिषवत्समतीयुर्वासरा इव समांश्च सहस्रम् ॥ ५७ ॥
तं कदाचिदुपसृत्य विरिञ्चस्तस्य दृष्टिपथमप्युपगम्य ।
अर्थ्यतामभिमतं वितरामीत्याह वाग्भिरमृतस्रपिताभिः ॥ ५८ ॥
तत्क्षणं प्रमुदितः क्षितिपालस्तन्निशम्य वचनं द्रुहिणस्य ।
स्तोतुमारभत चारणलोकस्तूयमानचरितः स्वयमेनम् ॥ ५९ ॥
त्वत्प्रसूतमवतो हरतोऽपि स्यादुपासनविधिर्यदि धातः ।
त्वं कियत्कियदिवासि न वन्द्यस्तत्त्वदर्शनपरैर्मतिमद्भिः ॥ ६० ॥
त्वादृशा जनिमता शयितव्यं त्वादृशा च ननु जागरितव्यम् ।
यत्र हि स्वपिति नश्यति लोको यत्र जीव्यति पुनः समुदेति॥६१॥

भारतीपरिवृढस्य पुरस्ते वागियं न परिहासपदं किम् ।
नृत्यतः पुरहरस्य पुरस्तान्नृत्यतां स्थितिरिव प्रमथानाम् ॥ ६२ ॥
हुंकृतेन कपिलस्य महर्षेर्भस्मतामुपगताः पितरो मे ।
स्वर्गसिन्धुसलिलेप्विह तेषामस्तु मत्करपुटेन निवापः ॥ ६३ ॥
तस्य प्रतिश्रुत्य तथेति देवः प्रदर्श्य गङ्गामपि पार्श्व एव ।
तिरोभवत्पश्यत एव तस्य वक्त्रैः समस्तागमवावदूकैः ॥ ६४ ॥

संव्यानमूर्मिलतिकाव्यतिषङ्गलब्ध-
फेनानुलेपमिव पाण्डरमावहन्तीम् ।
पश्यन्पुरस्तनुमतीं सुरलोकसिन्धुं
सिद्धं मनोरथममंस्त दिलीपसूनुः ६५ ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध-
निर्वाहकमुहात्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण
नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते
गङ्गावतरणे भगीरथवरलाभो नाम द्वितीयः सर्गः ।

तृतीयः सर्गः ।

ततः प्रणामैः स्तुतिभिश्च पार्थिवं प्रसादयन्तं सुरलोकवाहिनी ।
जगाद सद्यो जगदण्डमण्डलं निमज्जयन्तीव वचोभिरेव सा ॥ १ ॥
प्रविष्टमात्रास्वपि मे रसातलं प्रवाहनासीरतरङ्गपङ्क्तिषु ।
पतेदलाबूफलकर्परोपमं विभिद्य विध्यण्डकपालसंपुटः ॥ २ ॥
मदम्बुसंपातविधूतकल्मषैर्महीश पूर्वैस्तव यत्र वत्स्यते ।
स एव लोको यदि मत्पयोजवात्पथि प्रलीयेत फलेत्तपस्तव ॥ ३ ॥
महर्षिरोषग्लपितान्समुद्धरन्महीभुजः कानपि लिप्ससे यशः ।
अवेक्षसे नैव जगत्त्रयीजुषामकाण्डसंवर्तविधानपातकम् ॥ ४ ॥
पतत्युदारे पयसांभरे मम प्रसह्य राजन्गिरिराजमौलिषु ।
समुत्पतच्छीकरवर्षदुर्दिनं चतुर्मुखो धाम किमावसेन्निजम् ॥ ५ ॥
ससर्ज कल्पादिषु विष्टपत्रयीं स योगमास्थाय कियन्तमात्मभूः ।
कथावशेषीक्रियतां मया पुनः कथं पतामीति गिरकयैव सा ॥ ६ ॥

अचिन्तयित्वा कृतिगौरवं विधेरपि त्यजन्तीं करुणां शरीरिषु ।
पताम्यहं यद्यपि कुत्र वा भवन्भवान्निवापाञ्जलिमाचरिष्यति ॥ ७ ॥
पतेयमप्यर्थितसाधनाय ते निगृह्य वेगं निखिलं बलादहम् ।
परिप्लवाः क्षुद्रतया मदूर्मयः परं तु नेमे वचसि स्थिता मम ॥ ८ ॥
प्रदर्श्यतां कस्य पुरः पयोजवो निवेद्यतां वा नृप केवलं गिरा ।
न संनिकर्षे वडवामुखानलो न वा स योगी चुलुकीकृतार्णवः ॥ ९ ॥
विषादमभ्येमि भुवं पदे पदे विपद्यमानामनुचिन्त्य यद्यपि ।
तथापि नन्दामि चिरोपसंभृतां तरङ्गकण्डूमपनेष्यता त्वया ॥ १० ॥
प्रवेष्टुमध्रेण पथा रसातलं हठाद्विशन्त्याममरावतीं मयि ।
पुनः स्वहस्तार्पितचन्दनाङ्कितं शचीमुखं द्रक्ष्यति किं पुरंदरः ॥ ११ ॥
अपि प्रकृत्या यदचञ्चलं जलं तदप्यलं यां ग्रसितुं महोदधेः ।
पदं भवेन्नाम समग्ररंहसां मदम्भसां किं न्वियमेव मेदिनी ॥ १२ ॥
इति प्रसन्नं मधुरं च वाङ्मयं प्रवाहमात्मीयमिवोद्विरन्त्यसौ ।
क्षणं व्यरंसीदिव यं सुरापगा तमेव लेभे वचनक्षणं नृपः ॥ १३ ॥
ससर्ज यस्त्वां त्रिजगन्नियामकश्चतुर्मुखः सोऽपि यदि त्वमूर्मिभिः ।
अवापितस्तत्क्षणमात्मसंशयं कथैव का स्याज्जगतो विनश्यतः ॥ १४ ॥
महात्मतां यद्यपि ते महापगे न वेद वेधा न हरिर्न शंकरः ।
तथापि पौराणिकसंकथामुखात्कियत्कियद्देवि गृहीतवानहम् ॥ १५ ॥
अतो न किंचित्प्रतिवक्तुमुत्सहे भवत्प्रवाहावतरोपपादकम् ।
परं तु मय्यम्ब दयोर्मिला दृशः पतन्तु ते किंचिदिति प्रसादये ॥१६॥
प्रसाद्यमाना मुहुरित्थमुक्तिभिर्भगीरथाय प्रससाद सा ततः ।
अपि स्वयात्रानुपपत्तिगोचरामनेन च प्रास्तुत संकथां मिथः ॥ १७ ॥
मदुक्तयुक्त्या नृपते मया विना प्रतिप्रयातुं यदि ते न रोचते ।
अनेन रूपेण परं रसातलं प्रवेक्ष्यते तर्हि भवत्कृते मया ॥ १८ ॥
सुरापगास्रोतसि पूर्वभूभुजां कदा प्रदास्यामि जलाञ्जलीनिति ।
तपस्यतो मे फलमस्ति किं त्वया प्रवाहरूपं परिहृत्य नीतया ॥ १९ ॥

अहस्तवायं यदि तात तर्हि तां गृहाण गङ्गाममरावतीं गताम्।
भणन्ति लक्ष्मीदयिताङ्घ्रिताडनप्रभिन्नविध्यण्डपरिस्रुतेति याम् ॥ २० ॥
न पातुमम्भो भवतीमिहार्थये परःसहस्रा भुवि सन्ति सिन्धवः।
न चाम्बु दिव्यं ननु सन्ति वृष्टयः परं तु लिप्से तव पावनं पयः ॥ २१ ॥
यदीदमेवेच्छसि याहि भूतलं गृहाण भस्मान्युपयाहि मां पुनः।
ममान्वगागच्छ विधातुरालयं मनोरथं साधय मज्जलैस्ततः ॥ २२ ॥
कथंचिदेनः कपिलापराधजं पितामहानामपनेतुमिच्छता।
अकर्मभूमावधिगत्य तावकं पयः किमम्ब प्रतिपद्यतां मया ॥ २३ ॥
सुशिक्षितस्त्वं यदि वृद्धसेवया श्रुतिस्मृतिभ्यामुपदर्शिते पथि।
विधित्ससे किं नु विकृष्य मां बलादकर्मभूमावहिराजवेश्मनि ॥ २४ ॥
न वक्तुमीशे गिरमुत्तरोत्तरं त्वदुक्तिधारासमशीर्षिकापदम्।
गुरोर्निदेशो मम दुस्त्यजस्त्वयं कुतस्तमुत्सादयितुं प्रवर्तसे ॥ २५ ॥
यदि त्वलङ्घ्यं गुरुशासनं त्वया यतस्व भूमाववतारणे मम।
स्मृता स्मृता संनिदधामि तावदित्युदीर्य तं दिव्यनदी तिरोदधे ॥ २६ ॥
विचिन्तयन्नभ्रनदीगिरं मुहुर्विनिःश्वसन्नायतमायतं ततः।
प्रजेश्वरः प्रस्तुतकार्यसिद्धये जगन्ति सर्वाणि जगाम चेतसा ॥ २७ ॥
मुमूर्षमाणासुरशैल्कविक्रमप्रसङ्गसंभावनयापि मूर्च्छताम्।
अभून्न चित्ते नृपतेर्दिवौकसामपि प्रसज्य प्रतिषेधपात्रता ॥ २८ ॥
सुराग्रजो यद्यपि यद्यपि स्वयं जगन्ति निर्मात्यसकृद्युगात्यये।
शशाप तामेव नदी भवेति वा गिरेः सुतां यद्यपि कोपमूर्च्छितः ॥ २९ ॥
तथापि तद्दुर्विनयोपमर्दने प्रभुर्जराजर्जरितः कथं विधिः।
तया पुराभिद्रुत एव भीषितस्तुता तथासाविति हि प्रगीयते ॥ ३० ॥
सहेत किं नाम वियन्नदीं हरिः सहिष्यते किंचिदयं तु साहसी।
ससर्ज विध्यण्डपुटेऽपि यः पदं समुत्क्षिपन्नावरणोदकैर्नदीम् ॥ ३१ ॥
अयं हि मन्नश्चिरमर्णवोदरे पुरा पुराणीः स्वयमाहरद्धरिः।
अयं हि निर्मथ्य सुधाब्धिमद्रिणा पुरा सुरानप्यमृतैरतोषयत् ॥ ३२ ॥

---

१. 'शल्कविक्रम' इति मातृकायाम्. अपि स्यात् 'शुष्कविक्रम' ?.

अमुं पुमांसं परिहृत्य कोऽपरः प्रवर्ततामर्णवशोषकर्मणि ।
अमुं विना केन पुनर्महोदधावबन्धि सेतुः शतयोजनायतः ॥ ३३ ॥
महीधरैर्मन्दरगन्धमादनत्रिकूटहेमाचलरोहणादिभिः ।
अधारि तामप्यवहद्वसुंधरामयं न किं नाम पुरा स्वदंष्ट्रया ॥ ३४ ॥
विचारयामो यदि कर्म वैष्णवं किमस्त्यसाध्यं त्रिषु विष्टपेष्वपि ।
विचारयामो यदि वापि तां नदीं भरं क्व विन्यस्य विशङ्कमास्महे ॥ ३५ ॥
इदं तु सिद्धं हिमशैलनन्दना तथाविधैवास्तु ततोऽधिकापि वा ।
उपायवेदी मधुकैटभाहितस्तथापि किं किं न स साधयिष्यति ॥ ३६ ॥
न देवताभिर्न मृगैर्न मानुषैर्न वायुधैः संभवि यस्य नाशनम् ।
हिरण्यमीदृक्षमपि प्रतिघ्नतो न बुध्यते कैरपि तस्य मायिता ॥ ३७ ॥
कथं कथं धिग्धिगिदं स्मृतिं गता कथा ममेयं पुरशासनाश्रया ।
पुराणिनी नन्वयमीदृशोऽपि सन्क्षणान्नृसिंहः शरभेण पातितः ॥ ३८ ॥
निवेद्यते यद्यपि तस्य विक्रमो जलंधरान्धत्रिपुरस्मरादिभिः ।
तथापि बाणासुरसंगरे जनाः पठन्ति तस्यापि पराक्रमक्षतिम् ॥ ३९ ॥
अतो न किंचिद्व्यवसातुमीश्महे मतिं स्वकीयां परमाश्रिता वयम् ।
क्व कूपमण्डूकनिभा मतिर्नृणां क्व देवतातत्त्वविचारचातुरी ॥ ४० ॥
इति क्षितीशः प्रणिधानमाश्रितः क्षणं यदा यत्र मिमील लोचने ।
तदा विधिस्तस्य दृशोः पुरो भवन्प्रभावमैशं गदितुं प्रचक्रमे ॥ ४१ ॥
कियत्यसौ तात वियन्नदी भवेत्कियन्ति सर्वाणि जगन्ति वा पुनः ।
स्वयं यदि प्राक्तनपुण्ययोगतः स एव ते संरभते महीश्वरः ॥ ४२ ॥
यदंशलेशावतरस्य केलयो भवन्ति दक्षाध्वरशिक्षणादयः ।
पठन्ति तस्यैव पराक्रमक्षतिं न चेतना जातु कुतो विवेकिनः ॥ ४३ ॥
पुरा मुकुन्दाय तथा तपस्यते पुराहितस्वप्रतिपादितं वरम् ।
न पालयेद्बाणपुरे यदि स्वयं भजेदमुं पार्थिव देवतेति कः ॥ ४४ ॥
यदस्ति विश्वं क्रियते स्म येन तद्यतः स चाभूत्स च यत्र लीयते ।
स च स्वयं येन किलानुगृह्यते ततोऽप्यतीतं तदवैहि दैवतम् ॥ ४५ ॥

प्रसूतिमीशानहरीन्द्रवेधसां प्रचक्षतेऽथर्वशिखागिरो यतः ।
विहाय सर्वानपि यस्य वन्द्यता विधीयतेऽथर्वशिखादिसूक्तिभिः ॥ ४६ ॥
प्रमाणमूर्धन्यपदाभिषेचिता यतश्चतस्रः श्रुतयोऽपि जज्ञिरे ।
किमुक्तिभिः स प्रणवोऽपि यत्पुरः प्रतीयतेऽथर्वशिरस्यनेकधा ॥ ४७ ॥
प्रभुं प्रशान्तं परमेश्वरं च यं भणन्ति कैवल्यगिरः परिस्फुटम् ।
यमेव विश्वाधिक इत्यनुश्रवाः प्रचक्षते कण्ठरवेण नापरम् ॥ ४८ ॥
यदास्तिहेतोर्यतते जगत्त्रयी यदेव चाद्यं फलराजसाधनम् ।
तयैव देव्या स्वयमात्मविद्यया यदीयमर्धं वपुषो विभूषितम् ॥ ४९ ॥
सुखावहो यः किल शंभुशंकराद्यभिख्यया यो वपुषातिनिर्मलः ।
य एव सर्वज्ञ इति प्रघुष्यते विशुद्धसत्त्वात्मकतां विभावय ॥ ५० ॥
तपोभिरल्पैर्दयते च देहिनां स देवदेवः शशिखण्डमण्डनः ।
दयापि सा देयमदेयमित्यमुं विभागमेव प्रथमं न बुध्यते ॥ ५१ ॥
इति क्षितीशं प्रतिबोधयन्नसावदीक्षयच्छाम्भवदीक्षया पुनः ।
ददौ च तस्मै विनताय तत्परं परिष्कृतं पञ्चभिरक्षरैर्मधुम् ॥ ५२ ॥
प्रविष्टमात्रश्रुतिसंपुटोदरः स मन्त्रराजः शशिखण्डपाण्डरः ।
तमांसि तस्य प्रबिभेद तत्क्षणं मनांसि यूनामिव मान्मथः शरः ॥ ५३ ॥
प्रतिप्रयाते जगतां पितामहे भगीरथः पूर्णमनोरथस्ततः ।
तपश्चरिष्यन्नतिदारुणं पुनर्गिरिं जगाम श्वशुरं पिनाकिनः ॥ ५४ ॥
मरुद्भिरेकान्ततुषारवर्षिभिर्मनोहरन्तीषु यदीयभूमिषु ।
नवाभिसारेऽप्यधरं मृगीदृशां विमुक्तशङ्कं व्रणयन्ति कामिनः ॥ ५५ ॥
कठोरसौरातपतापविद्रवत्तुषारवापीसलिलैकजन्मनाम् ।
सरोरुहाणां किमिवोपहन्यते हिमेषु वा यत्र हिमात्ययेषु वा ॥ ५६ ॥
हिमस्पृशां यन्मरुतां प्रसादतो विलासिनां मुग्धवधूरतेष्वपि ।
न शिक्षणीयाजनि जातु सीत्कृतिर्न चार्थनीया परिरम्भसान्द्रता ॥ ५७ ॥
पुराणवेणुव्यतिषङ्गसंभवं दवं यदीयाः शमयन्ति तत्क्षणम् ।
तदर्चिरूष्मग्लपितद्रवीभवत्तुषारसङ्घातमहाम्बुवृष्टयः ॥ ५८ ॥

द्रवीभवद्भिः क्वचिदातपोष्मणां क्वचिच्च विद्याधरगानविद्यया।
हिमस्रवैरुपरितरैश्च यत्तटैः स्वयं भवेदेव न पञ्चषैर्दिनैः ॥ ५९ ॥
तपोविशुद्धे हृदये तपस्विनामपि क्षणादूर्ध्वमवस्थितो न यः।
स एव यत्सानुविहारकौतुकी सदा महेशो यदि किं ततोऽधिकम् ॥ ६० ॥
स्वतन्त्रखेलद्विरिकन्यकाकरस्वयंग्रहावर्जितमुग्धपल्लवाः।
मुनीन्द्रवृन्दादृतमूलपांसवो जयन्ति धन्याः किल यत्र वीरुधः ॥ ६१ ॥
परिश्रमद्गन्धमृगाधिवासितं प्रकीर्णकल्पद्रुमपुष्पमप्यधः।
शिलातलं स्निग्धविशालशीतलं सुखेन यत्राधिवसन्ति किंनराः ॥ ६२ ॥
यदीयनीहारकणानितस्ततः किरन्मृगाङ्कः प्रथते सुधाकरः।
यदीयगण्डोपल एव कश्चन प्रयाति कैलास इति स्थिरं यशः ॥ ६३ ॥
स यक्षविद्याधरकिंनराप्सरःफणीन्द्रगन्धर्वनिरन्तरे पथि।
व्रजन्नतिक्रम्य तुषारभूधरं जगाम कैलासगिरिं जनेश्वरः ॥ ६४ ॥
महेशभूषाहिकुलानि कन्दरे चिरोपरोधात्क्षुधितानि रक्षितुम्।
समीरणं सेवितुमागतं बलान्नयन्ति यत्र प्रमथाः कृपालवः ॥ ६५ ॥
विशङ्कलङ्केशभुजोपकम्पिताद्यतो विकीर्णा रजतोपला इव।
गणा जयन्ति प्रलयान्तपावकज्वलत्त्रिलोकीभसितावगुण्ठिताः ॥ ६६ ॥
तटेषु तत्तज्जगदण्डमण्डलीसमाहृतब्रह्मकरोटिकोटिषु।
चरन्विधिर्यत्र न जातु शोचति स्मरन्नपि स्वं किल पञ्चमं शिरः ॥ ६७ ॥
प्रवेशिताः स्फाटिककन्दरोदरं नवाङ्गना यत्कटकेषु किंनरैः।
अपत्रपन्ते बहिरासिताः सखीरवेक्ष्य नैर्मल्यवशादतिस्फुटम् ॥ ६८ ॥
बिभर्ति यः स्फाटिकराजतीस्तटीः कुटुम्बिनो यत्र धनेश्वरादयः।
समः समृद्ध्या क इवास्य वर्तते प्रभुर्न भिक्षामटति स्वयं यदि ॥ ६९ ॥
शरार्कधुर्धूरवतीषु यत्तटे महेशपुष्पोपवनीषु रक्षिणः।
स्वतःप्ररूढामपि जातु केतकीं न हि क्षमन्ते विषवल्लरीमिव ॥ ७० ॥

सुरसिद्धतापसगतागतोचितां
परिहृत्य तत्र पदवीं भगीरथः।

अधितिष्ठति स्म तटमस्य पावनं
हृदयं च तस्य पुनरिन्दुशेखरः ॥ ७१ ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध-
निर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाचादीक्षितपौत्रेण
नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते
गङ्गावतरणे गङ्गाहंकारो नाम तृतीयः सर्गः ।

चतुर्थः सर्गः ।

स बाह्यकरणग्रामसंविधानानुरोधिनीम् ।
आकृष्य मानसीं वृत्तिमाधत्त मदनान्तके ॥ १ ॥
इयता क्रमितुं शक्या मयेयमिति दर्शयन् ।
स तस्थौ भुवमाक्रम्य चरणाङ्गुष्ठरेखया ॥ २ ॥
बभौ तेन समुत्क्षिप्तो बाहुर्ज्याघातलाञ्छितः ।
जित्वा तपोभिर्ब्रह्मर्षीञ्जैत्रस्तम्भ इवोच्छ्रितः ॥ ३ ॥
स्वात्मानन्दसुधास्वादसुखितो वसुधेश्वरः ।
न फलेषु न मूलेषु नाप्सु च प्रीतिमानभूत् ॥ ४ ॥
सस्नौ जजाप दध्यौ च स संध्यास्वखिलास्वपि ।
कथाभिः कालकालस्य जजागर च शर्वरीः ॥ ५ ॥
तप्यमाने तथा तस्मिंस्तत्यजुः क्रमशो भयम् ।
क्षुद्रस्वस्वपदस्वामिदुर्विदग्धा दिवौकसः ॥ ६ ॥
षडङ्गमातृकामूर्तिषडध्वादिविभेदिना ।
न्यासजालेन नृपतिरङ्गमङ्गमशोधयत् ॥ ७ ॥
अनुसंधाय चण्डीशमन्तश्चण्डांशुमण्डले ।
पार्थिवः पञ्चषान्मासानुपासामास वासरे ॥ ८ ॥
अप्राकृतपरंज्योतिरभेदध्यानशालिनः ।
तस्य दृष्टिपथे स्थातुं तत्रास महसां निधिः ॥ ९ ॥
अगृहीतोत्तरासङ्गमासीनं च तमन्तरे ।
परीक्षितुमिवाजग्मुर्दिवसा हिमसान्द्रिताः ॥ १० ॥

विना सशपथैः सान्त्वैर्विना व्याजैश्च कामिनाम् ।
अपि सान्द्रं परिष्वङ्गमन्वजानन्नवाङ्गनाः ॥ ११ ॥
गर्भेष्वाप्रपदीनानामवगुण्ठनवाससाम् ।
अशेत द्वन्द्वमस्पन्दमासक्तोरुभुजं मिथः ॥ १२ ॥
कञ्चुकाहरणातङ्ककातराणां मृगीदृशाम् ।
दयालुर्हैमनो वायुर्ददौ रोमाञ्चकञ्चुकम् ॥ १३ ॥
किं त्यक्तं युवभिर्धर्मे किं लब्धं चाधिकं हिमे ।
आनुकूल्याद्यशो लेभे चतुरस्तु हिमागमः ॥ १४ ॥
प्रकृत्या कुटिलो मारः पवनस्तुहिनाकरः ।
दीर्घाश्च रात्रयो हन्त जीवन्तु पथिकाः कथम् ॥ १५ ॥
संश्रान्तो हिमवर्षेण शङ्के मकरकेतनः ।
उपारुरोह नारीणामूष्मलं कुचमण्डलम् ॥ १६ ॥
फालानलशिखोत्तप्तपाणिपद्मा कपर्दिनः ।
कथमप्यतिचक्राम हिमं हैमवती तदा ॥ १७ ॥
ध्वंस्यमानेषु बाणेषु भज्यमाने च कार्मुके ।
भुवनान्यजयत्त्रीणि भ्रूक्षेपादेव मन्मथः ॥ १८ ॥
वसन्त इव हेमन्तो वशीचक्रे जगत्त्रयम् ।
न वसन्तः स्वतः किंतु यः स्मरेण कटाक्षितः ॥ १९ ॥
मञ्जुः कुन्देषु ते भृङ्गा यैर्व्याप्तमखिलं वनम् ।
कस्य किं वा न पर्याप्तं कालो यद्युपतिष्ठते ॥ २० ॥
द्वौ हि तेजस्विनौ लोके सविता स च पार्थिवः ।
तस्थतुस्तौ विभज्येव दक्षिणोत्तरयोर्दिशोः ॥ २१ ॥
स्वस्तिकस्थगितोरोजाः सीत्कारतरलाधराः ।
स्नानान्तेषु स्त्रियो मुग्धा यूनामाचक्रुर्मनः ॥ २२ ॥
पतितव्यं हिमैर्नाम स्नातव्यं नाम च द्विजैः ।
किं कुर्मः कृतवानेवं स विधिर्नोपलभ्यते ॥ २३ ॥

धूलिधूसरितादर्शदुर्दर्शं रविमण्डलम् ।
प्रत्येतुमक्षमाश्चक्रा न मिथः समगंसत ॥ २४ ॥
निष्प्रभो यद्रविर्जज्ञे यच्च धूसरिता दिशः ।
उत्पातेनेव तेनासीत्प्रलयः पान्थयोषिताम् ॥ २५ ॥
निदाघ एव यत्रत्यः परत्र शिशिरायते ।
तत्रैव यदि हेमन्तः स कथं नास्तु पर्वतः ॥ २६ ॥
प्राक्तनेषु तुषारेषु प्रत्यग्रं पतितं हिमम् ।
निश्चीयते स्म मृदुताद्दश्यैर्विद्याधरीपदैः ॥ २७ ॥
प्रथमा भसितारब्धसर्वाङ्गीणावगुण्ठनाः ।
पाणिस्थं देवदेवस्य पर्युपासत पावकम् ॥ २८ ॥
अमुक्ताहेमनेपथ्यमङ्गरागं च कौङ्कुमम् ।
किंचित्तत्रान्वमन्यन्त कुबेरान्तःपुरस्त्रियः ॥ २९ ॥
आकृष्टयोः कुमाराभ्यामैभवैयाघ्रचर्मणोः ।
संभ्रान्ता पतिमावत्रे सव्यानाग्रेण पार्वती ॥ ३० ॥
अवमुच्य वतंसेन्दुमवरोप्याहिभूषणम् ।
उद्घाट्य चाक्षि तार्तीयमीशेनापि स्थितं तदा ॥ ३१ ॥
नृपतिस्त्रिजगद्दाहनिदानेन तपोऽग्निना ।
हेमन्तं हिमवन्तं वा नाचिन्तयत चेतसा ॥ ३२ ॥
त्रिदशास्तच्छिरोरन्ध्रतपोग्निज्वालतापिताः[1] ।
ससरुश्चाक्षुषं ज्योतिः संवर्तेषु कपर्दिनः ॥ ३३ ॥
परिपाकोन्मुखे तस्य प्रायस्तपसि दारुणे ।
प्रसन्नानि निमित्तानि प्रादुरासन्पदेपदे ॥ ३४ ॥
विकचाम्भोरुहां वापीं विमलं चेन्दुमण्डलम् ।
स्वप्नेषु पश्यन्राजर्षिः सिद्धं मन्त्रममन्यत ॥ ३५ ॥
कल्पान्तोद्भ्रान्तजीमूतगर्जितस्निग्धमांसलः ।
संध्यासु शुश्रुवे तेन शंभोर्डमरुकध्वनिः ॥ ३६ ॥

---

१. तपो जज्वाल.

चण्डीशताण्डवालोकसंभ्रान्तानमृतान्धसः ।
ददर्श दिवि संध्यासु क्षणत्विष इव क्षणम् ॥ ३७ ॥
प्रत्यहं प्रमथास्तत्र पश्यन्तस्तं तिरोहिताः ।
जातु विज्ञापयमासुश्चरितं तस्य शूलिनः ॥ ३८ ॥
तावतस्तपसो दातुमपश्यन्नुचितं फलम् ।
हरः प्रतस्थे तं द्रष्टुमधमर्ण इव ह्रिया ॥ ३९ ॥
उपरि न्यस्य संव्यानमुत्सार्य वलयान्पुरः ।
आन्तःपुरगृहद्वारमम्बिकैव करं ददौ ॥ ४० ॥
अचिन्तितोऽपनिष्क्रान्तमालक्ष्य मदनान्तकम् ।
किमेतदिति संभ्रान्ताः परिवव्रुस्ततो गणाः ॥ ४१ ॥
विनयानम्रजम्भारिविशोधितपुरं पुरः ।
अतिक्रम्यालयद्वारमारुरोह वृषं हरः ॥ ४२ ॥
अम्बापि संभ्रमासन्नसखीदत्तकरा शनैः ।
पादारविन्दविन्यासैः पावयामास मेदिनीम् ॥ ४३ ॥
कामं शिक्षितसंचारा कठोरे हृदि मे यतः ।
अतः कथंचिदाक्रामदङ्घ्रिभ्यामेव सा भुवम् ॥ ४४ ॥
चन्द्रचूडकरालम्बसंभृतारुण्यसंपदम् ।
अम्बिकायाः करं मन्दमाममर्श सखीजनः ॥ ४५ ॥
देवोऽपि स्वयमारुह्य वृषभं वृषभध्वजः ।
देव्या विलम्बमानाया दृष्टिमध्वनि संदधे ॥ ४६ ॥
कुद्ध्यन्नन्दिकरोद्भूतवेत्रपातपलायिताः ।
विजहुः सरणिं गौर्या विनीतास्तत्र देवताः ॥ ४७ ॥
पद्भ्यामेवोपसर्पन्त्याः पार्वत्याः पथि शंकरः ।
कटाक्षैर्विचकारेव कह्लारेन्दीवरास्तरम् ॥ ४८ ॥
व्यजनैः प्रान्तविन्यस्तकस्तूरीचन्द्रगन्धिभिः ।
मातरं तामसेवन्त कौबेरान्तःपुरस्त्रियः ॥ ४९ ॥

सान्द्रस्तनपरीणाहसंभुग्नाय पदेपदे ।
भद्रान्याशास्त मध्याय पार्वत्याः प्रणयी तदा ॥ ५० ॥
आयतोद्वीविकाखिन्नानमरान्वेत्रदूरितान् ।
कटाक्षैः सानुजग्राह करुणासारसान्द्रितैः ॥ ५१ ॥
अनालम्ब्य सखीहस्तमनाक्रम्य च पादुकाम् ।
संनिकर्ष महेशस्य सा जगाम शनैः शनैः ॥ ५२ ॥
कृत्वा सव्यपदं लक्ष्म्याः कुञ्चिते जानुमण्डले ।
आरुरोह वृषं शंभोर्हस्तमालम्ब्य सा ततः ॥ ५३ ॥
आरोपयन्निव स्वैरमालिलिङ्ग शिवः शिवाम् ।
इति संकथयन्तीषु सखीष्वैक्षिष्ट सान्यतः ॥ ५४ ॥
पाणिभ्रमितशूलाग्रपर्यस्तजलदाः शिवम् ।
शतमन्वगमन्रुद्राः शतरुद्रीयसंस्कृताः ॥ ५५ ॥
कुतः प्रतिष्ठते देवः कुत्र चेति गणास्तदा ।
पार्णिभिर्नयनान्तैश्च पप्रच्छुरितरेतरम् ॥ ५६ ॥
भुग्न भारेण भक्त्या च पुण्ये शिरसि नन्दिनः ।
वाममास्थापयद्बाहुं वाहनस्थो महेश्वरः ॥ ५७ ॥
वाहनारोहविस्रस्तकपर्दान्तविलम्बितम् ।
चन्द्रं गृहीतुमुद्बाहुः स्कन्दो व्यचरदन्तिके ॥ ५८ ॥
प्रागलब्धं विचित्यापि पादं मौलिं च शूलिनः ।
पश्यन्तौ जग्मतुः पार्श्वे चक्रायुधचतुर्मुखौ ॥ ५९ ॥
अन्तकान्धककन्दर्पकालकूटादिनिग्रहम् ।
गायन्तो मधुरं तस्य गन्धर्वा ययुरग्रतः ॥ ६० ॥
प्रशान्तं पावनं तत्र प्राप्य राज्ञस्तपोवनम् ।
तस्थौ तपस्यतस्तस्य पुरतः पुरशासनः ॥ ६१ ॥
स च तत्रान्तरे प्रातः स्नातो मन्दाकिनीजले ।
दध्यौ चिरमुमाकान्तं दहराकाशमण्डले ॥ ६२ ॥

उन्मीलयन्दृशौ किंचित्तेन कोलाहलेन सः ।
अग्राकृतं महः किंचिदद्राक्षीदग्रतो दृशोः ॥ ६३ ॥
तस्यान्तः पुरुषं कंचित्तरुणेन्दुशिखामणिम् ।
सान्द्रीभूतशरच्चन्द्रचन्द्रिकाभं ददर्श सः ॥ ६४ ॥
निर्बन्धक्लान्तभूषाहिनिर्दयाघ्रातमूर्च्छितम् ।
बोधयन्तं पुनः स्कन्दं चूडाचन्द्रसुधाकणैः ॥ ६५ ॥
हृदयं वीतमालिन्यं वाचमप्यमृतोर्मिलाम् ।
अधिष्ठातुमशक्तेन क्ष्वेलेनाक्रान्तकंधरम् ॥ ६६ ॥
दुर्दान्तत्रिपुरश्लोषवृत्तान्तज्ञैः सुधाशनैः ।
सातङ्कं दृष्टवदनं बहुमानस्मितेष्वपि ॥ ६७ ॥
कपालानि शिरःस्थानि स्कन्धे प्रत्येकशो विधेः ।
दत्त्वा तदीयजिज्ञासौ गणेशे कुपितं मृषा ॥ ६८ ॥
हेरम्बकंधरालम्बिदूर्वाग्रग्रासकौतुकात् ।
गन्तुमुन्नमितग्रीवं गृह्णन्तमसकृन्मृगम् ॥ ६९ ॥
अस्मिन्दयस्व रक्षेममुं पश्येति नाकिनाम् ।
आवेदयन्त्या कार्याणि हैमवत्याप्यनूषितम् ॥ ७० ॥
अथ दृष्ट्वा स देवेशमदृष्टं निगमैरपि ।
साध्वसाद्भुतसंभ्रान्तो न किंचित्प्रत्यपद्यत ॥ ७१ ॥
ततः प्रदक्षिणीकृत्य तन्मयं सपरिच्छदम् ।
मुहुः पस्पर्श धन्येन मूर्धा तस्याङ्घ्रिपङ्कजम् ॥ ७२ ॥
आत्माहैः फलपुष्पाद्यैरानर्च स महेश्वरम् ।
तदर्हैर्यदि यष्टव्यं कस्तमाराधयिष्यति ॥ ७३ ॥
क्वायं क्व शंभुस्तदपि स्तोतुं समुपचक्रमे ।
न हि वस्तुकृता प्रीतिः स्वशक्तिमनुरुध्यते ॥ ७४ ॥
त्वं गतिस्त्वन्मयं विश्वमिति साधारणी स्तुतिः ।
अस्तुतिस्त्वयि युक्ता तदवाङ्मनसगोचरे ॥ ७५ ॥

गुणं सन्तमसन्तं वा कीर्तयेद्यदि सा स्तुतिः ।
गृह्णन्गुणैकदेशं ते क इव स्तावको जनः ॥ ७६ ॥
सर्वज्ञ शंकराभिख्यासमावेदितवैभवात् ।
त्वदृते किं परब्रह्म सच्चिदानन्दलक्षणम् ॥ ७७ ॥
त्वत्प्रसूतो हरिर्यावत्रय्यन्तैरुपवर्ण्यते ।
तावत्प्रभावं भवतस्तर्कयन्ति मनीषिणः ॥ ७८ ॥
त्रिमूर्तिजननी तुर्या या मूर्तिर्विदितास्ति सा ।
यदि ते यदि वान्यस्य तन्मे ब्रह्मास्ति किं क्षतम् ॥ ७९ ॥
धर्मधर्मिभिदापन्नं चैतन्यं यदि मायया ।
जातौ तदेव हि युवां जगदादिमदंपती ॥ ८० ॥
कैवल्योपनिषद्धुष्टं यदिदं रूपमीश ते ।
संनिधत्तां तदा देव संस्मरामि यदा यदा ॥ ८१ ॥
इति तुर्यन्तसिद्धान्तनिष्कर्षामृतवर्षिणा ।
वाङ्मुखेन स्तुतस्तेन व्याजहारेदमीश्वरः ॥ ८२ ॥
यत्तप्तवानसि तपो यच्चैवं भक्तिमानसि ।
ततः प्रीतिजुषो मत्तस्तात काङ्क्षितमर्थ्यताम् ॥ ८३ ॥
इत्याज्ञापयति स्वामिन्येतदाह भगीरथः ।
संभ्रमामोदसंबाधस्तब्धगद्गदया गिरा ॥ ८४ ॥
आगतोऽसि मदर्थं यदागसोऽस्यैव शान्तये ।
नालं मम तपः सर्वं नाथ केनार्थये वरम् ॥ ८५ ॥
तथाप्यद्य त्वदीयाङ्घ्रिसाक्षात्कारोपसंभृतैः ।
तपोभिरर्थये तात काङ्क्षितं मे त्वदाज्ञया ॥ ८६ ॥
तपसाराधिता गङ्गा याचितावतरा मया ।
स्वाम्बुवेगसहं कंचित्प्रत्ययाचत मां पुनः ॥ ८७ ॥
अस्मिन्ननन्यसाध्येऽर्थे व्यापर्तुमुचितं तव ।
अत्रोदाहरणं मुख्यं हालाहलविनिग्रहः ॥ ८८ ॥

आयासमीदृशं यत्त्वमार्थितोऽसि जगद्गुरो ।
तन्मम क्षम्यतां बाल्यचापल्यमिति चानमत् ॥ ८९ ॥
अभिषेकप्रियाणां नः प्रियमेतत्कृतं त्वया ।
नापराद्धं पुनः किंचिदित्युवाच तमीश्वरः ॥ ९० ॥
अभिधाय वृषात्तूर्णमवरुह्य महेश्वरः ।
निषसाद पुरस्तस्य निर्मले स्फाटिके तले ॥ ९१ ॥
आबद्ध्य चर्म वैयाघ्रमपसार्य च बालकौ ।
सावष्टम्भः क्षितावास्त सज्जीभूतो वृषध्वजः ॥ ९२ ॥
सावलेपनभःसिन्धुसंनिपातोचितं प्रभोः ।
नन्दी विस्रंसयामास नागेन्द्रग्रथिता जटाः ॥ ९३ ॥
भगिनीसमागमसमुत्सुका शिवा
प्रमथास्तदद्भुतदिदृक्षयाकुलाः ।
स्वमनोरथोपगमसान्द्रकौतुको
नृपतिश्च तं निभृतमक्षिभिः पपुः ॥ ९४ ॥
बद्धस्रस्तकपर्दकन्दरपतद्भोगीन्द्रचन्द्राङ्कुर-
क्षेपव्याप्ततनन्दिदृष्टिवलनव्याधूतदिग्भित्तयः ।
सावष्टम्भमहेशसंभ्रमपरित्रस्यत्त्रिलोकस्तुताः
पारे मद्रचसाममर्त्यतटिनीसंपातपूर्वक्षणाः ॥ ९५ ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध-
निर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण
नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते
गङ्गावतरणे शंकरसाक्षात्कारो नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

प्रान्तसंक्रमिततारया दृशा पश्यति त्रिपुरशासने ततः ।
अस्मरत्सुरनदीमहंकृतां ध्यानयोगविधिना भगीरथः ॥ १ ॥
संभृता मनसि सा ततः क्षणात्संभ्रमेण महताकुलीकृता ।
सर्वतश्चिरनिरोधलज्जितं सज्जतामनयदूर्मिमण्डलम् ॥ २ ॥

सा निवेदयितुमात्मनिर्गमं सन्निकर्षमुपजग्मुषी विधेः ।
व्याजहार विनयावधीरणव्यक्तगर्वगरिमोष्मला गिरः ॥ ३ ॥
अस्ति नन्वयमयुग्मलोचनः स्फाटिकाचलचरो वनेचरः ।
धर्तुमिच्छति स नाम मामकं त्वत्परीक्षितमहारयं पयः ॥ ४ ॥
स प्रकामजरठो गुरुः पिता सा च मुग्धहृदया यवीयसी ।
व्याहतो यदि न मे समुद्यमः कः शिवः क इव राजतो गिरिः ॥ ५ ॥
त्वद्गृहे स्थितवती चिरादहं त्वामनेन परितोषये ततः ।
त्वच्छिरोलवनकर्म दुर्मदं संनिपात्य गिरिशं रसातले ॥ ६ ॥
सावलेपनिपतन्मदूर्मितासंप्लवैककवलीकृतो हरः ।
संगतः पयसि शङ्खशुक्तिभिर्नन्दिना ननु गवेषयिष्यते ॥ ७ ॥
कालकूटमिव मन्यते शिवो मामकं प्रकृतिदुर्मदं पयः ।
ब्रूहि तावदधुनापि मेति तं मा विषीदतु यवीयसी पुनः ॥ ८ ॥
शङ्कितो जगदकाण्डविप्लवाद्याचते यदि भवानथापि माम् ।
तं मदम्बुवहनातिमानिनं कंचिदेव शमयामि नापरम् ॥ ९ ॥
कर्णयोर्यदि पतेयुरन्ततो गर्जितानि चलतां मदम्भसाम् ।
तत्त्वतः कथय किं भवेच्छिवस्त्वं हि तन्महिमलेशवेदिता ॥ १० ॥
इत्थमुद्धतमुदीर्य सा विधिं संगतानपि सुरानभाषत ।
मा परित्रसत मामकं पयो लज्जते बलपराक्रमाय वः ॥ ११ ॥
यात यूयमपयात च क्षणं देवता निजनिजालयांस्ततः ।
कौतुकं तु यदि वोऽस्ति वीक्षितुं कोणमावसत निर्भया दिशाम् ॥१२॥
त्रासिताः किल तयैवमुक्तिभिः पार्श्वमापुरमराः पिनाकिनः ।
कस्य नाम न तथाविधा गिरः क्षोभयेयुरपि चाश्मनं मनः ॥ १३ ॥
उद्यतान्गदितुमापगागिरः स्तम्भितानथ निजेन तेजसा ।
आकलय्य नयनाञ्चलैः सुरानन्तरस्मयत चन्द्रशेखरः ॥ १४ ॥
संनिवृत्य सदसस्ततो बहिः क्रोधमन्थरविसंस्फुटैः पदैः ।
आविवेश सरसीं ततो नु तामापगापि जगदाक्रमोद्यता ॥ १५ ॥

स्थापिताः कमलजन्मना पुरा सेतवः श्रुतिमयाः समन्ततः ।
संनिपत्य सकृदेव सप्लुतैरूर्मिभिस्त्वरितमुल्ललङ्घिरे ॥ १६ ॥
प्राणिनां प्रतियुगान्तमर्णवैर्यामकल्पयत पद्मभूर्दशाम् ।
सैव तस्य फलिता तदा तया कर्मणः क इव नाश्नुते फलम् ॥ १७ ॥
प्राप्य जानुमतिलङ्घ्य नाभिमप्यम्भसि क्षणमथास्य संमिते ।
क्रन्दतामशरणं तपस्विनां शुश्रुवे कलकलान्वितं वचः ॥ १८ ॥
सर्वतः सुरतरङ्गिणीजलैः संप्लुते सदसि तत्र वेधसः ।
प्राणसंयमनशिक्षया परं मज्जिता न कतिचिन्महर्षयः ॥ १९ ॥
वक्त्रसौधवलभीगता विधेः शारदापि सहसोत्थिता सती ।
उद्गृहीतकरपुस्तका भयादक्षिपद्युगमिव क्षणं क्षणम् ॥ २० ॥
विश्वसर्गचतुरोऽपि पद्मभूर्न प्रतिव्यधित तत्र किंचन ।
स्वैरमस्तु कुशलः परापदि स्वापदि त्वकुशलोऽखिलो जनः ॥ २१ ॥
सत्यलोककुहरक्षणासिकासंकटा क्षमतयेव तत्क्षणम् ।
निर्जगाम परितस्ततो बहिस्तन्निसर्गनिरवग्रहं पयः ॥ २२ ॥
गाधभाजि गतविक्रियं जले ससितं तदनु नाभिमात्रके ।
सोक्तिगुम्फमपि दर्शितस्थले वक्त्रमण्डलमधाच्चतुर्मुखः ॥ २३ ॥
तारिता वयमिमां महापदं तावकादिह तपोबलादिति ।
सं स्तुतः परिजनेन लज्जितः कः स्तुतेरपि वधोऽभिषङ्गिणः ॥ २४ ॥
फेनिलाः सलिलशोषरेखकाः सर्वतः सदनभित्तिपर्वसु ।
आयतश्वसितमानमन्मुखं पश्यति स्म स दशातिदीनया ॥ २५ ॥
नाजपं किमिति मन्त्रमानलं नासृजं किमिति चाभितस्तटीः ।
इत्यखिद्यत विधिर्गते जले सा किल प्रकृतिरप्रजन्मनाम् ॥ २६ ॥
आननैर्हसितबाष्पकर्बुरैरद्य जीवितमिवेति वादिभिः ।
दोर्भिरप्यधिकदूरचालितैरालिलिङ्ग मुनिमण्डलं मिथः ॥ २७ ॥
सत्यलोकमपहाय निश्चिते गन्तुमिन्द्रपुरमभ्रगङ्गया ।
धावयन्पथि जनान्पुरो ययौ वेत्रपाणिरिव वीचिमारुतः ॥ २८ ॥

पाकशासनपुराभ्रये पदे स्वेच्छया विहरतां सुधान्धसाम् ।
आगतं प्रलयमाचचक्षिरे जाह्नवीजलझलज्झला रवाः ॥ २९ ॥
संभ्रमोपगतचारशंसितस्वर्गसिन्धुपतनं पदे पदे ।
सौधशृङ्गवलभीनिवेशितस्वस्वमूलधनमप्सरोजनैः ॥ ३० ॥
मन्दुरोदरविमुक्तविद्रवत्सैन्धवानुचरसादिमण्डलम् ।
दिक्तटोच्चलितजाङ्गिकामरस्त्रीकृताभ्रककुलं गृहे गृहे ॥ ३१ ॥
निर्गतत्रिदशनाथदर्शनस्तब्धविद्रवदनीकिनीभटम् ।
इत्थमाकुलमतर्कितागता सा चकार नगरं शचीपतेः ॥ ३२ ॥
(त्रिभिस्तिलकम्)
संपपात हरिनीलदन्तुरे वैजयन्तशिखरे समन्ततः ।
सा ततो विदधतीव संस्तवं मस्तके निपतितुं महेशितुः ॥ ३३ ॥
सर्वतः प्रचलितैः कणात्मना सौधशृङ्गपतितैस्तदम्बुभिः ।
संगतो न समलक्ष्यत क्षणं निर्मलः सुरपतेर्मदावलः ॥ ३४ ॥
वैजयन्तविनिपातवेगतो दूरमुत्पतति तत्पयोभरे ।
छत्रगर्भनिहितेव सा पुरी नाजनि क्वचिदपि क्षतोदरा ॥ ३५ ॥
प्राप्य सानुपदमेव मेदिनीं यं यमम्भसि निमज्जयिष्यति ।
तं तमत्र विनिधातुमेव किं त्रायते स्म निपुणं त्रिविष्टपम् ॥ ३६ ॥
सा ततः प्रचलिता समन्ततो व्यानशे निरवशेषमम्बरम् ।
संविभक्तपरभागसुन्दरीचन्द्रिकेव शरदागमोज्ज्वला ॥ ३७ ॥
सा दिवि प्रमथनाथकुन्तले संभ्रमद्विमलवीचिमण्डला ।
तर्क्यते स्म चतुरैः सुधाशनैर्मालिकेव नवमल्लिकामयी ॥ ३८ ॥
व्योम्नि तल्लहरिवल्लरीहृता ये सुराः सुरगजाश्च केचन ।
ते तदीयजलजन्तवो न चेत्को नरः पयसि कश्च सिन्धुरः ॥ ३९ ॥
तज्जलभ्रमिभिराहितभ्रमा नन्दनोपवनपादपास्तदा ।
संप्रहर्तुमसमेक्षणं तया भ्रामिता इव गदा विरेजिरे ॥ ४० ॥
निम्नभागविनिपातसंभृता निस्तला रुरुचिरे जलभ्रमाः ।
गङ्गया निगमसेतुसंस्तवादार्जिताः प्रणवमण्डला इव ॥ ४१ ॥

आदिभिक्षुगृहिणीं यवीयसीं सा सभाजयितुमुद्यता दिवः ।
आजहार विविधानि भूषणान्यम्बराणि च महेन्द्रमन्दिरात् ॥ ४२ ॥
मुक्तदिव्यतरुपुष्पवृष्टयः श्लाघनोक्तिमुखराश्च सर्वतः ।
आहृता लहरिमारुतैस्तथा सिद्धचारणगणाः सहाययुः ॥ ४३ ॥
उद्गताभिरितरेतराहतादूर्मिभिः सुरगणः समुच्छ्रितः ।
आसदत्सदनमेव वेधसः को न तच्छ्रयति तज्जलाप्लुतः ॥ ४४ ॥
वीचिवेगपरितुष्टसंपतत्पाकशासनपताकिनीसखी ।
योद्धुमुद्यतवतीव वाहिनी सा जगाम सविधं महेशितुः ॥ ४५ ॥
आ विरिञ्चिगृहमा हिमाचलं निर्मला रुरुचिरे तदूर्मयः ।
स्वर्वधूभिरभितो दिदृक्षया पातिता इव कटाक्षरेखिकाः ॥ ४६ ॥
प्राप्य शंकरकपर्दकन्दरं संभ्रमन्निह तदूर्मिमारुतः ।
क्रोशति स्म सुरसिन्धुमुद्यतां मा पतेति विनिवारयन्निव ॥ ४७ ॥
सानुरागबहुमानमानतां सा शिवामभिकपार्श्ववर्तिनीम् ।
एकया किल तरङ्गरेखया पाणिनेव मृदुलं परामृशत् ॥ ४८ ॥
तत्प्रवाहमुखवल्गदूर्मिकाशीर्णशीकरसमुत्थितास्तदा ।
ताडिता इव महोपलैस्ततो दूरदूरममरा विदुद्रुवुः ॥ ४९ ॥
कोपलेशपरुषैरवज्ञया कूणितैरपि विलोचनाञ्चलैः ।
पश्यति स्म पतनोन्मुखीं नमीनीषदुन्नमितकन्धरो हरः ॥ ५० ॥
यावदानमयते यथापुरं द्रष्टुमुन्नमितमीश्वरः शिरः ।
तावदेव निपपात तत्र सा विस्मयाय मिपतां दिवौकसाम् ॥ ५१ ॥
शापकोपकलुषेव सा विधिं संनिमज्य सुचिरं विनिर्गता ।
तत्कपालमपि शांभवे शिरस्याजघान परुषाभिरूर्मिभिः ॥ ५२ ॥
तस्य पञ्चमशिरोनिपातनादर्धदुर्मरणमापपात यत् ।
पातकं परिजहार तद्भवं पावनेन पयसा वियन्नदी ॥ ५३ ॥
तज्जवादुपहृतं दिवौकसां तस्य मूर्धनि विमानमण्डलम् ।
वेत्रदण्डवलनेन नन्दिनो दिक्षुखेषु निपपात दूरतः ॥ ५४ ॥

केयमार्द्रयति मस्तकं गुरोस्तद्भसेय निखिलाममूमिति ।
किंचिदुच्छ्रितकरे गजानने हुंकृतान्यकृत सत्रपं शिवः ॥ ५५ ॥
वीचिमारुतवितीर्णपारणामांसलाः शिवकपर्दपन्नगाः ।
संप्रसार्य फणमापदस्ततः संररक्षुरमृतांशुरेखिकाम् ॥ ५६ ॥
अप्रतर्क्यमसमीक्षितावधिं तं कपर्दवलयं पिनाकिनः ।
आपगा दिविषदामवाङ्मुखी पन्नगीव कलशं समाविशत् ॥ ५७ ॥
तज्जटासु विशती वियन्नदी सा कियत्पथमदृश्यतामरैः ।
शुश्रुवे तदनु तज्जलारवो यस्य किंचिदपलभ्यते ततः ॥ ५८ ॥
तज्जटापटलकन्दरोदरस्वीकृताः सुरनदीमहोर्मयः ।
लेशतोऽपि किल नाललक्षिरे सत्क्रिया इव कृतघ्नगोचराः ॥ ५९ ॥
मूर्ध्नि तस्य मुहुराहितभ्रमा प्राप सा न पदवीं निवर्तितुम् ।
दुर्लभं ननु जगत्सु देहिनां तं प्रविश्य विनिवर्तनं पुनः ॥ ६० ॥
अभ्यषिञ्चदमरापगा शिवं यच्छ्रुतिव्यतिकरानघैर्जलैः ।
तेन किं नु सुकृतेन भूयसा तत्क्षणाल्लयमवाप तत्र सा ॥ ६१ ॥
तापितासु नयनाग्निहेतिभिस्तज्जटासु पतितास्तदूर्मयः ।
अम्भसां पुनरतिप्रबन्धतः क्लेदमात्रमदिशन्कथंचन ॥ ६२ ॥
ज्ञातमित्यथ समीपवर्तिना नन्दिना सविनयं निवेदिते ।
सव्यपाणिविधुता जटाः पुनः शंकरः परिबबन्ध पन्नगैः ॥ ६३ ॥

कपर्दममरापगासलिलसेकसान्द्रीकृतं
विधुन्वति सविभ्रमं पशुपतौ विकीर्णास्ततः ।
क्वचित्सुरपुरंध्रयः क्वचन यक्षविद्याधराः
क्वचिच्च परमर्षयः समवलन्त संमूर्च्छिताः ॥ ६४ ॥
यावद्व्योमविटङ्कसंकुलचलत्कल्लोलकोलाहलै-
राया भीमवधारयन्दुहितरं प्राप्तस्तुषाराचलः ।
तावत्पीतसुरापगोदकपुनर्व्याधूतसंदानिताः
संमृष्टाश्च पटाञ्चलेन शिवया शंभोरपश्यज्जटाः ॥ ६५ ॥

अक्लिष्टपन्नगमजर्जरितेन्दुरेख-
मव्यस्तकाशकितवस्तबकावतंसम् ।
शंभोरदृश्यत शिरः सुरसिन्धुमुक्त-
दिव्यद्रुमप्रसवसौरभसारसान्द्रम् ॥ ६६ ॥
प्रणमदमरग्रामप्रस्तूयमानमहास्तव-
स्तवकितगुहामूलाः कैलासशैलतटास्तदा ।
प्रशमितवियद्गङ्गाहंकारसंकथनादृत-
प्रमथपरिषच्छन्नाः किं नाम नादधतेऽद्भुतम् ॥ ६७ ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध-निर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते गङ्गावतरणे गङ्गावतारो नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

ततो जटाभिर्गिरिशस्य पीते तावत्यपि स्रोतसि देवसिन्धोः ।
भगीरथोऽपि प्रमथैः सहैव विसिस्मिये प्रागथ विव्यथे च ॥ १ ॥
तुष्टो विरिञ्चः प्रससाद शंभुर्लब्धा च गङ्गा फलितं किमेतैः ।
आराधनीयं वलयं जटानामज्ञासिषं येन न लेशतोऽपि ॥ २ ॥
संध्यासु दिष्ट्या यदि नृत्यतोऽस्य संशीर्य या कापि जटापतिष्यत् ।
कल्पान्तसंभेददुरुत्तरापि सप्तार्णवी केव तदाभविष्यत् ॥ ३ ॥
आभाष्य गङ्गामवतार्य तामप्यासादिता येन न कार्यसिद्धिः ।
सोऽहं विलज्जः पुनरद्य तस्याः संजीवनायैव कथं यतिष्ये ॥ ४ ॥
निर्विद्य किंचिन्नृपतिस्तदैवं धैर्यं परं धारयति स्म भूयः ।
नायं गुणोऽस्य प्रकृतिर्यदेषा चुक्षोभ किंचिद्यदसौ स दोषः ॥ ५ ॥
समानयेयं पुनरभ्रगङ्गां संपादयेयं यदिवापरां ताम् ।
तदस्ति किं यत्तपसामसाध्यमिति प्रपेदे पुनरिन्दुमौलिम् ॥ ६ ॥
प्रसादयामास भगीरथस्तं वाग्भिः पुरेवात्वरितो महेशम् ।

---

१. 'वाक् पुरेवात्वरितो महेशम्' इति मातृकायाम्.

आद्यं विदुः साधनमर्थसिद्धेरसंभ्रमं कार्यविपर्ययेऽपि ॥ ७ ॥
कल्पावसानेषु चतुर्दशापि जगन्ति यत्र त्वयि संविशन्ति ।
तत्रैकवेधोगृहदीर्घिकेयं लीना वराकी यदि का स्तुतिस्ते ॥ ८ ॥
कियन्ति पीतानि विधेः कपालैः कियन्ति वेगादवनौ निपेतुः ।
कियन्ति केशेष्वपि लिल्यिरे ते गङ्गोदकानीति कुतः स्मयस्ते ॥ ९ ॥
दिष्ट्या निपीता भवता नदीयं शक्त्या न तस्यास्त्वयि कः प्रसङ्गः ।
शङ्खाम्बु दत्तं कियदेव भक्तैः सहस्रधारं ननु मन्यसे त्वम् ॥ १० ॥
सद्यानि चूडोरगफूत्कृतानि सद्याश्च गौरीचरणप्रहाराः ।
तज्जानती नाथ जटापदे ते तस्थौ न गङ्गा स्वयमेव नूनम् ॥ ११ ॥
आस्तां हिमाद्रौ श्वशुरेऽनुवृत्तिरास्तां च भक्ते मयि तेऽनुकम्पा ।
चण्डी न दृश्या भगिनीवियोगशङ्काकुला किं प्रसताश्रगङ्गाम् ॥ १२ ॥
अस्त्वेवमासीद्यदि ते कपर्दिन्गर्भो जगद्भिस्त्रिभिरप्यपूर्णः ।
मूर्ध्नापि किं ते भवितव्यमेव गङ्गापि यस्य स्वपनाय नालम् ॥ १३ ॥
अभ्यर्थये त्वामथवा न गङ्गां कस्त्वं गृहीतुं पुनरुज्झितुं वा ।
स्तोष्यामि ता एव जटास्त्वदीया याभिर्निपीता कणवन्नदी सा ॥ १४ ॥
जटा नमो वश्चिरसंप्ररूढां रुद्धा पिपासामियतीं स्थिताभिः ।
युष्माभिरालिह्यत नान्तिकेऽपि दिष्ट्या पयोमण्डनिभोऽयमिन्दुः ॥ १५ ॥
जटा ललाटानलतापितानां पानोदकं किं नु वियन्नदी वः ।
यच्च न्यगीर्यन्त पदेपदेऽपि पयांसि तस्याः स किमूपदंशः ॥ १६ ॥
पीतं पयो वह्निति मा बिभीत भविष्यथ स्वस्थतराः पुरेव ।
चण्डीशमत्तभ्रमणेन यूयं सद्यः समुद्भ्रान्तजला दिनान्ते ॥ १७ ॥
भक्तार्पिताभिः कियतीभिरद्भिः कालो महान्येन कपर्द नीतः ।
स त्वं समासाद्य च तावदम्बु भूयोऽपि किं प्रागिव भिक्षुकोऽभूः ॥१८॥
इत्थं चमत्कारतरङ्गिताभिस्तुतोष तस्य स्तुतिभिर्महेशः ।
साहित्यमर्मावगमे क्षमेत सर्वज्ञमीशं तमृते परः कः ॥ १९ ॥
मोक्तुं नदीमानमनानभिज्ञं मूर्धानमीशो नमयांबभूव ।
भक्तैकरक्षाव्रतदीक्षितानां दूरे स्वमानद्रढिमाभिमानः ॥ २० ॥

ये श्रुश्रुवुर्गर्वकिरो गिरः स्वास्तेष्वेव पश्यत्सु सुधाशनेषु ।
हीणेव निर्गन्तुमवाङ्मुखी सा ततोऽपतद्विन्दुसरस्युदारे ॥ २१ ॥
तान्येव यादांसि महाद्भुतानि ता एव पर्यासदिशो लहर्यः ।
येतुः कपर्दात्पुनरिन्दुमौलेर्गर्वोक्तयस्ताः क्व गता न विद्मः ॥ २२ ॥
तामापतन्तीमवनौ कपर्दादाकुञ्चितादीषदिवेन्दुमौलेः ।
दूरादमन्यन्त विलम्बमानां मालामिव द्रोणमयीममर्त्याः ॥ २३ ॥
सा तत्र सिन्धुः सरसि क्षरन्ती स्रोतांसि सप्त स्वयमाबभार ।
त्रिभिः प्रतीचीदिशमाववार त्रिभिश्च सा तैर्दिशमिन्द्रगुप्ताम् ॥ २४ ॥
आमन्त्र्य मूर्ध्ना प्रणतेन शंभुमारुह्य च स्यन्दनमग्रतस्तम् ।
संप्रस्थितं पार्थिवमन्वयासीत्स्रोतः परं कीर्तिरिवास्य मूर्ता ॥ २५ ॥
गङ्गोर्मिभिर्मन्दमनुप्रवृत्तैर्गच्छन्पुरस्तादथ तच्छताङ्गः ।
आकृष्यमाणामलशृङ्खलस्य गन्धद्विपस्यापजहार शोभाम् ॥ २६ ॥
क्वचित्पतन्ती क्वचिदुत्पतन्ती क्वचिच्च यान्ती चिरमुत्पथेन ।
सा तत्र चण्डीशजटावनान्ते संभ्रम्य दिङ्मोहवतीव रेजे ॥ २७ ॥
पादे पतन्ती परितः स्पृशन्ती गात्राणि पर्यङ्कतले लुठन्ती ।
कालाद्बहोरुत्कलिकावतीव कामं गुरोः सा विजहार पार्श्वे ॥ २८ ॥
दृष्टानि कौमारविहारकाले दृश्यानि नीहारगिरेस्तटानि ।
द्रष्टुं चिरात्कौतुकशालिनीव सा सर्वतस्तत्र समारुरोह ॥ २९ ॥
अस्तोदकायां मयि शंकरेण किं नाम मह्यं कृतवानसि त्वम् ।
नाहं सुता ते न गुरुर्मम त्वमिति क्रुधेवाथ जह्नौ हिमाद्रिम् ॥ ३० ॥
अथाद्रिशृङ्गादवतीर्य भूमौ सा तत्र मन्दं सरिदुच्चलन्ती ।
आरब्धयज्ञस्य जगाम जह्नोरभ्यर्णमालोकितुमाददेव ॥ ३१ ॥
मौलौ निवासादमृतांशुमौलेर्दक्षाध्वरध्वंसदृढव्रतस्य ।
संक्रान्ततद्रीतिरिवाभ्रगङ्गा जह्नोरवध्वंसयति स्म यज्ञम् ॥ ३२ ॥
मदूर्मिवेगापहृताः सुराश्च कियत्कियद्यत्र हविर्लभन्ते ।
किं तत्र नार्हं ग्रसितुं ममेति जघ्राह सर्वं हविरभ्रगङ्गा ॥ ३३ ॥

एतावदायस्यसि किं वृथैव जह्नो सकृन्मज्ज जले मदीये ।
स्वर्गं च याहीत्यनुगृह्णतीव तं मज्जयामास तरंगिणी सा ॥ ३४ ॥
सुराः पुरोडाशचरुध्रुवाज्यस्वीकारसातत्यगतक्षुधोऽपि ।
उदन्यया केवलमर्दिताः किमाकर्णमम्भः पपुरभ्रसिन्धोः ॥ ३५ ॥
पुरा पतन्ती मुकुटे पुरारेर्लेभे फलं या किल दुर्विनीतेः ।
भूयोऽपि सैवापचकार जह्नोः कुतः प्रकृत्या कुटिलोपशाम्येत् ॥ ३६ ॥
यामापतन्तीं महता रयेण संरभ्य तावज्जगृहे महेशः ।
तां लीलयैवापिबति स्म जह्नुस्ततोऽप्युदग्रा ननु तं प्रपन्नाः ॥ ३७ ॥
कायं मुनिः क्षत्त्रकुलप्रसूतः क्व सा नदी शंभुजटैकधार्या ।
अस्तामुना सैव यदि क्षणेन केनाधिगम्यस्तपसां प्रभावः ॥ ३८ ॥
राजर्षिरेको विचकर्ष गङ्गामन्यः पुनस्तां कवलीचकार ।
ब्रह्मर्षिभिर्धिग्धिगितः परं वा संन्यस्यतां किं नु तपोभिमानः ॥ ३९ ॥
जातैव नीता विबुधैरियं द्यां शप्ता निरुद्धापि च वेधसा स्याम् (?) ।
अस्ता शिवेनाप्यथ जह्नुना च कस्मिन्क्षणेऽजायत न प्रतीमः ॥ ४० ॥
कन्या तवेयं भवितेति देवैर्याचे मुने त्वामिति तेन चोक्तम् ।
जह्नुर्जहौ कर्णपुटेन गङ्गां कर्णादृते यच्छतु काङ्क्षितं कः ॥ ४१ ॥
रुद्धा चिरं यच्छ्रुतिसेतुमध्ये बद्धा चिरं यच्च जटासु शंभोः ।
सा निर्ययौ वासनया तयैव विशृङ्खलं कर्णपुटान्महर्षेः ॥ ४२ ॥
तां जह्नुकोपाद्यसनं प्रपन्नां कालाद्भहोः क्षोणितलेऽवतीर्णाम् ।
नद्योऽनुरक्ता इव तत्र तत्र तरङ्गहस्तैर्दृढमालिलिङ्गुः ॥ ४३ ॥
गच्छन्पुरस्तस्य रथो यथेच्छं गङ्गा च पश्चात्तमनुव्रजन्ती ।
प्रायेण धाटीग्रहणप्रसक्तौ बालावुभौ केलिपराविवास्ताम् ॥ ४४ ॥
प्रवर्तते पावयितुं प्रदेशं यं यं नदी सा पुर एव तस्याः ।
तं तं पुनन्तः स्वयमूर्मिवातास्तस्यै ददुर्नावसरं कदाचित् ॥ ४५ ॥

---

१. स्वर्वीचिशीकरासारचारसमीरकिशोरसंस्पर्शनेन निजदर्शनेन चाशेषकिल्बिषविशोषणात्केवलं सकलजनदेहनिर्णेजनमात्रलम्भितफलसलिलाम्' इति धर्मविजये दृश्यते.

भिन्दन्तमद्रीन्सरसीर्विशन्तं व्यापाटयन्तं च वनान्तराणि ।
प्रवाहमस्या नयति स्म यत्नाद्गीरथो मत्तमिव द्विपेन्द्रम् ॥ ४६ ॥
अन्योन्यसंभेदसमुच्छ्रितासु कल्लोलरेखासु कदाचिदस्याः ।
भूयः स्वलोकाक्रमसाध्वसेन दूरे सुरा दुद्रुवुरन्तरिक्षे ॥ ४७ ॥
स्वर्गादमर्त्यानवरोपयन्ती स्वच्छन्दतादुर्ललितैस्तरङ्गैः ।
मर्त्यानपि स्वाम्भसि मग्नमात्रान्दिवं नयन्ती विजहार गङ्गा ॥ ४८ ॥
विन्ध्यो गिरिः कुम्भजकोपभीतो गङ्गा च जह्नुग्लपितावलेपा ।
शङ्के समानव्यसनाविवेमौ समीयतुर्द्वौ सविधेऽथ काश्याः ॥ ४९ ॥
भक्त्या परित्यज्य गतिं सगर्वौ भक्तं पुरस्कृत्य भगीरथं च ।
विवेश विश्वेशितुरन्तिकं सा जानाति येनास्य जटाप्रभावम् ॥ ५० ॥
त्यक्तावशिष्टं कियदम्बु गाङ्गं सारूप्यभाजां कतमेन लभ्यम् ।
इत्थं सचिन्ते सति विश्वनाथे काशीमयासीदियमिङ्गितज्ञा ॥ ५१ ॥
त्रय्यन्तसिद्धाञ्जननिर्मलाक्षैस्तपोधनैरप्यनवेक्षितं यत् ।
आलक्ष्यते धाम तदेव यस्यामात्यन्तिकेनाक्षिनिमीलनेन ॥ ५२ ॥
यामभ्युपेताः परया समृद्ध्या भिक्षाशिनो दिग्वसना भवन्ति ।
यामावसन्तो भवबन्धमुक्त्यै देहार्ध एवाकलयन्ति दारान् ॥ ५३ ॥
भस्माङ्गरागाः शिरसः कपालं पात्राय माल्याय च जालमस्थ्नाम् ।
जना यदीयाः पुनराददानास्तनुं त्यजन्तीव न तु त्यजन्ति ॥ ५४ ॥
आतन्वतीमुज्झिततारतम्यमाब्रह्मकीटं जगदेकरूपम् ।
यामप्रबुद्धा इव पण्डिताश्च श्रेयः किमासादयितुं श्रयन्ते ॥ ५५ ॥
सारूप्यभाजो बहवोऽत्र शंभोश्चत्वारि वक्त्राणि पुनर्विधातुः ।
एकेन चैकं लवितव्यमित्थं प्राप्ते गतिः केति भणन्ति यस्याम् ॥ ५६ ॥
प्राञ्जजयन्ती सलिलावलेपात्प्राप्तं पुरो यं कमपि द्युसिन्धुः ।
तस्मिन्महेशे पुनरन्वगेव यस्यां परित्रस्यति तज्जटाभ्यः ॥ ५७ ॥
पठन्ति यस्यामथ पाठयन्ति प्राज्ञाः शतं निर्मिमिते कृतीश्च ।
अस्थीन्यपूतान्यहयो न धार्या भोज्यं विषं नेति तु नावयन्ति ॥ ५८ ॥
आसाद्य यत्राक्षरमेकमीशात्प्राणैर्विमुच्यार्धपथं प्रपन्नैः ।

सहे नराश्चेत्पशुपक्षिणोऽपि ····सर्वभूता स्म इति स्मयन्ते ॥ ५९ ॥
सा तत्र सिन्धुर्विशती प्रसन्ना सेव प्रसन्नाश्च गिरः कवीनाम् ।
गभीरतास्वादिमवेगमूलां स्पर्धामबध्नन्नितरेतरेण ॥ ६० ॥
मय्यागतायामपि मुक्तिदायां तीर्थैः किमेभिः किमथापि लिङ्गैः ।
इतीव काश्यामुभयानि तानि सा मज्जयन्ती शतशो व्यचारीत् ॥६१॥
अम्भोभरैराश्रममण्डलानि संप्लावयन्ती शतशो मुनीनाम् ।
प्रायेण तत्पापजिहासयेव ममज्ज गङ्गा मणिकर्णिकायम् ॥ ६२ ॥
आपाततः स्वाद्विव तत्त्वतस्तु क्रूरादपि क्रूरतरं यदम्भः ।
पीते कणेऽप्यस्य शरीरिणो यत्पिबन्ति हालाहलमप्ययत्नम् ॥ ६३ ॥
ऐश्वर्यलोभात्स्वमुपागतानां कर्णे जपन्किंचन देहभाजाम् ।
यः कोऽपि यस्यां कितवावतंसो भिक्षाकपालानि करेषु दत्ते ॥ ६४ ॥
भर्तुं स्वमेकं वपुरप्यशक्त्या प्रायः स्वतीराश्रयिणां जनानाम् ।
शिष्येषु विन्यस्यति या त्रिलोकसृष्टिस्थितिध्वंसमहाधिकारम् ॥ ६५ ॥
एकैकमस्याश्चुलुकं वहेयुरेते यदि केव भवेद्द्युसिन्धुः ।
इति क्षितीशे बिभयांबभूव पश्यन्प्रजास्तत्र महेशरूपाः ॥ ६६ ॥
ग्रस्ता जटाभिः प्रथमं पुरारेर्ग्रस्ता ततो या चुलुकेन जह्नोः ।
ब्रह्मर्षिभिः सात्र पपे दृशैव भग्नः सकृद्भज्यत एव भूयः ॥ ६७ ॥
सा वेगादथ मणिकर्णिकाजलान्तःसंपातप्रतिहृतिसंभवैर्धुसिन्धुः ।
व्याकीर्णैर्नवकुसुमैरिवाम्बुलेशैर्विश्वेशं विनयपरिष्कृता ववन्दे ॥ ६८ ॥

स्वच्छन्दप्रचरद्भगीरथरथक्रेंकारधाराश्रव-
प्रत्युद्यन्मुनिलोकलोचनपुटीनिर्वेदसर्वंकषैः ।
स्रोतोभिर्घनसारसान्द्रशिशिरैः स्वर्लोककल्लोलिनी
तामालिम्पदिवेन्दुचूडनयनज्वालाजटालां पुरीम् ॥ ६९ ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध-
निर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाचादीक्षितपौत्रेण
नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते
गङ्गावतरणे काशीप्रवेशो नाम षष्ठः सर्गः ।

सप्तमः सर्गः ।

अथ संनिहितं भगीरथं सरितं तामपि तद्रथानुगाम् ।
अवलोकितुमिच्छतां नृणामतुलस्तत्र बभूव संभ्रमः ॥ १ ॥
अगृहीतविवेकमापणानुपसंहृत्य सवेगमेकतः ।
पथिकान्वणिजोऽन्वयुञ्जत क्व नु सा सिन्धुरिति प्रतिक्षणम् ॥ २ ॥
स्थविरेषु गतेषु जाह्नवीसलिलोत्पीडभिया ततस्ततः ।
क्षणमध्ययनोपघाततः परितुष्टा बटवो विजह्रिरे ॥ ३ ॥
प्रलयेष्वपि ये न शिक्षिताश्चिरमानन्दवनीनिवासतः ।
मुनयः किल ते चिरायुषः सुरसिन्धूर्मिषु विस्मयं दधुः ॥ ४ ॥
चरमं ववृषे भगीरथः शिशिरैरत्र नदीपयः कणैः ।
पुरतस्तु तदा पदे पदे पुरयोषित्करलाजमुष्टिभिः ॥ ५ ॥
पथि दिव्यनदीभगीरथौ प्रचलन्तौ शनकैः सविभ्रमम् ।
अवलोक्य शिरोगृहस्थिता हरिणाक्ष्यो विदधुर्मिथः कथाः ॥ ६ ॥
स्खलनात्कचिदुन्नते पथि स्तिमितं पश्य रथं क्षिपन्त्यमी ।
रभसाहतचक्रमण्डला रथदण्डा इव जह्नुजोर्मयः ॥ ७ ॥
पतितामिह कर्णिकां चिरात्प्रतिलप्स्यार्पयितुं महेशितुः ।
किमियं मणिकर्णिकासरस्यवगाढा सरिदारसातलम् ॥ ८ ॥
सखि कर्षसि किं भगीरथं नयनैः प्रान्तनिविष्टतारकैः ।
अदसीयरथानुपातिनी ननु मुग्धे सुरसिन्धुरेष्यति ॥ ९ ॥
तमनुप्रहिणोषि किं दृशौ सखि नेमे पुनरागमिष्यतः ।
ननु चोपदिशाम एव ते प्रथमं तेन वयं प्रतारिताः ॥ १० ॥
इयदुच्चलितापि जाह्नवी न किमप्याहरतिस्म वस्तु नः ।
अनुमातु मृषातपस्विना हृदयस्थैव हृता गभीरता ॥ ११ ॥
इयमप्यपरा वराकिका दृगिवास्माकममर्त्यवाहिनी ।
अनुगच्छति तत्र तत्र तं पुरतो गच्छति यत्र यत्र सः ॥ १२ ॥
अवसन्तममन्दमारुतं जगदेनज्जयतो नृपादितः ।
स्वयमेव सखि स्मरः स्वयं शरचापावपि नाम संन्यसेत् ॥ १३ ॥

ननु दृष्टिपथेऽवतिष्ठसे नरनेतुः सखि दूरतो व्रज ।
प्रतिपश्यति सोऽपि चेदितः प्रलयोऽयं ननु पौरयोषिताम् ॥ १४ ॥
अलमेनमुदीक्ष्य निर्दयं सखि सौधादवरुह्यते [मया] ।
त्वमिहास्व मनो बहिर्गतं मम चेदेति निरुद्ध्य शंस मे ॥ १५ ॥
सरिदन्तरसंगमागसा स्वयमागन्तुमनिच्छतीमयम् ।
महिषीमुदधेरसंशयं मदनोऽयं नयते तदन्तिकम् ॥ १६ ॥
तरुणे शरदिन्दुसुन्दरे तरलापाङ्गवशंवदस्मरे ।
कृतमानपरिग्रहाः क्षणं किममुष्मिन्नपि सन्ति योषितः ॥ १७ ॥
अधिगोपय मैनमाशये सहसैवोत्सृज यात्वयं क्वचित् ।
ननु चायतपातिभिः शरैर्मदनो मर्मसु ताडयिष्यति ॥ १८ ॥
हिमशैलनिषण्णकिंनरीनयनोपान्तनिपीतशेषितम् ।
पिबतां नृपमेनमायतं नयनानां न किमस्ति नस्त्वपा ॥ १९ ॥
अपचित्य रसालपल्लवान्यधिरुह्य स्फटिकस्थलीमपि ।
अवलोकयितव्यमेवमप्ययि मुग्धे किमवेक्षसे हठात् ॥ २० ॥
त्वरयन्नुषिताः सुखेन नः स्वयमेवैनमवेक्षितुं नृपम् ।
प्रहरन्पुनरित्थमाशुगैः प्रसवास्त्रः कथमद्य जीयताम् ॥ २१ ॥
दहतीव विधौ वनप्रिये परुषं जल्पति कुप्यति स्मरे ।
स्वमनस्यपि खेदतापि ते किमयं निष्फलमीक्ष्यते चिरम् ॥ २२ ॥
इति कर्णपुटेन पार्थिवः कलयन्पौरविलासिनीगिरः ।
प्रचचाल तदा शनैः शनैः परिपश्यन्पुररामणीयकम् ॥ २३ ॥
तनया इव मातरं चिरादुपयातामुपगम्य जाह्नवीम् ।
प्रमदाद्भुतभक्तिशालिनो मुनयो वाग्भिरथोपतस्थिरे ॥ २४ ॥
अपहर्तुमुपायतो विधेर्जननिर्माणमहाधिकारिताम् ।
वितनोषि जनानजन्मनो यदसि प्रागमुनैव यन्त्रिता ॥ २५ ॥
वितरिष्यसि काङ्क्षितानिति त्वयि विश्वासमवाप्नुमः कथम् ।
अपसृत्य वपुर्वपुष्मतां ननु तेभ्यो न ददासि तत्पुनः ॥ २६ ॥

दिश देवि सुतान्दिश स्त्रियो दिश भोगानिति नार्थयामहे ।
जहिमो वपुरेव गृह्यतां तदिदानीमिति नो मनोरथः ॥ २७ ॥
दिश नः प्रणतैव वाञ्छितं सुरसिन्धो यदि लिप्ससे यशः ।
वपुरन्तमपि प्रतीक्षसे यदि काश्यां पुनरुक्तिरेव ते ॥ २८ ॥
अमृतं हृतवत्यसि ध्रुवं हरकोटीरमृगाङ्कसंगता ।
वयमप्यमृतार्थिनस्ततो भवतीमम्ब चिरादुपास्महे ॥ २९ ॥
वसवो बहवो विनाशिता न च गर्भे विधृतोऽपि षण्मुखः ।
भवतीं सुतनिर्घृणामतो वदितुं मातरिति त्रपामहे ॥ ३० ॥
निगमैस्तव संस्तवो महानपि सर्वज्ञशिरस्यवस्थितिः ।
परिहर्तुमतस्तवौचिती भवमूलं ननु चक्रकाश्रयम् ॥ ३१ ॥
सुखमास्व पुरीह याहि वा न पुनर्जातु यतस्व मत्कृते ।
भवितव्यपरिक्रमैः क्वचित्सकृदस्मानपि सिञ्च शीकरैः ॥ ३२ ॥
स्वतनूविषयामहंक्रियामपहातुं त्वयि मज्जतां सताम् ।
भुवनत्रयगोचरैव सा पुनरुन्मीलति हा किमद्भुतम् ॥ ३३ ॥
न विमुञ्चसि सावलेपतां ननु मुग्धे शमितापि शंभुना ।
किमपि प्रणतैव देहिनां किमुपारोहसि मस्तकस्थलम् ॥ ३४ ॥
इति जह्नुसुतास्तवोक्तिभिर्मुखरे तत्र मुनीन्द्रमण्डले ।
अवरुह्य भगीरथो रथादगमद्विश्वपतेरुपान्तिकम् ॥ ३५ ॥
शतशः परितोष्य शंकरं प्रणिपातैर्मुदितो भगीरथः ।
सुकुमारतरैः सुगन्धिभिः कुसुमैरर्चयति स्म वाञ्छयैः ॥ ३६ ॥
भव भूतपते विषाशनो भव भिक्षुर्भव भोगिभूषणः ।
तदपि प्रतिपत्तुमर्थये तव सारूप्यविडम्बनामहम् ॥ ३७ ॥
अयि लुब्धकताधिरोप्यतामपि वा भिक्षुकताभिनीयताम् ।
इयतैव किमर्थिनो नरा जहति त्वां कपटैकशिक्षिताः ॥ ३८ ॥
मदनान्तकविष्टपत्रयक्षुधिताह्लादनकङ्कणाङ्कया ।
अपि नोदरमन्नपूर्णया तव पूर्येत विनैव भिक्षया ॥ ३९ ॥

जटिलोऽसि दिगम्बरोऽसि यज्जितकामस्य तदर्हमेव ते ।
गुणगृह्य इतीदमुच्यसे किमपि च्छादय सव्यमङ्गकम् ॥ ४० ॥
स्वयमेव दिशन्मदीप्सितं वह निःश्रेयसदानशौण्डताम् ।
परथापि तदर्पयिष्यते ननु गङ्गामणिकर्णिकादिभिः ॥ ४१ ॥
भुवनत्रयभारवाहिना भवता मे भवितुं न कौतुकम् ।
भवदङ्घ्रिसरोजसेविषु प्रमथेष्वेकतरत्वमस्तु मे ॥ ४२ ॥
भवबन्धहरोऽस्मि देहिनामिति विश्राम्यतु वीरघोषणा ।
चतुरो यदि पूर्वमात्मनः श्रुथय त्वं त्रिजगत्कुटुम्बिताम् ॥ ४३ ॥
सति हेमगिरौ शरासने सति वेश्मन्यपि राजते गिरौ ।
भवता शिव भैक्षवृत्तिना क्रमितव्यः समयः कियानयम् ॥ ४४ ॥
वहसीन्दुमनेन किं भवेद्भवतो वस्तुषु सारवेदिता ।
भवदादरणात्कपालवद्भवति प्रत्युत तस्य हेयता ॥ ४५ ॥
त्रिपुरेषु परीक्षितं स्मितं मदनो वेद कटाक्षमीश ते ।
ननु नाम जनो जिजीविषुर्बहुमानं भवतोऽर्थयेत कः ॥ ४६ ॥
सकृदत्र समेयुषां नृणां शिरसि स्थापयसे सुरापगाम् ।
अमुमर्थमजानता मया कियदस्यै सरिते कृतं तपः ॥ ४७ ॥

इति स्तुवन्मुकुटनिवेशिताञ्जलिर्भगीरथः प्रणतशिवंकरं हरम् ।
न्यवर्तत क्षणगमनोपरोधतः क्व जाह्नवी प्रतिचलिता तटादिति ॥ ४८ ॥

अथ नृपमधिरूढस्यन्दनं यान्तमग्रे
सुरसरिदनुयान्ती वीचिभिर्मन्थराभिः ।
विहितजनकुटुम्बा संनिधौ दण्डपाणे-
र्बलवदनुगमेऽपि प्राप्तशङ्केव रेजे ॥ ४९ ॥

आचान्तो नयनैरपक्ष्मवलनैरायम्य पारैर्जनै-
र्धावं धावमुपावरुन्ध्य सरणिं सङ्घीभवद्भिः पुरः ।

स्पृष्टः साधय साधयेति लहरीहस्तैरिवान्वक्तया
त्रस्यन्त्या पुरशासनादतियथौ देवः स वाराणसीम् ॥ ५० ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध-
निर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाचादीक्षितपौत्रेण
नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते
गङ्गावतरणे विश्वेश्वरस्तवो नाम सप्तमः सर्गः ।

अष्टमः सर्गः ।

समतिलङ्घ्य पुरीमथ काशिकां स पुरतः प्रचचाल भगीरथः ।
सुरसरिज्जलसंप्लवसंभ्रमक्षुभितजानपदेन पथा शनैः ॥ १ ॥
नरपतेर्दधतीव सहायतां नगरपार्श्वचरी सरयूस्तदा ।
पथि पुनः स्वयमेव समागता परिचकर्ष नभःसरितं क्षणात् ॥ २ ॥
अनुसृतः सरितैष पलायते ननु[1] बलादनया ह्रियते हठात् ।
इति नृपः पशुभिः स निसर्गतो निजगदे पथि जानपदैर्जनैः ॥ ३ ॥
पथि चचाल भगीरथदर्शिते सुरनदी···नेदमहं स्तुवे ।
पथि तदाचरिते ननु तद्भुवा प्रकृतिमण्डलमेव नियम्यते ॥ ४ ॥
कियदितश्चलितव्यमिति श्रमव्यतिकरादनुयोक्तुमिवोद्यता ।
असकृदस्पृशदूर्मिकराग्रतः प्रचलितं पथि तं पुरतो नदी ॥ ५ ॥
चिरनिरूढमनोरथमालिका सुरनदी दयिताननचुम्बने ।
कलयति स्म मुखानि सहस्रधा सति समीपगते मकरालये ॥ ६ ॥
पथि विलम्ब्य विलम्ब्य पदे पदे गिरिगुहासु निलीय निलीय च ।
उपजगाम कथंचिदुपान्तिकं नववधूरिव नर्मसखस्य सा ॥ ७ ॥
अनशनव्रतकर्शितकुम्भभूसलिलपारणसंशयिताम्भसः ।
अवततार बिले किल केवले जलनिधेरथ भूमिपते रथः ॥ ८ ॥
तमसि तत्कुहरोपहिते महत्यनुचिता तपनातपसंकथा ।
तपन एव यदि स्वयमापतेद्भवति कज्जलपिण्ड इव क्षणात् ॥ ९ ॥

---

१. मातृकायां 'न न बलादनया' इत्येव वर्तते.

उपनिपत्य पुरेव पिपासया जिगमिषन्ति न यावदितोऽन्यतः।
जलधरा इति तावदबिन्धनो हुतवहः किल तानपि जग्रसे ॥ १० ॥
प्रतिनवाम्बुदशीकरसेचनप्रकटितोष्मणि तत्र हि यादसाम्।
ज्वरमधत्त यथा जलदागमो न तु तथा मधुमासविपर्ययः ॥ ११ ॥
प्रतिनिदाघविरामसमाहितैर्जलधराम्बुभिराहितवृत्तयः।
कतिचिदासत कण्ठगतासवो जलपतेः पुरि तोरणवालकाः ॥ १२ ॥
पतिभिया निपतेयुरितोऽद्रयः क्षितितले जगदण्डमितः स्फुटेत्।
तदनु चावरणोदकमुत्पतेदिति मनोरथमूहुरिह स्थिताः ॥ १३ ॥
प्रियतमाभिगमाय सुदूरतोऽप्युपगताः सरितो जलदागमे।
तमनवेक्ष्य शुचेव तदास्पदे प्रथम एव पदे विलयं गताः ॥ १४ ॥
क्षितिभृतः कुलिशाहतिकातराः शरणमित्यभजन्त यमर्णवम्।
स च बभूव कथा परिशेषितो विधि····रां मुखता ननु तादृशी ॥१५॥
कवलितास्तिमिभिः शफरार्भकाः सुखममंसत जीवनतो मृतिम्।
सलिलशालिषु तद्वदनाध्वसु क्षणपरिक्रमणोत्सवलिप्सया ॥ १६ ॥
क्वचन भानुसुतादिमहानदीपतनतः शिशिरास्विव भूमिषु।
परिमितानभितस्तनुशोषणाज्जलधरानवलोक्य शुशोच सः ॥ १७ ॥
रविकरोपनिपातविशोषितस्फुटितकर्दमरन्ध्रनिरन्तरम्।
बिलमवेक्ष्य बिभाय स वारिधेः सुरनदी सलिलव्ययशङ्कया ॥ १८ ॥
चिरमनेन पथा परुषोष्मणा प्रतिनिशं प्रचरन्नपि चन्द्रमाः।
कथमहो न कदापि विलीन इत्यसकृदाकलयन्स विसिस्मिये ॥ १९ ॥
अथ भगीरथदेवपथानुगा सुरनदी तदवाप बिलं भुवः।
प्रथममावसथादिव वेधसः प्रमथनाथजटागहनोदरम् ॥ २० ॥
सति सरस्वति सन्ति पयोधराः सति तदम्भसि सन्ति च सिन्धवः।
तदिह काम्बुकथेति विषीदतामभयदेयमजायत यादसाम् ॥ २१ ॥

---

१. 'कथापशेषितो' इति मातृकायाम्. २. सरस्वति=समुद्रे. 'सरस्वान् सागरोऽर्णवः' इत्यमरः.

कियदिदं परिपूरयितुं भवेत्सगरसूनुनखाग्रकृतं बिलम् ।
इति पतद्भिरपि स्वयमन्धरं सिमसिमायितमेव तदूर्मिभिः ॥ २२ ॥
समदवल्गदमर्त्यतरङ्गिणीशफरवर्गनिरीक्षणलज्जिताः ।
अनुबभूवुरहो नु महोत्सवं तमपि सिन्धुशया जलजन्तवः ॥ २३ ॥
मधुरिमैकरसापि सुरापगा लवणतामगमत्पतितार्णवे ।
भुवनमूल्यरसापि हि साहिती कुकविवक्त्रगता कुरुते व्यथाम् ॥ २४ ॥
सुरनदीसलिलानिलताडितः परिजहौ भसितावरणं पुनः ।
अधित धूममथाग्निरबिन्धनः सति समीपतले पुनरार्द्रिते ॥ २५ ॥
पयसि संभृत एव यथापुरं जलनिधौ मिलिता जलजन्तवः ।
यदि भवन्ति कथंचन संपदो भवति का स्वजनेषु दरिद्रता ॥ २६ ॥
सगरनन्दनरन्ध्रसमुत्पतद्भुजगराजपुरीतिमिरावृते ।
जलनिधेः कुहरे लुठनादभूत्सुरनदीसलिलेष्वपि नीलता ॥ २७ ॥
समुपलभ्य पयांसि यथापुरं मुमुदिरे न तथा जलमानवाः ।
सलिलशोषदशासु लयं गतान्समनुचिन्त्य शिशूनरुदन्यथा ॥ २८ ॥
समधिकोष्मणि तत्र विलिल्यिरे निपतिताः प्रथमे सरिदूर्मयः ।
सपदि पूरितसागरवीचिकाप्रतिहताश्चरमे तु निवर्तिताः ॥ २९ ॥
चुलुकितो मुनिनापि गतत्रपः परिजुघोष पुरेव तदार्णवः ।
मतिमता ध्वनितव्यमदोषवत्क इव वेद गतं सदसच्च वा ॥ ३० ॥
अयमगाहत शोषमिह स्थिता जलचरा बहवः प्रलयं गताः ।
इति तदम्बुनरा मुदिताः क्षणादकथयन्गतकल्पकथामिव ॥ ३१ ॥
अथ पतन्तमसुं नृपते रथं तमपि सागरपूरणनिस्वनम् ।
युगपदेव पपुः सुखमीक्षणैरनिमिषैरहिलोकपुरंध्रयः ॥ ३२ ॥
फणधरालयमूलनिवासिनं[1] प्रमथनाथमवेक्ष्य भयेन वा ।
क्षणनिरुद्धतरङ्गरया पुनः परिपपात भगीरथबोधिता ॥ ३३ ॥
कनकभूधरमूलमणित्विषा गलितसंतमसेऽथ रसातले ।
भुजगराजभुजार्गलपालितां धुरि ददर्श स भोगवतीं पुरीम् ॥ ३४ ॥

१. 'निवासिनप्रमथनाथ' इति मातृकायाम्.

प्रवसतो विनिवर्तयितुं पतीन्कृतधियः किल यत्फणिकन्यकाः ।
पथि कुहापि तदीक्षणगोचरे परिनिपत्य भवन्ति गतज्वराः ॥ ३५ ॥
स्वयमुपेतसमीरकृताशनैः स्फुटितभूविवरोदरशायिभिः ।
फणधरैरनपेक्षितवेतनैः प्रभुरवर्तत यत्र स वासुकिः ॥ ३६ ॥
सदनमेत्य स जग्धिकृते सखीन्समुपहूय निवेश्य च पङ्क्तिशः ।
विदधति व्यजनैरुपवीजनं किमपि यत्र मुखेष्वनिलाशनाः ॥ ३७ ॥
सति फणावलयातपवारणे सति च तन्मणिदीपशिखाङ्कुरे ।
घनतटिज्जटिलेषु घनागमेष्वभिसरन्ति न यत्र फणिस्त्रियः ३८ ॥
न विधुरस्ति न दक्षिणमारुतः क इव तद्विधुरः कुसुमायुधः ।
तदपि शासनमस्य दुरुत्तरं शिरसि बिभ्रति यत्र फणिस्त्रियः ॥ ३९ ॥
कतिचिदच्युतमञ्चकुलोद्भवाः कतिपये हरकुण्डलवंशजाः ।
रविरथाश्वगुणान्वयजाः परे तदिह तार्क्ष्यभयं न यदोकसाम् ॥ ४० ॥
अधुतसिद्धशिरोमणिभूषणो ग्रथनविश्लथनासहकञ्चुकः ।
अधृतकुण्डलमुग्धमुखाम्बुजो जयति यत्र भुजङ्गवधूजनः ॥ ४१ ॥
सति महावरणेऽपि हि यज्ञना न दधते परिखाखनने त्वराम् ।
तनुतराब्जभवाण्डकरण्डकाधरकपालपरिक्षतिशङ्कया ॥ ४२ ॥
परिपतत्सु ततः स समन्ततः स्वमवलोकयितुं पुरवासिषु ।
बहिरभीतवदास्त हृदा पुनः परिजजाप पतङ्गपतेर्मनुम् ॥ ४३ ॥
पतति तत्र सुधाशनदीजले फणधराः कतिचित्पथि पातिनः ।
प्रविशिशुर्भयसंकुचिताङ्गका रथविटङ्कपदेषु महीपतेः ॥ ४४ ॥
प्रमथनाथजटापटलापतत्फणधरेन्द्रमुखादखिलां कथाम् ।
श्रुतवतां किल तन्नगरौकसां सुरनदी न बभूव भयावहा ॥ ४५ ॥
प्रविशतीषु रसातलमण्डलं त्रिदशसिन्धुजलोरगपङ्क्तिषु ।
अजनि बन्धुसमागमसंभवः फणभृतां प्रतिमन्दिरमुत्सवः ॥ ४६ ॥
अथ परीत्य स भोगवतीं पुरीममरसिन्धुसखो वसुधेश्वरः ।
शुचि विविक्तमनोरममासदद्भगवतः कपिलस्य तपोवनम् ॥ ४७ ॥

---

१. 'सदनमेत्य स' इत्येव मातृकायाम् (सदनमेत्य च ?).

कपिलकोपहुताशनसंभृतं स पुरतः पितृभस्म निरीक्ष्य तत् ।
प्रमदशोकसमागममूर्च्छितो द्विविधमश्रु दधौ युगपद्दृशोः ॥ ४८ ॥
अथ रथादवतीर्य भगीरथे सगरजानुपसर्पति वीक्षितुम् ।
भसितराशिममज्जयदम्भसा भगवती सुरलोकतरङ्गिणी ॥ ४९ ॥
सुरसरित्कवलीकृतशेषितं दिवि यदास्त पदं त्रिदिवौकसाम् ।
तदपि तत्क्षणनिर्हृतकल्मषैरपहृतं बलिभिः सगरात्मजैः ॥ ५० ॥
प्रथमलब्धसुरालयसंभृतप्रतिनवामृतपानगलत्तृषः ।
तदपवर्जितमञ्जलिमम्भसामपि पपुः पितरः सुतवत्सलाः ॥ ५१ ॥
अथ नदीमवगाह्य विनिर्गतः क्षितिपतिः परिपूर्णमनोरथः ।
मृदुगभीरपदामशृणोद्दिवि स्तुतिं·····चतुराननगुम्फिताम् ॥ ५२ ॥
न सगरोऽयमविन्दत नांशुमान्न च भवज्जनकस्तपसि स्थितः ।
तमपि लब्धवतोऽद्य मनोरथं तव यशो न गिरां पथि वर्तते ॥ ५३ ॥
श्रुतिगिरोऽपि विचित्य विचित्य यं विफलयन्ति परिश्रममात्मनः ।
समुपलभ्य तमेव महेश्वरं क इव नाम नियोजयितुं प्रभुः ॥ ५४ ॥
दशमुखोऽपि यदङ्घ्रिनियन्त्रितान्परिचकर्ष पुरा न भुजान्निजान् ।
क इव तस्य कपर्दपथंगतां सुरनदीमपि कर्षतु साहसी ॥ ५५ ॥
यदभजन्त दिवं सगरात्मजा यदपि सिन्धुरपूर्यत शोषितः ।
यदुपयन्ति नराश्च परं पदं तदखिलं तव तात तपोबलात् ॥ ५६ ॥
तव भगीरथ वत्स सुतार्थिनस्तनुभवा सरिदस्त्वियमादिमा ।
इति निशम्य गिरं परमेष्ठिनः परिजहौ स तपोजनितां व्यथाम् ॥ ५७ ॥
ततः समामन्त्र्य वियन्नदीं तां तदम्बुसंपातपथेन देवः ।
अपाङ्गपातैः फणिसुन्दरीणामनुद्रुतः प्राप तटं पयोधेः ॥ ५८ ॥
ततश्चिरादेत्य तटं पयोधेः प्रतीक्षमाणा नृपतेर्निवृत्तिम् ।
चमूसमेताः सचिवास्तदीयास्तमुत्पतन्तं सलिलादपश्यन् ॥ ५९ ॥
समुद्यतस्तस्य जलान्नृपस्य मुखेन मुग्धस्मितसुन्दरेण ।
उल्लासमासादयति स्म सेना वेलेव सिन्धोः शशलाञ्छनेन ॥ ६० ॥

---

१. 'समुद्यतः' इति षष्ठ्येकवचनम्.

तपोविपाकेन निसर्गतोऽपि तमप्रधृष्यं च शनैरुपेत्य ।
पौरैरहंपूर्विकया प्रणेमे तदग्रविन्यस्तमहोपहारैः ॥ ६१ ॥
दृष्ट्यानुकम्प्यानथ संबभाषे संभाषितव्यान्पुनरालिलिङ्ग ।
आलिङ्गितव्यान्प्रणनाम वीरः पौरैश्चिरादुत्सुकतां प्रपन्नः ॥ ६२ ॥
प्रख्यापितं प्राक्सुरलोकसिन्धुतरङ्गरेखाजयडिण्डिमेन ।
पृष्टं प्रधानैः सचिवैरुदन्तं संगृह्य वीरः स्वमुदाजहार ॥ ६३ ॥
अलङ्घ्यवाक्यैरथ बन्धुवर्गैरात्तैरमात्यैरनुजीविभिश्च ।
संप्रार्थ्यमानः सममंस्त वीरः स राजनेपथ्यविधिं तदानीम् ॥ ६४ ॥
मन्दाकिनीमज्जनपूतमेको विस्रंसयन्नस्य जटाकलापम् ।
उन्मथ्य मौलिं प्रथयांबभूव मुक्तामयैर्दामभिरेव सान्द्रम् ॥ ६५ ॥
स दुग्धसिन्धूदरजन्मनेव शुद्धेन रेजे श्रुतिमौक्तिकेन ।
कीर्त्येव कर्णंगतया दिगन्तसमाक्रमोदन्तनिवेदनाय ॥ ६६ ॥
आपाण्डरे चन्दनचर्चिकाभिरामुक्तमुक्तासरलोभनीये ।
वक्षःपदे तस्य चिरेण लक्ष्मीर्भस्माङ्गरागव्यसनं मुमोच ॥ ६७ ॥
चचार कर्णद्वयसानुरागे चित्ते यदन्तःपुरसुन्दरीणाम् ।
स तेन संरक्त इवाबभासे परिष्कृतः काञ्चनकञ्चुकेन ॥ ६८ ॥
स पादमूलग्रथितासिधेनुराबद्धतूणः समुपात्तचापः ।
मुखेन रक्तान्तविलोचनेन मूर्तो रसो वीर इवाबभासे ॥ ६९ ॥
हृष्टेन गङ्गानयानान्नदीनां पत्या धुरि न्यस्तमिवोपहारम् ।
सखायमुच्चैःश्रवसस्तुरङ्गं स पाण्डरं कंचिदुपारुरोह ॥ ७० ॥
पदेन किंचिच्चलितेन सैन्धवं भ्रुवा च पर्यन्तविलोलया चमूम् ।
प्रचालयामास समं भगीरथः शनैस्ततः सागरतीरवर्त्मना ॥ ७१ ॥
दृगन्तरान्धंकरणं फणाभृतां दिगन्तगन्धद्विपकर्णदारुणम् ।
मुकुन्दनिद्रारसमोषभीषणं बबन्ध भेरी पुरतोऽस्य मौखरीम् ॥ ७२ ॥
तदानकध्वानतरङ्गसंभ्रवैर्बबन्ध शय्या बलिहन्तुरन्धताम् ।
समीपमासेदुषि सा किमन्यथा विशङ्कमासीत विहंगपुंगवे ॥ ७३ ॥

दिवौकसः पाणिविहारमात्रतो दशोर्निकोचेन परं फणाभृतः ।
अनेन तेनापि नरा व्यवाहरन्नथ क्षणं गर्जति तस्य दुन्दुभौ ॥ ७४ ॥
कठोरधाराङ्कुशपातसंकुचत्सबृंहितोदस्तमुखा विषाणिनः ।
चमूचराः कोशवितीर्णसंभ्रमैर्निषादिभिर्दूरत एव निन्यिरे ॥ ७५ ॥
तनुच्छदासञ्जितचर्मपट्टिकानिबद्धकौक्षेयनिषङ्गकार्मुकाः ।
खलीनरज्जुग्रहणोच्छ्रिताननाः प्रचेलुरश्वाः पुरतोऽस्य सङ्घशः ॥ ७६ ॥
पताकिनीमूलचरो भगीरथः समन्त्रिवर्गैश्चतुररैतर्क्यत ।
अनुद्रुतः प्राक्चिरमभ्रगङ्गया स्वयं च तां किंचिदनुद्रवन्निव ॥ ७७ ॥
योधैस्तरङ्गाननु निष्पतद्भिर्भङ्गैश्च योधाननु धावमानैः ।
मिथो मृषा युद्धमिवाततान महार्णवस्तस्य बलार्णवेन ॥ ७८ ॥
प्राप्तोपगूहा इव वारिराशेः पर्यन्ततालीवनमर्मरेण ।
तरङ्गरेखाविलयान्तरेषु सेनारवाः शुश्रुविरे नृपेण ॥ ७९ ॥
दिव्यं पयः क्षोणितलेऽवतार्य संपन्नकीर्तिं तमिवानुकर्तुम् ।
भौमं रजो वाजिखुरप्रसूतं पताकिनी तस्य दिवं निनाय ॥ ८० ॥
सैनिकावतरदीर्घतरङ्गा संददर्श सरयूमविदूरे ।
सानुरागमुपगूहितुमग्रे संप्रसारितकरामिव देवः ॥ ८१ ॥
ततो विलम्ब्य क्षणमागमय्य पताकिनीमप्यनुसंपतन्तीम् ।
स राजचिह्नैरुपसेव्यमानः शनैरयोध्याभिमुखं प्रतस्थे ॥ ८२ ॥
तृष्णाकदुष्णं पततामभीक्ष्णं पौराङ्गनालोचनमण्डलानाम् ।
उत्सारणायेव स चामराभ्यां संवीज्यमानः शनकैरयासीत् ॥ ८३ ॥
तस्याग्रतो निर्मलमाबभासे साम्राज्यचिह्नं नवमातपत्रम् ।
पुरौकसां दर्शयितुं नृपेण नीतः कियानंश इवाभ्रसिन्धोः ॥ ८४ ॥
आलिप्तहर्म्याग्रपदं सुधाभिराबद्धहेमध्वजलोभनीयम् ।
संमृष्टरथ्यं च समन्ततोऽपि भगीरथस्तन्नगरं विवेश ॥ ८५ ॥
पताकिनीभिः प्रविशन्तमन्तर्लाजैरवर्षन्पुरयोषितस्तम् ।
गङ्गावतारावसरे पुरेव दिव्यैः प्रसूनैर्दिवि देवकन्याः ॥ ८६ ॥
आह्वादिभिर्मङ्गलतूर्यघोषैराशीवचोभिश्च समं जनानाम् ।
सौधाधिरूढैः शतशोऽवरोधैः संदृश्यमानः सदनं विवेश ॥ ८७ ॥

संभाव्य देवः क्रमशो द्विजातीन्बन्धूनमात्याननुजीविनश्च ।
द्वारान्तिकस्तब्धवधूसमाजसंबाधमन्तःपुरमाविवेश ॥ ८८ ॥
वियोगखिन्नास्तपसा विषण्णं स्वप्नेक्षिताः स्वप्नदशानुभूतम् ।
स्मेराननाः स्मेरमुखारविन्दं तमभ्युपेयुस्तरुणं तरुण्यः ॥ ८९ ॥
पादे निपेतुः परिरभ्य दीर्घं तस्थुर्मुखैस्तस्य मुखं चुचुम्बुः ।
संकल्पयोगाच्चिरविप्रलब्धास्तथापि तं नैव विशश्वसुस्ताः ॥ ९० ॥
संरक्षन्ननुजीविनो वितरणैः संप्रीणयन्नर्थिनः
पौराञ्जानपदानपि प्रतिदिनं पश्यन्दयादृष्टिभिः ।
आ वेधोगृहमा रसातलमपि स्वं नाम विश्रावय-
न्दीनत्राणकृता भुजेन बुभुजे देवः समस्तां भुवम् ॥ ९१ ॥
वाचं व्याकुरुते चिरंतनगिरं मीमांसते चोभयीं
पान्थः काव्यपथेषु पादकमले सक्तः पुरारेरिति ।
मामेतत्कथयिष्यतीति रचितं काव्यं मया तत्पुन-
स्तावद्वक्ष्यति वा न वा तदुपरि न्यस्तः समस्तो भरः ॥ ९२ ॥
साहित्यं न हि जानते कतिपये शास्त्रैकनिष्ठा यदि
क्षन्तव्यं विदुषामिदं क नु पुनः सर्वत्र सर्वज्ञता ।
उत्पन्नाः किल धूमकेतव इव क्लिश्नन्ति यत्साहितीं
दुर्वैदग्ध्यलवेन केचिदिह तद्दुःखाय विद्यावताम् ॥ ९३ ॥
अस्पृष्टाः कलयापि दुष्कविकुलैरज्ञैरनाकर्णिता
ज्ञानाज्ञानवतां कदाप्यपतिता दूरे दुरूहाध्वनि ।
खेलन्तु श्रुतिसंपुटीचुलुकिताः स्वैरं रसज्ञैर्जनैः
प्रत्युक्तिच्यवमाननूतनसुधासाराः कवीनां गिरः ॥ ९४ ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्ध-
निर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण
नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचिते
गङ्गावतरणे भगीरथनगरप्रवेशो नामाष्टमः सर्गः ।

समाप्तोऽयं ग्रन्थः ।

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC
SOCIETY

KÂVYAMÂLÂ. 77.

THE

DELARÂMÂ-KATHÂSÂRA

OF

RÂJÂNAKA-BHATTA-ÂHLÂDAKA.

EDITED BY

MAHÂMAHOPÂDHYÂYA PAṆḌIT S'IVADATTA

Head Paṇḍit and Superintendent, Sanskṛit Department,
Oriental College, Lahore,

AND

KÂS'ÎNÂTH PÂṆḌURANG PARAB.

Second Edition.

PUBLISHED

BY

PÂNDURANG JÂWAJÎ,

PROPRIETOR OF THE "NIRNAYA-SÂGAR" PRESS,

Bombay.

1923.

Px. L. 90

Price 7 Annas.

ORI-891
ORI 891.21
Raj Pal

Registered according to Act XXV of 1867.

(All rights reserved by the Publisher.)

PUBLISHER:—Pandurang Jawaji, } 'Nirnaya-Sagar' Press,
PRINTER:—Ramchandra Yesu Shedge, } 23, Kolbhat Lane, Bombay.

काव्यमाला. ७७.

राजानकभट्टाह्लादकविरचितो

देलरामाकथासारः ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना महामहोपाध्याय-
पण्डितदुर्गाप्रसादेन, मुम्बापुरवासिपर्णशीकरोपाह्व-
लक्ष्मणशर्मात्मजवासुदेवशर्मणा च संशोधितः ।

(द्वितीयावृत्तिः)

स च

मुम्बय्यां

पाण्डुरङ्ग जावजी

इत्येतैः स्वीये निर्णयसागराख्ययन्त्रालये मुद्रयित्वा प्रकाशितः ।

शाकः १८४५, खिस्ताब्दः १९२३.

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपतेरेवाधिकारः ।)

मूल्यं ७ आणकाः ।

काव्यमाला ।

राजानकभट्टाह्लादकविरचितो देलरामाकथासारः ।

प्रथमः सर्गः ।

नमस्कृतिर्यस्य परं सपर्यावर्याप्रसूनैर्न तु धूपदीपैः ।
सदैव युष्मान्महिमा प्रभूतः पायात्सदैवस्य हितस्य तस्य ॥ १ ॥
एषा कथा मौसलशास्त्रदृष्टा भूयिष्ठसद्वाच्यमहाविशिष्टा ।
मनोविनोदाय सतां जनानां गीर्वाणवाण्या क्रियते मयाद्य ॥ २ ॥
धनेशदिग्वारवधूसुवेशो देशो धरामण्डलहारिभूषा ।
अस्ति प्रभूताद्भुतवस्तुलाभो नाम्ना हलाभो जगति प्रतीतः ॥ ३ ॥
यत्राङ्गनालिङ्गनमद्यपानक्रीडाप्रपञ्चेष्वभवद्धि चिन्ता ।
कलिश्च नित्यं शुकशारिकासु मन्युः सपत्नीषु परस्परं च ॥ ४ ॥
कचग्रहस्तत्र मृगेक्षणासु नाशो बभूवाखिलदुर्नयेषु ।
पातोऽपि लीलाधृतकन्दुकेषु घातः स्मराख्यैस्तरुणेषु यत्र ॥ ५ ॥
वराङ्गनानूपुरयुग्म एव यत्र ह्रह्वं मुखरत्वमासीत् ।
प्रतोदघातस्तुरगेषु चापध्वनिः सुधासूतिवसन्तशत्रौ ॥ ६ ॥
सामर्षनारीपरिसान्त्वनेषु वचोहरप्रेषणमेव चासीत् ।
किं चापि नित्यं रतियुद्धकाले यूनां जनानामतिनिर्दयत्वम् ॥ ७ ॥
यत्राभवद्बाष्पजलप्रपातो बालाङ्गनानां नवसंगमेषु ।
पीडाभवच्चासुरदच्छदेन वातूलचेष्टा मधुघूर्णितेषु ॥ ८ ॥
वैवर्ण्यमासीन्मदनातुरेषु कम्पोऽभिषेकावसरे वधूनाम् ।
शङ्काभवत्तत्सुरताप्तिहेतोर्यस्मिन्पुरे चेतसि कामुकानाम् ॥ ९ ॥

वक्रोक्तिरासील्लटभाङ्गनासु नैष्ठुर्यमेतत्कुचमण्डलेषु ।
गर्ह्याप्यभूद्दुष्कृतकार्य एव नित्यं नराणां सुकृताश्रयाणाम् ॥ १० ॥
याच्ञाभवत्कामिजनस्य बालवराङ्गनालिङ्गनचुम्बनेषु ।
अधोगतिर्द्राग्जरतीस्तनेषु तदीयकेशेषु च मन्दभावः ॥ ११ ॥
कृशत्वमासील्लनोदरेषु छेदोऽपि पुष्पावचये तरूणाम् ।
स्तम्भोऽप्यनङ्गप्रभवोऽभिकेषु रते नवोढाकरुणप्रलापः ॥ १२ ॥
मनस्विनीसान्त्वन एव चाटु तद्भ्रूषु कौटिल्यमभूत्सुहारि ।
व्यथा हि कामाहिततीक्ष्णबाणपातेन पान्थेषु रतोत्सुकेषु ॥ १३ ॥
धिग्वाद आसीत्परिचुम्बनेन यूनां नवोढानवसंगमेषु ।
कोपः क्षणं भर्तृषु मानिनीनां कृतापराधेष्वपरारतेन ॥ १४ ॥
तत्राभवद्विश्रुतकीर्तिपूरः संग्राममध्ये प्रवरः सुवीरः ।
साधुर्दयालुः सरलोऽतिधीरो राजा सुरत्राणमहम्मदाख्यः ॥ १५ ॥
तस्यातिभक्ता हितकार्यसक्ता नानाप्रतीता खलु मेरभक्ता ।
बभूव चेतोहरकान्तिरूपा भार्या निजान्तःपुरमुख्यभूता ॥ १६ ॥
तया समं चापरकामिनीभिः शृङ्गारकेलीर्विविधाः स कुर्वन् ।
बभार नो जातुचिदेव राज्यकार्यादिचिन्तां हृदि निर्विमर्शः ॥ १७ ॥
त्यक्तप्रजाजस्रविचार्यकार्ये तस्मिन्प्रयाते विपुले च काले ।
अदर्शनालापवशादमात्यवर्या विरक्ता निखिला बभूवुः ॥ १८ ॥
तस्यैकदा भूमिपतेः पुरस्तान्निरीक्षितुं वक्त्रमुपानिनाय ।
सुनिर्मलं दर्पणमुच्चशोभं बाह्याङ्गने नापित एक एव ॥ १९ ॥
आदर्शमध्ये स ददर्श राजा वक्त्रं जरापाण्डुररोमकूर्चम् ।
ततः प्रदध्यौ सहसा विमुच्य तद्दर्पणं जातघनानुतापः ॥ २० ॥
इयत्यहो भूरितरे च काले यातेऽपदानं न हि किंचिदेव ।
अकार्षमुच्चैर्नरनाथयोग्यं वयोऽनयं निष्कलतावशेषम् ॥ २१ ॥
ध्यात्वेति तां रात्रिमथातिवाह्य प्रातर्वितीर्य स्वपुरे निजाज्ञाम् ।
विनिर्ययौ सर्वसहाययोधभृत्यान्वितः सन्मृगयां विधातुम् ॥ २२ ॥

---

१. 'सुल्तान्' इति यावनीभाषायाम्.

गच्छन्स मार्गे विशिखावलीभिर्निपातयन्प्राणिगणान्धरित्र्याम् ।
पार्ष्णिप्रहारातिसकोपवाजिवेगेन दूरं कटकाज्जगाम ॥ २३ ॥
प्रधाव्यमानप्रवराश्ववेगादेकं महागह्वरमाससाद ।
तत्रालुलोके वरवर्णशोभामेकां मृगीं निर्भयगामिनीं सः ॥ २४ ॥

तामीक्ष्य तत्र नृपतिर्निजचापदण्डा-
द्धन्तुं निशातविशिखं विचकर्ष सद्यः ।
सा व्याजहार हरिणी तु मनुष्यवाचा
त्वेकत्र रुद्धगतिरुद्भतविस्मयं तम् ॥ २५ ॥
राजंस्त्वदर्थमधुना हि समागताह-
माकृष्य बाणधनुषी इह संहरातः ।
किंचिद्वदामि सुमते क्षणमात्रमेव
यत्सावधानमनसा शृणु तत्समग्रम् ॥ २६ ॥
दुष्कर्मणार्जितविपत्तव भूपतेऽस्ति
या सर्वसद्विभववित्तविनाशकर्त्री ।
एतर्हि तर्हि यदि वाञ्छसि तत्समेति
त्वां साधुनैव सदृसा तु मदीयवाचा ॥ २७ ॥
किं तु त्वमिच्छसि तु चेत्परिणामकाले
तत्सांप्रतं भज मदीयगिरा स्वराज्यम् ।
ब्रूह्यद्य हृद्गतयथेष्टनिजाभिलाषं
त्वत्कारणात्त्रिदिवतोऽहमिहावतीर्णा ॥ २८ ॥
श्रुत्वेति तद्विरमसौ पृथुजातदुःखो
दोलाधिरूढहृदयोऽथ समभ्यधात्ताम् ।
जायामुपैमि ननु यावदहं क्षणेन
पृष्ट्वाम्ब तावदिह मद्दयया भव त्वम् ॥ २९ ॥
उक्ते तथेति स तया स्वपुरं प्रतस्थे
मार्गेऽथ संमिलितसैन्यभटानुयातः ।

गच्छज्ज्ञवेन सहसा निजराजधानीं
संप्राप्य वासभवनं निजमाविवेश ॥ ३० ॥
आनीय तत्र निकटं किल मेरभक्तां
दूरीकृताखिलजनो विजनं समेत्य ।
तस्याः शशंस नृपतिः स मृगीवचस्त-
त्प्रोद्भिन्नबाष्पजलगद्गदभाषितेन ॥ ३१ ॥
आकर्ण्य तद्गिरमुवाच तु मेरभक्तां
सा तं विमृश्य विपुलोद्गतचित्तपीडा ।
राजन्नुपैति यदि दुर्गतिरद्य शक्ति-
र्देहेऽस्ति किंचिदपि सोढुमुरुप्रयत्नम् ॥ ३२ ॥
प्राप्तेऽथ दारुणतरे परिणामकाले
शान्ताखिलेन्द्रियनितान्तघनावसादे ।
कुर्वः किमेव बत कुत्र तदा प्रजा वः
सर्वे हसन्ति हि यदङ्गुलिदर्शनेन ॥ ३३ ॥
तद्गच्छ तूर्णमित एव मृगीसमीपं
तां ब्रूहि भूमिप पुरो विनयात्प्रणम्य ।
मातस्त्वदीयवचसा तु विपन्नमाद्य
स्फीतव्यथां तु न सहे परिणामकाले ॥ ३४ ॥
इति निजदयिताया वाचिकं तन्निशम्य
रजनिमवनिपालः स्वावरोधेऽतिवाह्य ।
उषसि तु मृगयाव्याजेन दूरीकृतस्व-
भृतकसचिवसैन्यः काननं तद्विवेश ॥ ३५ ॥

इति राजानकभट्टाकादकविरचिते देलरामाकथासारे मृगीदर्शनानन्तरं नृपगमनं नाम प्रथमः सर्गः ।

द्वितीयः सर्गः ।

अथ सपदि कुतोऽप्यागत्य दत्तावधानां
स नरपतिरपश्यत्तां मृगीं काननेऽत्र ।

द्रुततरमुपसृत्य प्राह नम्रोत्तमाङ्गो
भवतु जननि हन्त व्यापदद्यैव सा मे ॥ १ ॥
वच इदमथ तस्याकर्ण्य सद्यस्तिरोभू-
द्विपुलजनितचेतोविस्मया सा कुरङ्गी ।
त्रिचतुरपदयातस्यावनीशस्य वाजी
सपदि विधिनियोगाद्धन्त पञ्चत्वमाप ॥ २ ॥
निजकटकसमीपप्राप्तमात्रेऽथ पद्भ्यां
सपदि धरणिनाथे दुःखनम्रोत्तमाङ्गे ।
विपुलसुभटचक्राक्रान्तसर्गमृगव्या(?)
विविधनिशितहेतिर्व्याधसेना जगाम ॥ ३ ॥
तदथ सकलसैन्यं हन्तुमभ्युद्यतां तां
सपदि शबरसेनां वीक्ष्य सर्वेऽप्यमात्याः ।
प्रवरहयगणानारुह्य तूर्णं तु जग्मु-
र्नगरमवनिपालं तं पदातिं विमुच्य ॥ ४ ॥
सकलविपुलसैन्ये विद्रुते ते पुलिन्दा
नरपतिमिममेकं वीक्ष्य दीनं पदातिम् ।
रुरुधुरथ समेत्य ज्यातले संनिपात्य
पृथुतरमुरुरज्वा दोर्युगं चापि बद्ध्वा ॥ ५ ॥
परिहृतसकलालंकारभूयिष्ठरत्नं
धरणिपतिमनन्दप्रत्तगात्रप्रहारम् ।
मुमुचुरथ कथंचिद्रज्जुबन्धं निवार्य
स्रवदपरिमितासृग्धारमेतं किराताः ॥ ६ ॥
तदतिघनरुषाथात्रान्तरे तत्सहायाः
सपदि ददुरमन्दानन्दितास्तत्स्वराज्यम् ।
द्रुततरमपरस्मै गोपुरे संनिधाय
प्रथितविपुलशौर्यात्रक्षिणो हेतिहस्तान् ॥ ७ ॥

इति निजपुरवार्तां तामजानन्स राजा
मुषितसकलभूषारत्नविच्छायशोभः ।
द्रुतपदमवरोधोत्कण्ठितोऽथ प्रतस्थे
शबरनिबिडबन्धायासितो राजधानीम् ॥ ८ ॥
कतिपयमथ वर्त्मातीत्य गच्छन्पुरस्ता-
न्नरपतिरथ पन्थां भेरभक्तां ददर्श ।
मलिनवसनभाजं स्वप्रियां तां रुदन्तीं
विगतनिजपरिष्कारां भिया क्षिप्रयान्तीम् ॥ ९ ॥

अथ तां निरीक्ष्य च कथंचिदेव स प्रविभाव्य भूमिपतिरात्मवल्लभाम् ।
घनतप्तबाष्पजलगद्गदस्वरो निजशोककारणमपृच्छदन्तिके ॥ १० ॥

अयि वैशसकारणं प्रिये वद केनासि नितान्तदुःखिता ।
विगतांशुकभूषणा कथं क्व च यासि द्रुतगामिनी पुरः ॥ ११ ॥
अथ सा विनतानना पतिं तमुदीक्ष्यावददश्रुगद्गदम् ।
सचिवैस्तव राज्यमर्पितं ह्यपरस्मै द्रुतमेत्य पत्तनम् ॥ १२ ॥
अहमप्यपनीतभूषणा नगरादद्य पलाय्य चागता ।
त्वमपि क्व नु यासि सांप्रतं यदि दृष्टो रिपुभिर्निहन्यसे ॥ १३ ॥
तदितस्त्वरितं तु कंचनापरदेशं हि मया सह व्रज ।
अनुकूलविधिस्तथापि ते यदहं संघटिता पुरोऽधुना ॥ १४ ॥
इति तद्वचनेन दुःखितः प्रविहाय स्वपुरस्पृहां नृपः ।
परदेशमथोपचक्रमे सहसा गन्तुमरातिसाध्वसात् ॥ १५ ॥

अथ स भूमिपतिर्दयितासखो गहनभूधरवर्त्म परिश्रमन् ।
कमपि देशमवाप्य चकार तद्वसतिमध्वघनश्रमखेदितः ॥ १६ ॥
न गुणवान्न च विक्रमलाञ्छनो न कवितापि च यत्र हि पूज्यते ।
परमसौ बत जीवति यः सदा नयति काष्ठचयं गहनान्तरात् ॥ १७ ॥
स नृपतिः सुकुमारशरीरवानपि दरिद्रतया विवशीकृतः ।
अधमवंशजनेऽपि विगर्हितामपि कुवृत्तिमजिग्रहदेव ताम् ॥ १८ ॥

प्रत्युषस्यपि निजप्रियार्पितापूप एव पथि भोजनाय सः ।
दूरवर्तिगहनान्तरं ययाविन्धनानयनहेतवे सदा ॥ १९ ॥
सायमेत्य विपिनात्पुरं प्रविश्यापणे तमपि काष्ठसंचयम् ।
वृत्तिमेष कुरुते स्म हन्त विक्रीतलब्धमितनिष्कसंख्यया ॥ २० ॥
एवमेव सुचिरं बभार विक्रीतकाष्ठनिचयेन जीविकाम् ।
प्रातरेव बत संततं व्रजन्सायमेत्य विपिनात्पुरं विशन् ॥ २१ ॥
द्वित्रियातपरिवत्सरावधौ काष्ठकष्टनिरतस्य तस्य सा ।
वल्लभा तु समजीजनत्सुतौ द्वौ क्रमेण शशिकान्तिसुन्दरौ ॥ २२ ॥
वृद्धिमापतुरथो क्रमेण तौ दारकौ रुचिरराजलक्षणौ ।
मातृपितृघनहर्षकारिणौ शैशवोचितमनोज्ञलीलया ॥ २३ ॥
..... ।
..... ॥ २४ ॥
..... ।
..... ॥ २५ ॥

इति राजानकभट्टाह्लादकविरचिते देलरामाकथासारे ..... नाम द्वितीयः सर्गः ।

तृतीयः सर्गः ।

..... ।
..... ॥ १ ॥
..... ।
..... ॥ २ ॥
..... ।
..... ॥ ३ ॥
..... ।
..... ॥ ४ ॥
..... ।
..... ॥ ५ ॥

..... ।
..... ॥ ६ ॥
..... ।
..... ॥ ७ ॥
..... ।
..... ॥ ८ ॥
..... ।
..... ॥ ९ ॥
..... ।
..... ॥ १० ॥
..... ।
..... ॥ ११ ॥
..... ।
..... ॥ १२ ॥
.....ह मातः ।
तुभ्यमद्य तु ददानि समग्रांस्तान्गृहाण सहसैव हि मत्तः ॥ १३ ॥
द्रव्यमन्यदधिकं ह्यत एतन्नैव रत्नमिह चार्हति लब्धुम् ।
नेयता यदि ददासि भवत्या नीयतामपरधाम तदद्य ॥ १४ ॥
सा निशम्य गिरमित्थममन्दानन्दितस्य वणिजस्तु विमृश्य ।
एवमस्त्विति जगाद पुरस्तात्संनिधाय धरणीपतिपत्नी ॥ १५ ॥
सोऽथ सार्थपतिरुद्धतहर्षस्तूर्णमेव विगणय्य समग्रम् ।
तत्समर्घ्यं च शतत्रयमस्यै भासुरं मणिमजिग्रहदण्डम् ॥ १६ ॥
तां ततः प्रमुदितः स बभाषे सन्ति चान्यमणयोऽस्य समानाः ।
तर्हि यद्यपि तवाद्य समीपं तान्समानय जनन्यखिलांस्त्वम् ॥ १७ ॥
दीयते खलु मयास्य समानं वित्तमम्ब विगणय्य समग्रम् ।
तन्निशम्य मुदिता नृपपत्नी सा तथेति तमथो निजगाद ॥ १८ ॥

साप्यशेषमथ तत्परिगृह्य स्फीतहर्षभरपूरितचित्ता ।
आययौ निजगृहं नृपपत्नी व्यापदन्तसमयं प्रविदन्ती ॥ १९ ॥
गूढमेव तदुपार्जितवित्तं सा निधाय विजने नृपजाया ।
कस्यचिन्न समभाषत नैवादर्शयच्च कृतसंवृतिरुच्चैः ॥ २० ॥
सा परेऽह्नि च समेत्य विहङ्गीपञ्जरान्तिकमुपात्तघनास्था ।
अद्वितीयमपरं च तदण्डं पश्यति स्म गुरुदीप्ति सुदीप्तम् ॥ २१ ॥
तं मणिं च परिगृह्य सहर्षाकृष्य मञ्जुलमुपञ्जरगर्भात् ।
तस्य नैगमवरस्य समीपं सा पणान्तरमथैत्य जगाम ॥ २२ ॥
तत्र तस्य तु यथा प्रथमस्मिन्[1]वासरे ननु तथैव तदह्नि ।
अण्डमेकमपरं च ततो विक्रीय वित्तमनयन्निजधाम ॥ २३ ॥
अथ सा तृतीयदिवसेऽपि तथा परिलब्धरत्नकृतविक्रयतः ।
समुपात्तवित्तनिचयेन तदा बहुशो जहर्ष सुखमाप भृशम् ॥ २४ ॥
इति संततप्तगुरुरत्नचया विहगीप्रसादवशतो ननु सा ।
सह तेन सार्थपतिना व्यधित व्यवहारमत्र न परेण समम् ॥ २५ ॥
अथ संभृतप्रवरचित्तचया स्वपतिं कदाचिदवदद्दयया ।
सततं कुटुम्बभरणाय विभो नितरां प्रताम्यसि कुवृत्तिवशात् ॥ २६ ॥
निजशिल्पकर्मवशतो द्रविणं मम विद्यतेऽद्य ननु किंचिदिह ।
परिगृह्यते तदत एव मया सदनप्रयासकरदासजनः ॥ २७ ॥
ननु सर्वथा स्वपतिरेव सदा परिरक्ष्यते वरकुलाङ्गनया ।
तदितः परं भव सुखी सुचिरं त्यज काष्ठकष्टकृतवृत्तिमिमाम् ॥ २८ ॥
करवै कुटुम्बभरणं तु कथंचिदपि स्वयं विविधयत्नशतैः ।
न सहे त्वदीयवपुषः सततं पृथुखेदमुत्तमगुणस्य विभो ॥ २९ ॥
इति भारतीं प्रियहितां नृपतिः स निशम्य तामथ निजां दयिताम् ।
प्रशशंस जातघनहर्षभरो विरराम चेन्धनचयाहरणात् ॥ ३० ॥

---

१. 'प्रथमे च' इति पाठः कल्पनीयः, प्रथमशब्दस्य सर्वनामसंज्ञकत्वाभावात्स्मिन्नादेशाप्रवृत्तेः ।

स ततः प्रभृत्यभवदत्र सुखी सुकुलीनसाधुविबुधैर्गुणिभिः ।
सह धर्मशासनकथाविबुधा धरणीपतिर्विरचयन्सततम् ॥ ३१ ॥
विहगीप्रसादपरिलब्धमहाद्रविणेन सा विपुलदासजनान् ।
समजिग्रहन्नरपतेर्दयिता निजमन्दिरे विविधकर्मकृते ॥ ३२ ॥
अपि केवलं स्वयमसौ नितरां सह तेन सार्थपतिना सततम् ।
मणिभिर्धनैर्विदधती प्रवरैर्व्यवहारमास्त सुखितात्र पुरे ॥ ३३ ॥
सततं तदीयसदनागमना परिजातसंस्तववशेन तु सा ।
गतयत्रणा विविधनर्महृता वणिजा समं रतिमचीकमत ॥ ३४ ॥
स्वगृहात्सदैव धनभोज्यसुरादिकमेतदीयसदनं सधनम् ।
उपनीय तेन वणिजैव समं ह्यधसत्पपौ भृशमरंस्त च सा ॥ ३५ ॥
प्रतिवासरं प्रचुररागहृता समभूत्तथैव किल सार्थपतौ ।
स्वधनेन रुच्यतममस्य कृते स्वयमेव भोज्यमपचत्तु यथा ॥ ३६ ॥
तं भर्तारमपि स्वकीयतनयौ तौ राजचिह्नाङ्कितौ
सर्वेस्वं मनुते स्म नैव च तदा सा **मेरभक्ता** तथा ।
रागग्रस्तमतिर्यथैव वणिजं तं दुष्कुलीनं शठं
स्त्रीणां दुश्चरितं न जातुचिदहो पापावहं शाम्यति ॥ ३७ ॥

इति देल्लरामाकथासारे वित्तप्राप्त्यनन्तरं वणिजा सह राजपत्नीसंगमो नाम तृतीयः सर्गः ।

चतुर्थः सर्गः ।

ज्ञानतीक्ष्णधिषणा बभूव तत्कालमस्य वणिजः स्वमन्दिरे ।
वृद्धयोषिदपि काचिदुच्चकैस्तत्कृपापरमना हि शाकिनी ॥ १ ॥
भोज्यभाण्डनिचयं सदा समादाय तत्र जरती विलोक्य सा ।
तां गतागतकरीं दिवानिशं सार्थवाहसदने विसिस्मिये ॥ २ ॥
एकदा समुपसृत्य साब्रवीत्सार्थवाहमथ वृद्धकामिनी ।
पुत्र सेयमिह संततं किमागच्छति प्रचुरभाण्डधारिणी ॥ ३ ॥
एतदागमनहेतुमत्र मे ब्रूहि पुत्र मम तथ्यमेव तत् ।
नैव गोपयितुमर्हसि ध्रुवं त्वं मया तनयवद्धि मन्यसे ॥ ४ ॥

हृद्गतं वद ममाधुना भृशं कौतुकं मम किलात्र वर्तते ।
वेद्म्यहं सकलबुद्धिचेष्टितं तद्ब्रवीमि हितकाम्यया तव ॥ ५ ॥
सोऽभ्यधादिति निशम्य भारतीं वृद्धयोषितमिमामथो वणिक् ।
मातरत्र तव किं वदाम्यहं स्त्रीमनो हि तरलं प्लवंगवत् ॥ ६ ॥
आययाविह निजात्पदाच्युतः कोऽपि भूमिपतिरम्बिके पुरा ।
सेयमस्य दयिता मदन्तिके जातुचिद्व्यधित रत्नविक्रयम् ॥ ७ ॥
तत्ततः प्रभृति जातसंस्तवा मां सदैव भजतेऽनुरागिणी ।
नैव मुञ्चति कदाचिदप्यसौ स्नेहबन्धमनिवारितं मयि ॥ ८ ॥
तत्स्वकीयधनसंचयाद्व्ययं नित्यमेव कुरुते निरन्तरम् ।
मामकं न हि तु किंचिदेव गृह्णाति वित्तमपि कल्पितार्थना ॥ ९ ॥
भारतीमिति निशम्य सा ततस्तं जगाद जरती वणिक्पतिम् ।
पुत्र चेदतिघनानुरागिणी सा भवत्यपि भवत्यनारतम् ॥ १० ॥
तत्स्वगेहविहगीं निहत्य चेत्त्वानुपानयति भोक्तुमद्य सा ।
मन्यते तदतिविस्मयान्मया प्रेम पूर्णमतिमात्रशोभनम् ॥ ११ ॥
सोऽब्रवीदिति निशम्य तामथो मातरत्र बत को हि संशयः ।
यत्र दुर्लभसुपीनमेष मां शासनं तु कृपयानयात्र किम् ॥ १२ ॥
साप्यभाषत विहस्य शाकिनी तत्त्वमत्र न हि वेत्सि नन्दन ।
विस्मयप्रदमिहाद्य विद्यते कारणं न वितथं मयोच्यते ॥ १३ ॥
तन्निशम्य गुरुजातकौतुकः सोऽत्र सार्थपतिरुच्चकैस्ततः ।
पक्षिणीपिशितभक्षणोद्यतस्तत्प्रतीक्षणरतोऽभवत्तदा ॥ १४ ॥
सा जगाम नरनाथवल्लभा सार्थवाहनिकटं तदन्तरे ।
सोत्सुका प्रचुरहर्षमानसा भोज्यपानभृतभाण्डधारिणी ॥ १५ ॥
तां विलोक्य स पराङ्मुखोऽभवन्नैव किंचिदपि चावदत्ततः ।
संजहार च तदाननोत्सुकां दृष्टिमुच्चतरमन्युमानभूत् ॥ १६ ॥
सा तथाविधमवेक्ष्य तं प्रियं जारमाह समुपेत्य तत्क्षणम् ।
भूतले विविधभोज्यसंभृतस्थापिताभिनवभाण्डसंचया ॥ १७ ॥

त्वत्कृतेऽहमविमृश्य तत्क्षणं तत्करोमि तदपि ब्रवीषि यत् ।
नापराधमपि वेद्मि चात्मनः स्तोकमप्यथ हि येन खिद्यसे ॥ १८ ॥
तावकीनवचनामृतं मया केवलं दयित काङ्क्ष्यते सदा ।
किं पराङ्मुखमवस्थितो भवान्मन्दभाग्यवशतो मम प्रभो ॥ १९ ॥
वेत्सि किंचिदपराधमद्य मे यद्यहो तदपि किं प्रतीक्ष्यसे ।
रोचितं यदिह तत्कुरु प्रभुस्त्वं ममाहमपि चेटिका तव ॥ २० ॥
नाथ किंचिदपि नोऽभवत्समाराधनाय मम चास्ति दुष्करम् ।
तत्प्रसीद वद सांप्रतं द्रुतं हृद्गतं यदिह तन्महामते ॥ २१ ॥
अर्थ्यतां च भवता यदीप्सितं विद्यते मम यदेव दुर्लभम् ।
जीवितं यदनुरागतो मया दीयते परधने तु का कथा ॥ २२ ॥

इत्यस्या गिरमुपकर्ण्य सार्थवाहः प्रत्याहाथ सपदि मन्दमन्दवाचा ।
किं ब्रूमो यदपि नितान्तनीरसं तन्मांसं मे निकटमिहानयस्यजस्रम् ॥२३॥
रुन्ध्यो यत्पिशितमतीव पुंश्चलि त्वं तां गेहे स्वगयसि सर्वदा विहंगीम् ।
पक्त्वा तत्सविधमिहानयाद्य तूर्णं प्रीतिस्ते यदि मयि विद्यते नितान्तम्॥२४॥
श्रुत्वैतत्तमथ जगाद **मेरभक्ता** व्यक्तीभूतनिजविहंगिका सदुःखा ।
क्रीडार्थं पृथुककृते स्थिता हि सा मे किं तस्याः कृशतरमांसचर्वणेन ॥२५॥
अन्यान्कांश्चिदपि सुपीवरान्विहंगान्भूरींस्त्वत्सविधमिहानयामि तूर्णम् ।
मेषादीनपि विविधान्पृथूनथो वा तां सूक्ष्माकृतिविहगीं त्यजस्व नाथ ॥२६॥
उक्तोऽप्येवमथ स भूरिशो यदासौ निर्बन्धान्न तु विचचाल सार्थवाहः ।
तां हन्तुं सपदि तदैव सा विहंगीमङ्गीकारमकृत तस्य चित्ततुष्टयै ॥२७॥
प्रातस्तामथ विहगीं निहत्य गूढं सा क्रूरा विगतघृणा हि **मेरभक्ता** ।
जाराराधनवशतो निरस्तदुःखा तन्मांसं सपदि पपाच सूक्ष्मभाण्डे ॥ २८ ॥
पक्त्वा तद्रहसि निधाय चैकदासीं रक्षायै निजसदने प्रयुज्य तूर्णम् ।
तं द्रष्टुं वणिजमगच्छदस्य तच्च व्याख्यातुं त्ववसरमाप्तुमात्मभोगे ॥ २९ ॥
तत्काले नृपतनयौ विधाय लीलामन्योन्यं विपुलतरोद्भतश्रमार्तौ ।
क्षुत्क्षामौ किमपि तु भोजनं विधातुं तत्तूर्णं सदनमथाविवेशतुस्तौ ॥ ३० ॥

एकान्तौ नृपतनयौ तु तत्र दृष्ट्वा दासीमेत्य सविषमूचतुस्तदानीम् ।
भद्रे त्वं वद जननी क्व चागमत्सा कावाभ्यामशनमिहाधुना ददाति ॥३१॥
दासी सा तदिति निशम्य तौ बभाषे कापीतो झगिति गताभवत्त्वमाता ।
रक्षार्थं निजसदने तथा प्रयुक्ता किं चाहं बत करवै विना तदाज्ञाम् ॥३२॥
श्रुत्वैतद्विरमवधूय चेटिकायाः क्षुत्क्रान्तौ स्वयमथ किंचिदेव भोज्यम् ।
अन्विष्य क्षणमपि नापतुर्यदा तौ तद्भाण्डं रहसि तदात्र पश्यतः स्म ॥ ३३ ॥
आनिय द्रुतमथ तत्सुगन्धिनानाद्रव्येण प्रसभमनोहरं समीपम् ।
तत्रान्तः सपदि निवार्य तत्पिधानं तां पक्त्वा बत विहगीं ददर्शतुस्तौ॥३४॥
दृष्ट्वा तद्विपुलबुभुक्षयाग्रजोऽसौ तन्मध्यात्सपदि शिरो निगीर्य साक्षि ।
पक्षिण्याः स्वयमघसच्च तत्कनीयांस्तद्वक्षोऽपि च स तथैव तूर्णमेव ॥ ३५॥

तन्मांसावयवद्वयं च युगपद्भुक्त्वा बुभुक्षावशा-
त्तद्भाण्डं च तथैव मातृभयतः कृत्वा पिधानाचितम् ।
तत्रैवापि निधाय किं तु विजने निर्याय वेश्मान्तरा-
त्क्रीडां कर्तुमथो प्रजग्मतुरिमौ भूपालपुत्रौ बहिः ॥ ३६ ॥

इति देलरामाकथासारे विहगीव्यांपादनानन्तरं राजपुत्रकृततदङ्गद्वयकवलीकारो नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

तत्काले निजसदनं समेत्य तूर्णं पप्रच्छ क्षितिपतिवल्लभा स्वदासीम् ।
भद्रे कोऽत्र हि मदसंनिधौ प्रविष्टः श्रुत्वैतद्विरमिति चेटिकाचचक्षे ॥ १ ॥
त्वं याता जननि यतः प्रभृत्यपीतः केनापि द्रुततरमेव कारणेन ।
आरभ्य ध्रुवमिह नस्ततस्तु गेहे नान्यः कश्चिदपि समागतो न दृष्टः ॥ २ ॥
किं तु क्षुत्क्रमविवशौ त्वदीयपुत्रौ मामेत्याहतुरुपकण्ठमम्बिकेऽद्य ।
भद्रे किंभवति हि नौ कृते स्वभोज्यं माता साक्व च विगता गृहं विहाय ॥३॥
श्रुत्वैतत्त्वहमवदं नृपात्मजौ तौ माता वां क्व च विगतेति नैव वेद्मि ।
रक्षार्थं निजसदने तया प्रयुक्ता तस्याः शासनमपहाय किं करोमि ॥ ४ ॥
उक्तौ ताविति च मया स्वयं प्रविश्य क्षिप्रं मन्दिरमथ भोजनं प्रलब्धुम् ।
खट्वायास्तलमपिधानसूक्ष्मभाण्डात्किंचिन्मांसशकलयुग्ममाशतुश्च ॥ ५ ॥

श्रुत्वैतत्सपदि ससंभ्रमं सदुःखं तद्भाण्डं स्वयमुपसृत्य मेरभक्ता ।
शीर्षेणापि च ननु वक्षसा विहीनं हर्षोन्मुक्तनिजमना ददर्श तत्र ॥ ६ ॥

अन्यथातितशकुन्तकर्षितोरःशिरःसु परिपूरिताङ्गकम् ।
तच्चकार सहसा तथैव सा द्रव्यगौरवनितान्तसौरभम् ॥ ७ ॥

गूढमेव ननु तत्ततः समादाय भाण्डमतिमात्रहर्षिता ।
रम्यकल्पितसुवेशशोभिता सार्थवाहनिकटं जगाम सा ॥ ८ ॥

आगतामथ स भाण्डधारिणीं तां निरीक्ष्य गुरुजातसंपदः ।
गाढरामपरिरम्भचुम्बनाद्यैरतोषयदतीव भूरिशः ॥ ९ ॥

शाकिनी गदितशिक्षयादरात्तच्चखाद सकलं स्वयं पलम् ।
अन्यमांसमपि सा जघास तच्चित्तरञ्जनकृतेऽनुरागिणि ॥ १० ॥

सोऽथ सार्थपतिरेतया समं राजयोग्यवरभोगरूपया ।
उच्चकैर्विविधचेष्टितं व्यधात्स्वात्मगुप्तसदने यथेप्सितम् ॥ ११ ॥

क्षणं सघनसंमर्दं ललितकुन्तलाकर्षणं
क्षणं च परिचुम्बनं सुभगतत्कपोलद्वये ।
क्षणं मधुरमद्यपानमपि जानुयुग्मं पुरो
निधाय च ससंभ्रमं मणिमये महाभाजने ॥ १२ ॥

मुहुश्च परिरम्भसंभवसुखामृतास्वादनं
मुहुर्मदनविभ्रमं.....मुहुर्नर्म च ।
मुहुः स्वगुणकीर्तनं मुहुरपि प्रियाः सत्कथा
मुहुश्च कमनीयचेष्टितमलं रतिव्यत्ययम् ॥ १३ ॥

वणिक्स इति भूरिशो ह्यनुभवन्समं चैतया
निनाय रजनीं मुहूर्त....बलं सुखं हर्षवान् ।
ततः समुदिते रवौ प्रतिमुमोच तां वल्लभां
स्वकीयसदनं प्रति प्रचुरभोगसंतर्पितः ॥ १४ ॥ (तिलकम्)

ततः समुपसृत्य तां स वणिगाह हर्षान्वितो
गृहस्थजरतीस्त्रियं कृतनमस्कृतिस्तत्पुरः ।

यदेव भवती जगाद जननि प्रियं मे हितं
तदद्य विहितं मया सपदि सावहेलं निशि ॥ १५ ॥
निशम्य वणिजो वचस्तदिति सा विमृश्य क्षणं
जगाद जरती विहस्य वणिजं गुरुज्ञानवित् ।
यदत्र तनया भवद्वरतरं हि सारं परं
न जग्धमपि तत्त्वया प्रचुरकाम्यसिद्धिप्रदम् ॥ १६ ॥
स चावददथो किमन्यदधिकं ब्रवीषि द्रुतं
ह्यतो जननि कथ्यतां हृदि विमृश्य मे निर्णयात ।
मयैव ननु खादितं सकलमेव चैकाकिना
तयार्पितममन्दरागवशतः सगात्रं फलम् ॥ १७ ॥
उवाच जरती पुरः शृणु वदामि सत्यं तव
भृशं तनयसारभूतमभवद्विहंग्याः शिरः ।
उरश्च यदहो तदेव खलु तत्सुतौ जक्षतु-
स्त्वया यदपि भुक्तमद्य च तदन्यमांसोपमम् ॥ १८ ॥
स्वपुत्रयुगखादितावयवहीनभाण्डं ततो
विलोक्य सहसा भृशं तनयभूरिदुःखाकुला ।
त्वदीयभयकारणादपि कुतश्चिदानीय सा
निहत्य शकुनिं परं किल तदङ्गतोऽपूपुरत् ॥ १९ ॥
स सार्थपतिराह तामथ विचिन्तयन्स्वात्मनः
कुभाग्यपरिजृम्भितं प्रसभविप्रतीसारवान् ।
क एतदशनेन संभवति मातरुच्चैर्गुण-
प्रभावगरिमा च को यदनिशं प्रशंसस्थलम् ॥ २० ॥
तमाह जरती ततस्तनय यो हि भुङ्क्ते शिर-
स्तदीयमुत यत्र यत्र स हि तिष्ठति प्राज्यधीः ।
अवाक्ष्यति स तत्र तत्र सहसैव राज्यं मह-
त्सुखं च कमनीयमेव नितरां यथेष्टं शुभम् ॥ २१ ॥

स्वहारवरमध्यशोभितसुरत्नधाम्नि ध्रुवं
शतत्रयमवाप्य संततमुदारदीनारतः ।
सुखं भजति मङ्गलं श्रयति सोऽपि सद्भाग्यवा-
नुरश्च सुत यस्तदीयमपि चात्ति कश्चिन्नरः ॥ २२ ॥
भवान्पलमखादयिष्यदपि भूरिसिद्धिप्रदं
तदव्ययदितत्प्रभाववशतोऽभविष्यत्सुत ।
महाधरणिवल्लभः प्रवरभागधेयावहो
निरन्तरधनाढ्यकोशसुखसंस्थिताम्भोधिजः ॥ २३ ॥
तदेव विहगीपलं खलु यथा त्वया खाद्यते
तथा कुरु यथा तथा तनय चैवमेव प्रियम् ।
त्वदीयहितकाम्यया निजगदे मया संततं
तदभ्यधिकरुच्यमांसमिह विद्यते तेन किम् ॥ २४ ॥
अपृच्छदथ तामसौ विपुलजातकौतूहलो
विधातृपरिवञ्चितं स्वमशुभं विनिन्दन्मुहुः ।
उपाय इह कथ्यतां जननि मे त्वया सांप्रतं
किमत्र तु विधीयते वरमते क्षणं चिन्तय ॥ २५ ॥
प्राज्यं प्राज्यं जननि यदि तन्मेऽभविष्यच्च बह्वी
वित्तप्राप्तिः प्रतिदिनमथो तावकीनप्रसादात् ।
यद्यत्किंचित्सपदि भवती स्वात्मबुद्ध्याकरिष्य-
त्तत्तत्को वा सदसदपि वालङ्घयिष्यद्वराकः ॥ २६ ॥
आकर्ण्यासौ तदिति जरती सार्थवाहं बभाषे
शीर्षे वक्षस्यपि च तु विहंग्यास्तु तस्या यदस्थि ।
काम्यं रत्नं तनय रुचिरं वाञ्छिता मेयसिद्धि-
प्राप्तिप्राज्ञानुपमविभवं माननीयं तदस्ति ॥ २७ ॥
नैतत्केनापि खलु सुमते जीर्यते नाम भुक्त्वा
तस्मात्तस्यास्तनययुगवक्षोन्तरे विद्यतेऽद्य ।

तत्तत्प्रेम्णा यदि निजसुतौ साहनिष्यन्निगूढं
किं चैतद्वयस्थियुगलमतोऽप्रापयिष्यद्भवांस्तत् ॥ २८ ॥
अद्य त्वं तनय तथा कुरुष्व तूर्णं सद्यो यदुचिरतरास्थिनी निगीर्य ।
प्राप्नोषि प्रवरमते धराधिपत्यं वित्तं च प्रतिदिनमुच्चकैर्यथैव ॥ २९ ॥
अन्यत्किंचित्तदपि न हि तद्विद्यते नात्र मन्त्रः
पुत्रैतच्चेत्सपदि बत संपत्स्यते ते स्वभाग्यैः ।
किं भूयिष्ठैः सततविफलायासदैः कार्यभारै-
स्तस्मादत्रैव शुभदमहाकर्मणि प्रेरयैताम् ॥ ३० ॥
उक्त्वा चैवं सपदि विरतायां तु तस्यां जरत्यां
स्फीतोत्कण्ठातिविविधमहाभोज्यसंपूर्णभाण्डा ।
रन्तुं तस्यान्तिकमुरुमुदा सा ययौ मेरभक्ता
सालंकारा रुचिरतरसंकल्पिताकल्पशोभा ॥ ३१ ॥
तामायान्तीं सपदि स वणिग्वीक्ष्य सोत्कण्ठचित्तां
चेटीस्कन्धार्पितवरमहाभोज्यभाण्डां सहर्षाम् ।
कोपाटोपं विगतहसितं धारितादत्र मौनं
त्यक्तालापं परिहृतगुणं सावमानं चकार ॥ ३२ ॥
आलोक्यैवंविधमुपगता कामिनं तं प्रदध्यौ
धिङ्मां भाग्यैः सततपरिहीनामुदारावसादाम् ।
दीनाराणां त्रितयशतदां प्रत्यहं तां विहंगीं
हत्वा यः सेवित इह बत प्रत्युतासौ समन्युः ॥ ३३ ॥
ध्यात्वैवं तं सविनयमसावाचचक्षे सदुःखा
केनैवं त्वं प्रकुपित इवालोक्यसे प्राणनाथ ।
जानाम्यत्र प्रियतम विचार्यापि हेतुं न किंचि-
त्तन्मा मिथ्या मयि घनरुषा वक्रवक्त्रं कुरुष्व ॥ ३४ ॥
जानीषे किंचिदपि खलु चेद्रोषलेशं मम त्वं
यद्भूयास्त्वं किमिह तु करोष्युच्चकैश्चावहित्थाम् ।

मह्यं याज्ञा यदिह भवता दीयते सादरेण
क्षिप्रं सा चेद्यदि न विहिता तद्दुषं धत्स्व चित्ते ॥ ३५ ॥
दैवान्निष्कारणमपि विभो चेत्प्रकुप्यस्यभीक्ष्णं
तन्नो युक्तं सदयमनसां त्वादृशानां जनानाम् ।
भूयोभिर्वा किमिह वचनैः किं प्रलापैश्च मिथ्या
मां पादान्ते ध्रुवमपरथा विद्धि संत्यक्तजीवाम् ॥ ३६ ॥
उक्त्वैवं तच्चरणयुगले संनिपत्य प्रभूत-
प्राप्तस्वान्तस्मरशरभरासारसंभूतपीडा ।
तत्कालं सा करुणकरुणं गाढरागंगृहीता
वक्षोजोर्ध्वच्युतनयनबाष्पाम्बुधारा रुरोद ॥ ३७ ॥
त्यक्त्वा मौनं सपदि कुपितः स्वार्थलोभगृहीतो
दूरं कृत्वा विधिमपि हठात्सिद्धिमिच्छन्वराकः ।
तां रागान्धामथ स शनकैराचचक्षे कथंचि-
त्तद्वक्त्रालोकननिरतदृष्टिं निजां संनियम्य ॥ ३८ ॥
त्वं मे भर्ता त्वमसि दयितः प्राणनाथस्त्वमेव
त्वं सर्वस्वं मम यदपि चास्ति प्रभो तत्त्वदीयम् ।
वाङ्मात्रेण प्रतिदिनमहो भाषसे चैवमद्धा
प्रत्यक्षं तन्न हि तु फलतो लभ्यते किंचिदेव ॥ ३९ ॥
इत्थं तद्वचनेन जातकुतुका सोद्धाष्पनेत्रा ततः
पप्रच्छाङ्घ्रितले निपत्य सहसा साभ्यर्थनं सादरम् ।
किं गूढं भवता विनाप्यकरवं कार्यं ममेहोच्यतां
ज्ञात्वा तत्सदसद्विनिर्णयमहो यद्रोचते तत्कुरु ॥ ४० ॥

इति देलरामाकथासारे सरोषकामुकानुनयो नाम पञ्चमः सर्गः ।

षष्ठः सर्गः ।

श्रुत्वा तत्स वणिग्वाच दुर्मतिस्तां नैवासीन्मम विहगीपलेऽतिलिप्सा ।
वक्षःशीर्षमपि तदीयमेव भोक्तुं वाञ्छाभूत्किमपरमांसचर्वणेन ॥ १ ॥

तद्वस्तुद्वयमपि सर्वमेव सद्यः स्नेहेन स्वसुतयुगाय पूर्वमद्धा ।
दत्त्वा मन्निकटमथागतासि भाण्डं संपूर्णं परखगगात्रतो गृहीत्वा ॥ २ ॥
साकर्ण्योक्तिमिति तमेव मन्यमाना विज्ञानप्रवरमहाधियं तु कंचित् ।
प्रत्याह प्रिय मदसंनिधौ तु ताभ्यां जग्धं तद्वद किमहं करोमि तत्र ॥ ३ ॥
सोऽवादीद्यदि दयितेऽधुना ध्रुवं मां जानीषे प्रियतममेव कामुकाग्र्यम् ।
तत्तूर्णं निजतनयौ यथा तथा तौ हन्यास्त्वं युगपदलं निगूढमेव ॥ ४ ॥
उत्पाट्य हृदयमथो तयोः स्वयं तद्वक्षोन्तर्गतविहगीवरास्थियुग्मम् ।
आकृष्य द्रुतमधुना प्रयच्छ मह्यं मन्युर्मे न च परथा प्रशाम्यति द्राक् ॥५॥

विद्युन्निपातमिव मन्दिरवह्निदाहं
खड्गप्रहारमिव सागरमज्जनं वा ।
जारानुरोधवशतः शिशुमारणं हा
साङ्गीचकार धिगहो वनितानुरागम् ॥ ६ ॥
श्रुत्वेत्यथाभ्युपगमं नितरां प्रतुष्टो
दुष्टो वणिक्सपदि तां दृढमालिलिङ्ग ।
गेहे निजे द्रविणभूरितरव्ययेन
प्रोच्चैस्तदा वरमहोत्सवमादिदेश ॥ ७ ॥
आनीय सोऽन्तिकमहो विविधं प्रभूतं
पक्वान्नहारिमदिरादियथेष्टभोज्यम् ।
आरोप्य तां निबिडरागहृतां निजाङ्के
प्रीतां परामनुबभूव रतादिभोगैः ॥ ८ ॥
आलिङ्गच तां निबिडमेव नरेन्द्रपत्नीं
भोगान्सुदुर्लभतरांश्च पुरो निरीक्ष्य ।
आखण्डलं च मदनं धनदं तदानी-
मात्मानमेव स विवेद वणिक्प्रमोदात् ॥ ९ ॥
कृत्वा क्षणं तदधरामृतपानलीलां
स प्रोद्भूतप्रमदजातनितान्तदर्पः ।

पीयूषलाभमथिताम्बुनिधिप्रभूत-
संभूतखेदविवशांस्त्रिदशान्निनिन्द ॥ १० ॥
तन्नेत्रवक्त्रकरकण्ठकुचोदराति-
शोभां निरीक्ष्य रुचिरां स चिरं विचार्य ।
इन्दीवरेन्दुकमलाच्युतशङ्खहेम-
कुम्भाशनिप्रविहितानुकृतिं न सेहे ॥ ११ ॥
एवं तदा विरचयन्स्वमनोविनोदं
साकं तया विविधनर्मकथाश्च कुर्वन् ।
संसेवयन्सुरतसौख्यमलं यथेच्छं
तामत्यवाहयदसौ क्षणवत्त्रियामाम् ॥ १२ ॥
उत्थाय साथ वणिजः शयनाद्गतायां
रात्रौ स्वपुत्रयुगमारणबद्धकक्ष्या ।
कर्तुं ह्युपायमतिदुःखकरं प्रभूत-
पापावहं च निजमन्दिरमाजगाम ॥ १३ ॥
ध्यात्वा चिरं निबिडरागविनष्टबुद्धिः
सा दुष्टकामुकसमागमतुष्टचित्ता ।
अन्विष्य कंचिदपि दासमतीव पापं
जग्राह वित्तनिचयेन दयाविहीनम् ॥ १४ ॥
स्थूलाकृतिं शमनहुंकृतितुल्यवाचं
कृष्णाननं दुरितकर्मनिरस्तशङ्कम् ।
आनीय तं विजनमाह नितान्ततीव्रं
चात्यन्तनिर्घृणमतीव भयानकं च ॥ १५ ॥
त्वत्स्वामिने हि विगणय्य वितीर्य दीना-
राणां सहस्रमधुनैव समग्रमेव ।
दासीकृतस्त्वमिह वाञ्छितकर्महेतोः
क्षिप्रं मया प्रकुरु तद्यदहं ब्रवीमि ॥ १६ ॥

यद्येकमेव भवता क्रियतेऽद्य कार्यं
सद्यस्तु तेन भविता तव दास्यमुक्तिः ।
तत्त्वं करोषि यदि नैव तु मूर्खभावा-
च्छास्ति परामनुभवस्यधुनैव मत्तः ॥ १७ ॥

श्रुत्वेत्यसौ समुपजातनितान्तहर्ष-
स्वान्तर्व्यथाभयविषादनिरस्तधैर्यः ।
पप्रच्छ तां जननि किं क्रियते मयाद्य
तद्यत्र दुष्करतमेऽस्ति मनोरथस्ते ॥ १८ ॥

सा प्रत्यभाषत कुरागविनष्टबुद्धि-
र्मांसं पुनः स्थितमिमं विकरालवक्त्रम् ।
एतौ मदीयतनयौ सहसाधुनैव
गूढं निहत्य कुरु वाञ्छितपूरण मे ॥ १९ ॥

आकस्मिकोद्ततडिद्विनिपाततुल्यं
श्रुत्वा तदेवमतिमात्रगतत्रपोऽपि ।
कर्णौ पिधाय स बभूव दयार्द्रचित्तः
कश्चूतचम्पकतरू जडधीश्छिनत्ति ॥ २० ॥

तां व्याजहार धरणौ प्रणिपत्य दासो
ब्रूह्यन्यदद्य ननु यत्तदहं करिष्ये ।
निष्कारणं जननि रम्यगुणाभिरामौ
कान्ताकृती तव सुतौ तु कथं निहन्याम् ॥ २१ ॥

कन्दर्पदर्पहरकान्तिसुरूपरम्या-
वेतौ निहन्तुमपि सर्वजगत्कृतान्तः ।
कारुण्यमावहति चेतसि हा कृतान्तो
मातः प्रसीद विपरीतधियं त्यजातः ॥ २२ ॥

देशेऽस्मिन्नप्यखिल एव हि विश्रुतौ तौ
राजोचितप्रवरलक्षितलक्षणत्वात् ।

हन्यां कथं यदि च केनचिदेतदेवं
दृष्टं श्रुतं च भविता मम ते च शास्तिः ॥ २३ ॥
तेनापि निर्दयतरेण तथाविधेन
प्रोक्ता विधाय विनयं च भयं च दत्त्वा ।
नो दुर्ग्रहात्तु विचचाल कुकामिराग-
ग्रस्तस्वबुद्धिरतिनिर्दयतां जगाम ॥ २४ ॥
तस्या नितान्तमिति दुर्ग्रहमाकलय्य
स्वार्थातिसाध्वसवशीकृतचित्तवृत्तिः ।
अङ्गीचकार स कथंचिदहो तदीय-
पुत्रद्वयप्रलयकर्म ततो भुजिष्यः ॥ २५ ॥
अत्रान्तरे हि विहगीविनिगीर्णमस्थि-
वक्षःप्रभावसमुपार्जितवित्तराशिः ।
ज्येष्ठानुजस्य तु बभूव सदैव दीना-
राणां शतत्रितयलाभवशेन तस्य ॥ २६ ॥
क्रीडानिमित्तमथ तौ विजनं स नीत्वा
बालौ नरेन्द्रतनयौ विगतात्मशङ्कौ ।
जग्राह वक्षसि निधाय बत स्वमुष्टिं
हन्तुं रुषा सपदि राहुरिवार्कचन्द्रौ ॥ २७ ॥
पप्रच्छतुस्तमवनीशसुतावकस्मा-
त्कस्मात्प्रकुप्यसि सखे बत निर्निमित्तम् ।
दासत्वमेव कुरुषे सततं हि नस्त्वं
नास्माभिरप्रियमकारि तवाद्य किंचित् ॥ २८ ॥
श्रुत्वेत्युवाच स ततः परिचारकस्तौ
केनापि कारणवशेन भवज्जनित्री ।
रोषाकुलास्ति युवयोरधुना नितान्तं
सोऽहं प्रयुक्त इह वामनया निहन्तुम् ॥ २९ ॥

किंचित्तदीयवपुषोस्तु भवान्न कुर्या-
तौ त्वं निहत्य सहसा प्रकटं समेहि ।
इत्यादिदेश जननी युवयोरिदानीं
मां किं करोमि परतन्त्रनिजक्रियस्तत् ॥ ३० ॥

दृष्ट्वा युवां हि निहतौ धनजातहर्षा-
दङ्गीचकार मम किंकरकर्ममुक्तिम् ।
सा चान्यथा विविधया तनयातिपीडां
स्वार्थान्स भीतिवशगः किमहं करिष्ये ॥ ३१ ॥

तावूचतुः सविनयं प्रणिपत्य दासं
संभूतभूरितरभीतिसकम्पचित्तौ ।
नैवार्हसि त्वमिह हन्तुमनागसौ नौ
साधो विचारय मनस्यधुना स्वयं तत् ॥ ३२ ॥

निष्कारणं च यदि हंसि सखेऽधुनावां
पापं भविष्यति नितान्तममन्ददुःखम् ।
त्वं घातयन्सपदि नौ यदि केनचिच्च
दृष्टः खलीकृतिमवाप्स्यसि चानिवार्याम् ॥ ३३ ॥

अङ्गीकृता यदि तया हितया जनन्या
हत्वा हि नौ तव तु किंकरकर्ममुक्तिः ।
तत्पुंसु सत्सु कथमर्हति मद्भु रामा
कर्तुं यथेच्छमधिकारममन्ददर्पात् ॥ ३४ ॥

कर्तुं सखे स्वपरिचारककर्ममुक्तिं
ह्यावां विलिख्य निजलेखमिहैव तुल्यम् ।
व्यक्ताक्षरैः स्वयमुताद्य तथा ददाव
त्वां जातुचिन्न तु रुणद्धि यथैव कश्चित् ॥ ३५ ॥

भोगार्थमप्यतनुहर्षकरं च दीना-
राणां सहस्रमपि संप्रति दीयते ते ।

स्वार्थो भवत्यभिमतो भवतो नितान्तं
पुण्यं च नौ तदपि रक्षसि चेद्विचार्य ॥ ३६ ॥
किं चान्यथा तव सखे गुरु पातकं स्या-
त्स्वार्थोऽपि नश्यति न तुष्यति कोऽपि बुद्ध्वा ।
नो सा भविष्यति च किंकरकर्ममुक्तिः
स्त्रीणां मतं हि विफलं सति पुंसि यस्मात् ॥ ३७ ॥
तद्भोः प्रसीद कुरु मा गुरु पातकं नौ
त्रायस्व संप्रति सखे श्रय साधुवादम् ।
कीर्तिं नितान्तमिह चापरलोकपथ्यां
श्रेयस्करं प्रबलपुण्यमलं गृहाण ॥ ३८ ॥
श्रुत्वेत्यभाषत ततो मुदितः स दीना-
राणां सहस्रमिह मे त्वरितं युवाभ्याम् ।
तद्दीयते यदि च संप्रति लेखपत्रं
रक्षामि वां भवतु यत्तदतो ममाद्य ॥ ३९ ॥
तस्मै विलिख्य च ददौ नितरां प्रतुष्टो
ज्येष्ठः स्वलेखमथ किंकरकर्ममुक्त्यै ।
तस्यानुजश्च सहसैव यथोक्तदीना-
राणां सहस्रमपि जीवितरक्षणार्थम् ॥ ४० ॥
ततः प्रमुदितो भृशं द्रविणतः सदा मेरकः
उवाच नृपतेः सुतौ भयविकम्पिताङ्गौ पुरः ।
पलाय्य ननु कुत्रचिद्विपुलरंहसा गम्यतां
व्रजाम्यपरदेशमध्यमहमप्यलं साध्वसात् ॥ ४१ ॥
श्रुत्वैवं गिरमुच्चकैः प्रमददां तौ भूमिपालात्मजौ
मार्तण्डातपतप्तधन्वधरणौ पीयूषवृष्टिं यथा ।
दूरं क्वापि तु जग्मतुः प्रतिभयास्त्वं मन्यमानौ पुन-
र्जातं भूरिजवोद्भतामिततरोच्छ्वासे प्रकम्पाकुलौ ॥ ४२ ॥

इति देलरामाकथासारे कामुकाराधनार्थं दासविमुक्त्यनन्तरं पुत्रद्वयपरदेशगमनं नाम षष्ठः सर्गः ।

सप्तमः सर्गः ।

गच्छन्तौ विपुलाध्वखिन्नवपुषौ क्षुत्क्षामकण्ठौ भृशं
नानारम्यगवाक्ष्यहर्म्यरुचिरागारावलीदन्तुरम् ।
तीक्ष्णानल्पसुशिल्पमूर्तिजनितासंसेवितं कंचिद-
प्येकं सत्पुटभेदनं पृथुधनं संप्रापतुस्तौ क्रमात् ॥ १ ॥
तत्काले विधियोगतो नरपतिस्तत्रागमत्पञ्चतां
तद्दुःखाकुलसाधुवर्यसचिवान्बाष्पाम्बुसिक्ताननान् ।
स्वप्ने दिव्यपुमाञ्जगाद सहसा कश्चित्समभ्येत्य ता-
न्प्रत्येकं दयया निशीथसमये व्योम्नोऽवतीर्य स्वयम् ॥ २ ॥
युष्मद्भाग्यवशान्महम्मदसुरत्राणात्मजः सद्गुण
इब्राहीम इति प्रसिद्धनिजनामेह भ्रमँश्चागतः ।
राजद्वारि निशाक्षये रुचिरसद्रूपो हि यो दृश्यते
तस्मै राज्यमिदं भवद्भिरधुना सर्वैर्द्रुतं दीयताम् ॥ ३ ॥
इत्युक्त्वा सचिवान्स दिव्यपुरुषोऽप्येकैकशोऽन्तर्दधे
स्वप्ने तेऽपि तदित्थमत्र वचनं चेतोहरं दुर्लभम् ।
अन्योन्यं जगदुः प्रहृष्टमनसः प्रातस्ततस्तत्यजुः
स्वक्षोणीपतिमृत्युकालजनितस्वान्तव्यथावैशसम् ॥ ४ ॥
अत्रान्तरे तौ क्षितिपालपुत्रावितस्ततः संभ्रमतो भ्रमन्तौ ।
पुरं प्रविश्य श्रियमीक्षमाणामेकां मसेदामथ पश्यतः स्म ॥ ५ ॥
तत्रोपविश्य श्रमविश्लथाङ्गो ज्येष्ठोऽनुजं प्राह स राजपुत्रः ।
भ्रातः श्रियं पश्य पुरोत्तमेऽस्मिन्नदृष्टपूर्वां विविधां मनोज्ञाम् ॥ ६ ॥
एतस्य रम्यां पुटभेदनस्य द्रष्टुं श्रियं संप्रति किं तु बह्वीम् ।
भ्रातस्तदेकेन पथा व्रज त्वं गच्छामि चान्येन च वर्त्मनाहम् ॥ ७ ॥
दिनावसाने च ततो मिलित्वा भ्रातर्मसेदान्तर एव चात्र ।
कथासुखं चानुभवाव उच्चैः परस्परालोकितकौतुकेन ॥ ८ ॥
श्रुत्वेति तद्वाक्यमथो कनीयांस्तथेति चोक्त्वा प्रययौ सुदूरम् ।
उत्थाय सोऽप्यव्रज उच्चकैस्तां द्रष्टुं श्रियं तत्र पुरे चचार ॥ ९ ॥

स चाग्रजोऽगच्छदुदारलक्ष्मीं पश्यन्पुरे तत्र सविस्मयोऽलम् ।
समाससाद क्षितिपालसिंहद्वारं निबद्धामितवारणाश्वम् ॥ १० ॥
सुलक्षणालोकनकौतुकेन पृष्टो जनैरन्वयनामनी सः ।
स्वकीयवृत्तान्तमशेषमेव व्यावर्णयामास नरेन्द्रसूनुः ॥ ११ ॥
निवेदितं तत्र जनैः सहर्षं ततः ससैन्याखिलमन्त्रिमुख्याः ।
पौराश्च बद्धाञ्जलयः समन्तादुपागता राजसुतं प्रणेमुः ॥ १२ ॥
स्वप्नोक्तसल्लक्षणदर्शनेन प्रहृष्टचित्तैः सचिवैस्तदानीम् ।
हिरण्यकुम्भैर्विमलाम्बुपूर्णैं राज्येऽभिषिक्तः स रराज राजा ॥ १३ ॥
प्राज्यं स राज्यं समवाप्य नानाभोगोपभोगोत्सुकमानसोऽभूत् ।
कनीयसो भ्रातुरहो कदाचित्सस्मार नो राजसुतस्य तस्य ॥ १४ ॥
अत्रान्तरे स क्षितिपालसूनुर्मो(मृ)रादभक्षो(बरूशो) दिवसावसाने ।
अदर्शनाद्भ्रातुरहो मसेदासमीपमागत्य शुशोच दुःखात् ॥ १५ ॥
दूराध्वखेदेन बुभुक्षया च भ्रातुर्वियोगेन च पीड्यमानः ।
कथंचिदाहारमसौ तु किंचिच्चकार तत्रापणमध्यमेत्य ॥ १६ ॥
इतस्ततो भ्रातृगवेषणार्थं भ्रमन्प्रभूतव्यसनान्तचेताः ।
स्खलद्गतिर्दूरतराध्वखेदादेकं वरोद्यानमथाविवेश ॥ १७ ॥
व्याकोशपुष्पस्तबकप्रनम्रप्रतानिनीराजिविराजमाने ।
तत्र क्षणं शाखितलोपविष्टस्तुतोष नानाश्रियमीक्षमाणः ॥ १८ ॥
इतस्ततो यावदसौ स्वदृष्टिं क्षिपन्क्षणं शाखितलेऽत्र तस्थौ ।
तदन्तिके तावदथारुरोह प्रोत्तुङ्गसौधं वनिता तु काचित् ॥ १९ ॥
विराजितां साञ्जनहारिनेत्रद्वयेन सभृङ्गजितोत्पलेन ।
प्रोत्तुङ्गपीनस्तनयुग्मशोभाहिरण्यकुम्भाहितकान्तिगर्गा(र्भा)म् ॥ २० ॥
आश्यामघम्मिल्लविधुंतुदेन भ्रान्त्या सुसंपूर्णतुषाररश्मेः ।
व्योम्नोऽवतीर्यं द्रुतमेव भूमौ रुषेव पश्चात्समुपात्तवक्त्राम् ॥ २१ ॥
लावण्यपाथोनिधिरत्नवीचिं तारुण्यहेमाद्रिहिरण्यवल्लीम् ।
सुकान्तिगङ्गानलिनीं प्रफुल्लां शृङ्गारमद्भूमिरुहालवालाम् ॥ २२ ॥

दम्भोलिमध्यामपि वंशनासामानन्ददामन्दसुसुन्दरत्वात् ।
तां सुन्दरीं वीक्ष्य ननन्द तत्र पूर्णेन्दुवक्त्रां स नरेन्द्रसूनुः ॥ २३ ॥
(चतुर्भिः कुलकम्)

ततः स दध्यौ नरनाथसूनुर्नवीनसंभूतमनोभवार्तिः ।
इयत्यहो नो ददृशे न काचिन्मया पुरेऽस्मिन्भ्रमता पुरंध्री ॥ २४ ॥
किमप्सराः काचिदियं तु नाकाच्छापावतीर्णा धरणीतलेऽत्र ।
पुरान्तरात्किं बहिरन्यथेयं व्यक्तं समारुह्य करोति हर्म्यम् ॥ २५ ॥
ध्यात्वेति निर्याय नरेन्द्रसूनुरुद्यानमध्यात्सहसा ततः सः ।
तदन्तिके कांचिदुपेत्य दासीं पप्रच्छ केयं ललना स्थितेति ॥ २६ ॥
सा चेटिका भूमिपतेस्तनूजं जगाद जातामितकौतुकं तम् ।
इयं पुरेऽस्मिन्प्रथिताभिरामा वेश्यास्ति नाम्ना खलु देलरामा ॥ २७ ॥
दीनारराशिं विगणय्य सद्यः शतत्रयं यो हि ददाति चास्यै ।
एकां स रात्रिं भजते विचित्रभोगैः सुखं साकमथानयेह ॥ २८ ॥
श्रुत्वेति संचोदितचित्तवृत्तिर्लब्धावकाशेन मनोभवेन ।
अद्य प्रयच्छामि शतत्रयं यत्तूर्णं समावेदय चेत्युवाच ॥ २९ ॥
ततस्तया हर्षपुरःसरं तत्समीपमागत्य निवेदितः सः ।
तदीयवाचा प्रविवेश देलरामाभिरामालयमुच्चशोभम् ॥ ३० ॥
विलोक्य तं साद्भुतरूपकान्ति मनोहराकारमुदारशोभम् ।
प्रत्युद्ययौ जातनितान्तहर्षा निजासनार्धं सविधे निधाय ॥ ३१ ॥
नानास्वलंकारभराभिरामां सदान्यरामाधिककान्तिकान्ताम् ।
विलासहास्यादिगुणाविरामां ददर्श हर्षादथ देलरामाम् ॥ ३२ ॥
अन्योन्यमालिङ्ग्य ततोऽतिगाढं कपोलयुग्मं परिचुम्ब्य चैव ।
प्रीतिं प्रकल्प्य प्रथमं नितान्तं चैकं त्वलंचक्रतुरासनं तौ ॥ ३३ ॥
चेटीगिरा तत्पुरतस्तदानीं दीनारराशिं विगणय्य सद्यः ॥
स सर्वमेवात्र तु सावहेलं चिक्षेप वस्त्रान्तरतो विकृष्य ॥ ३४ ॥
तदन्तिके चाथ विचित्रशोभं पर्यङ्कमारुह्य नितान्तरम्यम् ।
नानाविधैर्भोगचयैर्यथेच्छं संभोगसौख्येन च पिप्रिये सः ॥ ३५ ॥

ततो गतायां कमनीयभोगैर्मुहूर्तवत्तत्र तु यामवत्याम् ।
प्रविश्य चेटी तमुवाच कोपान्निर्याहि तूर्णं सदनादमुष्मात् ॥ ३६ ॥
दत्ता यथा ह्यो भवता स्वभाटी तथाद्य योऽस्यै हि ददाति कामी ।
स एतया साकमिहैकरात्रिं भोगान्यथेच्छं भजते मनोज्ञान् ॥ ३७ ॥
श्रुत्वेति तद्वाक्यमथाभ्यधात्तां मयैव भाटी प्रतिपाद्यतेऽद्य ।
तथैव ह्यः किं तु यथैव नूनं मिथ्यातिकोपं त्यज चेटिके त्वम् ॥ ३८ ॥
उक्त्वेति संरम्भवशेन तूर्णं प्रक्षिप्य भाटीं पुरतो यथोक्ताम् ।
तथैव भेजे विविधान्नपानस्वेच्छाहितानल्परतोपभोगान् ॥ ३९ ॥
तस्यां गतायामपि यामवत्यां तथैव दासीवचनेन सद्यः ।
प्रक्षिप्य भाटीं पुरतो यथोक्तां निशामुखं प्राग्वदसौ सिषेवे ॥ ४० ॥
इत्थं तदानीं कतिचिद्दिनेषु यातेषु दध्यावथ वारयोषित् ।
यथोक्तदीनारसमर्पणेन प्रभूतसंभूतकुतूहला सा ॥ ४१ ॥
अहो न कोशादि विलोक्यतेऽस्य स्वहस्तगं नो द्रविणं च किंचित् ।
न चापि कश्चिद्धृतकोऽनुयायी बहिश्च नो निर्गमनं कदाचित् ॥४२॥
कुतः समानीय ददाति वित्तं चेटीगिरा संप्रति तूर्णमेषः ।
यथोक्तदीनारचयं हि मह्यं को हेतुरत्रेति न वेद्मि हन्त ॥ ४३ ॥
इत्थं विमृश्य सुचिरं हृदये तदानीं
ज्ञातुं तदीयधनसंभवकारणं सा ।
कर्तुं च किंचिदपि कौतुकमात्मसिद्ध्यै
तं चापि वञ्चयितुमेव समुद्यताभूत् ॥ ४४ ॥

इति देलरामाकथासारे देलरामासमागमनानन्तरं राजपुत्रस्य वञ्चनोपायो नाम सप्तमः सर्गः ।

अष्टमः सर्गः ।

अथ समारभतात्मधनेन सा वरतरं स्वमहोत्सवमेकदा ।
मधु नितान्तमपाययदत्र तं सविनयं प्रणिपत्य पुनः पुनः ॥ १ ॥
मधुमदेन तु निष्कलमीक्ष्य तं विनयपूर्वमपृच्छदसौ स्वयम् ।
किमिति वित्तचयेन भवेद्विभो यदि भवद्विध एति सुकामुकः ॥ २ ॥

अहमतो ह्यधुना तव किंकरी ललितकान्तिवशीकृतमानसा ।
त्वमपि जीवितनाथ इहास्ति यन्मम धनं त्वदधीनमिदं हितम् ॥ ३ ॥
तदपि कौतुकमेकमिहाद्य मे मनसि जीवितनाथ विजृम्भते ।
यदसितोत्कलिकावशतः सदा न रसिकास्मि तु कुत्रचिदप्यहो ॥ ४ ॥
तदहमस्मि तवाद्य यदि प्रिया यदि च वेत्सि तु मामनुरागिणीम् ।
मयि चिकीर्षसि चेत्त्वमनुग्रहं कथय तत्कुतुकं विनिवारय ॥ ५ ॥
इति निशम्य तदीयगिरं ततो मधुमदापहृताखिलचेतनः ।
सपदि तां तदपृच्छदसौ तदा किमिति संभ्रमतो नृपनन्दनः ॥ ६ ॥
अथ ततो गणिका निजगाद सा यदि विवर्णयसि स्फुटमद्य मे ।
यदि न कुप्यसि नाथ मनागपि प्रियतम ध्रुवमद्य वदामि तत् ॥ ७ ॥
वद तदद्य तु वेद्मि यदि प्रिये ध्रुवमिह द्रुतमेव मयोद्यते ।
इति निशम्य नृपात्मजभारतीं सपदि वक्तुमसावुपचक्रमे ॥ ८ ॥
न निजधाम न चानुचरागमो न च बहिर्गमनं तव दृश्यते ।
न हि तु किंचिदपि स्वकरेऽप्यहो किमपि नैव च भाण्डमपि प्रभो ॥९॥
इयदहो प्रतिवासरमेव तत्कुत इदं द्रविणं तव विद्यते ।
इति हि जीवितनाथ कुतूहलं मनसि संप्रति तिष्ठति मेऽनिशम् ॥१०॥
अथ स वारवधूमविदन्निमां कुस्तितवञ्चनतत्परमानसाम् ।
सुपरिपीतघनासवमोहितः सरलहृत्समभाषत सत्यतः ॥ ११ ॥
शृणु पुरैकविहंगसुता हि नः समभवत्सवने सदने कृशा ।
बत निहत्य तु तामपचत्कदाचिदपि मज्जननी विजने स्वयम् ॥ १२ ॥
अथ तमेव तदीयमुरस्तदा द्रुततरं विनिगीर्य निजे गृहे ।
किमपि कर्म विधातुमथो बहिर्विगतमातरि जातबुभुक्षया ॥ १३ ॥

यतः प्रभृति खादितं तदपि किं तु वक्षो मया
ततः प्रभृति सर्वदा द्रविणमेतदुत्पत्स्यति ।
निजोरसि च वल्लभे किल तदस्ति जानेऽस्ति मे
तदन्तिकतमांशुके कथमिदं भवेदन्यथा ॥ १४ ॥

इति स्फुटतरं गिरं सपदि सा समाकर्ण्य तां
विधाय मधुना समं मुदितमानमामिश्रितम् ।
तथाविधघनासवापहृतचेतनाय द्रुतं
ददौ तु वमनौषधं नृपसुताय तस्मै तदा ॥ १५ ॥
ववाम सकलं ततो यदपि जग्धमेवाशनं
महामणिमनोहरं तदपि चास्थि वक्षोऽन्तरात् ।
निपीतमदिरालवस्रवदमन्दनासाम्यवा-
न्स भूमिपतिनन्दनः सपदि खेदितो विव्यथे ॥ १६ ॥
नरेन्द्रतनये ततो वमनखेदसुप्ते निशि
प्रहृष्टगणिकाप्यसौ तदतिवान्तभोज्यान्तरात् ।
गवेष्य च विलोक्य निर्मलतरं विधायास्थि त-
न्निगीर्य च तदन्तिके व्यधित तत्र निद्रासुखम् ॥ १७ ॥
प्रभातसमये तया सपदि चोदिता चेटिका
जगाद घनमन्युना नृपतिनन्दनं निर्धनम् ।
इतोऽपसर सांप्रतं त्वपर एति वित्तप्रदः
किमत्र कुरुषे रुषेति करमाचकर्ष स्वयम् ॥ १८ ॥
उवाच स तु पूर्ववत्समहिमास्थिरत्नास्थया
मयैव खलु दीयते तदखिलं यथोक्तं धनम् ।
त्वमद्य कुरुषे रुषं किमपि चेटिके दुर्मते
यदा न मम विद्यते वसु तदा व्रजामि स्वयम् ॥ १९ ॥
उदीर्य वसनान्तरं निजमिति स्वयं वीक्षते
प्रलब्धुमथ पूर्ववद्रविणमत्र यावच्च सः ।
न तावदपि चास्ववान्किमपि किं तु संस्मृत्य तां
निशान्तरजनश्रुतिं सपदि विव्यथे छिद्रतः ॥ २० ॥
ततः सपदि कुट्टनीप्रमुखसर्वचेटीजनै-
र्धनं हि परिदीयते त्यजत संभ्रमं निष्फलम् ।

इति प्रतिपदं वदन्बत निरुद्धजङ्घाभुजो
हतेन सदनान्तरान्नृपसुतः स निर्वासितः ॥ २१ ॥
गर्ह्यागालिगलार्धचन्द्रमुखभूयिष्ठावमानोद्गत-
व्रीडामन्युविषादसाध्वसवशात्संत्रस्तचित्तस्ततः ।
ध्यायं ध्यायमतीव वारवनिताछद्मानुतापावहो
गन्तुं क्वापि स हन्त भूपतिसुतो दूरं प्रतस्थे तदा ॥२२॥

इति देलरामाकथासारे गणिकाकल्पितकपटवञ्चनानन्तरं राजपुत्रखलीकारो नाम अष्टमः सर्गः ।

नवमः सर्गः ।

स्वचापशरमात्रपाणिरतिमात्रदुःखाकुलो
व्रजन्नृपतिनन्दनो बत स निर्धनः प्रस्खलन् ।
अवृत्तिवशतो मुमूर्षुरटवीमथैकां क्रमा-
दवाप गणिकाकुचेष्टितमतीव निन्दन्मुहुः ॥ १ ॥
व्रजन्स पुरतो घनोद्गतबुभुक्षया पीडितः
स्खलत्प्रतिपदं विषादहतशक्तिरायासवान् ।
परस्परविवादतः प्रकुपितं त्वरण्यान्तरे
ददर्श मनुजत्रयं सपदि तत्र भूपात्मजः ॥ २ ॥
उपेत्य सहसा ततो नृपसुतः स पप्रच्छ ता-
न्विवादमिह निर्जने कुरुत किंनिमित्तं रुषा ।
ममाद्य वदत स्वयं कलहहेतुमङ्ग ध्रुवं
विचार्य करवै च वो निजसमीहितं हृद्गतम् ॥ ३ ॥
इत्थं निशम्य वचनं हृदयंगमं त-
त्कंचिन्महान्तमपि तं प्रविभाव्य कान्त्या ।
तन्मध्यतः सपदि कश्चिदुवाच तत्र
त्वेको नरः सविनयं च सहर्षमेव ॥ ४ ॥
भल्लांशुकश्च रुचिरोऽभिनवस्थलस्था
चेति दृशाभिमतमस्ति विभो स्वकीयम् ।

वस्तुत्रयं वरमिदं तदिहाद्य भागी-
कर्तुं विवाद उदभूदितरेतरं नः ॥ ५ ॥
त्वं कोऽपि संप्रति किलावसरेऽस्मदीय-
भाग्यैरिहागत उदारतरस्वबुद्धिः ।
भागीकुरुष्व तदिदं कृपया क्षणं नो
यद्यस्य वेत्सि तदितस्तु विचार्य देहि ॥ ६ ॥
पप्रच्छ राजतनयः स ततः प्रभूत-
संभूतकौतुकवशेन नरं तमेकम् ।
वस्तुत्रयस्य वद को महिमास्य साधो
यत्कारणेन भवतां जनितो विरोधः ॥ ७ ॥
एको नरः स निजगाद नरेन्द्रसूनुं
श्रुत्वेति वाक्यमथ तत्र पुरः प्रणम्य ।
भक्ष्येयमङ्ग ननु यस्य करेऽस्ति दीना-
राणां शतत्रयमसौ लभते सदैव ॥ ८ ॥
नित्यं स्वहस्तनिजदत्तयथेच्छनिष्कै-
र्भोज्यादिकं सपदि दूरतरादपि द्राक् ।
नेदिष्टमानयति तस्य सुभाग्यभाजः
कीरोऽप्यसौ प्रवरधीरुत यस्य पुंसः ॥ ९ ॥
एषापि यस्य कृतिनो भवति स्थलस्था
स्थानं स यत्सपदि वाञ्छति गन्तुमद्धा ।
प्राप्नोति तत्त्वरितमेव परैरदृष्टो
वैमानिकोपमजवेन नितान्तसौख्यात् ॥ १० ॥
श्रुत्वेति तं स निजगाद नरेन्द्रसूनु-
र्जानाम्यहं वरगुणान्हि परस्परं वः ।
कस्मै मयाधिकतमो रुचिरः स्वभाग-
स्तद्दीयतेऽलमिति चेतसि संशयो मे ॥ ११ ॥

आकृष्य चापमित एव शिलीमुखांस्त्री-
न्मुञ्चामि वो जवगुणं विनिरीक्षितुं तत् ।
एकैकशः परिगृहीतमदीयबाणो
यः पूर्वमन्तिकमिहैति स ज्येष्ठभागी ॥ १२ ॥
आकर्ण्य वाचमिति तैस्तु तथेति चोक्ते
कर्णान्तकृष्टदृढगाढतरस्वचापः ।
वेगेन दूरतरगामिनरेन्द्रसूनु-
र्बाणत्रयं सपदि दिक्त्रितये मुमोच ॥ १३ ॥
तेषु द्रुतं तदभिधावनसोद्यमेषु
त्यक्त्वा स्ववस्तुचयमस्य समीप एव ।
प्राहोपविश्य नृपसूनुरथो स्थलस्थां
भस्त्रां शुकं च निजहस्तगतं विधाय ॥ १४ ॥
माहात्म्यतस्तव जनन्यधुनैव देल-
रामान्तिकं द्रुततरं घनरंहसैव ।
प्राप्नोम्यहं ननु यथैव तथा कुरुष्व
त्वं मे प्रसादमवसाद निगर्हणार्हम् ॥ १५ ॥
वाञ्छात्रतः सपदि भूपसुतः स तस्याः
शय्यासमीपमथ तत्क्षणमाससाद ।
साश्चर्यमेव च ससाध्वसमन्तिके तं
दृष्ट्वा व्यचिन्तयदसावपि वारयोषित् ॥ १६ ॥
असद्गृहे बहुविधामिति रक्षिवर्गे
नावेदितो न हि च केनचिदेव दृष्टः ।
सोऽयं कथं सपदि मे निकटं प्रविष्टो
भूयिष्ठविस्मयकरः स्वविशिष्टबुद्ध्या ॥ १७ ॥
कोऽपि ध्रुवं समहिमायमुदारकीर्ति-
स्तत्सांप्रतं विनयमेव करोमि चास्य ।

ध्यात्वेति वारवनिता विततार सद्यः
खट्वातलात्प्रमुदितेव समुत्सुकेव ॥ १८ ॥
अभ्यर्णमेत्य चरणद्वितयं प्रणम्य
तज्जानुयुग्ममपि सा परिचुम्ब्य सद्यः ।
बाहुद्वयेन च बलिं विरचय्य चाग्रे
भूमौ ततः समुपविश्य च तं बभाषे ॥ १९ ॥
दिष्ट्या चिरेण मम लोचनगोचरत्वं
यातः प्रभो कथय कुत्र तदद्य तावत् ।
आसीद्भवान्विपुलसद्गुणवान्स्वकान्ति-
लावण्यवान्प्रवरवारणबन्धरज्जुः ॥ २० ॥
पापा गुणैर्विरहिता बत कुट्टनीयं
चेट्योऽपि दुष्टमतयः सदने वसन्ति ।
स्वैरं कुकर्म रचयन्ति निकाममद्धा
याभिः कुबुद्धिवशतो नरिनर्तितास्मि ॥ २१ ॥
प्राणप्रियस्त्वमपि याभिरहो हठेन
निर्वासितः सपदि हन्त हि कद्वदाभिः ।
मद्भारतीमपि निरस्य विहस्य ताभि-
राक्रान्तवेश्मवशतः किमहं करिष्ये ॥ २२ ॥
नाथ प्रसीद कुरु मा मयि चावहेलां
लीलां कुरुष्व किल पूर्ववदेव तस्मात् ।
उक्त्वेति वाररमणी रमणीयवाणी
तं भूमिपालतनयं दृढमालिलिङ्ग ॥ २३ ॥
सोऽपि क्षणेन विनिवार्य तु मौनमुद्रां
भस्त्रां निधाय वसनान्तर एव गूढम् ।
आलप्य किंचिदपि हास्यकरं स्वदीना-
राणां शतत्रितयमक्षिपदेतदग्रे ॥ २४ ॥

तस्यासने तु विनिरीक्ष्य नवां स्थलस्था-
मेकं शुकं च करगं परितुष्टचित्ता ।
पप्रच्छ वस्तुयुगलस्य तु तस्य वार्तां
संजातविस्मयवशेन नरेन्द्रसूनुम् ॥ २५ ॥
सोऽमुं मृषैव निजगाद तु सावहित्थं
छिद्रं विदन्पुनरपि क्षितिपालसूनुः ।
एकस्य कस्यचिदिदं करगं बभूव
वस्तुद्वयं स च ददौ प्रणयेन मह्यम् ॥ २६ ॥
उक्त्वेत्यथो बहुविधामितभोजमद्य-
पानादिकं सह तया स विधाय रात्रौ ।
सट्टातलेऽतिरुचिरे शयनार्थमुच्चै-
रभ्यर्थितोऽपि न मुमोच निजां स्थलस्थाम् ॥ २७ ॥
तस्यानुरोधवशतो निजतूलितल्प-
मुत्सृत्य वारवनितापि तदन्तिके सा ।
शय्यां व्यधात्कृतकरागवशावतीर्णा
पर्यङ्कतः सपदि भूरितरादरेण ॥ २८ ॥
याते ततो नृपसुतः स निशैकयामे
याम्ये तया कचिदितः सह चिन्तयेति ।
नेर्निद्र एव समभाषत तां स्थलस्थां
सुप्तां विभाव्य तदुपर्यबलां समीपे ॥ २९ ॥
यत्रास्ति नो वसतिरेव हि यत्र रथ्या
न ज्ञायते जननि कुत्रचिदप्यजस्रम् ।
अम्भोनिधिः परित एव विभाति यत्र
द्वीपं तदद्य नय मामनया समेतम् ॥ ३० ॥
इत्थं राजसुतो निगद्य स ततो रात्र्यन्धकारे घने
भल्लाकीरकरश्च वारवनितायुक्तस्तदानीं सुखम् ।

तन्माहात्म्यवशेन वासभवनान्निर्याय चालक्षित-
स्तद्वीपं समवाप वाञ्छिततरं मध्येसमुद्रं द्रुतम् ॥ ३१ ॥

इति देलरामाकथासारे वस्तुत्रयप्राप्त्यनन्तरं देलरामां वासभवनादाकृष्य तया साकं राजपुत्रस्य सिन्धुद्वीपगमनं नाम नवमः सर्गः ।

दशमः सर्गः ।

प्रातरत्र सहसा विहाय निद्रामसावथ विलासिनी तदा ।
न व्यलोकत निजं गृहादिकं केवलं च परितः पयोनिधिम् ॥ १ ॥
सा ततो विपुलजातसाध्वसातङ्कसंकुचितदर्पगौरवा ।
तत्र वारवनिता व्यचिन्तयद्भूमिपालसुतमायया छलम् ॥ २ ॥
हन्त मे प्रतिकृतिर्दुरात्मनाश्वास्य किं तु विहितामुनाधुना ।
क्व व्रजामि तदितो महार्णवाल्लोलसद्विपुलवीचिसंचयात् ॥ ३ ॥
मामकं सदनमाययौ यथा गूढमेष नितरामलक्षितः ।
तत्तथेह च हि मां द्रुतं ममाकृष्य वासभवनादिहागतः ॥ ४ ॥
किं प्रलापनिवहैर्वृथा कृतैः सावहित्थमिह वस्त्रमद्य मे ।
युक्तमेव परथा त्वहं रुषा चेदनेन निहता शृणोति कः ॥ ५ ॥
एवमत्र तु विचिन्त्य तं प्रबुद्धं जगाद मुदितेव तत्क्षणम् ।
शोभनं हि भवता विनिर्मितं कर्मतोऽर्थयति मामकं मनः ॥ ६ ॥
कुट्टिनी गतघृणा हि तत्र मां त्वत्परायणतमां विलोक्य सा ।
संततं भ्रुकुटिमेव मन्युना दुर्मतिः प्रकुरुते स्म भूरिशः ॥ ७ ॥
अद्य तावकधिया नृशंसधीः सा क्व चाहमपि च क्व दूरतः ।
एकया तदपि हन्त चिन्तया व्याकुलासि नितरामिह प्रभो ॥ ८ ॥
ग्राम एव न च पत्तनं विभो दृश्यतेऽत्र न तु मानुषागमः ।
केवलं जलधिरेव सर्वतः सांप्रतं किमुपभुज्यते हि तत् ॥ ९ ॥
सोऽभ्यधान्नृपसुतः प्रहर्षवान्वारयोषितमथो विहस्य ताम् ।
भुङ्क्ष्व यन्मनसि रोचते प्रिये तुभ्यमद्य भव धीरधीः सदा ॥ १० ॥
इत्युदीर्य सभयां प्रियां समाश्वास्य कीरमवदत्पुरःस्थितम् ।
किंचिदेव किल तत्करे समर्प्य स्ववित्तमवनीशनन्दनः ॥ ११ ॥

मत्समीपमिह सन्मतेऽधुनान्विष्य भद्र हि कुतश्चिदुत्तमात् ।
तूर्णमेव पुटभेदनाद्धनाद्भोज्यमानय वरासवान्वितम् ॥ १२ ॥
सोऽथ तद्वचनमात्रतस्तदोत्पत्य खं सपदि सन्मतिः शुकः ।
आनिनाय ललितं कुतश्चिदस्यान्तिकं विविधमासवाशनम् ॥ १३ ॥
आसवं बहुविधं च भोजनं तच्छुकाहृतमनेन दुर्लभम् ।
सा सुधाफलसमे समं समास्वाद्य वारवनिता विसिस्मिये ॥ १४ ॥
प्रत्यहं स तु तथैव कीरराडाजहार वरमासवाशनम् ।
सोऽपि भूमितनयस्तया समं निर्विशङ्कमघसत्पपौ सुखम् ॥ १५ ॥
एवमत्र शुकमन्नताहृतानल्पभोज्यमधुमुख्यभोग्यवान् ।
कालमेष दयितासखस्तदा कंचिदेव सुखमत्यवाहयत् ॥ १६ ॥
जातुचित्तमवदन्नृपात्मजं वारयोषिदथ छिद्रदर्शिनी ।
आर्यपुत्र न हि विद्यते····नौ कर्म किंचिदपि देहखेददम् ॥ १७ ॥
मन्दमन्दमपि तच्छनैः शनैर्भोजनं ह्यविरतं विधीयताम् ।
किं न नाथ सततं महामते खैरमत्र विजने मनोहरे ॥ १८ ॥
वासरद्वयकृते यदानया मासंततमसौ शुकः सुधीः ।
तत्समाहरतु भोज्यमुच्चकैः सासवं सकृदनल्परंहसा ॥ १९ ॥
एष चापि न भवेद्वृतागतैः खेदितो हि शुकराट् पुनः पुनः ।
हृत्प्रमोद उत(?)जावयोः प्रभो जायते बहुविधाशनेन तत् ॥ २० ॥
सोऽब्रवीन्नृपतिनन्दनस्तत्तां तदा कपटवञ्चनोद्यताम् ।
ह्यस्तनं कथमिहोपभुज्यते नव्यमेव परिवर्ज्य भोजनम् ॥ २१ ॥
वारितापि नितरां पुनः पुनः सा तदेव गणिका समभ्यधात् ।
सोऽपि राजतनयस्तथाकरोत्कीरमाशु विनियोज्य(?)सर्पतिम् ॥ २२ ॥
रंहसैव सहसागते शुके भोज्यमत्र परिगृह्य सासवम् ।
न्यस्तजानु नितरामपाययत्सा नरेन्द्रतनयं भृशं मधु ॥ २३ ॥
क्षीबतामुपगतं विलोक्य तं सा समज्ञसतरार्धभाषितम् ।
वारयोषिदतिहर्षितः स पप्रच्छ स प्रणयमुच्चकैरिति ॥ २४ ॥

नाथ तुष्यति मदीयमानसं ह्यत्र रम्यतलभूरिशाद्वले ।
संगमेन तव भोगसंचयैर्हृत्प्रियैः परमदुर्लभैः सदा ॥ २५ ॥
कौतुकं तदपि नाथ विद्यते चैकमेव नितरां मनस्यतः ।
नागदुर्लभतरातभोगहृष्टापि सम्यगिह नो भजे सुखम् ॥ २६ ॥
सोऽथ तामवददत्र वल्लभे ब्रूहि यन्मनसि वर्तते तव ।
त्वत्कृते हि सहसा करोमि तत्किं न सिध्यति ममाद्य सुन्दरि ॥ २७ ॥
तोषिताथ सुतरां जगाद सा भूपनन्दनमिदं निशम्य तत् ।
संततं व्ययकृते कुतस्त्वया दीयते धनमियद्वनान्तरे ॥ २८ ॥
एष चापि शुकराट् त्वया कुतो लब्ध उत्तममहागुणः सुधीः ।
मां कथं च निजवेश्मनः समाकृष्य चानयदहो भवानिह ॥ २९ ॥
स्वर्गभूमिरियमेव मन्यते सांप्रतं ननु मया त्वया सह ।
किं तु तावकवराद्भुतक्रियां श्रोतुमस्मि नितरां समुत्सुका ॥ ३० ॥
तन्निशम्य मदिराविमोहितो विस्मृताधमतदीयकैतवः ।
सर्वमेव स शुकादिवस्तुवृत्तान्तमत्र सहसा व्यवर्णयत् ॥ ३१ ॥
तन्निगद्य सुरतासवाशनोद्वेगतः सपदि भूपनन्दनः ।
तत्र पादयुगलं प्रसार्य निद्रां चकार रजनीमुखे ततः ॥ ३२ ॥

तत्काल एव सहसा शनकैः स्थलस्था
पृष्ठाद्भुवस्तलनिषण्णमिमं विधाय ।
तस्यां स्वयं समुपविश्य तदन्तिकात्सा
भस्त्रां शुकं च निजहस्तगतं चकार ॥ ३३ ॥

वाणीं जगाद ननु वासगृहं स्वकीयं
तत्प्राप्नुयां सपदि सांप्रतमेव रात्रौ ।
इत्युक्तिमात्रवशतो गगनाध्वना सा
स्वं वेश्म वारवनिता द्रुतमाससाद ॥ ३४ ॥

दृष्टा साथ चिरेण तीव्रकुतुकात्कासीति पृष्टा तदा
दासीभिः परिचुम्ब्य जानुयुगलं भक्त्या प्रणम्याग्रतः ।

आस्यास्यन्नृपनन्दनस्य विहितच्छद्मक्रियावञ्चना-
वृत्तान्तं सकलं सहास्यवचना हर्षेण वाराङ्गना ॥ ३५ ॥

इति देलरामाकथासारे द्विर्विहितराजपुत्रकैतववञ्चनानन्तरं सिन्धुद्वीपादेलरामास्व-
गृहागमनं नाम दशमः सर्गः ।

एकादशः सर्गः ।

अत्रान्तरे स नरनाथसुतः समुद्र-
द्वीपे प्रभातसमये सहसा प्रबुद्धः ।
भस्त्रां शुकं च रुचिराभिनवां स्थलस्थां
तां चापि वारवनितां न ददर्श तत्र ॥ १ ॥
स्मृत्वा ततो रजनिमध्यनिरुक्तवाचं
निन्दन्स्वकीयमतिविप्लवमुच्चकैस्तम् ।
सर्वं तथैव विहितं ननु वारवध्वा
मेने विमृश्य कपटं प्रकटं स्वबुद्ध्या ॥ २ ॥
उच्चैः शुशोच स ततो नरनाथसूनु-
र्जानन्मृतं स्वमुपवासनितान्तयत्नात् ।
अश्नामि किं कथमितश्च तरामि सिन्धो-
रेकोऽधुना बत किमत्र करोमि शून्ये ॥ ३ ॥
आदौ ययैव बत वञ्चित एव योऽह-
माश्वास्य हृद्गतमवोचमहो हि तस्याः ।
धिङ्मां विमर्शरहितं सहितं नितान्तं
मौख्येंण येन विपदं बहुशो भजामि ॥ ४ ॥
निर्वासितः प्रथममेव यदानयाहं
दत्त्वार्धचन्द्रमवमानमलं विधाय ।
रथ्या तदा मम बभूव सुखेन गम्या
तन्निर्मिता प्रतिदिनं निजजीवरक्षा ॥ ५ ॥
काहं व्रजामि तदितस्त्वधुनातिदुर्गा-
द्रलाकरं कथमिमं बत लङ्घयामि ।

एवं प्रलापमुखरो निजपाणिपृष्ठे
ध्यात्वा मुखं क्षणममन्दशुचा निदद्रौ ॥ ६ ॥
तत्काल एव(?)विधिनियोगवशेन दिव्यं
मञ्जीरमञ्जुतरशिञ्जितमुल्ललास ।
आकर्ण्य तत्सपदि भूपसुतः प्रबुद्ध
उत्थाय चाक्षिपदसौ परितः स्वदृष्टिम् ॥ ७ ॥
बभ्राम काननमितस्तत एव ताव-
दाप्लावसज्जमथ तावदसौ ददर्श ।
सीमन्तिनीत्रितयमत्र विनम्रगात्रं
तीरस्थितानुपमवस्त्रचयस्वरूपम् ॥ ८ ॥
उद्वीक्ष्य जातकुतुकः स ततः प्रदध्यौ
नैवेह कस्यचिदपश्यमहं हि वक्त्रम् ।
प्राप्तं ततो द्रुततरं वनितात्रयं तु
भूयिष्ठदृष्टसुविशिष्टगरिष्ठधाम ॥ ९ ॥
जाने हि काश्चिदपि दिव्यवरप्रभावा
एताः स्त्रियो ललितकान्तिवशाद्भवन्ति ।
यत्तन्ममास्तु सहसाभरणादि वस्तु
क्षिप्रं हरामि तदथो किमिवावदन्ति ॥ १० ॥
ध्यात्वेति वारिनिधितीरतलाज्जहार
सद्यस्तदीयवसनाभरणादि सर्वम् ।
आलोक्य तास्तदिति नम्रसमग्रदेहा
भूपालसूनुमवदन्नितरां हसन्तम् ॥ ११ ॥
भो भो महापुरुष नैतदिहोचितं ते
योगिन्य एव हि वयं त्रिदिवावतीर्णाः ।
स्नातुं समुद्रसलिले विमलेऽधुना त-
न्मा बालचापलवशात्कुरु नर्मलीलाः ॥ १२ ॥

त्वं वञ्चितो ननु यया कपटेन तुभ्यं
तत्प्राप्त्युपायवरमद्य वरं वदामः ।
लज्जामहे तदपि ते पुरतो विनम्रा
नीत्वास्मदीयवसनाभरणानि देहि ॥ १३ ॥
श्रुत्वेति ताः स निजगाद नरेन्द्रसूनु-
रादौ वरं ददत मद्यमिहाद्य तूर्णम् ।
मुञ्चामि युष्मदखिलाभरणादि वस्तु-
व्रातं ततः सपदि नापरथा कदाचित् ॥ १४ ॥
आकर्ण्य तस्य वचनं नृपनन्दनस्य
चैका जगाद वनसंमुखदत्तदृष्टिः ।
संवर्धितः स्वयमसौ हि मयात्र शाखी
कृत्वालवालमयमेव महाप्रभावः ॥ १५ ॥
एतत्पलाशमपि यो मनुजो हि धत्ते
वस्त्रान्तरे यदथ वा निजपाणिमध्ये ।
स प्रत्यहं प्रकुरुतेऽतिसुखेन दीना-
राणां शतत्रयमवाप्य यथेष्टभोगान् ॥ १६ ॥
अन्याप्युवाच तरुरेष महान्मदीयो
यो धारयेद्विटपमस्य महाप्रभावम् ।
यद्यत्पुरं समभिवाञ्छति गन्तुमद्धा
तत्तत्समाश्रयति स क्षणमात्रमेव ॥ १७ ॥
भूपालनन्दनमवोचदथो तृतीया
योगीश्वरी निजकराङ्गुलिदर्शनेन ।
पश्याग्रतो विकचभूरितरप्रसूनः
शाखी महामहिमवानिह मामकोऽयम् ॥ १८ ॥
अस्य त्वगेव नृपनन्दन यस्य चूर्णी-
कृत्वा शिरस्यमितरोषवशेन नूनम् ।

प्रक्षिप्यते सपदि गर्दभतां स गच्छे-
त्स्वेच्छावशेन निजकर्मकृते विधेयः ॥ १९ ॥
कारुण्यपुण्यवशतः खरजन्ममुक्तिं
वाञ्छेत तस्य यदि किं तु रुषं विहाय ।
भूपोऽपि मस्तकतले त्वचमेतदीयां
प्रेम्णा क्षिपेत्सपदि सोऽपि तथाविधः स्यात् ॥ २० ॥
श्रुत्वेति हृष्टहृदयः स परस्परं त-
द्वाक्यं यथाभिलषितं च वरं प्रलब्ध्वा ।
ताभ्यो ददौ स्ववसनाभरणानि सर्वं
यन्नीतमेव सहसा नरनाथसूनुः ॥ २१ ॥
आप्लावनिर्मलतरङ्गनितान्तजात-
कान्तिप्रभातुलितशारदचन्द्रशोभाः ।
आमुक्तदिव्यवसनाभरणाः स्त्रियस्ता-
स्तत्कालमेव सहसाथ तिरोबभूवुः ॥ २२ ॥
सोऽथ प्रहृष्टवदनो नरनाथसूनु-
रेकैकशः क्षितिरुहत्रितयात्तदानीम् ।
पर्णं त्वचं च विटपं च महाप्रभावं
तस्मादजिग्रहदनल्पकुतूहलेन ॥ २३ ॥
वस्तुत्रयं तदथ हस्तगतं विधाय
प्रोवाच वाचमिति राजसुतस्तदानीम् ।
तस्या इतस्त्वरितमेव हि वारवध्वाः
संप्राप्तधामनिकटोपवनो भवेयम् ॥ २४ ॥
इत्युक्त्वा विटपस्य तस्य सहसा माहात्म्यतः प्राप्तवा-
निच्छामात्रवशेन वारवनितावेश्मान्तिकस्थं तदा ।
उद्यानान्तरमेव राजतनयः प्रोल्लङ्घ्य रत्नाकरं
ध्यायंश्चेतसि तत्पराभवमसौ भूयिष्ठरोषाकुलः ॥ २५ ॥

इति देवरामाकथासारे योगिनीवरप्रसादेन सिन्धुद्वीपादुत्तीर्य राजपुत्रस्य गणिकोपवनागमनं नामैकादशः सर्गः ।

द्वादशः सर्गः ।

अत्रान्तरे नृपसुतापहृतस्ववस्तु-
व्रातप्रभावगरिमार्जितवित्तराशिः ।
नानाविधाहितमहोत्सवहृष्टचित्ता
सा वारयोषिदपि हर्म्यमथारुरोह ॥ १ ॥
आमुक्तभूषणवरांशुकभूषिताङ्गी
संत्रस्तबालमृगचञ्चलनेत्रश्रीः ।
वातायनोपरि रराज नितान्तमेषा
दिव्याङ्गनेव वरवारवधूस्तदानीम् ॥ २ ॥
शिञ्जानमञ्जुलसुरञ्जितचित्ररत्न-
मञ्जीरयुग्मललिताङ्घ्रियुगं रराज ।
तस्या विकोशमुखरालिभृतस्थलाम्बु-
जन्मानुकारि सरलाङ्गुलिपत्रहारि ॥ ३ ॥
करभाधिकोच्चमसृणं त्वधरं ललितोरुबिम्बयुगलं शुशुभे ।
मदनद्विपेन्द्रदशनद्वितयं मुनिचित्रशाखिपरिभञ्जनकृत् ॥ ४ ॥
नाभिर्बलित्रितयहारितरातिरम्या
तस्या बभौ विरचिता तदहं हि मन्ये ।
स्थित्यर्थमीश्वरभयान्मकरध्वजेन
सोपानलाञ्छितमनोरमदीर्घिकेव ॥ ५ ॥
तस्या उरोजद्वयमूर्ध्वगामि रराज सत्काञ्चनकुम्भकान्ति ।
पश्याव एतद्वदनं कदा वामित्थं हि सोत्कण्ठतयेव नुन्नम् ॥ ६ ॥
शिरोधरा चापि रराज तस्या भूष्याद्वितीयाखलभूषणालम् ।
कंसारिहस्तस्थितकम्बुशोभां विडम्बयन्ती धवलोच्चकान्तिः ॥ ७ ॥
तस्याः पाणियुगं रराज रुचिरं रक्ताब्जशोभाधिकं
प्रान्तप्राज्यविराजमाननखरं स्पष्टाङ्गुलीलाञ्छितम् ।
मन्ये शंकरदग्धपञ्चविशिखामर्शेण चेतोभुव-
श्चक्रे तद्विगुणं स्वबाणदशकं यद्व्याजतो नूतनम् ॥ ८ ॥

दशनपङ्क्तिरलं शुशुभेऽमिता धवलकान्तिविडम्बितचन्द्रिका ।
प्रवरमौक्तिकराजिविराजिता स्मरवशंकरचूर्णसुसंनिभा ॥ ९ ॥

नात्युन्नतेन न च वामनताश्रितेन
नैवातिपीवरतरेण न कार्श्यभाजा ।
नातीव किं च विनतेन सुकान्तिनासा-
वंशेन चापि शुशुभे ललितार्जवेन ॥ १० ॥

नेत्रद्वयं तत्र रराज तस्या निरन्तरामन्दसुपक्ष्मशोभम् ।
तिरस्कृतैणेक्षणकान्तिदर्पं व्याकोशराजीव पलाशरम्यम् ॥ ११ ॥

शोभां भ्रूयुगलं बभार नितरां तस्या महाकान्तिभृ-
द्रम्यं काम्यतमं विजिह्ममनघं संदर्शनानन्दकृत् ।
जानेऽहं नु नवीचकार मदनश्चापद्वयं शंभुना
निर्दग्ध्वाद्य निजैककार्मुकवशामर्षेण जैत्रं स्थिरम् ॥ १२ ॥

बभार शोभां नितरां ललाटपट्टं तदीयं विमलत्वकान्ति ।
शङ्के रुषा शंकरशीर्षपृष्ठादचूचुरच्चन्द्रकलामनङ्गः ॥ १३ ॥

सच्छोभालकराजिराजितमलं लावण्यकान्त्या करं
वक्त्रं चारुतरं तदीयमनघं सद्रूपगर्वावधि ।
शङ्के नानुचकार पार्वणसुधासूतिः कलङ्काश्रया
तत्पङ्केरुहसाम्यवर्णनविधौ किं चित्रमुच्चैर्भवेत् ॥ १४ ॥

उवाह शोभां च तदुत्तमाङ्गं नितान्तसीमन्तविराजमानम् ।
विनिर्जितालिव्रजबर्हिबर्हनितम्बबिम्बाश्रितकेशपाशम् ॥ १५ ॥

तत्केशपाशधवलस्तबकापदेशा-
च्चन्द्रो विवादमकरोदिति राहुणेव ।
मां चेद्वसस्यशरणं किमिदं मदीय-
भ्रान्त्या रुणत्सि वदनं मदनोऽत्र रक्षी ॥ १६ ॥

चान्द्रीं त्विषं दशनशुभ्रमरीचिकान्त्या
लीलालसेन गमनेन च राजहंसीम् ।

कर्णान्तसर्पिनयनद्वितयेन बालां
संत्रासितां च हरिणीमपि सा जिगाय ॥ १७ ॥
नात्युन्नतं नैव तथातिह्रस्वं स्वमुष्टिमेयोदरराजमानम् ।
सरोरुहाकारमदोषगात्रं वपुश्च तस्याः शुशुभे नितान्तम् ॥ १८ ॥
विराजते स्मापि तदीयवाणी शनैः शनैर्मन्द्रतरोल्लसन्ती ।
वसन्तसंतुष्टपिकालिवीणानिकाणह्यातुलतुल्यशोभा ॥ १९ ॥
कण्ठे हारलतां महामणियुतां श्रोत्रद्वये कुण्डले
सौवर्णे भुजयोश्च रत्नवलयान्यङ्घ्रिद्वये नूपुरे ।
अन्यत्प्राज्यतमांशुकादिविविधाकल्पं वहन्ती बभौ
सा हर्म्ये गगनात्स्वशापवशतो विद्याधरीव च्युता ॥ २० ॥
तस्याः स्मितोद्गतमनोहरशुभ्रदन्त-
दीप्त्या रराज नितरां धवलः स सौधः ।
संपूर्णशीतकरमण्डलमध्यनिर्य-
ज्ज्योत्स्नाप्रभाप्रकरतो हि यथा हि मानी ॥ २१ ॥
एवं स्वकान्तिविभवादिसहर्षचित्ता
कर्णान्तगामिवरदृष्टिमितस्ततः सा ।
चिक्षेप यावदपि तावदिमं नरेन्द्र-
सूनुं ददर्श सरुषं निजनिष्कुटान्तः ॥ २२ ॥
तं वीक्ष्य जातगुरुसाध्वसविस्मया सा
विच्छायतामगमदाशु ततस्तदानीम् ।
चन्द्रत्विषेव नलिनी खलिनीव साधोः
संमानती रविरुचा च कुमुद्वतीव ॥ २३ ॥
कोपाकुलं तमवलोकयितुं तदानीं
भूपालनन्दनमसौ न शशाक भीत्या ।
वाराङ्गना सपदि विह्वलमानसालं
पञ्चाननं हि करिणीव निरस्तधैर्या ॥ २४ ॥

साचिन्तयद्ध्रुवमसौ गुणवान्महात्मा
कोऽपि प्रभूतमहिमा हिमरश्मिधामा ।
प्रायो मया कपटतः परिवञ्चितोऽयं
तत्किं चिकीर्षति रुषाद्य न वेद्मि हन्त ॥ २५ ॥
उल्लङ्घ्यवारिनिधिमेष मुहूर्तमात्रा-
त्प्राप्तोऽधुनैव हनुमानिव रंहसान्यः ।
कुत्र व्रजामि तदितो निजहर्म्यपृष्ठा-
दृष्टा सरोषममुना च बताहमद्धा ॥ २६ ॥
किं चाधुना मम विधिः शरणं भयेऽस्मि-
न्यत्तन्ममास्तु निजकर्म हि कः प्रमार्ष्टि ।
एतत्समीपमपि सान्त्वयितुं व्रजामि
जानामि नापरमुपायमलं विचार्य ॥ २७ ॥
ध्यात्वेति सा निकटमस्य तु मन्दमन्दं
गन्तुं स्वकीयपरिवारजनैरदृष्टा ।
एकाकिनी विपुलसाध्वसकम्पमाना
वातायनादवततार ततस्तदानीम् ॥ २८ ॥
यान्ती प्रभूतभयतस्तु शनैः शनैः सा
दूराद्ददर्श सरुषं नरनाथसूनुम् ।
गत्वा ततश्चिचतुरेषु पदेषु भूमौ
विन्यस्य जानुयुगलं प्रणनाम चाग्रे ॥ २९ ॥
सोऽप्यग्रतः सविनयां प्रणतोत्तमाङ्गां
प्रक्षिप्तजानुयुगलां गलदश्रुधाराम् ।
उत्तुङ्गपीनकुचकुम्भनिवेशितस्व-
पाणिद्वयामतिभयामथ तामपश्यत् ॥ ३० ॥
कोपाकुलः स सहसा नरनाथसूनु-
रुत्थाय तां भुजयुगेन हठान्निरुध्य ।

चूर्णीकृतामथ मुमोच तदीयशीर्षे
वृक्षत्वचं भव खरीति निगद्य वाचा ॥ ३१ ॥
तद्वाक्यमात्रवशतः सहसा तदानीं
वाराङ्गनाविगतसर्वनिजस्वरूपा ।
सा गर्दभी समभवन्नरनाथसूनो-
स्तच्चेष्टितं मनसि रोषवशात्स्मरन्ती ॥ ३२ ॥
दन्तालिकामथ वितीर्य स राजपुत्रः
पीडामतीव जनयंल्लगुडप्रहारैः ।
ईर्ष्यावशेन सहसा स्वयमेव पृष्ठं
तस्या अशिश्रयदसूक्ष्मघृतप्रमोदः ॥ ३३ ॥
श्वभ्राद्रिकान्तारवनप्रदेशान्बभ्राम कान्तोऽधिकरूपहीनाम् ।
आरुह्य नित्यं स तु गर्दभीं तां भीतां प्रहारैः स्रवदश्रुधाराम् ॥ ३४ ॥
तदीर्ष्यया स्वात्मकृते समं सा वहन्नपूपाः स नरेन्द्रसूनुः ।
स्वल्पं ददौ वारि तृणं च तस्यै पृष्ठाद्विनेनावततार जातु ॥ ३५ ॥
अत्रान्तरे तत्परिवारवेद्यो दिनेष्वनल्पेषु गतेषु तत्र ।
तां स्वामिनीं नैव कुतोऽप्यवापुर्गवेषितामप्यखिलाध्वयानैः ॥ ३६ ॥
लब्धुं ततस्तां परिवर्जिताशाश्चेट्यः समग्रा अपि कुट्टनीश्च ।
स्वमस्तकन्यस्तसमस्तहस्ताश्चक्रन्दुरुच्चैर्गलदश्रुधाराः ॥ ३७ ॥
जग्मुः समग्रा अपिराजधानीं तच्चेटिका बाष्पनिरुद्धवाचः ।
आस्थानसंस्थं ददृशुर्नरेन्द्रं निवेदिता द्वाःस्थगुणेन सद्यः ॥ ३८ ॥
विन्यस्य जानुद्वयमग्रतस्ताः कृत्वाशिषं साश्रुदृशः सदुःखाः ।
चेट्यः समग्रा अपि कुट्टनी च व्यजिज्ञपन्भूमिपतिं प्रणम्य ॥ ३९ ॥
राजन्वती भूर्भवता नरेन्द्र प्रजापरित्राणकरस्त्वमेव ।
श्रीमान्सुरत्राणवरस्त्वमद्धा तद्दीनवाक्यं शृणु सावधानः ॥ ४० ॥
केनापि खिन्नेन हृताद्य राजन्विलासिनी सा बत देलरामा ।
अन्वेषिताप्येव नितान्तयत्नात्कुतोऽपि नास्माभिरहो प्रलब्धा ॥ ४१ ॥

धुरंधरे तत्त्वयि नाथ भूमिपुरंदरे पौरविचारदक्षे ।
विटादयश्चेत्रभवन्ति पापास्तत्कस्य गर्हा क्रियते परस्य ॥ ४२ ॥
श्रुत्वेति तद्वाक्यमसौ नरेन्द्रः ससंभ्रमं दीनतरं तदानीम् ।
आश्वासमाशां विरचय्य सद्यो व्यसर्जयच्चारगणांस्तु दिक्षु ॥ ४३ ॥
अन्विष्य ते चारगणा यदा न प्रापुः कृतश्चित्रमतिप्रयत्नात् ।
तदा नरेन्द्रस्य भिया पलाय्य चाशिश्रयन्देशमथान्यमेव ॥ ४४ ॥

देशेऽस्मिन्बत जाल्मतस्करविटा वृद्धिं कियन्तो घना
जग्मुः केन नितान्तमेव दुरितासक्ता महानिष्कृपाः ।
यत्कश्चित्कमिता जहार गणिकां तां देलरामाभिधां
हाहाकारमिति प्रकाममुदभूत्प्रत्यालयं प्रत्यहम् ॥ ४५ ॥

इति देलरामाकथासारे तद्रूपवर्णनानन्तरमेतस्याखिरस्कारो नाम द्वादशः सर्गः ।

त्रयोदशः सर्गः ।

याते तु काले विपुले कदाचित्कृशाकृतिं तां रुधिरार्द्रदेहाम् ।
खरीखरूपामुपरिस्थितक्ष्मापालात्मजप्रत्तघनप्रहाराम् ॥ १ ॥
सबाष्पनेत्रां बत देलरामां ददर्श मार्गे खसुतानुयाता ।
योगीश्वरी काचिदमन्दजातकुतूहला ज्ञानवती सुदूरात् ॥ २ ॥

(युगलकम्)

आलोक्य तां साह ततः खकन्यामेकं महत्कौतुकमप्रतस्त्वम् ।
पुत्रि द्रुतं पश्य न यावदेति दृग्गोचराद्दूरतरं प्रयाति ॥ ३ ॥
साप्यब्रवीत्तां जननीं न किंचित्पश्याम्यहो मातरहं विचार्य ।
प्रत्याह कन्यामथ योगिनी सा येयं खरी सैव हि देलरामा ॥ ४ ॥
आरुह्य यस्तिष्ठति पुत्रिपृष्ठे चास्याः प्रहारैर्जनयन्हि पीडाम् ।
स राजपुत्रो बहुशोऽनयायं विवञ्चितश्छद्म विधाय पूर्वम् ॥ ५ ॥
श्रुत्वेति संजातकुतूहला सा निर्बन्धतस्तां जननीमपृच्छत् ।
आमूलवृत्तान्तमशेषमेव व्यावर्णयामास तु योगिनी सा ॥ ६ ॥

कन्याथ सा तां जननीं ययाचे मातः खरीं देहविमुक्तिरस्याः ।
यथा भवेत्त्वं हि तथा कुरुष्व क्ष्मापालसूनोः प्रणयं विधाय ॥ ७ ॥
निर्बन्धतः सा निजकन्ययैवमभ्यर्थिता सादरगौरवेण ।
भूपालसूनोर्निकटं तदानीं योगीश्वरी तत्सहिता प्रतस्थे ॥ ८ ॥
तमाह दूरान्नरनाथसूनुं क्षणं प्रतीक्षस्व महाजन त्वम् ।
किंचिद्ब्रवीतुं मम विद्यतेऽद्य तवोपकण्ठे विपुलाभिलाषः ॥ ९ ॥
श्रुत्वेति भीत्याथ पुरःसरन्तीं दन्तालिकाकर्षणतो निरुद्ध्य ।
तां गर्दभीं वर्त्मनि राजपुत्रो मुहूर्तमात्रं विनयेन तस्थौ ॥ १० ॥
अभ्येत्य सा तं कुशलादिवार्तां पृष्ट्वा नरेन्द्रात्मजमाचचक्षे ।
कथान्तरे सा स्वसुतासमक्षं योगीश्वरी पादतले प्रणम्य ॥ ११ ॥
योगीश्वरी तद्गुणहृष्टचिता सिद्धा प्रसक्ता तव चाहमद्धा ।
विमृश्य तस्मात्तव नैव कांचिद्गर्हां तु वेद्मि पृथुसद्गुणस्य ॥ १२ ॥
भवादृशं नैव तथापि वैरं महात्मनां दीनजनेऽतिपापे ।
चिरं प्रधर्तुं सुतयुक्तमद्धा कुलीनपुंसामपरो गुणः कः ॥ १३ ॥
मुञ्चाधुनैतां तु खरीस्वरूपां दुष्कर्मसक्तामिह देलरामाम् ।
कृत्वा विवाहं सुमते स्वकीयां कन्यामिमां तुभ्यमहं ददानि ॥ १४ ॥
यथेतरे पुत्रविरोधसक्ता भवद्विधा नैव तथाविधाः स्युः ।
यदिच्छसि त्वं तदसौ ददाति तुभ्यं यथा किं तु तथा करिष्ये ॥ १५ ॥
प्रसीद तत्पुत्र दयां कुरुष्व गृहाण कीर्तिं श्रय साधुवादम् ।
पुण्यं च वृद्धिं नय(?) दार्यसेव्यं भज स्वमार्गे त्यज कोपमस्याम् ॥ १६ ॥
इयं सुता मे तव धर्मपत्नी यथा भवत्येवमुताधुनैव ।
तथा करिष्येऽधमवंशया तु किमेतया दुर्मतिवारवध्वा ॥ १७ ॥
तन्निशम्य नरनाथनन्दनस्तां जगाद वरयोगिनीं ततः ।
एतया गणिकयातिपापया यन्ममापकृतमेव वेत्सि तत् ॥ १८ ॥
यातना बहुविधा विधाय तद्धर्तुमेव गणिकामिमां ध्रुवम् ।
विद्यते मम मनोरथोऽम्बिके किं करोमि भवदीयशासनात् ॥ १९ ॥

यन्मदीयमहरज्जनन्यनल्पं हि वस्तुनिचयं सुदुर्लभम् ।
तद्ददातु सकलं तदुद्धृतं स्वापतेयमपि चानुवासरम् ॥ २० ॥
प्रत्यहं च मम दास्यसेवनं चेत्करोति हि विलोक्य सांप्रतम् ।
लेखमम्ब रुचिरं भवत्समक्षं स्फुटाक्षरततिप्रशोभितम् ॥ २१ ॥
तत्करोमि भवदीयशासनान्मातरद्य हि तथाविधामिमाम् ।
रासभीजनिमथो निवार्य तूर्णं प्रभाववशतः पुरस्तव ॥ २२ ॥
वाचमेवमथ सा निशम्य तां व्याजहार नरनाथनन्दनम् ।
योगिनी प्रमुदिता विहस्य संकल्पमाशिषममन्दसिद्धिदम् ॥ २३ ॥
दुर्मतिं कुगणिकां करोषि चेद्रासभीजनिविवर्जितामिमाम् ।
यद्यदिच्छसि ददाति तद्धुतं साक्षिणी ह्यपरथा त्वहं सदा ॥ २४ ॥
योगिनीगिरमिमां निशम्य सच्छद्मशङ्कितमनोनिमित्ततः ।
त्रिर्मनोरथमवोचदात्मनः साक्षिणोऽप्यकृत तत्र पञ्चषान् ॥ २५ ॥
पादपत्वचमथो मुमोच तां प्राप यां प्रवरयोगिनीवरात् ।
मूर्ध्नि भूमिपतिनन्दनः स तस्यास्तदा सपदि वारयोषितः ॥ २६ ॥
तत्प्रभाववशतः क्षणेन सा गर्दभीसमुचिताकृतिं जहौ ।
प्राप साभरणचित्तहारिकाम्यात्मविग्रहमथो तथाविधम् ॥ २७ ॥
वारयोषिदथ सा तदोपसृत्य प्रणाममकरोत्प्रहर्षिता ।
भूमिपालतनयस्य तस्य विन्यस्य जानुयुगलं ससंभ्रमम् ॥ २८ ॥
सोऽपि मन्युवशतस्ततोऽभवत्तां विलोक्य पुरत पराङ्मुखः ।
योगिनी किल तदिङ्गितं च तस्यै न्यवेदयदमर्षदर्शनात् ॥ २९ ॥
वारयोषिदपि योगिनीगिराङ्गीचकार विनयात्प्रणम्य सा ।
अञ्जसा सकलमेव राजपुत्रेप्सितं बहुविधं यथोदितम् ॥ ३० ॥
तद्दिने निजगृहं समानयद्योगिनी नृपतिनन्दनं ततः ।
वारयोषिदपि तस्य शासनाद्धीनता निजगृहं जगाम सा ॥ ३१ ॥
भूमिपालतनयाय तत्र तस्यै निजां दुहितरं समर्पयत् ।
पाणिपीडनमथो विधाय सा योगिनी प्रमुदिता यथाविधि ॥ ३२ ॥

साथ वाररमणी तदीयवस्तुव्रजं च तदुपार्जितं धनम् ।
आनिनाय नृपनन्दनान्तिकं दास्यलेखमिह योगिनीगृहे ॥ ३३ ॥
अत्रान्तरे तत्र पुरे हि **देल्लरामा**प्रवृत्तिं प्रथितामितीमाम् ।
प्रत्यालयं सर्वजनो निशम्य नरेन्द्रसूनुं प्रशशंस हर्षात् ॥ ३४ ॥
राजापि चाकर्ण्य जनश्रुतिं तां प्रभूतसंभूतकुतूहलेन ।
स्वराजधानीमनयद्विसृज्य भृत्यान्प्रियान्भूपसुतस्तत्तम् ॥ ३५ ॥
ततः परिज्ञाय निजं कनिष्ठं सहोदरं भूमिपतिस्तदानीम् ।
आनन्दबाष्पाम्बुकणार्द्रनेत्रो गाढं समुत्थाय तमालिलिङ्ग ॥ ३६ ॥
तमग्रजं सोऽपि विभाव्य हर्षात्तज्जानुयुग्मं परिचुम्ब्य चैव ।
कृत्वा प्रणामं निकटोपविष्टो बाष्पाम्बुधाराकुलितो बभाषे ॥ ३७ ॥
यातो **मसेदा**न्तिकतः सुदूरं यदा पुरा मां प्रविहाय तूर्णम् ।
दिनावसानेऽपि तदा मया त्वं कुतोऽपि नान्विष्य चिरं हि लब्धः ॥३८॥
श्रुत्वेति राजा निजगाद तत्र स्वभ्रातरं तत्तपया विनम्रः ।
ममेह संप्राप्तनरेन्द्र तस्य त्वं विस्मृतोऽपूर्णमतेस्तदानीम् ॥ ३९ ॥
श्रुत्वेत्यसौ तस्य शशंस **देल्लरामा**प्रवृत्तिं पुरतोऽग्रजस्य ।
स चाप्यवोचन्निखिलं स्वराज्यप्राप्त्यादिवृत्तान्तमशेषमेव ॥ ४० ॥
कथान्तरे तं निजगाद राजा **मो(मु)रादभक्षं(बख्शं)** स्वसहोदरं सः ॥
हृहत्यसर्वामितसेनया स्वं देशं व्रजावोवरमद्य जेतुम् ॥ ४१ ॥
यत्रैव हेतिं जनकश्चकार यत्रैव नो ज्ञातिजना वसन्ति ।
हलाभदेशं स्वमनोरथो मे प्रयातुमद्यैव हि विद्यते तम् ॥ ४२ ॥
श्रुत्वेति सोऽपि प्रशशंस हर्षान्**मो(मु)रादभक्षो(बख्शो)**वचनं तदेव ।
आज्ञां ददौ सोऽथ पुरेऽत्र सेवाकृते नरेन्द्रः पृतनाधिपाय ॥ ४३ ॥
अल्पैर्दिनैः सर्वबलेऽपि सज्जीकृतेऽथ सेनापतिना नरेन्द्रः ।
विनिर्ययौ स्वं नगरं विजेतुं दत्त्वा परस्मै निजराज्यमत्र ॥ ४४ ॥
दासीपाणो(?)पार्जित**देल्लरामा**समन्वितस्तद्धनपूरितोष्ट्रः ।
योगीश्वरीपुत्रिकया च साकं तमन्वगच्छत्स निजानुजन्मा ॥ ४५ ॥

गच्छन्क्रमात्प्राप स भूमिपालः सहानुजो भूरिबलं पुरं तत् ।
राजच्युतो यत्र स भारजीवी स जानिरेतज्जनको बभूव ॥ ४६ ॥
दीर्घाध्वखिन्नामितसिन्धुवारः स भूमिपालः स्वसहायवाक्यात् ।
एकां त्रियामामथ तत्र तस्थौ सहानुजः खेदनिवारणार्थम् ॥ ४७ ॥
आकस्मिकोल्काविनिपाततुल्यं पितुर्जनेभ्यो मरणं निशम्य ।
शुशोच राजा ससहोदरोऽलं तदीयनाम्नात्र चकार धर्मम् ॥ ४८ ॥
स्वमातरं चाहितसंगमां तां तेनैव साकं वणिजाशृणोत्सः ।
निनिन्द तद्दुश्चरितं नितान्तं ददौ न तस्यै निजदर्शनं च ॥ ४९ ॥
प्रातस्ततः सद्गतिकुञ्जरेन्द्रमारुह्य राजा स्वपुरीं प्रतस्थे ।
विराजमानोपरिहेमछत्रः सहानुजो भूरिबलानुयातः ॥ ५० ॥
क्रमेण गच्छन्स शनैः शनैः स्वभ्रात्रान्वितो वीरभटानुयातः ।
समाससादाथ तमात्मदेशं नाम्ना हलाभं वरवस्तुलाभम् ॥ ५१ ॥
आमुक्तवर्म्मा निशितातुखड्गः सज्जीकृतायोधनदक्षवीरः ।
भ्रात्रा समं तन्नगरं हठात्स द्वाःस्थान्निहत्य द्रुतमाविवेश ॥ ५२ ॥
योद्धुं विनिर्यातविपक्षवृन्दं निहत्य संख्ये भटपत्यसंख्ये ।
पितुः स्वकीयस्य सहानुजन्मा विवेश राजा निजराजधानीम् ॥ ५३ ॥
तत्रानुयातान्सुभटान्यथेच्छं दानेन मानेन च तोषयित्वा ।
समुत्सुकांस्तान्प्रति स स्वदेशं व्यसर्जयद्भूमिपतिस्ततः सः ॥ ५४ ॥
प्राज्यं स राज्यं स्वयमेव तस्मिन्हलाभदेशेऽखिलमन्त्रिवाचा ।
जग्राह तस्यै च निजानुजाय ददौ क्रमोपागतयौवराज्यम् ॥ ५५ ॥
इब्राहीमनराधिपो निजपितुः संप्राप्य सिंहासनं
हत्वा वैरिगणान्नराज नितरां सिंहानुकारी तदा ।
दासीभावयथेष्टकर्मनिरतां ता देलरामां पुनः
पश्यन्सोऽपि बभूव तत्र नगरे मो(मु)रादभक्षः(बख्शः) सुखी ५६

इति देलरामाकथासारे स्वदेशराज्यप्राप्तिर्नाम त्रयोदशः सर्गः ।

समाप्तोऽयं ग्रन्थः ।

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY

KÂVYAMÂLÂ. 78.

THE
S'RINGÂRA-SARVASVA-BHÂṆA
OF
NALLÂ-DÎKSHITA.

EDITED BY

MAHÂMAHOPÂDHYÂYA PAṆḌIT S'IVADATTA
HEAD PAṆḌIT AND SUPERINTENDENT, SANSKṚIT DEPARTMENT,
ORIENTAL COLLEGE, LAHORE,
AND
WÂSUDEV LAXMAṆ SHÂSTRÎ PAṆS'ÎKAR

Third Edition.

PUBLISHED BY
PÂNDURANG JÂWAJÎ,
PROPRIETOR OF THE "NIRNAYA-SAGAR" PRESS.
BOMBAY.

1925.

Price 7 Annas.

9RI 891.21

[All rights reserved by the publisher.]

PUBLISHER:—Pandurang Jawaji, } at the 'Nirnaya-sagar' Press,
PRINTER:—Ramchandra Yesu Shedge, } 26-28, Kolbhat Lane, Bombay.

काव्यमाला. ७८.

श्रीनल्लाकविविरचितः

शृङ्गारसर्वस्वभाणः ।

जयपुरमहाराजाश्रितेन महामहोपाध्यायपण्डितशिवदत्तशर्मणा,
मुम्बापुरवासिपणशीकरोपाह्वलक्ष्मणात्मजवासुदेवशर्मणा
च संशोधितः ।

तृतीयावृत्तिः ।

स च
मुम्बय्यां
पाण्डुरङ्ग जावजी
इत्येतैः स्वीये निर्णयसागराख्ययन्त्रालये मुद्रयित्वा प्रकाशितः ।

१९२५

मूल्यं ७ आणकाः ।

श्रीनल्लाकविः ।

श्रीमानसौ **बालचन्द्रदीक्षित**तनूजो **नल्लाकविः** कौशिकगोत्रोत्पन्नश्छन्दोगश्चोलेषु **कुम्भघोण**नगरपरिसरकण्डरमाणिक्याख्याग्रहारे जनिमापद्य **रामनाथमखीन्द्रेण परमशिवेन्द्राचार्य**-तच्छिष्य**सदाशिवब्रह्मेन्द्राभ्यां** च संशिक्षितः शास्त्रेषु-नविंशवया एव खसख्युर्**वैद्यनाथदीक्षितस्य** वचनगौरवेण भाणमिमं **सुभद्रापरिण-यनाटकं** च रचयामास। क्रमशोऽन्याश्च काश्चन सुकृतीः। तासु च, **अद्वैतमञ्जरी**, त-द्व्याख्या **परिमला** चेति द्वावेव ग्रन्थावद्य समुपलभ्येते। अस्य गुरू **रामनाथमखीन्द्रः**, तञ्जनगराधीशस्य **शहजि**महाराजस्य सदस्यः श्रीमतो **रामभद्रदीक्षितस्य** समकालिक इति [2]**षड्दर्शनीसिद्धान्तसंग्रह**स्यामुखश्लोकेभ्यः प्रतीयते। **परमशिवेन्द्राचार्यः** प्रख्यात[3]**कुशलविजयनाटका**दिग्रन्थानां प्रणेतुस्तञ्जपुराधिनाथेनश्रीशहजिमहाराजेन

---

१. अद्वैतमञ्जर्या अवसाने,

'नल्लासुधीनिबद्धेयमद्वैतरसमञ्जरी ।
कर्णावतंसपदवीं विबुधैरधिरोप्यताम् ॥'

इति, तद्व्याख्यायाम् 'इति श्रीकौशिककुलजलधिचन्द्रश्रीबालचन्द्रदीक्षिततनूभवस्य श्रीमत्प-रमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रपादश्रीसदाशिवब्रह्मपूज्यपादानुग्रहभाजनस्य श्रीनल्ला-कवेः कृतिषु स्वकृताया अद्वैतरसमञ्जर्या व्याख्या परिमलाख्या संपूर्णा ।' इति च संदृश्यते.

२. षड्दर्शनीसिद्धान्तसंग्रहे.

'रामभद्राध्वरिवरो रामनाथमखीश्वरः ।
नरहर्यध्वरिमणिः पेरियप्पबुधाग्रणीः ॥
श्रीवेङ्कटेशविबुधः श्रीमान्यज्ञेश्वराध्वरी ।
मखी च श्रीनिवासार्यो महतामपि संमतः ॥
शासनाक्षरमाकर्ण्य शाहराजस्य (A.D.1684–1511) धीमतः ।
सप्तैते शास्त्रसिद्धान्तान्सङ्गृह्णन्ति यथामति ॥'

इति रामनाथमखिनो रामभद्रदीक्षितसमकालिकत्वं शहजिमहाराजसदस्यत्वं च स्पष्ट-मुक्तं भवति.

३. कुशलविजयनाटके,

'श्रीरङ्गपट्टणपतित्रिशिरःपुरेशचेञ्जीपुराधिपतितञ्जपुराधिनाथैः ।
उच्चैर्यथोत्तरमुदञ्चितगौरवश्रीरास्ते सुखं शहजिराजपुरेऽधुनासौ ॥
स किल पलकचेरिग्रामवास्तव्यविद्वज्जनमकुटवतंसाद्वासुदेवाध्वरीन्द्रात् ।
अधिगतपदवाक्यन्यायतन्त्रत्रिलोकीगुरुपरमशिवेन्द्राध्यापितब्रह्मविद्यः ॥'

इति वेङ्कटकृष्णदीक्षितस्य परमशिवेन्द्राचार्यशिष्यत्वं स्पष्टम्.

समुदञ्चितश्रियोवेङ्कटकृष्णदीक्षितस्य ब्रह्मविद्यागुरुः, शिवगीतातात्पर्यप्रकाशिकायाः प्रणेता च। सदाशिवब्रह्मेन्द्रः परमशिवेन्द्राचार्यशिष्यः, ब्रह्मसूत्रवृत्तेर्ब्रह्मतत्त्वप्रकाशिकाया[1] आत्मविद्याविलासस्य च कर्ता। अतोऽस्य नल्लाकवेः काले बहुशः स्खिस्ताब्दीयसप्तदशकावसानभागस्तदुपरितनशतकपूर्वभागश्च, नातः प्राचीन इति विनिश्चेतुं पार्यते॥

इति

टी. एस्. कुप्पुस्वामिशास्त्री.

---

१. आत्मविद्याविलासे.

'निरवधिसंसृतिनीरधिनिपततजनतारणस्फुरन्नौकाम्।
परमतभेदनघुटिकां परमशिवेन्द्रार्यपादुकां नौमि॥
देशिकपरमशिवेन्द्रादेशवचोद्बुद्धदिव्यमहिमाहम्।
स्वात्मनि विश्रान्तिकृति सरसं प्रस्तौमि किंचिदिदम्॥'

इति.

काव्यमाला ।

श्रीनल्लाकविविरचितः
शृङ्गारसर्वस्वभाणः ।

विष्णुब्रह्मपुरंदरादिविबुधैः सान्द्रे विवाहाङ्गणे
प्रेमावेशवशात्परस्परहठाश्लेषे धृतोत्कण्ठयोः ।
गौरीशंकरयोः ससंभ्रममणीपीठाधिरोहे मिथः
संघर्षेण समुद्गतः पुलकसंभारः शिवायास्तु नः ॥ १ ॥

अपि च ।

नरगजमयं मायाशक्त्या वहन्वपुरुज्ज्वलं
जयति महसामेकस्तोमस्तरङ्गितमङ्गलः ।
अभिनवसुधानिष्यन्दानां गिरामुपगुम्फनं
परिणमयति स्फारं यच्ध्यानपद्धतिसंभवः ॥ २ ॥

अपि च ।

करकिसलयराजत्कीरशावाभिरामां
सरसिजभवदारान्वाचमाराधयामः ।
श्रुतिमधुरमधूलिस्यन्दिसूक्तिक्रमेभ्य-
श्चिरसरसकविभ्योऽप्यञ्जलिं कल्पयामः ॥ ३ ॥

(नान्द्यन्ते ।)

सूत्रधारः—(सप्रश्रयमञ्जलिं बद्ध्वा ।)

वितन्वन्यत्कोणं विशिखमचिरादेव भगवा-
ननङ्गः केनापि त्रिभुवनमजय्यं विजयते ।

यदालोको यूनामपहरति चेतांसि मसृणः
स वस्तन्यादन्यादृशसुखमपाङ्गो मृगदृशाम् ॥ ४ ॥

(इति पुष्पाञ्जलिं विकीर्य । नेपथ्याभिमुखमवलोक्य ।) मारिष, इतस्तावत् ।

(प्रविश्य ।)

पारिपार्श्वकः—भाव, अयमस्मि ।

सूत्रधारः—इह खलु सकलपुरललामभूते विविधाद्भुतनिवासभुवि पुरुहूतपुरातिशायिनि मध्यार्जुननाम्नि नगरे वन्दारुमुकुन्दपुरंदरारविन्दभवमुखवृन्दारकवृन्दमुकुटमणिगणकिरणपुञ्जमञ्जरितचरणपल्लवस्य लीलायितसमस्तभुवनस्थितिसंस्थितेर्मन्दस्मितभस्मितपुरत्रयस्य निटिलहुतभुगाहुतीकृतरतिप्रणयिनो वामाङ्गीकृतवामदृशः शेखरीकृतकुमुदबान्धवस्य कवलीकृतकालकूटस्य महालिङ्गनाम्नो भगवतः शितिकण्ठस्य वसन्तोत्सवदर्शनोत्सुकतया संगतानामनङ्गतन्त्रकलापदेशिकानां वैदेशिकानां विदुषामेषा परिषदुपस्थिता । तस्मादस्माभिरियं केन रूपकेण समाराधयितव्या ।

पारिपार्श्वकः—(सहर्षम् ।) अद्य खलु साफल्यं प्रयोगतन्त्रपरिश्रमस्य ।

अवेक्ष्य विद्यावैशद्यमहो सर्वे सभासदः ।
कन्दलीभवदानन्दाः कम्पयेयुः शिरांसि यत् ॥ ५ ॥

भाव, तर्हि कस्य कवेः कृतिः प्रयोक्ष्यते ।

सूत्रधारः—(स्मरणमभिनीय ।)

जयति किल चोलमण्डलमण्डनमुद्दण्डपण्डिताध्युषितम् ।
कण्डरमाणिक्यमिति ख्यातं महदग्रहारमाणिक्यम् ॥ ६ ॥

असौ तत्र श्रीमानमृतरसधारासहचरीं
गिरां देवीं बिभ्रद्वजमुखकृपातः परिणताम् ।
सपर्यासंतुष्यद्गुरुपरिवृढानुग्रहपरि-
स्फुरत्प्रत्यग्ज्योतिर्जयति किल नल्ला बुधमणिः ॥ ७ ॥

अयं नाम कवनं नाम कियद्दूरमुभयोः । कथंचन परिणतकवनप्रणयनीयमधुरप्रबन्धसंदर्भनिर्वाहमहासाहसमिति बहुविधशङ्काकलङ्कसङ्कुलितं कविकुलमालक्ष्य कविनामुनैवोक्तम्—

निबध्नन्ति स्वैरं कृतिमिह कियन्तो न भुवने
रसं किंतु व्यङ्क्तुं प्रभवति कविष्वेषु कतमः ।
मम श्रीमल्लम्बोदरदरकृपापाङ्क्तिगिरः
प्रबन्धेऽस्मिंश्चेतः कुतुकमनुबध्नाति तदपि ॥ ८ ॥

इति ।

पारिपार्श्वकः—को न वेद विश्रुतः खल्वयम्, यस्य विद्यागुरुः सर्वतोमुखप्रमुखमखसंतर्पितकंदर्पशासनः षड्दर्शनीप्रवचनप्रौढशिष्यप्रशिष्यपरम्परासंपादितयशःकन्दलः श्रीमान्रामनाथमखी ।

सूत्रधारः—

बालचन्द्रमखीन्द्रस्य तनयो विनयोज्वलः ।
स भाणं प्राणयद्बाल्ये सद्गुरुवचनगौरवात् ॥ ९ ॥

पारिपार्श्वकः—कः पुनरस्य सखा ।

सूत्रधारः—

कामारातिपदारविन्दयुगलध्यानैकबद्धादर-
स्तन्माहात्म्यवशेन शैशवदशासंप्राप्तविद्यायशाः ।
दान्तो रत्नगिरीश्वराध्वरिसुतः स्वाधीनपातञ्जल-
व्याहारोऽयमलंकरोति जगतीं श्रीवैद्यनाथः सुधीः ॥ १० ॥

तदमुनैव कविना संदर्भितं शृङ्गारसर्वस्वं नाम भाणरूपकमभिनेतव्यम् ।

कवेरेता वाचः परिविकचमल्लीमधुमुचः
सभास्तारः सर्वे सरससरसा नः परिणताः ।
वयं च प्रख्याता दिशि दिशि तथा नाट्यकलया
गुणस्तोमो दैवादयमुदयमासादयति नः ॥ ११ ॥

(समन्तादवलोक्य ।)

माकन्दपल्लवसमुल्लसितैर्वनान्तै-
र्माद्यत्पिकीगलगलत्कलकूजितैश्च ।
मन्दानिलेन मधुसौरभनिर्भरेण
मासो वसन्त इति संप्रति तर्कयामि ॥ १२ ॥

अपि च।

समुल्लसितमल्लिकाकुसुमगन्धसंभावितः
स्फुरद्बकुलकुड्मलान्तरमिलन्मधूलीधरः।
हरन्हरिणलोचनारतिपरिश्रमं विभ्रमैः
शनैरिह चलत्यसौ मलयशैलबालानिलः॥ १३॥

मारिष पारिपार्श्वक, तत्प्रयोजय पात्रमचिरेण।

पारिपार्श्वकः—यदाज्ञापयति भावः। (इति निष्क्रान्तः।)

सूत्रधारः—(निरूप्य।)

भ्रमरोऽयं प्रतिवनं भ्रमन्नुद्भूतकूजितः।
विडम्बयति संभ्रान्तं विलपन्तं वियोगिनम्॥ १४॥

(नेपथ्ये।)

स्वर्णाङ्गरागितनिसर्गशरीरकान्त्या
कर्णावतंसितदगुत्पलपत्रसीम्ना।
हारीकृतस्मितपरम्परया तरुण्या
हा किं करोम्यपहृतं हृदयं मदीयम्॥ १५॥

सूत्रधारः—(निरूप्य।)

कौसुम्भवस्त्रपरिमण्डितमध्यभागः
कह्लारकोरकविराजितकर्णपूरः।
श्मश्रुप्ररोहदलसंदलिताननेन्दुः
कन्दर्पदर्पदमनस्तरुणः क एषः॥ १६॥

(विमृश्य।) अयं किल मम श्यालः कनकलताविधुक्तस्यानन्दशेखरस्य भूमिकामादाय इत एवाभिवर्तते। तदहमप्यनन्तरकरणीयाय सज्जीभवामि। (इति निष्क्रान्तः।)

इति प्रस्तावना।

(ततः प्रविशत्यनङ्गशेखरः।)

अनङ्गशेखरः—('स्वर्णाङ्गरागित–' (१५) इति पुनःपुनः पठति।)

उत्तुङ्गस्तनतटमुत्पलायताक्षं
कस्तूरीतिलकविलासिफालदेशम्।

उत्तालालकभरमूहनीयमध्यं
तत्तादृग्वरतनुरत्नमभ्यपश्यम् ॥ १७ ॥

अहो, परदारावलोकनं परमदुःखकारणमिति सत्यमेव सतां वचनम् । यतः ।

शकलयति मनो मे शम्बरारिः शरौघैः
शिथिलयति शरीरं शीतलो गन्धवाहः ।
प्रबलयति पिकानां पञ्चमः कामरोगं
द्विगुणयति च तापं दारुणश्चन्द्रपादः ॥ १८ ॥

अये दग्धमकरध्वज, किं कारणं मह्यं द्रुह्यसि । अथवा किं करोतु भवान् । स्वभावः खलु ते विरहिजनद्रोहः ।

चेतोहरा सा मम पूर्वपुण्यैर्दृष्टिप्रिया दृष्टिपथं प्रयाता ।
तामग्रतः स्थापयितुं क्षणार्धं वृथाभ्यसूयो विधिरक्षमोऽभूत् ॥ १९ ॥

हा चपलाक्षि, साकूतया दृष्ट्या मां निहत्य तत्क्षणमेव निर्दाक्षिण्यं कथं निर्गतासि ।

सरभसमुपसृत्य संनिधाने चरणरणन्मणिनूपुराभिरामम् ।
स्मरशरपरिपीडिताङ्गकं मामयि दयिते सुदृढं परिष्वजस्व ॥ २० ॥

(स्मरणमभिनीय ।) आः, कथं विस्मरामि । यत्किल पूर्वस्मिन्वासरे विरहवेदनया मूर्च्छितं मामुपेत्य मनोरथानुकूलवचनेन समाश्वासितवती चन्द्रमुखी । तदलमधुना मुधा परिदेवितेन । (परितो विलोक्य ।) कथं परिणतप्रायैव प्रभातवेला ।

गच्छत्यस्तनितम्बमम्बरमपाकुर्वन्करैश्चन्द्रमाः
संगच्छन्त इव प्रियैस्तत इतो निष्क्रम्य चक्राङ्गनाः ।
प्रच्छन्नाः कुलटा विटान्विजहति प्रायस्त्रियामात्यया-
न्नक्तं जागरणेन वारवनिता निद्रातुमुद्युञ्जते ॥ २१ ॥

अपि च ।

परिमलभरानुषङ्गप्रकटीकृतपद्मिनीपरिष्वङ्गः ।
अलसो मधुरसपानादहरारम्भे परिभ्रमत्यनिलः ॥ २२ ॥

(पुरोऽवलोक्य ।)

पूर्वक्षमाधरशिखाशिखराधिरूढो
लाक्षारसारुणवपुर्भगवान्दिनेशः ।
प्राचीमुखस्य परिकर्मविशेषलिप्सोः
काश्मीरपङ्कतिलकश्रियमातनोति ॥ २३ ॥

अथ महोमहोन्नतस्य जगदेकदीपस्य भगवतो भानुमतोऽपि कितवाचारचातुरी । तथा हि ।

प्राचीकुचमुदयाद्रिं परिरभमाणैः करैस्तपनः ।
कंचन विकासयोगं कुरुते सरसीमुखाब्जेषु ॥ २४ ॥

(पुरो विलोक्य । सहर्षम् ।) एषा खलु मञ्जुलमणिमञ्जीरकाञ्चीरत्नकञ्चुलीचारुहारचीनाम्बरकनकवलयकटकताटङ्कमुखविभूषणक्रयणपरायणरमणीकुलविलासरमणीया प्रत्यापणप्रसार्यमाणकर्पूरकस्तूरीहरिचन्दनपटवासवासनासनाथचारुसमीरकिशोरसंचारघुमघुमायितपरिसरहरिदन्तराला सकलविलासिलोकसंकेतसाधिका पण्यवीथिका । अपूर्वोऽयं पन्थाः । तदमुनैव साधयामि । (इति विपणिप्रवेशमभिनीय । सहर्षम् ।) इह खलु संचरन्ति चञ्चलतरमञ्जीरझलज्झलसिञ्जितरञ्जितनिखिलदिङ्मुखं पथि पदविक्षेपैरवनीमम्बुजवनीमापादयत्यः, मन्दहासमरीचिकाभिर्मल्लीमतल्लीसुभगस्तबकनिकुरम्बकदम्बमम्बरमारचयन्त्यः, क्वचित्क्वचित्कटाक्षविक्षेपेण कुवलयवलयनिलयं कलयन्त्यः, करकमलार्पितकर्पूरवीटिकाः, कपोलगर्भिताम्बूलविलोभनीयाः, पुरंदरपुरपुरंध्रिका इव भूतलमवतीर्णाः, पुष्पशरवरवर्णिन्य इव बहुधा विभिन्नाः, सुन्दरयुवजनसंदर्शनकृतादराः, बदरामलकलिकुचबिल्वतालनालिकेरकुम्भगिरिसदृशदशावहस्तनभारशालिन्यो विलासिन्यः । (निरूप्य ।)

आस्तीर्णकालकम्बलविन्यस्तानेकवलयदामानः ।
कतिचन धूर्तयुवानः कलयन्त्यबलाकरेषु वलयानि ॥ २५ ॥

(निरूप्य)

विद्युल्लतेव नवविद्रुमवल्लिकेव
ज्योत्स्नेव रत्नमयकृत्रिमपुत्रिकेव ।
प्रायेव पुष्पधनुषो मम पुण्यभूम्ना
कैषा परिस्फुरति कैतकपत्रगौरी ॥ २६ ॥

हन्त, सौन्दर्यमस्या निर्वर्णयितुं सहस्रमपि लोचनानि न पर्याप्नुवन्ति ।

निन्दायामपि चन्द्रमा न विषयो वक्त्रस्य वामभ्रुवो
न्यक्कारोऽपि वृथा भवत्यसदृशे लीलारविन्दे दृशोः ।
बिम्बश्रीरधरस्य नार्हति परीहासेऽपि लक्ष्मीकृतिं
हैमन्यङ्गरुचो विडम्बनमपि ह्रीणे कुतो जायताम् ॥ २७ ॥
पश्यति चेदियमबला फलितं नः पूर्वसंचितैः पुण्यैः ।
संलपति सादरं यदि स स्वर्गः स परमपवर्गः ॥ २८ ॥

(सविमर्शम् ।) कथमेषा विद्युल्लता । या किल

यदृच्छासंप्राप्तं क्वचन विजने मामुपवने
विहारैर्व्याहारैरपि परवशीकृत्य चतुरम् ।
रसोद्रेकक्रुद्ध्यत्त्वमहमभिमानं परवधू-
रमर्यादारम्भं किमपि किमपि क्रीडितवती ॥ २९ ॥

तावदेनां संलापयिष्यामि । (इत्युपसृत्य ।) विजयस्व पञ्चबाणपाणिकृपाणिके । (सहर्षम् ।) किं ब्रवीषि—'प्राणवल्लभ, दुर्लभदर्शनस्य भवतः सुप्रातमेतदहः संजातम् ।' इति । ममाप्येष वादस्तुल्य एव । विद्युल्लते, चलति किमप्रतिरथस्ते मनोरथः । किं ब्रवीषि—'चिरप्ररूढाद्विशङ्कटात्पातित्रत्यसंकटान्मोचयित्वा कथंचिदात्मानं संप्रति कामचारव्रताचारेण भगवन्तं कामदेवमुपासीना स्वच्छन्दं विहरामि ।' इति । (सविस्मयम् ।) कथमिदमप्येवं नाम । (सश्लाघम् ।) उदारः कल्पः । कष्टं नाम कामिनीनां पतिगृहवासपातकम् । विद्युल्लते, महत्येव प्रत्यूषे किंनिमित्तं प्रस्थितासि ।

कथमेषा विरलवलयं प्रकोष्ठं दर्शयति । अतो मन्ये वलयमोचनं सनिमित्तमिति । ब्रूहि । कुतस्ते वलयभङ्गः । कथमेषा सलज्जस्मितं वदनमवनमयति । अनेन च रतिकलहो वलयभङ्गमूलमिति व्यज्यते ।

स परमभिवन्दनीयः सुन्दरि संभोगसंभ्रमे येन ।
परिमृदितासि निकामं भ्रमरेण शिरीषकलिकेव ॥ ३० ॥

किं ब्रवीषि—'तस्यामपि संकटावस्थायामगणिततादृगातङ्को मामुद्दिश्य महत्साहसं कृतवानसि ।' इति । कः संदेहः ।

प्राकारमुल्लङ्घ्य महानिशीथे प्रविश्य कृत्स्नाद्भवनं त्वदीयम् ।
निद्राति नाथे तदुपान्त एव त्वयान्वभूवं किल संगतानि ॥ ३१ ॥

किं ब्रवीषि—'तादृशोऽपि त्वमद्य स्वाधीनामपि मां किं न संभावयसि ।' इति महानयमपराधः । किंतु स्वच्छन्दचारिणीति न जानामि ।

अहरहरितः परं त्वामहमुपभोक्ष्ये निरातङ्कः ।
अनुमन्यसे तथा चेदनुग्रहः खल्वयं दयिते ॥ ३२ ॥

अयि वलयविक्रयिन्, एनां प्रति किं ब्रवीषि—

'हैमानि रत्नखचितानि मनोहराणि
योग्यान्यमूनि वलयानि तवैव नाम ।
मूल्यं विनैव मुदितो वितरामि ताव-
देहेहि सुन्दरि फलं किमतिक्रमेण' ॥ ३३ ॥

इति । चतुरतरमुपक्रान्तमनेन । यतः ।

अस्या वध्वाः कनकवलयामोचने वीतशङ्कं
प्राप्तुं शक्यः करकिसलयस्पर्शकल्याणयोगः ।
किं चोदञ्चन्नयनवलनं क्रूससीत्कारधारं
व्यक्ताव्यक्ताक्षरमपि वचो लभ्यमभ्यस्यमानम् ॥ ३४ ॥

विद्युल्लते, किं ब्रवीषि—'मानद, सादरमाह्वयतोऽस्यैव तावद्वलयानि क्रीणिष्यामि ।' इति । (रहः ।)

आस्तां समस्तयुवमोहकरं तवेद-
मापादचूडमभिरामतरं शरीरम् ।
हृद्यं त्वदीयवचनामृतमेतदेव
क्रीणाति मामपि जगन्त्यपि कीरवाणि ॥ ३५ ॥

(इति पदान्तरे स्थित्वा । विलोक्य च ।)

इदं वलयमुल्लसन्मणिमरीचिकारञ्जितं
करोमि करपल्लवे तव समीहितं चेदिति ।
प्रदर्शनमिवाचरन्परदुरापसंलापया
कयापि कुलसुभ्रुवा सरसमेष संभाषते ॥ ३६ ॥

(पुनर्निरूप्य ।)

कुचाभ्यामाधत्ते कुलशिखरिकूटस्य विभवं
मुखेनोद्वहति श्रियमपि शरत्पर्वशशिनः ।
अपाङ्गैरज्ञानामपहरति सर्वस्वमबला
बलाद्यूनामन्तःकरणमियमास्कन्दयति च ॥ ३७ ॥

(विमृश्य ।) कथमेषा कलभाषिणी । या किल
कदाचित्कावेरीपरिसरगते नीपविपिने
लताकुञ्जे सद्यस्तनकिसलयस्तोमशयने ।
समारभ्य क्रीडां रसपरवशे मय्युपरते
विलोलभ्रूरेषा स्वयमकृत वीरायितविधिम् ॥ ३८ ॥

वलयविक्रयिन्, अनया वलयमूल्यं पृष्टः । किं ब्रवीषि—'दशदीनाराः ।' इति । हन्त, मूर्खप्रलपितमेतत् ।

दीनजनकारुण्यैर्दीनारैः किं प्रयोजनं यूनाम् ।
मुखकमलपानमस्या मूल्यमिति ब्रूहि मुग्धवलयानाम् ॥ ३९ ॥

अपि कुशलं कलभाषिण्याः । किं ब्रवीषि सनिर्वेदम्—'किं नाम कुशलं कुलवधूनाम् ।' इति । हन्त, कुतः सततं श्वश्रूर्ननान्देति शृङ्खलया निरन्तरनिरुद्धासंचारा पञ्जरबद्धशुकीव शोकमनुभवसि । पश्य । भवादृश्यः पृष्ठी-

कृतशिष्टमर्यादा निर्याता विहरन्ति स्वैरचारिण्यस्तरुण्यः । अद्य प्रभृति त्वमपि विशृङ्खलीभूय सफलीकुरुष्व तारुण्यम् । अरण्यचन्द्रिकां मा कुरु करभोरु, सुकुमारतरं शरीरम् । सभ्रूभङ्गं किं ब्रवीषि—'विरम विरम । श्रोष्यन्ति संनिहिताः पतिबन्धवः ।' इति । तर्हि साधयामि । (इति कतिचन पदानि गत्वा । निरूप्य च ।)

नाहं शक्तिमती विना गुरुजनानुज्ञानमाज्ञाकरी
प्रातः पाथसि शीतले निपतितुं प्रायो न शक्नोमि च ।
मा मा मां स्पृश साहसेन सहसेत्युद्घोषयन्तीं बला-
द्वामाक्षीं वलयप्रसञ्जनमिषाद्बध्नाति हस्ते युवा ॥ ४० ॥

इयं च ।

पर्याप्तमण्डनवती पाणिधृताम्भोरुहा वरारोहा ।
वीरस्य मकरकेतोर्विक्रमलक्ष्मीरिवाभाति ॥ ४१ ॥

अस्याश्च ।

अद्य व्यक्तं किल कुवलयैश्वर्यमक्ष्णोरुपान्ते
दृष्टं दृष्टं करपरिसरे गौरवं पङ्कजस्य ।
किंच स्पष्टा कनकसुषमा संनिधावङ्गकानां
हन्तेदानीमधरसविधे वीक्षिता विद्रुमश्रीः ॥ ४२ ॥

(निरूप्य ।) कथमेनां कम्बले निषाद्य हस्ते वलयान्यारोपयत्येषः ।

हस्ताम्रे बलयानि यूनि विदधत्यस्मिन्वणिक्कुंजरे
सीत्कारक्षणमीलितक्षणचलद्भ्रूवल्लरी सुन्दरी ।
मन्दं मन्दमये तुदत्यलमलं मा मेत्यधीराक्षरैः
संभोगं चरितार्थमस्य कुरुते तादात्मिकैर्विभ्रमैः ॥ ४३ ॥

अपि च ।

समाप्ते वामाक्ष्याः कनकवलयामोचनविधौ
गृहीत्वा पाणिभ्यां करकमलयुग्मं च युगपत् ।
वदंश्चाशीर्वाचः शिरसि रचयन्पल्लवमिव
स्वयं धन्यंमन्यो जयति तरुणः स्वर्णवलयी ॥ ४४ ॥

(पुरोऽवलोक्य। सखेदम्।)

वलयनिकरं भग्नं बालेन्दुसंहतिसुन्दरं
करतलगते पात्रे कृत्वा वदन्परुषं वचः।
कपिरिव नवां मालां बालां सबाष्पविलोचना-
मयमभिपतन्क्रुद्धो वृद्धो बलादनुकर्षति ॥ ४५ ॥

कूलंकषकुचभारा कुङ्कुमकर्दमितमुग्धमणिहारा।
कुन्तलविनिहितमाला कुरुते केयं कुतूहलं बाला ॥ ४६ ॥

(सविमर्शम्।) एषा खलु काञ्चनमालायाः कनीयसी कान्तिमती। तावदेनां विमोचयिष्यामि। (इत्युपसृत्य। सरोषम्।) रे रे नैगमापशद दुरात्मन्, कथमिमां ब्राह्मणीं निःशङ्कमेव स्पृशसि। किं ब्रवीषि—'स्वामिन्, अनया बहुमूल्यानि बहूनि वलयानि विदलितानि।' इति। कान्तिमति, किं ब्रवीषि—'प्रागेव मोचनाद्भङ्क्षुराणि वलयानि।' इति। नैगम, किं ब्रवीषि—'मा मैवम्।

वलयानि यानि यावद्वामदृशोऽस्याः प्रसारितानि करे।
दलितानि तानि तावद्दर्शनमात्रेण कस्यचिद्यूनः' ॥ ४७ ॥

(अपवार्य।) कान्तिमति, किमेतत्। कथमेषा मौनेनोत्तरमाह। अतः सत्यमेवैतत्। नैगम, किमतः कर्तुमध्यवस्यसि। किं ब्रवीषि—

अमुमुदन्तमशेषमनुक्रमं कथयितुं दयिताय कुलाङ्गना।
निजमियं निलयं प्रतिनीयते वलयमूल्यपरिग्रहणेच्छया' ॥ ४८ ॥

हन्त, कियतीयं विभीषिका वृद्धवार्धकिनेयस्य। कान्तिमति, अपवार्य साश्रुगद्गदं किं ब्रवीषि—'यदि मम प्राणनाथस्य श्रवणपथमवतरेदियं वार्ता, अशोभनं तर्हि महदापतेत्। अतः किं करिष्यामि।' इति। अयि कातरे, मा भैषीः। अहमासे तव मानसीं व्यथामपसारयितुम्। नैगम, मुञ्चेमां चञ्चलदृशम्। मूल्यादप्यधिकं धनं ते वितरामि। (इति स्वप्रकोष्ठादवमुच्य महार्घं मणिकटकं प्रयच्छति।) कथमेष कङ्कणदानेन संतुष्टः पादयोर्निपत्य निष्क्रान्तः। कान्तिमति, सुखेन याहि पतिमन्दिरम्। किं ब्रवीषि—,परतन्त्रोऽयं जनः कामत्र प्रत्युपक्रियां करिष्यति।' इति।

स्मर मां स्मरतन्त्रेषु स्वतन्त्रेषु विलासिनि।
धन्यः स्यामियतैवाहमाकल्पं कुलसुन्दरि॥ ४९॥

(परिक्रम्यावलोक्य च। सकौतुकोल्लासम्।) एषा खलु समुत्तुङ्गमणिशृङ्गसंहति-प्रतिहतसंचारविशदशारदनीरदविभङ्गानुषङ्गशङ्कावहसुधालेपधौतैरहरहरुपचीयमाननटपटुवाद्यमानातोद्यघोषपोषितान्तरालतया साटोपनिष्यन्दत्स्फारनभःसरिदासारश्रमदायिभिः समुत्तम्भितस्मरजयस्फीतरजतस्तम्भसंभावनीयैः सौधैरभिमण्डिता रम्भाप्रतिरूपवाररम्भोरूपरिषत्कुचकुम्भपरिरम्भघनजघनाभोगोपभोगलब्धनिरतिशयानन्दैर्विटपीठमर्दमुखविदग्धलोकैरवतंसिता शृङ्गाररसप्रथमसमागमवीथिका शृङ्गारवीथिका।

अधरोत्तरभावमीयुषोरधिमञ्चं सुदृढोपगूढयोः।
इतरेतरमीहमानयोरिह यूनोश्चरितं महीयते॥ ५०॥

तत्सर्वथा नातिक्रमणीया वेशवीथिका। (इति वेशवीथिकाप्रवेशं नाटितकेन। ऊर्ध्वमवलोक्य।) लब्धं नयनसाफल्यम्।

ताम्बूलोद्वरणोद्यता परिगलद्धम्मिल्लमल्लीसरा
नीवीसंयमने निकाममलसं व्यापारयन्ती करम्।
वक्षोजच्युतमुत्तरीयसिचयं स्थाने पुनस्तन्वती
प्रासादे पवमानसेवनपरा बाला समालक्ष्यते॥ ५१॥

अस्याश्च।

प्रत्यग्रदन्तपददन्तुरिताधरोष्ठं
घर्माम्बुलेशपरिकर्मितफालदेशम्।
निःसीमनिःश्वसितनुन्नकुचं नताङ्ग्याः
संभोगमाधुनिकमङ्गमभिव्यनक्ति॥ ५२॥

कथमेषा मत्प्रणयिनी पद्मावती। अनया संभाषितुमिच्छामि। (इति प्रासादमिवाधिरुह्य। उपसृत्य च।)

अभ्यग्रनखपदाङ्कितमचिरसमुन्मृष्टपत्रमकरीकम्।
अद्यतनसुरतविह्वलमङ्गं भवदीयमङ्गके जयतु॥ ५३॥

कथमेषा मद्वचनमनादृत्य मन्दपवनमेवाभिनन्दति । हन्त, मन्दोऽपि कश्चित्कचिन्मान्य एव ।

उत्पुलकगण्डभरया समुदितसीत्कारधारया सुदृशा ।
संप्राग्घतो युवत्या सादरमालिङ्ग्यते पवनः ॥ ५४ ॥

कथमेषा मदधिरोषादिव परावृत्तमुखी तिष्ठति । भवत्वेवम् । (इत्यभिमुखीभूय ।) अपि प्रिये, सुखमास्यते । किं ब्रवीषि—'अलं गोत्रस्खलितेन । सा खलु वक्रमुखी तव प्रिया । कस्त्वं का वाहम् ।' इति ।

स्मर तरलमृगाक्षि प्राक्तनीमस्य मैत्री-
मभिनवमिव किं मामन्यदन्यद्ब्रवीषि ।
दरविकसदुरोजश्लाघनीया ममाङ्के
त्वमनिशमधिरूढा शिक्षिता बन्धभेदे ॥ ५५ ॥

किं ब्रवीषि—'किं नाम वस्तु किंचिदभिमर्शमात्रेण स्वीयं भवति दृश्यते ।' इति ।

सस्नेहमङ्कमधिरोप्य निसर्गरम्यां
त्वामीषदुन्मिषदुरोजभराभिरामाम् ।
आलिङ्ग्य गाढमधरं मधुरं त्वदीय-
मास्वादयन्नहमनैषमहानि तानि ॥ ५६ ॥

किं ब्रवीषि—'अधरास्वादः कंचिदधिकः परिजयहेतुरुपन्यस्तः किमेतावता । इति ।

प्रस्मरसि किं सुगात्रि प्रथमक्रतुस्नानमङ्गला भवती ।
प्रेम्णा मयोपभुक्ता प्रथमरसावेशदुर्ललिता ॥ ५७ ॥

किं ब्रवीषि—'कादाचित्केन केनचित्कर्मणा किं नाम भवतः कलत्रमस्ति ।' इति । परां कोटिमापन्नः कोपः । भवतु । एवमपनेष्यामि (इति पादयोर्निपत्य ।)

असावसि प्रेयान्परिचरितुमग्रे चरणयो-
रपाङ्गव्यापारावसरमभिकाङ्क्षन्नवहितः ।

किमप्यन्तः कृत्वा किमिति दयिते कुप्यसि मुधा
वद स्तोकं दासे मयि विदितमागः किमपि ॥ ५८ ॥

सप्रसादं किं ब्रवीषि—'आ यौवनारम्भादावयोरन्योन्यमनन्यसाधारणः प्रणयः ।' इति । प्रसिद्धमेतत् । मध्ये च किंचित्कालं केनापि दैवदुर्विपाकेन तथा नाम समापतितम् । भवतु । किं गतसंकथया । अद्यप्रभृत्यात्मनो भृत्यजनेष्वसावपि गणनीया भवता ।' इति । किमेतदपि प्रार्थनीयम् ।

सुरतान्तदुर्बलाङ्गीं सुमुखि त्वामुरसि सरसमाधाय ।
कुचकलशपीड्यमानः करोमि किं ब्रूहि शयनम् ॥ ५९ ॥

कान्ते, नितान्तं परिश्रान्ता भवती क्षणं विश्राम्यतु ।' (इति परिक्रम्यावलोक्य च । सहर्षम् ।)

असौ पटीयानधिपो विटानामारब्धकिंचित्कलहः कुतश्चित् ।
समुन्नतोरोजभरोपनीतं सव्यानमाकर्षति सारसाक्ष्याः ॥ ६० ॥

प्रक्ष्यामि तावदेनम् । (उपसृत्य ।) अये विटशेखर, किंनिमित्तस्ते कलहः सारसाक्ष्याः । किं ब्रवीषि—'मणिगुप्तकाख्यविहारे पराजिता खल्वेषा ।' इति । कीदृशोऽयं विहारः । कीदृशश्च तत्र जयः पराजयो वा । किं ब्रवीषि—'मत्तकाशिनीपयोधराकारशालितया परिकल्पितेषु पङ्क्तिभूतेषु सैकतराशिषु कुत्रचित्तद्विहारप्रवृत्तेन नरेण कचिद्रोपितो मणिर्निमीलिताक्षेण तदन्येन येन समुद्ध्रीयते तस्य जयो न चेत्पराजय इत्येवं संप्रदायो मणिगुप्तकविहारस्य । हन्त, अपूर्वोऽयं विहारः । किं ब्रवीषि—'ईदृशस्य विहारस्य प्रक्रमावसर एव तावदावयोरस्ति पणकृतिः ।' इति । सा कीदृशी । किं ब्रवीषि—'अहं चेत्पराजितो मासमेकं प्रत्यहं तव शतनिष्कं वितीर्य परिचरेयम् । भवती चेत्पराजिता मासमात्रं मम कलत्रभावमालम्बताम् ।' इति । इयं च पराजिता मया च त्रिचतुराणि दिनानि कलत्रनिर्विशेषमुपभुक्ता । संप्रति पुनरन्यथा प्रतिपद्यते । तस्मादयमारम्भः । तदेतद्विचार्यमत्रभवता ।' इति । सारसाक्षि, किं ब्रवीषि—'आवयोरस्ति कश्चिदन्यः समयबन्धः पणबन्धे । तस्मिन्मासे यदि प्रमादात्प्रमदान्तरेण प्रसज्येत संगमस्तदारभ्य लुप्येत कलत्रभाव इति । अयं च ह्यो निशीथे

मम कनीयस्या मुक्तावल्या संगतः।' इति। किमत्र नियामकम्। कथं चेदमुपपद्यते। किं ब्रवीषि—'केनापि निमित्तेन विलम्बितगतिरहमेवास्य शयनागारगतस्य कर्पूरवीटिकां वितरेति मुक्तावलीं विसृष्टवती। सा त्वनेन बलात्कृत्योपभुक्ता कृच्छ्रादागत्य मां प्रत्याह यथावृत्तमस्य वृत्तान्तम्।' इति। विट, किं ब्रवीषि—'सप्रणिपातं भूयो भूयः प्रार्थितवत्यपि सा तरुणी प्राज्ञेन मया समयबन्धमनुस्मृत्य परित्यक्ता किल। अतः स्वाभिमतालाभपरितप्तास्याः पुरः किमपि प्रलपितवती।' इति। सारसाक्षि, किं ब्रवीषि—'अस्तु नामैवं प्रलापः। निदर्शनं तु कथमन्यथयितव्यम्।

तस्याः प्रत्यागमनसमयग्लानिरङ्गेषु दृष्टा
दृष्टान्येवं दशनवसने किंच दन्तक्षतानि।
आस्तामेतन्निखिलमधुना पश्यतेन्दीवराक्ष्याः
प्रत्यक्षं वः कुचकलशयोर्भान्ति रेखा नखानाम्॥ ६१॥

विट, किं ब्रवीषि—

'क्रीडासद्मनि हंसतूलशयने निद्रालसोऽहं स्थितः
सा तत्रावसरे समेत्य रभसादुत्सङ्गमध्यास्त मे।
वीटीं तद्वदने मया वितरता किंचिन्निपीड्याधरं
वक्षोजे निहितः करः किमियता कामः समाराधितः॥ ६२॥

सारसाक्षि, किं ब्रवीषि—'अनङ्गशेखर, श्रूयते किमस्य वचनवैखरी। किमिदानीमधरोत्तरभावापन्न एव हस्तग्राहं न गृहीत इत्यस्याभिमानः।' इति। विट, प्रायस्त्वय्येव परिणमत्यपराधः। किं ब्रवीषि—'किमुच्यते त्वय्यपराध इति। मयि का तावदपराधलवस्यापि प्रसक्तिः। मुक्तावली परमपराध्यति या किल मम ज्यायसी स्वयं पुष्पिणीति स्वस्या आदेशतया मामिह प्राहिणोदित्यभिधाय छद्मना केवलमाक्रीडितवती।' इति। साधु रचितः सारसाक्ष्याः शिरसि कुञ्चितपञ्चाङ्गुलिप्रयोगो वयस्येन। सारसाक्षि, भवत्यैव प्रथममनुचितमाचरितमस्य निकटे वधूटीं प्रेषयन्त्या। तावदेनं यथापूर्वं कलत्रभावेनानुवर्तस्व।' इति। (कतिचित्पदानि गत्वा। विभाव्य च।)

कस्याश्चिदायताक्ष्याः काचित्पिदधाति कामिनी नयने ।
अन्यास्ततः समन्तादालयकोणेषु लिप्यन्ते ॥ ६३ ॥

अयं किल चक्षुरपिधानं नाम विहारः । (विमृश्य ।) साक्षिण्या सुमध्यायानया पिहिताक्षी काञ्चनमाला । (पुनर्निरूप्य सविस्मयम् ।)

नयने पिधातुमस्या नालं विस्तीर्णपाणियुगलीति ।
कुचसिचयप्रान्तेन स्थगयति वदनारविन्दमेणाक्ष्याः ॥ ६४ ॥

कथमेषा काञ्चनमाला मुक्तचक्षुरपिधाना इतस्ततो विलीनाः सखीरन्वेषयन्ती करलग्नां कलभगमनामानयति । (उपसृत्य ।) काञ्चनमाले, तव हस्ते कथं लग्ना कलभगमना । किं ब्रवीषि—'किमत्र चित्रं नाम ।

यत्रासीदियमङ्गना सतिमिरे गेहे निलीना सती
तत्रापि स्मितचन्द्रिका पिशुनयत्यङ्गप्रभाप्याहताम् ।
भूयानेष पदे पदे कुचपरीणाहो निरुन्धे गतिं
तस्याः संप्रति कस्य वा करतले गात्रं न लग्नं भवेत्' ॥ ६५ ॥

इति । (सश्लाघम् ।) युज्यते युज्यते ।

अस्या विशृङ्खलपयोधरजृम्भणेन
मध्यं प्रतिक्षणविशङ्कितभङ्गमास्ते ।
लावण्यनिर्झरतरङ्गनिमग्नमङ्गं
हासप्ररोहभरिता हरितां विभागाः ॥ ६६ ॥

कलभगमने, न खल्वीदृशे विहारे भवादृशीनामधिकारः । तस्मादितोमुखं मुखं मनागपाङ्गय । तावदहमेव प्रतिनिधीभूय त्वदीयं कृत्यं निर्वर्तयिष्यामि । काञ्चनमाले,

लग्नः स्यां यदि योषितामधिगमे तस्मिन्विधेये मया
सुप्रापः कुचकुम्भयोर्दृढपरीरम्भो हि संभाव्यते ।
लीनः स्यां यदि वा तदापि सुदृशा कार्ये ममालम्भने
लभ्येतैव घनस्तनस्तबकयोरव्याजमालिङ्गनम् ॥ ६७ ॥

किं ब्रवीषि—'किमद्य कलहंस इव चेष्टितुमध्यवसितोऽसि ।' इति । किं चेष्टितं कलहंसेन । किं ब्रवीषि—

'हस्ते शश्वल्लगति सुदृशामङ्गसंस्पर्शलाभा-
लुब्धो लग्नः स्मरपरवशास्ताश्च गृह्णाति भूयः ।
सोऽयं धूर्तो विजनभवने लीयमानां मृगाक्षीं
लब्ध्वा सद्यः सुरतरभसस्याकुलाङ्गीमकार्षीत् ॥ ६८ ॥

इति । हन्त, कथमनङ्गशेखरेऽप्यनाश्वासो वेश्याजनस्य । मुग्धे काञ्चनमाले, किं न जानासि ।

अहरहरुपहारमादधाना रहसि ममावसरं प्रतीक्षमाणाः ।
अहमहमिकया समीहमाना हरिणदृशः कति नाम नोपभुक्ताः ॥ ६९ ॥

किं ब्रवीषि—'आपणमापणमध्यास्ते लोकः । गच्छ गच्छ ।' इति । (सरोषं परिक्रम्यावलोक्य च । सकौतुकोल्लासम् ।) कथमम्बरकरण्डकास्यविभ्रमप्रवृत्तानां मत्तकाशिनीनामिह समवायः समुल्लसति । अत्र काचित्

एकं करण्डकमुदस्यति दक्षिणेन
वामेन किंचिदितरत्करपल्लवेन ।
व्यत्यासतो निपतिते करयोरुभे ते
पर्यायतः पुनरुदस्यति पक्ष्मलाक्षी ॥ ७० ॥

(पुनर्निरूप्य ।)

एषा रत्नकरण्डयुग्ममुपरि प्रक्षिप्य दोर्लाघवा-
देकेनैव करेण तन्निपतितं गृह्णात्युदस्यत्यपि ।
अन्येनापि करेण तावदनया रीत्यैव शातोदरी
संगृह्णाति समुत्क्षिपत्यपि मणिप्रायं करण्डद्वयम् ॥ ७१ ॥

(सविमर्शम् ।) इयं सा कलकण्ठी । उपसरामि तावदेनाम् । (इत्युपसृत्य ।) अये पतितसंग्रहप्रवृत्ते, स्वस्ति भवत्यै । किं ब्रवीषि—'न खल्वद्यतनी ह्यस्तनी वा मे पतितसंग्रहप्रवृत्तिः । किं तु यदा त्वयि निरङ्कुशो निहितः स्नेहानुबन्धस्तदानींतन्येव ।' इति ।

आलोलकङ्कणझणज्झणनादभव्य-
सव्यापसव्यकरकारिततताण्डवानि ।

चत्वार्यमूनि मणिखण्डकरण्डकानि
कुर्वन्ति हन्त हृदि मे कमपि प्रहर्षम् ॥ ७२ ॥

तदप्यस्थाने कुतो महान्तमायासमात्मनः संपादयसीत्यमर्षेण तथा भणामि । किं ब्रवीषि—'प्रकृत्या मयि पक्षपाती नाम भवान् ।' इति । कलकण्ठि, अस्ति किंचिदस्य जनस्य विज्ञापनीयम् । अर्धक्षणमवसरः प्रदातव्यः । सबहुमानं विहारमुपसंहृत्यावहिता । किं ब्रवीषि—'कीदृशी विज्ञप्तिरत्रभवतः ।' इति ।

उत्सङ्गे भवतीं निधाय सरसं संलापमभ्यस्य च
प्रेम्णा ते मुखवीटिकाविनिमयव्याजाद्गृहीत्वाधरम् ।
पाणिभ्यामपि ते पयोधरभरामर्शं विधाय स्वयं
कामप्यद्य कृतिं कयापि विधया कर्तुं मनः काङ्क्षति ॥ ७३ ॥

किं ब्रवीषि—'किमेतदपि दुर्लभं नाम । आत्मीयं खलु कलत्रमत्र-भवतः कलकण्ठी ।' इति । हन्त । अन्यदनेन प्रष्टव्यमुपस्थापितमुत्तरेण । कलकण्ठि, कस्य त्वमद्य कलत्रमसि (विचिन्त्य ।) आः, स्मृतम् । मम पुरः पुरा वितीर्णं खलु वसन्तकेन वत्सरस्य कलत्रपत्रम् । सनिर्वेदं किं ब्रवीषि—'किं वक्ष्ये तन्महाभारतम् ।' इति । किं पत्रलिखितप्रकारानुसारेण न चा-लितो विधिर्जाल्मेन । किं ब्रवीषि—'किं सर्वोऽप्यनङ्गशेखरः ।

मासे मासे वसनयुगलं मादृशां श्लाघनीयं
पक्षे पक्षे परमभिनवा कञ्चुली रत्नगर्भा ।
प्रातः प्रातः परिमलमुचो वीटिका गन्धमाल्ये
नक्तं नक्तं नवमपि पयो देयमित्यस्ति पत्रे ॥ ७४ ॥

अयं तु पारदारिकः

दत्ते किंचिद्वसनमसमं मादृशीनां वधूनां
दत्ते कांचित्प्रशिथिलमणीं कञ्चुलीं मे पुराणीम् ।
पक्षस्य द्विर्दिशति विरसा वीटिका नेतरे द्वे
प्रायो नक्तं वितरति पयः पण्डितो वञ्चनायाम् ॥ ७५ ॥

न केवलं दातव्यं न दत्तम्, प्रत्युत सर्वमप्यपहर्तुमारब्धम् ।' इति । कथय मे कथमेतत् । किं ब्रवीषि—'स तावदतिस्नेहाभिनयेन त्रिचतुराणि वासराणि प्रत्यहमन्यमन्यमुपहारमुपाहरत् । मया तु स्त्रीस्वभावसुलभेनाविवेकेन तदीयं प्रेम परमार्थमेव मत्त्वा विहितो महान्विस्रम्भः । ततश्च कचिद्रजन्यां चिरं तेन समं विहृत्य नितान्तं परिश्रान्तिवशेन गाढमुन्निद्रया परवत्यां मयि सर्वाण्यपि भूषणान्यवमुच्य मुक्ताहारमेकमादातुमुरसि करन्यासमारचयत् । तेन प्रतिलब्धबोधया मया तत्क्षणमेव हस्तग्राहं गृहीतः ।' इति । हा धिक् । अयं वराकः क्व ते संगतो भुजङ्ग इव चन्दनलतायाः । किं ब्रवीषि—'एतदुपश्रुत्य दुर्मर्षणया जनन्या जीर्णशूर्पेण संताड्य निर्वासितः । तदा प्रभृति प्रत्यहमभ्यागतान्भवादृशो यूनः सभाजयन्ती सुखेन प्रतिवसामि ।' इति । मदीयाभिराभिराशीर्भिः शरदः शतमित्थमम्लानयौवना सुखमास्स्व । (इति कतिचित्पदानि गत्वा निरूप्य च सहर्षम् ।) अत्र खल्वाचरन्ति कन्दुकविहारं तरुण्यः । असाविह वसन्तकलिका

वसनमुरसि स्रस्तं स्रस्तं निजे दधती पदे
विषमितमपि स्थाने स्थाने विभूषणमन्ततः ।
किमपि किमपि प्रोद्गायन्ती करेण पुनः पुनः
प्रवहति जवाद्भ्रामं भ्रामं वधूर्मणिकन्दुकम् ॥ ७६ ॥

(उपसृत्य ।)

मणिकन्दुकताडनोत्सुके मदनप्राणनमन्त्रफक्किके ।
कुचकन्दुकमर्दनस्य ते प्रतिजानीष्व पणः कियान्मतः ॥ ७७ ॥

किं ब्रवीषि—'अहो कियद्वैदग्ध्यम् । साधु साधु । यत्र क्रीतं तत्रैव विक्रीयते ।' इति । वसन्तकलिके, कथमेष पादमूलपतितोऽपि निर्दयमभिहन्यते । अथवा प्रकृत्यैव यं कंचिदपि हस्तलग्नमधरीकुर्वन्ति वाराङ्गनाः ।

वाचालकङ्कणगणेन भुजेन कण्ठे
मामन्तिकस्थमभिगृह्य निपात्य मञ्चे ।
आक्रम्य वक्षसि निपीड्य पयोधराभ्या-
माक्रीडितं खलु तलोदरि यद्भवत्या ॥ ७८ ॥

(पुनर्निरूप्य ।)

परिभ्रश्यद्वक्षोवसनसुखलक्ष्यस्तनतटं
समुद्भ्राम्यत्पादाम्बरललितदृश्योरुयुगलम् ।
उदस्तव्यत्यस्ताभरणसुविभाव्याङ्गकरुचि
भ्रमन्त्येषा यूनां भ्रमयति मनांसि प्रतिपदम् ॥ ७९ ॥

मानिनि, मा कुरु साहसमीदृशम् । अपायो भविष्यति वलग्नस्य । कथमेषा विरम्य निमीलिताक्षी निःश्वसिति ।

कुवलयनयनायाः क्लान्तिनिष्पीडिताभ्या-
श्चलति कुचदुकूलं चारु निःश्वासवाते ।
श्रमजलकणिकानां श्रेणिरस्यारविन्दे
वहति च मकरन्दस्यन्दसंदोहलक्ष्मीम् ॥ ८० ॥

अयमवसरः सम्यगनया संलपितुम् ।

श्रान्तासि नाम सुमुखि श्रमविश्रमाय
किं वीजयामि सहसा वसनाञ्चलेन ।
अन्तर्निवेशमथवा सपदि प्रविश्य
पानीयमेव मधुरं किमुपाहरामि ॥ ८१ ॥

किं ब्रवीषि—'अलमायासेन । मधुरतरेण वचनामृतेनैव भवतो निःशेषमपनीतो मदीयश्रमः ।' इति ।

स्मरसि किमसिताक्षि प्रक्षिपन्ती करेण
प्रसवसरनिबद्धं कन्दुकं प्राङ्गणाग्रे ।
पुनरपि मम हस्तप्रेरितेनैव तेन
त्वमपि सरसमङ्गे हन्त संताडितासि ॥ ८२ ॥

सव्रीडस्मितं किं ब्रवीषि—'जानामि तदुत्तरप्रवृत्तचरित्रविशेषानुसंधानार्थमित्थमात्थ ।' इति । हन्त, कथमद्यापि न विस्मरसि वीरायितम् । किं ब्रवीषि—'अहं तु न विस्मरामि । भवता पुनरद्य मदीयभाग्यविपर्ययेण प्रागिव भूयानिह परिचयो न विधीयते ।' इति ।

दासे मयि प्रेयसि दारुणानि वृथा प्रयुङ्क्ते वचनाक्षराणि ।
करोमि वासं तव संनिधाने कटाक्षमात्रावसरप्रतीक्षः ॥ ८३ ॥

आस्व । साधयामि । (इति पदान्तरे स्थित्वा निरूप्य च सानन्दम् ।)

अन्योन्यबद्धपरिहासपरम्पराभि-
राभिर्वधूभिरभितः परिवार्यमाणा ।
मञ्जुक्वणत्कनककङ्कणमङ्गणेऽस्मि-
न्नक्षान्विनिक्षिपति संप्रति पक्ष्मलाक्षी ॥ ८४ ॥

(उपसृत्य ।) अयि पक्ष्मलाक्षि,

करेण पद्मेरुहसोदरेण प्रक्षेप्तुमक्षान्प्रतिगृह्णती त्वम् ।
मदीयमप्यक्षपदाविशेषाद्धृष्टासि किं लोचनमानताङ्गि ॥ १८ ॥

किं ब्रवीषि—'अनङ्गशेखर, एह्येहि । किमागतासि । मया पुनरक्षक्रीडाक्षिप्तचित्तवृत्त्या न ज्ञातं भवदागमनम् । अयं महानपराधः ।' इति । कथमेषा हस्ते गृहीत्वा मामर्धासने निवेशयति । (परस्परसंस्पर्शमभिनयन् ।)

स्पर्शेन ते परमसुन्दरि दुर्निरूपं
निर्वाणमुन्मिषति मे दुरवापमन्यैः ।
पश्य प्रिये भजति संप्रति मे शरीर-
मुन्मस्तकस्तबकनिर्भरनीपरीतिम् ॥ ८६ ॥

(क्षणमिव स्थित्वा विभाव्य च ।) कथमेषा कुम्भस्तनी मन्दारकेण सह किमपि व्यवहरन्ती मदन्तिकमुपसर्पति । कुम्भस्तनि, किं ब्रवीषि—'व्यवहारः कश्चिदापतितो भवता परिच्छेत्तव्यः ।' इति । भवत्वेवम् किं ब्रवीषि—'अद्य षण्मासानस्माहमसि प्रणयिनी ।' इति । जानामि तावत् । येन केनापि पराजितेन जनेन जितवतोऽधः शेतव्यम्, अधरश्च तस्मै दातव्यः, इति तामरसाक्षीसाक्षिणीकं संकल्पितपणबन्धयोरावयोरासीदक्षक्रीडायां प्रवृत्तिः । तत्र तवैषा संप्रेष्या दिष्ट्या जितवती । पराजितः स्वयं संकल्पितमर्थं न संमन्यते । तदिदं न्यायतो निर्णेतव्यं भवता ।' इति । मन्दारक, किमेषैव परिपाटी । किं ब्रवीषि—'अहं तावदेतावदेव जानामि ।

अस्या मञ्जुकणितवलयं शश्वदक्षान्क्षिपन्त्याः
स्तोकाल्लक्ष्यस्तनकलशयोः सर्वदा दत्तदृष्टिः ।
चाटुप्रायैः सहजमधुरैः प्रेर्यमाणो वचोभिः
प्रीत्यै भूयः करनिपतितान्प्राक्षिपं तावदक्षान् ॥ ८७ ॥

अनन्तरं चानया जितं मया जितं वा को वेद ।' इति । कः संदेहः । इत्थं व्यवहारमादधानेन त्वयैव जितं नाम । कुम्भस्तनि, किं ब्रवीषि—'किमद्य साक्षिण्यप्यस्तंगता ।' इति । मन्दारक, किं ब्रवीषि—'तामरसाक्ष्युत्कोचदानेन किंकरीकृता साक्षिणीभावमात्मनि समारोपितवती । कथमस्या वचसि विश्वासो भविष्यति ।' इति । (अपवार्य ।) मन्दारक, कस्तवाध्यवसायः । किं ब्रवीषि—

'आरोप्य मञ्चमपनीय च नीविबन्ध-
मारुह्य पीवरपयोधरभारमस्याः ।
आस्वाद्य चाधरसुधारसमायताक्ष्या
रन्तुं यथेच्छमभिवाञ्छति मानसं मे ॥ ८८ ॥

तन्मदीयमनोरथानुरोधेन विधातव्यम् ।' इति । कुम्भस्तनि, इत्थं ब्रूते किल मन्दारकः । तदुपरि किमभिप्रेयते भवत्या । किं ब्रवीषि—'भवदुक्तिराकर्ण्यते । इति । (कुम्भस्तनीं हस्ते गृहीत्वा ।)

शेष्वाधस्तादथ वितर वा तस्य बिम्बाधरं त्वं
शेतेऽधस्तादधरमथवा सोऽपि दत्ते भवत्यै ।
अस्मिन्नर्थे समरसतया नास्ति कश्चिद्विशेषो
भूयो भूयः कलहविधया ब्रूहि किं वा फलं वा ॥ ८९ ॥

(उत्थानमभिनयन्नूर्ध्वमवलोक्य ।) हन्त, मण्डयति भगवान्मध्यमम्बरस्य महसां पतिः । अद्य हि

अन्तस्तोयममी विशन्ति शफराः शीतं सरः शैवलं
भृङ्गाः पङ्करुहान्धयन्ति च मधून्यावीक्ष्य पक्षानिलैः ।

सालानां रभसालवालवलयान्यध्यासते बर्हिणः
क्रीडन्ति क्रमविक्लवाः कटुरवा गोपानसीपालिषु ॥ ९० ॥

(परिक्रम्यावलोक्य च ।)

अग्रे कयापि मुखनीतमणीकलाची
पश्चात्कयापि सुदृशा करदत्तवीटी ।
पार्श्वद्वये व्यजनमण्डलवीज्यमाना
डोलाविहारमरविन्दमुखी करोति ॥ ९१ ॥

इमामुग्रातपवेलामनया संलपन्नपनेष्यामि तावत् । (इत्युपसृत्य ।) कथमेषा मामालक्ष्य प्रत्यवरोहति । अरविन्दमुखि, तूष्णीमास्स्व तूष्णीमास्स्व । किमुत्थानप्रयासेन ।

तव सुवदने गुञ्जन्मञ्जीर·····पदद्वयं
कलकलमिलत्काञ्चीदामाञ्चिता जघनस्थली ।
हिमरुचिरुचिस्निग्धं मुग्धस्मितं मधुरं वचः
स्वयमुपचरत्यस्थाने तत्तलोदरि सांप्रतम् ॥ ९२ ॥

किं ब्रवीषि—'प्रियदर्शन, सत्वरमधिरुह्य सनाथीकुरु डोलाम् ।' इति । (तथा कृत्वा ।) अये अरविन्दमुखि, मध्याह्ने गृहानागता मद्विधा मनीषिणो यथाभिमतमातिथ्येनोपास्थनमर्हन्ति ।

एष प्रियातिथिरुपाहर मेऽङ्कपीठं
पाणौ निवेशय पयोधरनालिकेरम् ।
वीटीं प्रदेहि वदने यदनेन कान्ते
मुञ्चामि येन मदनातपतापखेदम् ॥ ९३ ॥

किं ब्रवीषि—'मध्यरात्रः किल कालो मकरध्वजविधिचोदितस्य भवद्विधातिथ्युपराधनस्य ।' इति । मा भैवम् ।

रन्तुं प्रतीक्षणीया रजनी किल वेद किंकरैरेव ।
स्वच्छन्दचारिणां पुनरहरहराहुः स्मृतं सुरतम् ॥ ९४ ॥

किं ब्रवीषि—'कामपि गीतिक्रियामत्रभवतः कर्णपथमवतारयन्ती कृतकृत्यमात्मानं कर्तुमभिलषामि ।' इति । (सहर्षम् ।)

कुन्तक्षतेन्दुमण्डलरन्ध्रस्रवदमृतधारया गीत्या ।
चिरतरमुपोषितं स श्रवणद्वयमद्य पारणां लभताम् ॥ ९५ ॥

कथमेषा भ्रूसंज्ञाविज्ञातनियोगया परिचारिकया सरमसमुपनीतां वीणां गृह्णाति ।

कुवलयविलोचने त्वं कुरुषे किल पाणिपल्लवे वीणाम् ।
अहमपि करे करोमि किमधुना कुचतालमादरेण तव ॥ ९६ ॥

कथमेषा वीणां वादयन्ती सारिगमपधनीति सप्तस्वरैरुच्चावचारोहावरोहमनोहरं गायति । (मुहूर्तमाकर्ण्य । सबहुमानम् ।) अलमरविन्दमुखि, निर्वृतं मे हृदयम् । समाप्यतां नाम संगीतकम् । मा भूदस्थाने भूषणरत्नानां द्रवीभावेन तिरोभावः ।

तव तन्वङ्गि संगीते द्रवन्ति हि शिला अपि ।
निःसारो माक्षिकासारो नीरसश्च सुधारसः ॥ ९७ ॥

हन्त, अमृतवर्षणाभिषेकेणैव शिशिरीकृतं मम शरीरम् । अनेन प्रसन्नो भवत्याः प्रसवायुधो युधि निजायां विजयं विधास्यति । (अवतीर्य कतिचित्पदानि गत्वा । निरूप्य । सानन्दम् ।)

सव्येन दर्शितैकस्तनभारमुरस्तिरोदधती ।
व्यावृत्य मां कटाक्षैर्व्यथयति भुवनैकसुन्दरी केयम् ॥ ९८ ॥

एषा खलु कम्बुकण्ठी रत्नचूडेन सह विवदमाना कटाक्षेण मामाह्वयति । (उपसृत्य ।) कम्बुकण्ठि, किं ब्रवीषि—'ज्ञायते युग्मायुग्मदर्शनं नाम विहारः । ज्ञात एव । मुक्ताभिः परिपूरितां मुष्टिं प्रदर्श्यात्र मुष्टौ युग्ममयुग्मं वा मौक्तिकमिति केनचिदनुयुक्तः प्रतिद्वन्द्वी युग्ममिति वायुग्ममिति वा किंचित्प्रतिजानीते । अनन्तरं मौक्तिकानां विभजने परिशिष्यमाणं प्रतिज्ञानुसारेण संपद्यते चेत्प्रतिज्ञाकृतो जयो न चेदपजय इति खलु युग्मायुग्मदर्शनाख्यविभ्रमलक्षणम् । अत्र विभ्रमे प्रसक्तो विवादः ।' इति । किमस्ति पणव्यत्यासः । रत्नचूड, किं ब्रवीषि—'मम पराजये तत्कैंकर्यम् । जये च तत्स्वामिभावः ।' इति पणः । नात्र कश्चिद्व्यत्यासः ।

रत्नचूड, किं ब्रवीषि—'मुक्ताफलगणनायां येन जनेनापह्नवः क्रियते स निर्जितः'। इति संकेतः। अनया चापह्नवः कृतः। तथाहि—

मुक्ताफलपरिपूर्णा मुष्टिमियं नः प्रदर्श्य मुग्धाक्षी ।
युग्ममयुग्मं वा मे मुष्टिगतं मौक्तिकं वदेत्याह ॥ ९९ ॥

अहं तु युग्ममिति प्रतिज्ञाय,

मुक्ताफलानि करनिष्पतितानि युग्मं
युग्मं क्रमेण पुरतो विभजामि यावत् ।
अत्रान्तरे स्मितकिशोरमरीचिकाभि-
रेकीकृतानि सकलान्यपि सारसाक्ष्या ॥ १०० ॥

इति। कम्बुकण्ठि, किं ब्रवीषि—'मदीयेऽपि मन्दहासे मूलमस्यैव जल्पितम्।' इति। एष किमाह। किं ब्रवीषि—

'जेष्यामि त्वामिह विहरणे पश्य मे चातुरीं त्वं
जित्वा च त्वत्कुचमपि नखैः पीडयिष्यामि तावत् ।
काले किंचिन्मदभिलषितं कृत्यमारभ्य कुर्व-
न्मुग्धो रुद्धस्त्वदधरमधु स्वादु पास्यामि तावत् ॥ १०१ ॥

इति। रत्नचूड, किं ब्रवीषि—'इदमप्युत्तरमेतस्या वचसः। एषा खल्वेवमाह—

जित्वा भवन्तमधुना विधिनामुनैव
वक्षोजभारवहने विनियोजयिष्ये ।
क्रीडासु कासपि समुन्मिषति श्रमे वा
संवाहने चरणयोः सहसा नियोक्ष्ये ॥ १०२ ॥

इति। कम्बुकण्ठि, किं ब्रवीषि—'अस्य निष्कारणं कुचभरे करविन्यासेन परवशतया मम तथा निर्गतं वचनम्।' इति। रत्नचूड, किमेतत्सत्यमेव। किं ब्रवीषि—

'मुक्ताफलं किरन्त्या मुग्धदृशः स्तनभरेण मदपाङ्गः ।
अस्तस्तामुपदातुं न्यस्तो हस्तो मया तत्र ॥ १०३ ॥'

इति । अयं दुरुच्छेदो विवादः । (अन्यतो विलोक्य ।)

द्वैधीभूय स्थितमुभयतो यौवतं तत्र काश्चि-
त्प्रत्यस्यन्ति प्रसवरचितं कन्दुकं स्वं युवानः ।
आयान्तं तं वियति समुपादीयतां एव नम्रा-
स्तानारुह्य स्तनभरनताः सुभ्रुवो विभ्रमन्ति ॥ १०४ ॥

कथमेषा कृशोदरी पलायमानं मकरन्दकं हस्ते गृहीत्वा निर्भर्त्सयति । (उपसृत्य ।) अये कृशोदरि, किमेतत् । किं ब्रवीषि—'अयं खलु गजपति-कुसुमकन्दुको नाम विहारः । अत्र च यूनां युवतीनां च समाजे परस्पर-प्रतिस्पर्धितया व्यवस्थिते यत्समाजानुप्रविष्टस्य कस्यचिज्जनस्य हस्ते कन्दुको लगति तदनुप्रविष्टा एव त्रिचतुरः प्रतिस्पर्धिसमाजान्तर्गतांस्त्रिचतुरानश्वानिवाधिरुह्य प्रतिवसन्तीति मर्यादा । संप्रति मदीययानया गृहीतः कन्दुकः । अयं तु मम प्रतिद्वन्द्वी मामधिरूढां वहन्नन्तराले पातयित्वा पलायितुमुपक्रमते ।' इति । मकरन्दकसंज्ञस्य भवतो विप्रतिषिद्धा प्रवृत्तिरेषा ।

यस्या दर्शनमेव कामपि मुदं दुग्धे विदग्धे जने
संलापः सकृदेव यत्र विहितः स्वर्गं प्रसूते भुवि ।
कैवल्यं विलसीकरोति किल यत्संस्पर्शजा निवृति-
स्तां वोढुं सुदतीं तवाद्य न कियत्तप्तव्यमुग्रं तपः ॥ १०५ ॥

किं ब्रवीषि—'मार्गे गच्छतो मन्दिरनिर्माणं सुकरम् । बिभ्रतः खलु भारः ।' इति । कथमेषा तन्वी कृशोदरी भारायते भवतः । किं ब्रवीषि—

'बाढं तन्वी भवति सुदती बाढमेषाणुमध्या
बाढं लघ्वी पदनलिनयोर्बाढमन्यत्र मृद्वी ।
किं त्वेतस्याः शिखरिपुलिनैश्वर्यपर्याप्तिसीम्नोः
स्फारो भारः स्तनजघनयोः सर्वथा दुर्वहो मे ॥ १०६ ॥'

इति । तर्हि एवंभूतोऽपि सन्नत्र विहारे कथमनुप्रविष्टः । किं ब्रवीषि—'अस्या नाहं प्रतिद्वन्द्वी किं तु चारुहासिन्याः सा किल

तालाकारस्तनभरवती ताम्यमानावलग्ना
बाला किंचिद्विपुलजघना बालरोमावली च ।

तामुद्वोढुं तरलनयनामुत्सहे मां च सापि
कैषा योषा घनकुचभरा काहमाद्यो मृदूनाम् ॥ १०७ ॥'

इति । तर्ह्येनामित्थं ब्रूयाम् ।

कृशोदरि कृपा न किं तव बत प्रमुग्धासि किं
युवानमतिकोमलं किमधिरोहसि प्रेयसि ।
तवोन्नतघनस्तनं गुरुनितम्बबिम्बं वपु-
र्न वोढुमयमर्हति स्वयममुं त्यज प्रार्थये ॥ १०८ ॥

किं ब्रवीषि—'आलयघण्टामणिनाशेऽप्यर्चकस्य का हानिः ।' इति । ननु तवापि न हानिः । अस्य स्थाने मल्वीवर्धनमाकल्पयिष्यामि । किं ब्रवीषि—'किमिदानीमापणनालिकेरमध्वविनायकस्य प्रहरसि । तवानुग्रह-श्चेदस्मिंस्त्वमुद्वह । तावदमुं त्यजामि ।' इति ।

उद्वाहः खलु नारीणामुदारो वेदचोदितः ।
अनुतिष्ठामि चेदेनमभिवन्द्योऽसि सर्वतः ॥ १०९ ॥

अये मकरन्दक, चारुहासिन्याः प्रतिद्वन्द्वी किमर्थमेनां वहसि । किं ब्रवीषि—'संप्रति परिवर्तनेन मम प्रतिद्वन्द्वितयेयमापतिता ।' इति । (अपवार्य ।) एषा न मुञ्चति । पलायस्व तावत् । (परिक्रम्यावलोक्य च ।)

आलोचनोज्झितपरस्परजल्पितानां
मध्यादिपद्धतिषु दत्तविलोचनानाम् ।
प्रक्रान्तचक्रहयकुञ्जरसंगराणां
सङ्क्षुब्धकास्ति चतुरङ्गविहारभाजाम् ॥ ११० ॥

कथमेषा मारवल्लरी विदग्धभूषणेन सार्धं विगृह्यती कूकूरुतं करोति । (उपसृत्य ।) मारवल्लरि, किमत्याहितम् । किं ब्रवीषि—

'श्लथयति कबराणां भारमभ्यग्रबन्धं
नवमपि कुचभागे पत्ररेखां प्रमार्ष्टि ।
अधरमपि गृहीत्वा खादयन्नेष रागी
सरशनमपनेतुं चेलमालम्बते च ॥ १११ ॥

इति विदग्धभूषण, कथमविनयः क्रियते । किं ब्रवीषि—'को नामाविनयः । चतुरङ्गविभ्रमे निर्जितैषा । ततः संकेतितपणानुसारिणी मम प्रवृत्तिः । इति । (अपवार्य ।) मारवल्लरि,

अनङ्गसंगरे तैस्तैरद्वितीयासि विभ्रमैः ।
सा त्वमद्य कथं बाले चतुरङ्गरणे जिता ॥ ११२ ॥

किं ब्रवीषि—'अन्यव्यासक्तचित्तया मया बलप्रचारे न दृष्टिरर्पिता ।' इति । जानामि ते मनःप्रणिधानशैथिल्यकारणम् ।

कदा मामाक्रम्य स्तनशिखरसीम्नि प्रियतमः
शयानः स्वच्छन्दं रहसि रमयिष्यत्यनलसः ।
कदा वा संभोगश्रममनुभविष्याम्यहमिति
व्यवस्यन्ती चित्तं मयि किल विलीनं व्यरचयः ॥ ११३ ॥

कथमेषा व्रीडानम्रेण मुखेन प्रतिब्रूते । मारवल्लरि, कस्ते मनोरथः । किं ब्रवीषि—'जयासिद्ध्या भवितव्यम् ।' इति । विदग्धभूषण, भवतो विजये प्रमाणं किंचिदाख्याहि । किं ब्रवीषि—'अस्या मन एव साक्षि ।' इति । मूर्ख, तर्हि किमिति गर्वायसे । किं नामसाक्षिको व्यवहारः साधीयान् । तदयमकृतप्रायो विभ्रमः । पुनरन्यः प्रारभ्यताम् । विदग्धभूषण, किं ब्रवीषि—'यदादिशति प्रियवयस्यः ।' इति । मारवल्लरि,

स्वप्नेऽपि ते कुचभरे करमर्पयित्वा
सीत्कारमुग्धमधुरं सरसं निपीय ।
विस्रस्य नीविनहनं भवतीं प्रसह्य
संनह्य कर्म किमपि स्वयमाचरामि ॥ ११४ ॥

(इति पदान्तरे स्थित्वा विभाव्य च ।)

श्मश्रुस्तोकपरिष्कृतवक्त्रः संपन्नयौवनः कोऽयम् ।
मारसुकुमारमूर्तिर्मस्तकविन्यस्तपुस्तकः स्फुरति ॥ ११५ ॥

(विमृश्य ।) कथमेष कामन्तकः कामाक्षीमहोत्सवसफलीकृतलोचनः काञ्चीपुरीतः प्रतिनिवृत्तः । (उपसृत्य ।) सखे कामन्तक, अपि कुशल्यसि ।

(परिष्वज्य ।) किं ब्रवीषि—'दिष्ट्या संतीर्णविरहार्णवो भवन्तं पश्यामि ।' इति । हन्त । कया ते विरहः संगमो वा । किं ब्रवीषि—'तत्र कदापि दिवसावसानावसरे पुरसौन्दर्यसंदर्शनाय समन्ततः संचरन्नचञ्चलमल्लिकाक्षपक्षसंधुक्षितमारुतोत्सारितकमलावलीविलीनमदकलालिकलमकाहलीकमनीयायाः कमलिन्याः कस्याश्चन कच्छमगच्छम् । तस्मिन्नेव समसमयसमुदितसौदामिनीसमुदायसंपदिव संपादितसत्त्वसंबन्धा पञ्चशरराज्यसौभाग्यदेवतेव परिणताकारा कातराक्षी काचिदवातरदपाङ्गयोः पदवीमदवीयसीम् ।

साकूतस्मितवलिताननाभिरामं
पश्यन्ती प्रणयविकत्थनैरपाङ्गैः ।
उत्फुल्लोत्पलविपुलायतेक्षणा मे
सा चेतश्चतुरतरं वधूरमुष्णात् ॥ ११६ ॥

प्रतिनिवृत्तायां ततस्तस्यां प्रमुषितचैतन्यो मुहूर्तमितिकर्तव्यतामूढतया स्तब्ध एव स्थितवानस्मि । अथ परिसर एव सरसः परिदृश्यमानभृङ्गसङ्गसङ्घट्टननिष्पतत्पुष्पकल्पितास्तरणं शरणं प्रपद्य हृद्यमुद्यानं युगमिव निगमय्य कतिचिदतिचिरायमाणानि वासराणि यावदेवं प्रलपितुं प्रवृत्तोऽस्मि

तीव्रो दाहो वपुषि जडता चक्षुषोरश्रुभूम्ना
निद्राभङ्गादपचिततया नालमन्यत्र गन्तुम् ।
हा हा कष्टं प्रबलविरहव्याधिना दूषितोऽहं
किं वा कुर्वे किमु समुचितं केदमावेदयामि ॥ ११७ ॥

इति, तावदेव संजीवनौषधिरिव संजातजीविका कल्पलतेव कल्पितसंचारा काचन चपलाक्षी मामुपेत्य सादरमप्राक्षीत्—'कस्त्वं परिक्षीणश्चन्द्रमा इव समालक्ष्यसे । कुतश्च तिरश्चामपि दयनीयां दशामापद्यसे । सर्वथा मामवधार्यं विस्रम्भस्य भाजनं निवेदय वेदनीयम्' इति समनन्तरम् 'अयि निष्कारणप्रेमशालिनि, यदा पुनरस्मिन्कमलिनीकच्छे कांचन काञ्चनलतामिव तलोदरीमद्राक्षम् , तदारभ्य ममेयमवस्था । अद्य समस्तोऽपि भारस्त्वयि विन्यस्तः । तदुपरि यथा रोचते कुरु तथा' इत्युक्त्वा विरमति मयि सा पुनरेवमब्रवीत्—

'तरुणराज, तस्या नन्दभाग्याया निदेशेन सर्वतो विचिन्वन्ती किमप्यतिकरुणं वचनमुपश्रुत्य भाग्योदयादिह भवन्तं पश्यामि । सापि त्वद्दर्शनेन सद्यः स्मरशरापातपरिक्षुभितचेतना प्रस्खलितचलितचरणार्पणं प्रसृतमार्गसंसर्गं कृच्छ्रादगारमगात् । आगत्य च

निन्दन्ती निजमण्डनानि सुदती निःश्वस्य निःश्वस्य सा
विन्दन्ती तनुतापमप्रतिकृतिं मूयो वियोगाकुला ।
म्लायन्ती नवमल्लिकास्रगिव च न्यस्ता महत्यातपे
ध्यायन्ती हृदये भवन्तमनिशं कान्ता परं ताम्यति ॥ ११८ ॥

तस्मादद्य नक्तं निष्कुटवनमाक्रम्य संजीवय मे प्रियसखीम्' इत्यभिधाय निरगच्छत् । अहमपि निशीथे प्रसृमरतिमिरपूरपरिप्लाविते जगति चम्पकबकुलमल्लीमुखप्रसवपरिमलभरभङ्गुरमरुदङ्कुरमेदुरं मुद्रितमधुकरीझंकारं मुकुलितकलकण्ठकाहलीसंचारं विविधसालजालाभिरामं प्रविश्य गृहारामं परिपालयति मयि सापि सखीजनस्वरविशेषविदितमदागमनवृत्तान्ता निद्राणे प्राणनाथे निर्वाप्य दीपं निःशब्दमुद्घाट्य कवाटं पुरेव तिरोधाय द्वारं पुरोधाय धैर्यम्

विश्रान्तनूपुररवं पथि मन्दमन्दं
विक्षिप्य पादमपदे भयकम्पितोरु ।
आलोक्य शश्वदभितो निजबन्धुभीत्या
संकेतमागतवती सहसा मृगाक्षी ॥ ११९ ॥

आगत्य च ।

वक्षोजभारदृढपीडितवक्षसं मा-
मामाष्य पुष्यदमृतस्रुतिभिर्वचोभिः ।
अस्तंगतात्मपरिभेदविवेकमेक-
मप्राकृतं रतमकारि तया तरुण्या ॥ १२० ॥

इति । साधु सखे, साधु । निपुणः खलु भवान्निधुवनविद्यायाम् । किं ब्रवीषि—'कथमन्यथा भाजनं भवामि भवदीयप्रेमसंभारस्य ।' इति । किमे-

तच्छिरसि धार्यते पुस्तकमिव । किं ब्रवीषि—'भवति ज्योतिःसिद्धान्तसारावली नाम ।' इति । तर्हि ब्रूहि मे मनोरथम् । गणित्वा किं ब्रवीषि—

'कालालकालिभरया कमलायताक्ष्या
कूलंकषोन्नतकुचावनताङ्गयष्ट्या ।
तारुण्यदुर्ललितया तपनीयकान्त्या
तन्व्या समागमनमेव मनोरथस्ते ॥ १२१ ॥'

इति । (सबिरःकम्पम् । करेण करमास्फाल्य ।) सखे, प्रवीणोऽसि कामतन्त्र इव ज्योतिस्तन्त्रे । कदा पुनर्मनोरथस्य संपत्तिः । किं ब्रवीषि—'अद्य रजन्याम् ।' इति । भवतु । मनोरथसिद्ध्यनन्तरं पारितोषिकं ते वितरिष्यामि । किं ब्रवीषि—'सामान्यतो जानामि केवलं कुत्रापि कामिनीरत्ने विहितो भावानुबन्धो भवतेति । तद्विशिष्य ज्ञातुमभिलषामि ।' इति । सखे, किमस्ति तवापि गोपनीयं नाम ।

अव्याजसुन्दराङ्गकमप्राकृतरूपयौवनोन्मेषम् ।
कल्याणवेषमास्ते कनकलता नाम कन्यकारत्नम् ॥ १२२ ॥

किं ब्रवीषि—'कथमदृष्टचरे तस्मिञ्जने भवतः स्नेहानुबन्धः ।' इति ।

पश्यन्ती मां प्रणयपिशुनैर्दीर्घदीर्घैरपाङ्गै-
र्व्याजात्कस्मादपि नवनवं तन्वती मन्दहासम् ।
मध्येमार्गं परिजनवृता मन्दमन्दं प्रयान्ती
संदृष्टा मे सरसिजमुखी संमुखीना कदाचित् ॥ १२३ ॥

किं ब्रवीषि—

'किं ते लब्धः कुवलयदृशा संगमः प्रेमभाजा
संरम्भो वा किमु विरचितः संगमे संनताङ्ग्या ।
किं वाकार्षीः कुचभरपरीरम्भमस्याः कदाचि-
त्संलापं वा सकृदपि तया सानुरागं व्यधाः किम् ॥ १२४ ॥

इति । न किंचिदेतेषु । किंतु दर्शनमेव केवलमासादितम् ।

कटाक्षवागुराबद्धं विद्धं कामशरैरपि ।
कर्षन्ती निर्दयं चेतो गतैव मम कामिनी ॥ १२५ ॥

किं ब्रवीषि—

'स्थित्वा क्षणं त्वमिव सुन्दरि साधयेति
यान्ती वधूं परवशेन किमब्रवीस्त्वम् ।
मार्गं तदीयमवरुध्य पुरःस्थितः किं
पश्चाद्गतो नु पदवीमनुसृत्य तस्याः ॥ १२६ ॥'

इति तत्क्षणमेव तदीक्षणपातमात्रेण मोहितमतिरतिदुरासदमदनानल-दह्यमानमानसः शनैर्निजं निवेशं प्राविशम् । तदारभ्य

निन्दन्निन्दुं निखिलनयनानन्दकन्दायमानं
मन्दस्पन्दं मलयमरुतं मल्लिकातूलिकां च ।
चिन्तामन्तश्चिरमुपचितं तापमापद्य चाहं
क्षन्ता हन्त क्षणमपि सखे नास्मि घोरस्मरार्तेः ॥ १२७ ॥

किं ब्रवीषि—'अचिरेण भविष्यत्येव युवत्या संगमः ।' इति ।

अङ्गीकरोतु जनमेनमनङ्गलीला-
भङ्गीषु योषिदनुरागवशेन मा वा ।
तन्वी पुरेव पुरतः स्थितिमेकवारं
तन्वीत चेन्मम तदेव विनोदहेतुः ॥ १२८ ॥

कथमत्र संनह्यन्ति स्तम्भननटाः ।

एते नाट्यप्रवीणाः कटिदृढघटितक्षौमकक्ष्याभिरामा
धावन्तो दूरमूरुप्रचुरपरिचलन्निक्वणत्किङ्किणीकम् ।
अध्वन्यर्धे धृतज्यं धनुरिव तनुमावर्ज्य सज्जीकृतानां
वारं वारं वधूनामुदरमभिमृशन्तोऽङ्गिना लङ्घयन्ते ॥ १२९ ॥

हन्त स्तम्भनटाङ्गनाः कतिचन प्रेयांसमंसस्थले
पादाभ्यामभिहत्य मूर्धनि चिरं तिष्ठन्ति निश्चेष्टितम् ।
उत्प्लुत्याम्बरसीम्नि चक्रमिव च भ्रान्त्वा निपातक्षणे
पद्भ्यामेव पुरेव भूतलमलंकुर्वन्ति नार्योऽपराः ॥ १३० ॥

सखे, पश्येदं योषित्साहसम् ।

पाशावलम्बकलया सहसाधिरुह्य
स्तम्भाग्रमुन्नतमुरोजभरेण खिन्ना ।
तिर्यग्विवर्तिततनुस्तरुणी चिराय
चक्रे परिभ्रमति चम्पकमालिकेव ॥ १३१ ॥

(अन्यतो विलोक्य ।)

उद्यानोद्धतगन्धसिन्धुरनिभावाबद्धयुद्धादरौ
कक्ष्याबद्धकटीतटौ सविकटभ्रूभङ्गभीमाननौ ।
रुष्टौ गाढगृहीतमुष्टियुगलौ मुक्ताट्टहासौ मिथः
पर्यायं चरतोऽत्र मण्डलतया मल्लौ समुल्लासिनौ ॥ १३२ ॥

किं च ।

आस्फोटस्फुटितस्वमस्तकतटीसंघट्टितस्तम्भिता-
वन्योन्यं लघुलङ्घनेन झटिति व्यस्तौ पुनस्तावमौ ।
भ्राम्यन्तौ भुवि चक्रवच्च सुदृढं संश्लिष्य सद्यः स्थितौ
मुष्टिभ्यामितरेतरं प्रहरतो मल्लौ मुहुर्मांसलौ ॥ १३३ ॥

(पदान्तरे स्थित्वा ।) कथमिह प्रवृत्तमेव चरणायुधयोरायोधनम् । तथा हि ।

किंचिच्छिद्रोपलम्भादभिपतति जवादुन्नमत्कण्ठनालो
भूयो वैरिप्रहारान्परिहरति परिभ्राम्यति प्रान्तमेति ।
उड्डीयोड्डीय चञ्चद्गरुदुरुमरुदुद्भूतपर्यन्तधूली-
पालीकं कुक्कुटेन्द्रः पदनखशिखरैरन्यमङ्गे निहन्ति ॥ १३४ ॥

अन्यच्च ।

अनतिविवृतपक्षः साधु संनह्य युद्धे
निजमिह न जहाति स्थानमानम्रचूडः ।
अनिमिषनिहिताक्षस्तूर्णमभ्युद्रवन्तं
प्रहरति परमुच्चैरुच्चलंस्ताम्रचूडः ॥ १३५ ॥

(श्लोकमन्तरं गत्वा निरूप्य च ।)

बकादिगरुदावलीवलितमौलिरुद्घोषय-
न्स्वकीयबिरुदावलीं भसितलेपभीमाकृतिः ।

भुजार्पितभुजङ्गपुंगवभयंकरोऽनुद्रुत
प्लवङ्गमयुगान्वितः स्फुरति दारुणः कौशिकः ॥ १३६ ॥

अयं च

गुञ्जामणीखचितमास्यविले निवेश्य
तुम्बीफलं क्रमचलाङ्गुलिना करेण ।
उच्छूनगण्डमुपरुद्धनिरस्तरन्ध्र-
मुच्चैर्मनोज्ञमुपगायति कौशिकोऽन्यः ॥ १३७ ॥

(श्रुतिमभिनीय ।)

आम्यन्मन्दरकन्दरप्रसृमरव्याकीर्णदुग्धार्णव-
स्रोतस्तुङ्गवलत्तरङ्गपटलीनिध्वानविध्वंसनः ।
कल्पान्तोद्यमहाघनाघनघटासंघर्षघोषोद्भटो
रुन्धन्व्योम दिशश्च दुन्दुभिरवः स्फारं समुज्जृम्भते ॥ १३८ ॥

किमद्य दुन्दुभिनिर्घोषे कारणं भवेत् । (विचिन्त्य ।) असंशयमद्य वसन्तोत्सवे कावेरीतीरतिलकायमानं विमानाकारं मणिमण्डपमलंकर्तुकामस्य भगवतः पार्वतीवल्लभस्य प्रस्थानमङ्गलारम्भः संभावितः । तथा हि ।

आसिक्ता घनसारवारिभिरितोऽप्यासिच्यमानाः पुन-
र्लक्ष्यन्ते विशिखा विकीर्णसुमनःसंभारमाध्वीरसैः ।
बध्यन्ते परितः पुरं मणिमयप्रासादपङ्क्तिद्वय-
स्यूतानेकवितानतोरणगणैः सार्कं पताका अपि ॥ १३९ ॥

किं ब्रवीषि—'सत्यमेवैतत् ।

नीरन्ध्रं वियदन्तरं ध्वजपटच्छत्रच्छटाकोटिभिः
पुष्पैरद्य निरन्तरा वसुमती कुन्दारविन्दादिभिः ।
प्रत्याशं पुरमेतदायतदृशामोघैरमोघीकृतं
संपूर्णं पटवासपांसुनिकरैरत्रोत्सवे रोदसी ॥ १४० ॥

अत्र कतिचिदतिचिरं पतिगृहकारानिरुद्धतया कदाप्यविज्ञातबहिरङ्गणाः कुलाङ्गनाः कथमपि लब्धगुरुजनाभ्यनुज्ञानतया शनैःशनैर्निःसरन्त्यः, स्वच्छन्दं चरिष्यन्त्यः, स्वानुरूपतरुणावलोकनकुतूहलेन शतगुणीकृतोत्साहाः, नैसर्गिकशरीरसौन्दर्यातिरेकेण नयनसहस्रसंदर्शनीयाः, पश्यति चेदियमद्य

परिणतं पुण्यैरिति बोधमादधाना रसिकानाम्, विकिरन्त्यः कटाक्षाङ्कुरानभिरूपेषु, सानुरागं विचिन्वन्त्यः स्वाभिमतान्विलासिनः, यदृच्छया संनिहितेषु सहृदयेषु परस्परकटाक्षसंश्लेषणस्तिमिताः, सखीभिः साकं संलपन्त्य इव हन्त चिरस्य पश्यामि न स्मृतं सत्तादृगावयोराक्रीडितमिति जारैः संलपन्त्यः, अविगलितमपि धम्मिल्लमल्लीसरमभिमृशन्त्यः, करामेणाप्रच्युतमप्युत्तरीयमुरसि मुहुः संविदधानाः, अस्थाने मन्दहासमारचयन्त्यः, अपदे किमप्युत्तरमुदीरयन्त्यः, वासवप्रेषिता इव स्वर्वारवनिताः, वारिदप्रच्युता इव विद्युल्लताः, जेष्यन्त्य इव जगन्ति, चेष्यन्त्य इव यशो मकरध्वजस्य, घनसारनिर्भरवीटिकापूरितकपोलमण्डला मण्डलायमाना मण्डयन्ति महावीथिकाम् ।' इति । तदावामपि साधयावः । (इति कतिचित्पदानि गत्वा पुरो विलोक्य च ।)

प्रसवमयविमानमध्यराजद्रजतमनोहरपुंगवाधिरूढः ।
प्रभुरिह पुरतः पुरामरातिः प्रचलति संप्रति पार्वतीसनाथः ॥ १४१ ॥

('हर हर' इति शिरस्यञ्जलिं बद्ध्वा ।)

सोढुं नालमहं मनोभवकृतां बाधामसाधारणीं
त्वामार्तः शरणं व्रजामि मदनद्वेषिन्दयावारिधे ।
मां संयोजय कान्तया विरहिणं किं जीवितेनान्यथा
किं न ज्ञातमिदं त्वया वितरता वामं प्रियायै वपुः ॥ १४२ ॥

(पुरो विलोक्य सभयकम्पम् ।)

अयमिह महाशुण्डादण्डप्रकाण्डपरिभ्रम-
प्रकटितदुराधर्षोत्कर्षप्रभावसमन्वितः ।
मदपरवशः कृत्ताकृष्टार्धपीवरशृङ्खला-
कृतझणझणात्कारोदारः करी परिदृश्यते ॥ १४३ ॥

हन्त हन्त,

करिणि मदालसे स्फुरति शैल इव प्रचले
धुरि परितो विशीर्णहृदयोऽखिलपौरजनः ।
पतति पुनः समुत्पतति धावति रोदिति च
प्रचलति च वेपते भ्रमति पश्यति वित्रसति ॥ १४४ ॥

कथमत्र संभ्रमे पलायमानैः सह पलायितो वयस्यः कामन्तकः । (विचिन्त्य ।) नायं मदान्धो गन्धद्विपः किंतु प्रथमसमाराधनाकरणपरिकुपितस्य भगवतः करिवदनस्य प्रादुर्भाव एव । तदेनं स्तुत्या सान्त्वयिष्यामि तावत् ।

अञ्जलिरयं जनानामातङ्कच्छेदविरुदाय ।
वरदाय दिव्यगन्धद्विरदाय ध्वस्तसर्वदुरिताय ॥ १४५ ॥
जय जय जगतां मूल जय जय भो जन्मकल्मषद्वेषिन् ।
गजवक्त्र विघ्नशत्रो सुत्रामस्तुतचरित्र शिवपुत्र ॥ १४६ ॥

कथमेष स्तुतमात्र एव प्रसन्न इव परावर्तते । (परिक्रम्य निरूप्य च ।) विविक्तरमणीयोऽयमुद्देशः ।

आचम्य सद्यतनयासलिलस्य लेश-
मालिप्य पङ्कजपरागमयीं विभूतिम् ।
वातो गृहीतमकरन्दरसोपहारो
देवं सभाजयितुकाम इवायमेति ॥ १४७ ॥

तदत्र स्थित्वात्मानं विनोदयिष्यामि । (इत्युपविश्य ।) कः पुनरभ्युपायस्तामधिगन्तुम् । अथवा सर्वं संविधास्यति चन्द्रमुखी । (निरूप्य ।) कथमुपस्थितैव चन्द्रमुखी । सखि, किम्वमोघा भवदीयप्रवृत्तिः । किं ब्रवीषि—'का पुनरत्र कोट्यन्तरवार्तासि' इति । अद्य किमवस्था कनकलता । किं ब्रवीषि—'किं वक्ष्यामि । त्वद्दर्शनमारभ्य

न वहति वधूराहारेऽपि स्पृहां न च मण्डने
न भजति निशानाथे मोदं न चन्दनवारिषु ।
बत न कुरुते शश्वत्प्रीतिं प्रियेऽपि सखीजने
श्रयति नितरामङ्गेष्वायासमेव निरन्तरम् ॥ १४८ ॥

अपि च ।

आश्वासारो हरति कुचयोरद्य हारस्य लक्ष्मीं
गण्डाश्लिष्यत्करनखरुचिः कर्णपूरस्य शोभाम् ।
कान्तायास्ते विरहदहनम्लानगात्र्याः किमन्य-
त्प्राणाः पञ्चाप्यहरहरलंकुर्वते कण्ठमेव ॥ १४९ ॥

एवं दुर्दशापन्नां तामवेक्ष्य वत्सला तज्जननी मामाहूय 'केनापि प्रकारेण वत्सामनोरथं पूरय' इति करमालम्ब्य प्रार्थितवती । तदद्य चन्द्रशालायां कनकलतया भवन्तं योजयिष्यामि ।' इति । कथं मे चम्पकमालिकां कण्ठे संधारयति ।

कण्ठे धृता विकचचम्पकमालिकेय-
मानन्दमावहति कंचिदभूतपूर्वम् ।
कन्दर्पकेलिकलहेषु तया सलील-
मेणीदृशा भुजलता विनिवेशितेव ॥ १५० ॥

परितुष्टोऽहम् । परिणतश्च वासरः ।

रक्तश्चुम्बति वारुणीमुखमसावम्भोजिनीवल्लभः
कान्ताभिः कमलोदरेषु मधुपाः संवेशमातन्वते ।
आपन्नप्रियविप्रयोगविधुरास्तिष्ठन्ति चक्राङ्गनाः
संकेतस्थलमुद्दिशन्ति कुलटाः साकं विटानां वरैः ॥ १५१ ॥
मज्जति पश्चिमसिन्धौ पङ्कजबन्धौ समं करैरखिलैः ।
सद्यस्तमःप्रबन्धैः सान्द्रीभूतं समन्ततो भुवनम् ॥ १५२ ॥
एतस्मिन्समये मनोभवशरव्यापारसंजीवने
ब्रह्माणः परदारसंगममहासत्रेषु ये दीक्षिताः ।
ते वात्स्यायनसंमतव्रत····तानुष्ठानबद्धस्पृहा
मोदन्ते परसुन्दरीकुचपरीरम्भक्रियारम्भिणः ॥ १५३ ॥

चन्द्रमुखि, एहि । गच्छावो यत्र सा मम प्राणनाडी । (परिक्रम्य । सोपानाधिरोहणं नाटयित्वा । निरूप्य च ।)

मृदुलास्तरणोपधानशय्यासविधारोपितदीपदीपरम्यम् ।
अभिरामवितानमायताक्ष्याः शयनागारमुदारमेतदास्ते ॥ १५४ ॥
कर्पूराञ्जनघुटिकाघनीकृता बहलकार्तिकज्योत्स्ना ।
मूर्ता कुसुम····राज्ञा मुग्धाक्षी भाति कनकलता ॥ १५५ ॥

चन्द्रमुखि, त्वं प्रथमं याहि प्रियसखीसमीपम् । अहमप्यनुपदमागत एव ।] कनकलते, सखीं प्रति किं ब्रवीषि—'कथमेषा प्रियसमीपं गता ।

मर्मच्छिदा मलयपर्वतमारुतेन
मामेष हन्ति सहितो मदनः शरारुः ।
चेतोहरो यदि चिरायति जीवदायी
हा किं करोमि सखि संप्रति मन्दभाग्या ॥ १५६ ॥'

इति । (उपसर्पन् ।) कान्ते, मैवं वादीः ।

अहमेव मन्दभाग्यः समागमने कृतविलम्बः ।
प्रतिपालयत्यपि त्वं दूषयसि धन्यमात्मानम् ॥ १५७ ॥

चन्द्रमुखि, कनकलतां किं ब्रवीषि—

'उत्कण्ठिता त्वं यदलाभदोषादुपस्थितोऽयं तव चित्तचोरः ।
बद्धा भुजाभ्यां कुचशैलभारं निवेशयास्योरसि निर्विशङ्कम् ॥१५८॥'

कथमेषा सहसाध्वसोत्कम्पं नतमुखी तिष्ठति । चन्द्रमुखि, मां प्रति किं ब्रवीषि—

'प्रसर कादाचित्कं प्रौढातपतापखेदमनुभूतम् ।
मोदस्व कुमुदवत्त्वं चन्द्रिकया गाढमुपगूढः ॥ १५९ ॥'

इति ।

शीर्णा त्वया चन्द्रमुखि प्रतिज्ञा मया च तीर्णो विरहार्णवोऽद्य ।
मनोरथोऽयं परिपूरितो मे कल्याणमाशास्यति नः किमन्यत् ॥१६०॥

तथापीदमस्तु । (भरतवाक्यम् ।)

श्रीवाचौ कुरुतां महत्सु विहृतिं त्यक्त्वा विरोधं समं
भूयः किंच मिलन्तु मङ्गलचया गोब्राह्मणेभ्योऽनिशम् ।
भूपैर्नीतिपथानुसाररसिकैर्भूरस्तु राजन्वती
भूयादस्य कवेश्च शंकरपदध्यानानुरक्तं मनः ॥ १६१ ॥

(इति निष्क्रान्तः ।)

प्रागेव विंशद्वयसः प्रबन्धा नल्लाकवीन्द्रेण सुधीश्वरेण ।
शृङ्गारसर्वस्वमिति प्रतीतः संदर्भितोऽयं सरसः प्रबन्धः ॥ १६२ ॥

इति श्रीकौशिककुलजलधिराकासुधाकरश्रीबालचन्द्रमखिवरतनूभवश्रीनल्लाबुधकविशेखरविरचितः शृङ्गारसर्वस्वं नाम भाणः संपूर्णः ।

00057650

Digitized with financial assistance from
Mr. S.G. Kale in memory of his Father Mr. G.V. Kale
on 10 July, 2018